Battle, *s.* युद्धं, रणः-णं, समरः, संग्रामः, संख्यं, प्रधनं, आहवः, आजि *f.* समिति *f.*, युध् *f.*, ' b. array ' व्यूहः, सैन्यविन्यासः; 'b. axe' परशुः ; ' b. cry ' सिंहनादः, क्ष्वेडितं; ' b. field ' रण-समर-&c. भूमि *f.*, रणांगणं. **-***v. i.* युध् 4 A. **-ment,** *s.* सच्छिद्रः प्राकारः, भित्ति *f.*

Battue, *s.* संकुलवधः-निषूदनं.

Bauble, *s.* अल्पमूल्यं आभरणं, अल्पार्थं क्रीडनकं.

Bawd, *s.* कुट्टिनी, दूती, शंभली. **-ry,** *s.* दूतीकार्यं ; कुट्टिनीकर्मन् *n.* **-y,** *a.* गर्हित, अशुद्ध, अविनीत, नीच, ' bawd-house ' वेश्याश्रमः, वेशः.

Bawl, *v. i.* आ-उत्-क्रुश् 1 P, उच्चैः-तारस्वरेण शब्दायते (D.); रट् 1 P, नद् 1 P, उद्घुष् 10. **-er,** *s.* आ-उत्-क्रोष्टृ *m.*, उद्घोषकः. **-ing,** *s.* उत्क्रोशः, उद्घोषणं.

Bay, *a.* पिंग, पिंगल. **-***v. i.* *See* **Bark,** **-***s.* खातं, वंकः ; 'turn to b. ' ' stand at b. ' शत्रोरभिमुख स्था 1 P, ' b. salt. ' समुद्रलवणं, सैंधवं.

Bayonet. *s.* निस्त्रिंशः, गुलिकाप्रक्षेपणीसंसक्ता छुरिका.

Bazar, *s.* आपणः-णं, पण्यवीथिका-वीथी, विपणि-णी *f.*, हट्टः, निषद्या.

Be, *v. i.* भू 1 P, अस् 2 P, वृत् 1 A, विद् 4 A; ' b. it so ' भवतु, एवं-तथा-अस्तु. **-Being,** *s.* भावः, अवस्था, वृत्ति *f.*, अस्तित्वं, सत्ता. **2** भूतं, सत्वः- त्वं; ' rational b. ' सचेतनः, प्राणिन् *m.*; ' corporal b. ' शरीरिन् *m.*, देहिन् *m.*; ' Supreme B. ' परमेश्वरः, परमात्मन् *m.* **2** जन्मन् *n.*, संभवः, उत्पत्ति *f.* **-***a.* सत्, वर्तमान : 'b. that ' यतः, यस्मात् ; ex. by abl. or instr. of nouns.

Beach, *s.* (समुद्र-) तीरं, कूलं, वेला, तटं-टी. **-y.** *a.* तटयुक्त, कूलमय (यी *f.*).

Beacon, *s.* आकाशदीपः, महोल्का.

Bead, *s.* गुली, गुटिका ; ' a string of b. s ' माला; हारः ; ' a rosary of b. s ; ' जप-अक्षमाला ; ' telling b. s ' जपमालां गण् 10. **-man,** *s.* जपकरणे नियुक्तो जनः.

Beadle, *s.* दंडधरः.

Beak, *s.* चंचु *f.*, चंचूः, मुखं, तुंडः-डं. **-ed,** *a.* चंचुमत्, तुंडयुक्त. **-er** , *s.* काचपात्रं.

Beam, *s.* तुला, स्थूणा; 'of a balance ' दंडः, यष्टि *f.*; ' of a carriage ' धुर् *f.* **2** किरणः, अंशुः; *See* **Ray.** **-***v. i.* प्रोत्-वि-लस् 1 P, स्फुर् 6 P; ' a face b. ing with joy ' मुदा विलसदाननं. **-less,** *a.* निष्प्रभ, निस्तेजस्. **-y,** *a.* भास्वत्, भासुर, देदीप्यमान, अंशुमत्.

Bean, *s.* माषः, शिंबिकः.

Bear, *v. t.* वह् 1 P, नी 1 P. **2** धृ 1 P, आलंब् 1 A, भृ 3 U (राज्यभारमुवाह-बभार). **3** सह् 1 A, मृष् 4 P, 10, क्षम् 1 A. **4** प्रसू 2 A; उत्पद् c., जन् c. (जनयति); ' Satyavati bore two sons to the king ' नृपेण सत्यवत्यां पुत्रौ जातौ,-उत्पादितौ, नृपः सत्यवत्यां पुत्रावजीजनत्; the same sense ex. in स नैषधस्य सुतायां पुत्रमुत्पादयामास (R. xviii. 1) ' he had a son by the daughter ' &c. **5** (Cherish) भृ 3 U, धृ 1 P; ' I b. no malice to you ' तवोपरि द्वेषं न धारयामि, or न त्वं मम द्वेषपात्रं-स्थानं; ' he bore himself bravely on the occasion ' तस्मिन्नवसरे तेन साधु आचरितं, धीरं विक्रांतं ; ' b. witness ' साक्ष्यं दा 3 P

(with gen.) ; ' b. company ' सहचरः (री *f.*) भू 1 P; ' b. name ' नाम भृ 3 U, or धृ 10; व्यपदेशं भज् 1 A; (एवंव्यपदेशभाजिनः U. 6); ' b. fruit ' सफलीभू, फल् 1 P; ' b. in mind ' चित्ते अवधृ 10, मनसि कृ, अनुस्मृ 1 P, -*s.* ऋक्षः, भल्लुकः, भालुकः. **-Born,** *a.* जात, उत्पन्न, प्रसूत, संभूत; ' to be b. ' जन् 4 A, उत्पद् 4 A; प्रसू pass., उद्भू 1 P, संभू; 'was b. in the form of a dwarf' वामनरूपेण जातः-अवतीर्णः. **-back,** *v. i.* परा-प्रति-नि-वृत् 1 A. **-down,** *v. t.* अपाकृ 8 U; पराजि 1 A., निपत् c.; ' bore down all opposition' सर्वमंतरायमपाकुर्वन्. **-on,** *v. i. See* **Apply.** **-out** *v. t.* (fig.) दृढयति (D.); समर्थ् 10. **-up,** *v.* उद्वह् c., उत्तंभ् c., as in झटिति घटनोत्तंभितमिव (U. 3). **2** सह् 1 A; 'b. under grief' दुःखप्रतिकारं कुरु, शोकवशं मा गमः. **-er,** *s.* वाहः, हरः, वाहकः, in comp. वार्ताहरः ' b. of news ' **-ing,** *s.* अवस्थानं, स्थिति *f.* **2** वृत्ति *f.*, वर्तनं, आचरणं, रीति *f.*

Beard, *s.* श्मश्रु *n.*, कूर्चं; मुखरोमन् *n*; ' wearing long b. s. ' दीर्घकूर्चाः (pl.). **2** शूकं, किंशारुः. **3** फलं, कर्णः. -*v. t.* न्यक्कृ 8 U, समक्षं अवज्ञा 9 U or निर्भर्त्स् 10 A or अधिक्षिप् 6 P. **-ed,** *a* सश्मश्रु; श्मश्रुल, कूर्चधर &c. **-less,** *a.* श्मश्रुहीन; अजात-अनुद्भिन्न-श्मश्रु. **2** अप्राप्तव्यवहार.

Beast, *s.* पशुः, मृगः, जंतुः ; ' b. of prey ' श्वापदः; ' b. of burden ' धुर्यः, धुरीणः ; ' b. in the form of man ' नरपशुः. **-ful, -ly,** *a.* पशुतुल्य; जघन्य, पशुशील.

Beat, *s.* आघातः, प्रहारः ; ताडनं. **2** स्पंदनं, स्फुरणं. -*v. t.* तड् 10, प्रहृ 1 P, तुद् 6 P, अभिहन् 2 P, आहन् 2 A, (आहतायां प्रयाणभेर्यां). **2** (defeat) विध्वंस् c., भंज् 7 P, पराजि 1 A, पराभू 1 U. **3** आलुड् c., चूर्ण् 10. -*v. i.* स्पंद्-कंप्-वेप् 1 A, स्फुर् 6 P; ' b. very fast ' धमधमायते (D.). **-down,** निपत् c.; (price) न्यूनीकृ. **-into,** ताडनेन कृ or निर्मा 3 A: ' I shall b. thee into a good boy ' ताडयित्वा ताडयित्वा त्वामहं विद्वांसं करिष्यामि. **-off,** विद्रु c., प्रतिहन्. **-about the bush,** (lit.) वनं ग्रह् 9 P or आलुड् 10; (fig.) अप्रस्तुतमालप् 1 P. *See* **Bush.**

Beatify, *v. t.* परमानंदं दा 3 U. **2** अमरेषु गण् 10, स्वर्गीयलोकमध्ये आरुह् c. **-ic,** *a.* अपवर्गद, मोक्षप्रद.

Beatitude, *s.* मोक्षः, मुक्ति *f.*, निःश्रेयसं, अपवर्गः, निर्वाणं, परमा गतिः, कैवल्यं; ' desirous of b. ' मुमुक्षुः.

Beau, *s.* सुवेशः, सुभगंमन्यः.

Beauty, *s.* सौंदर्यं, चारुता, लावण्यं, शोभा, कांति *f.*, रूपं, रमणीयता, अभिरूपता, मनोज्ञत्वं, श्रीः, लक्ष्मीः. **-Beautify,** *v. t.* शुभ् c., भूष् 10, अलंकृ 8 U. **-Beautiful, Beauteous,** *a.* सुंदर (री *f.*), रम्य, रमणीय, कांत, मनोज्ञ, सुरूप, लावण्यवत्, रुचिर, शोभन, चारु (र्वी *f.*), मंजुल oft., by सु in comp.; सुमुखं-सुस्थलं. **-ly,** *adv.* साधु, सुंदरं, सुष्ठु, सु in comps.

Beaver, *s.* शिरस्त्राणभागः.

Becalm, *v. t.* निर्वात *a.* कृ 8 U, प्रशम् c. (शमयति); *See* **Calm.**

Because, *conj.* इति, हि (not at the beginning of a statement); यतः, यत्; more oft. ex. by कुतः, कस्मात् with abl.; by abl. or instr.; ' b. he is liable to the charge of inequality and cruelty ' (नेश्वरो जगतः कारणमुपपद्यते) कुतः वैषम्यनैर्घृण्यप्रसंगात् ' b. of ' ex. by instr. or abl.; हेतोः, कारणात्; ' b. of this ' इति हेतोः.

Beck, *s.* संज्ञा; संकेतः. **-on,** *v. t.* शिरसा-हस्तेन संज्ञां-संकेतं दा 3 U. **2** संज्ञया आह्वे 1 P.

Become, *v. i.* भू 1 P, संपद् 4 A; वृत् 1 A, जन् 4 A; in majority of adjectives ex. by nouns with गम्, प्राप् &c.; ' became dejected' विषादं गतः, विषण्णो बभूव; 'b. s hated ' द्वेष्यतां याति; 'became amazed' विस्मयमापेदे; ' b. ing curious ' समुपजातकुतूहलः; ' what became of the queen Sita ' सीतादेव्याः किं वृत्तं (U. 2), किमभवत्. -*v. t.* युज् pass., उपपद् 4 A, (with loc.); gen. ex. by अनुरूप, सदृश (शी *f.*), उचित, उपपन्न (all with gen.); ' does this b. thy matted hair ' किमिदं जटानामनुरूपं, युक्त-सदृशं &c. **-ing,** *a.* उचित, अनुरूप, युक्त, उपपन्न; ' it is b. ' सांप्रतं. **-ingly,** *adv.* यथोचितं, यथार्हं, युक्तं, अनुरूपं.

Bed, *s.* शय्या, शयनं, तल्पः-ल्पं, स्रस्तरः, शयनीयं; ' leave the b. ' मुंच शय्यां; ' confined to b. ' ' b. rid ' शय्यागत, शय्याग्रस्त ; ' polluter of other's b. ' पारतल्पिकः, परतल्पगः ; ' go to b. ' स्वप् 2 P, शी 2 A; ' b. chamber, ' ' b. room ' शयनागारं, शयनगृहं, वासगृहं ; ' b. clothes ' शय्योपस्कराः ; ' b. sheet ' शयनास्तरणं, उत्तरच्छदः ; ' b. stead ' पर्यंकः, खट्वा, मंचः. **2** (of a river) मध्यं, रयपथः. **3** फलकः. **-Bedding,** *s.* शय्योपकरणं, शयनसामग्री.

Bedash, Bedaggle, *See* **Stain.**

Bedaub, *See* **Daub.**

Bedeck, *v. t.* विभूष् 10, *See* **Adorn.**

Bedew, *v. t.* आर्द्रीकृ 8 U, क्लिद् c., प्रोक्ष् 1 P, सिच् 6 P.

Bedim, *v. t.* मलिनीकृ 8 U, कलुषीकृ; 'eyes b. ed with tears' बाष्पप्रकरकलुषां दृष्टिं (S. 6).

Bedizen, *v. t.* परिष्कृ 8 U. *See* **Adorn,**

Bedlam, *s.* उन्मत्तानां निवासः, वातुलालयः. -*a.*, **-ite,** उन्मत्त, वातुल.

Bee, *s.* आलिः, भ्रमरः, द्विरेफः, शिलीमुखः, भृंगः, मधुकरः, षट्पदः; 'honey b.' सरघा, मधुमक्षिका; 'b. hive' मधुकोषः; 'bees wax' मधुजं, शिक्थं.

Beef, *s.* गोमांसं.

Beer, *s.* यवसुरा-रं, यवमद्यं.

Beetle, *s.* पिंगकापिशा. 2 मुद्गरः. -*v. i. See* **Jut.**

Befall, *v. t.* आ-समा-पत् 1 P; 'such incidents b. worldly persons' आपतंति हि संसारपथमवतीर्णानामेते वृत्तांताः (Ka. 175): उपस्था 1 U, उपनम् 1 P (with gen.): कस्यात्यतं सुखमुपनतं दुःखमेकांततो वा (Me. 109) संपद् 4 A, घट् 1 A.

Befit, *v. t.* **Become.**

Befool, *v. t.* व्यामुह् c., विभ्रम् c. (भ्रमयति).

Before, *prep.* (Time) प्राक्, पूर्वं, अर्वाक्, (with abl.). 2 (Place) पुरः, पुरतः, अग्रे, अग्रतः, पुरस्तात् (with gen.); समक्षं, साक्षात्, प्रत्यक्षं. -*adv.* (place) *See* above. 2 (Time) पूर्व in comp.; 'not heard b.' अश्रुतपूर्व. -*conj.* यावत् न-तावत्; 'study your lesson b. he comes' यावदसौ नागच्छति तावत्पाठमधीष्व; एकस्य दुःखस्य न यावदंतं गच्छामि तावद्द्वितीयं समुपस्थितं मे; 'b. hand' प्रागेव, पूर्वमेव; प्रथममेव, अग्रे; 'b. mentioned' पूर्वोक्त, प्रागुक्त; 'as b.' यथा पुरा, यथापूर्वं; पूर्ववत्, 'in times gone b.' पुरा, गतकाले.

Befoul, *v. t.* दुष् c. (दूषयति); *See* **Stain.**

Befriend, *v. t.* अनुग्रह् 9 P; उपकृ 8 U, साहाय्यं कृ (with gen.),

Beg, *v. i.* भिक्ष् 1 A, भिक्षाटनं कृ 8 U, भिक्षां याच् 1 A. -*v. t.* अंजलिं बद्ध्वा-पादयोः पतित्वा विज्ञा c (ज्ञापयाति) or निविद् c. 2 याच् 1 A; अभि-प्र-अर्थ् 10 A; 'b s. to say' विज्ञापयति; 'b. favour of' प्रसद् c. अनुनी 1 P. **-gging,** *s.* याच्ञा, प्रार्थना. 2 भिक्षा, भिक्षाटनं. **-Beggar,** *v. t.* दरिद्रीकृ [illegible] सर्वस्वं हृ 1 P; 'b. s description' [illegible] *s.* -प्रार्थकः, अर्थिन् *m.*, भिक्षुः, याचकः, दरिद्रः. **-ly,** *a.* निर्धन, कृपण. 2 नीच, अपकृष्ट. **-y,** *s.* दैन्यं, कार्पण्यं, दारिद्र्यं, भैक्ष्यं.

Beget, *v. t.* जन् c. (जनयति): उत्पद् c.; प्रसू 2 A, सृज् 6 P. **-ter,** *s.* जनकः, उत्पादकः, जनयितृ *m.*

Begin, *v. t.* आ-प्रा-रभ् 1 A; प्र-उप-क्रम् 1 A, प्रस्तु 2 U, (प्रस्तूयतां [illegible]), प्रवृत् 1 A; 'the wind began' वातोऽग्रेसरोऽभूत्. **-ner,** *s.* आरब्धृ *m.*, नवच्छात्रः. **-ning,** *s.* आरंभः, उपक्रमः. 2 आदि *m.*; 'having no b.' अनादि. 3 मूलं, योनि *f.*, प्रभवः; 'b. with' आदि-आद्य- in comp.; 'in the b.' आदौ; 'from the b.' आमूलात्, आदितः; 'God has neither b. nor end' अनाद्यनंत ईश्वरः.

Begird, *v. t.* परिवेष्ट् 1 A or c., अवरुध् 7U, आ-परि-वृ 5 U; वलय, रसना, in comp,; समुद्ररसना-उदधिवलया-पृथ्वी 'earth begirt by sea'.

Begone, *interj.* अपेहि, अपसर, अपयाहि.

Begrease, *v. t.* वसया लिप् 6 P, or स्निग्धीकृ 8 U.

Begrime, *See* **Soil.**

Begrudge, *See* **Envy,** *v. t.*

Beguile, *v. t.* विनुद् c., अतिवह् c. (of time) (कथाभिर्दिवसमत्यवाहयत्). 2 व्यामुह् c., वंच् 10, विप्रलभ् 1 A, आकृष् 1 P; प्र-वि-लुभ् c.

Behalf, (on or in) अर्थं, अर्थे, हेतोः, कारणात्, कृते (with gen).

Behave, *v. i.* आचर् 1 P, वृत् 1 A, व्यवहृ 1 P; *See* **Act.** 2 वृत्तिं कृ 8 U, अनुष्ठा 1 P; 'well b. ed' सदाचारः. **-Behaviour,** *s.* आचारः, वृत्ति *f.*, व्यवहारः, चेष्टितं, चरितं, आचरणं.

Behead, *v. t.* शिरः (*n.*) छिद् 7 P or कृत् 6 P. **-ing,** *s.* शिरच्छेदः; 'worthy of b.' शीर्षच्छेद्यः.

Behest, *See* **Command** (*s.*)

Behind, *prep.* पश्चात्, पृष्ठतः, (with gen.) अनु (with acc.); 'concealing his body b. the creepers' लतांतरित-लताव्यवहितविग्रहः; 'he is far b. (backward)' मंदः, मंदधीः; 'b. the scenes' नेपथ्ये. -*adv.* पृष्ठतः; 'from b.' पश्चादेत्य, पृष्ठेनागत्य 2 अवरतः, अधस्तात्. 3 दूरे, दूरतः; 'b. part' पश्चाद्देशः, पृष्ठं, नितंबः.

Behold, *v. t.* दृश् 1 P, ईक्ष् 1 A ; *See* **See.** **-en,** *a.* उपकृत, कृतोपकारेण पराधीन. **-er,** *s.* प्रेक्षकः, दर्शकः, द्रष्टृ *m.*

Behoof, *s.* अर्थः, फलं, वृद्धि *f.*, लाभः.

Behove, *v. t.* Ex. by pot. pass. part. pot. mood, or अर्ह् 1 P; 'it b. s thee to assist me' त्वया मम साहाय्यं कर्तव्यं, साहाय्यं कर्तुमर्हसि &c., *See* **Become,** *v. t.*

Belabour, *v. t. See* **Beat.**

Belate, *v. i.* चिराय or चिरय् D.

Belay, *v. t.* प्रति-उप-रुध् 7 U.

Belch, *v. i.* उद्वम् 1 P, उद्गॄ 6 P. **-ing,** *s.* उद्वमनं, उद्गिरणं, उद्गारः.

Beleaguer, *See* **Besiege.**

Belie, *v. t.* असत्यं आरुह् c. (रोपयति); मिथ्याभियोगं कृ 8 U; परि-अप-वद् 1 A.

Believe, *v. t.* विश्वस् 2 P, (with loc.). श्रद्धा 3 U (with loc. of person and acc. of thing); प्रति-इ 2 P. (with acc.). 2 संभू c., तर्क् 10, मन् 4 A.–**er,** *s.* विश्वासिन् *m.*, श्रद्धालुः, श्रद्धान्वितः. –**Belief,** *s.* विश्वासः, विश्रंभः, प्रत्ययः, 2 श्रद्धा, आस्तिक्यबुद्धि *f.* 3 मति *f.*, बुद्धि *f.*, ' it is my b. ' इति मे मतिः or मतं, इत्यहं मन्ये.

Belike, *adv.* अपि नाम, क्रिस्वित्.

Belittle, *v. t.* लघूकृ 8 U.

Bell, *s.* घंटा; ' small b. ' किंकिणी; 'b. metal ' कांस्यं, पीतलोहं; ' b. clapper ' घंटावादकः.

Belladonna, *s.* कंटकारिका.

Belle, *s.* सुंदरी, रूपवती स्त्री; सुभगंमन्या.

Belles letters, *s.* वाङ्मयं.

Bellicose, *a.* कलहप्रिय,-शील, रणोत्सुक, युयुत्सु.

Belligerent, *a.*, *s.* बद्धसमर; योधनशील, युयुत्सु.

Bellow, *v. i.* नद् 1 P, निनद्, गर्ज् 1P, रस् 1 P, रट् 1 P, नर्द् 1 P. –**ing,** *s.* गर्जित, निनादः, गर्जनं, रसितं.

Bellows, *s.* भस्त्रा, दृति *f.*, भस्त्री, चर्मप्रसेविका.

Belly, *s.* उदरं, जठरं, तुंदं, कुक्षिः; ' b. ache ' उदरशूलः-लं; ' b. full ' आकंठं; उदरपूरणं (*s.*); ' b. bound ' आनद्ध; बद्धोदर; ' b. god ' उदरंभरिः, औदरिकः; ' b. worm ' क्रिमिः; कृमिः.

Belong, *v. i.* अस् 2 P, विद् 4 A, भू 1 P, with gen.; or by an adj. from noun; ' this book belongs to me ' ममेदं पुस्तकं, or मदीयमेतत् पुस्तकं, ' b. ing to spring ' वासंतिक (की *f.*) ; ' b. ing to the king ; ' राजकीय. 2 संबंध् pass.; ' this does not b. to you ' नायं तव व्यापारः.

Beloved, *a.* प्रिय, इष्ट, दयित, वल्लभ; ' b. person ' दायितजनः, &c.

Below, *prep.* अधः, अधस्तात्, तले, (with gen.). 2 ऊन in comp. 3 अयोग्य, अनर्ह, अननुरूप, असदृश (शी *f.*;); ' the gods are b. Hari ' अनु हरिं सुराः (S. K.). –*adv.* अधः, अधस्तात्; अधोभागेलोके (in hell). 2 नीचे, अवरतः. 3 इह, इह लोके.

Belt, *s.* मेखला, रस(श)ना, कांची. –*v. t.* मेखलारूपेण परिवृ 5 U or परिवेष्ट् 1 A.

Bemangle, *See* **Mangle.**

Bemire, *v. t.* पंकेन मलिनयति (D.). or दुष् c. (दूषयति).

Bemoan, *See* **Lament.**

Bench, *s.* पीठं; फलकः; ' b. of justice ' धर्मासनं, व्यवहारासनं.

Bend, *v. t.* नम् c. (न-ना-मयति), अव-आ-नम् c. (नमयति), नम्रीकृ 8 U, आवृज् 10, वक्रीकृ, भुज्-, वि-आ°-, 6 P; ' bent unde the load of breasts ' कुचभारानमिता स्तनभरेण नम्रतामानीता, स्तनभारेणावर्जिता; ' b. the brow भ्रूभंगं कृ; he ' bent his mind again to his task ' स पुनरपि स्वकार्ये मनोन्यदधात्-बबंध-न्यवेशयत्; ' b. to one's will ' वशीकृ. –*v. i.* आ-अव-प्र-नम् 1 P, नम्र-लीन- *a.* भू 1 P; ' trees b. down under the load of fruits ' भवंति नम्रास्तरवः फलागमैः (S. 5) –**Bent,** *a.* आनमित; ना-न-मित, आभुग्न; प्रवण, प्रह्व, आवर्जित; ' b. on' कृतनिश्चय, सुनिश्चय, कृतसंकल्प, विहितप्रतिज्ञ; ' eagerly b. on killing each other ' परस्परवधोद्यतौ. –*s.* नति *f.*, वक्रता, जिह्मता. 2 वंकः, पुटभेदः. 3 शीलं, वांछा, निश्चयः, प्रवृत्ति *f.*, अभिनिवेशः, –**ing,** *s.* नति *f.*; नमनं, अवनमनं.

Beneath, *prep.*, *adv.* *See* **Below.**

Benedict, *s.* नवोढः, नवपरिणीतः.

Benediction, *s.* आशिस् *f.*, आशीर्वादः; नांदी (in dramas); आशास्यं, *f.* धन्यवादः. 2 स्तवः, स्तुति *f.* –**Benedictory,** *a.* मांगलिक (की *f.*); ' b. stanza ' नांदीश्लोकः; नांदी.

Benefaction, *s.* उपकारः, उपकृतं, हितं.

Benefactor, *s.* उपकर्तृ *m.*, उपकारिन् *m.*, हितकृत् *m.*, उपकारकः, हित-प्रिय-करः.

Benefice, *s.* धर्मशिक्षकवृत्ति *f.*

Beneficence, *s.* उपकारशीलता, परोपकारः; उपकारः, हितं, दया, कृपा, त्यागिता.

Beneficent, *a.* दान-त्याग-शील, परोकारिन्, उपकारपर. 2 (thing) हितकर (री *f.*), हितकारिन्, हितावह.

Beneficial, *a.* हित, हितावह, उपकारक, लाभजनक; कल्याणकारक, सुखप्रद.

Benefit, *s.* उपकारः, हितं, अनुग्रहः. 2 फलं, लाभः; ' for public b. ' जनहितार्थं. –*v. t.* उपकृ 8 U, अनुग्रह् 9 P, हितं कृ, लाभं दा 3 U.

Benevolence, *s.* परहितेच्छा, परोपकारिता, दया, कृपा, उदारता, –**Benevolent,** *a.* हितैषिन्, उपकारपर, परोपकारशील, दयालु, परहितेच्छु. –**ly,** *adv.* परहितेच्छया, कृपया, दयापूर्वं.

Benight, *v. t.* तमसा आच्छद् 10. –**ed,** *a.* तमोवृत, नैशतमसाक्रांत; (fig.) अज्ञानतमोवृत.

Benign, Benignant, *a.* दयालु, प्रेमपर, सदय, सुखप्रद, कृपालु. –**ity,** *s.* दया, प्रीति *f.*, कृपा, अनुग्रहः, दयालुत्वं.

Benison, *s.* आशिस् *f.*, आशीर्वादः.

Benumb, *v. t.* जडयति (D.), जडीकृ 8 U, स्तंभ् 9 P.

Bequeath, *v. t.* मृत्युसमये इच्छापत्रेण दा 3 U or ऋ c. (अर्पयति), or प्रतिपद् *c.* –**Bequest,** *s.* रिक्थप्रदानं.

Bereave, *v. t.* विनाकृ 8 U, वियुज् 10, (with instr. for ' of '); ' b. ed of Madana ' मदनेन विनाकृता. 2 अपनी 1 P, भ्रंश् c., ' to be b. ed ' परिहा pass., वियुज् pass. **-ed, Bereft,** *a.* रहित, हीन, वियुक्त, हृत-गत in comp. **-ment,** *s.* विप्रयोगः, वियोगः; विरहः.

Berry, *s.* गुली, गुटिका.

Berth, *s.* शयनागारं, वासगृहं (नाकायां).

Bescatter, *See* **Scatter.**

Beseech, *v. t.* अनुनी 1 P; प्रसद् c., विनयेन याच् 1 A or प्रार्थ् 10 A. **-er,** *s.* प्रार्थकः, याचकः, आर्थिन् *m.*

Beseem, -ly, *See* **Become.**

Beset, *v. t.* रुध् 7 U, आकुलीकृ 8 U, आक्रम् 1 U, 4 P, संबाध् 1 A, उपपीड् 10, अभिभू 1 P. **-*a*.** आकुल, अभिभूत; ' b. with difficulties or dangers ' सङ्कटाकुल, अनर्थसंबाध, विपदभिभूत.

Beshrew, *v. t.* अमंगल प्रार्थ् 10 A, शप् 1 A.

Beside, *prep.* पार्श्वे, समीपं -पे; अभितः, परितः (acc.); निकटं-टे (gen). 2 असंबद्ध *a.*; ' b. oneself with joy ' आनंदपरवशः, आनंदेन विगतचेतन इव भूत्वा; ' this is b. the question ' अप्रास्ताविकं-अप्रासंगिकं-एतत्, अप्रकृतं.

Besides, *prep.* Ex. by भिन्न, व्यतिरिक्त, अपर, इतर, in comp., or with abl. **-*adv*.** अपरंच, अन्यच्च, किंच, अपिच, अधिकं.

Besiege, *v. t.* रुध् 7 U, अव-उप-रुध्, परिवेष्ट् 1 A or c., आक्रम् 1 U, 4 P **-er,** *s.* अव-उप-रोधकः. **-ing,** *s.* उप-अव-रोधः, रोधनं.

Beslave, *v. t.* वशीकृ 8 U, दम् c. (दमयति).

Besmear, *v. t.* वि-आ-अनु-लिप् 6 P, अंज् 7 P. दिह् 2 U. **-ed,** *a.* लिप्त, अक्त, दिग्ध; विषदिग्धः शरः 'b. with poison'; रक्ताक्तः ' b. with blood '.

Besmirch, *v. t. See* **Besmear.** 2 मलिनीकृ 8 U.

Besom, *s.* मार्जनी, शोधनी.

Besort, *v. i.* युज् pass., उपपद् 4 A.

Besot, *v. t.* मुह् c., जडीकृ 8 U. **-ted,** *a.* मूढबुद्धि, मूढात्मन्.

Bespangle, *v. t.* नक्षत्राकारभूषणैः अनुव्यध् 4 P or उप-शुभ् c. or भूष् 10.

Bespatter, *v. t.* मलेन सिच् 6 P, मलिनयति (D.). कलुषयति (D.).

Bespeak, *v. t.* सूच् 10, दृश् c., कथ् 10, *See* **Indicate;** आकृतिरेवानुमापयत्यमानुषतां (Ka.132) 'b. s its being superhuman.'

Bespeckle, Besprinkle, *See* **Speckle, Sprinkle.**

Best, *a.* प्रशस्ततम, उत्तम, श्रेष्ठ, परम, परार्ध्य; 'to the b. of one's capacity or power' यथाशक्ति, यावच्छक्यं; 'to the b. of one's belief' यथामति; 'b. of' ex. by रत्न or वर in comp.; स्त्रीरत्नं, मुनिवरः.

Bestain, *See* **Stain.**

Bestead, *v. t.* लाभाय भू 1 P, हिताय क्लृप् 1 A.

Bestial, *See* under **Beast.**

Bestir, (oneself) चेष्ट् 1 A, घट् 1 A, प्रयुत् 1 A. उद्यमं कृ 8 U, व्यवसो 4 P.

Bestow, *v. t.* दा 1 P, 3 U, प्रदा, प्रतिपद् c., (with dat.) वितॄ 1 P (with loc.). 2 प्रयुज् 7 A, 10, निक्षिप् 6 P; ' b. ing wealth on proper persons ' वित्तस्य पात्रे व्ययः, ' great care seems to be b. ed on this picture ' इदमालेख्यं प्रयत्नतः-सुनिपुणं-निर्मितमिति अनुमीयते; 'b. oneself' सेव् 1 A, आस्था 1 A, मनो निविश् c. **-al,** *s.* दानं, प्रतिपादनं. **-er,** *s.* दातृ *m.*, प्रदः in comp.

Bestraught, *a.* व्यग्र, चिंताकुल; *See* **Anxious.**

Bestrew, *v. t.* आस्तॄ-स्तॄ 5-9 U.

Bestride, *v. t.* पादौ पृथक् कृत्वा आ-अधिरुह् 1 P or अधिक्रम् 1 U, 4 P.

Bestud, *v. t.* अनुव्यध् 4 P, खच् 10.

Bet, *s.* पणः, प्रतिज्ञा. **-*v. t*.** पण् 1 A (with gen. of thing staked); शतस्य पणते (S. K.)

Betake, (oneself to) *v. t.* आश्रि 1 U, अंगीकृ 8 U; अरण्यवासमंगीचकार ' betook himself to forest residence'.

Betel, *s.* (tree) तांबूली, पुन्नागवल्ली, नागलता; ' b. box ' तांबूलकरंकः, पूगपात्रं; 'b. nut' पूगं, तांबूलं; 'b. box bearer' तांबूलकरंकवाहिन्.

Bethink, *v. t.* अनुध्यै 1 P, विमृश् 6 P; *See* **Think.**

Betide, *v. t.* आपत् 1 P, उपस्था 1 U, (gen.) *See* **Befall;** ' may woe b. him ' अभद्रं तस्य भूयात्.

Betimes, *adv.* प्रभाते, प्रातः, प्रत्यूषे. 2 यथासमयं, वेलायां, यथावसरं.

Betise, *n.* मौर्ख्यं, मूढता. 2 मौर्ख्यविलसितं.

Betoken, *v. t.* सूच् 10, दृश् c., *See* **Indicate.**

Betray, *v. t.* शत्रुकरेषु ऋ c. (अर्पयति), विश्वासघातेन ऋ c. 2 भिद् 7 U; 'b. ed the secret' रहस्यं बिभेद. 3 Indicate, q.v. 4 वंच् 10, *See* **Cheat;** 'b themselves' आत्मस्वरूपं प्रकटयंति. **-er,** *s.* विश्वासघातकः, वंचकः.

Betrim, *v. t.* भूष् 10, अलंकृ 8 U.

Betroth, *v. t.* (वाचा) दा 3 U, प्रतिपद् c., प्रतिश्रु 5 P, (dat.). **-al,** *s.* वाग्दानं, वाक्प्रदानं

Betrust, *See* **Entrust.**

Better, *a.* श्रेयस्, भद्रतर, गरीयस्, प्रशस्ततर, साधीयस्; 'b. than' वरं-न; 'better death than disgrace (I prefer death to disgrace)' वरं मृत्युर्न पुनरपमानः. 2 (In health) ex. by विशेषः; 'I am b. to-day' अस्ति मे विशेषोऽद्य (S. 3). -*adv.* वरं, श्रेयः, भद्रतरं, अधिकतरं, अधिकं. 2 (With verbs) ex. by तरां; 'he cooks b. than Ra'ma' रामात्पचतितरां. -*s.* श्रेष्ठता, प्रमुखत्वं, वर्चस्वं; 'get the b. of' अभिभू 1 P, अतिरिच् pass., *See* **Excel.** -*v. t.* वृध् c.; कृ with (*a.*). -**Betters,** श्रेष्ठाः (pl.).

Between, Betwixt, *prep.* मध्ये, अभ्यंतरे, अंतरे, मध्यस्थाने; oft. ex. by gen. of nouns; देशयोरंतरं 'distance b. the two countries'; 'b. joy and sorrow (tears)' शोकानंदमध्यवर्तिनी (Ka. 318).

Beverage, *s.* पानं, पेयं, पानीयं; 'b. of the Gods' अमृतं.

Bevy, *s.* गणः, संघः, समवायः.

Bewail, *v. t.* विलप् 1 P, शुच् 1 P, *See* **Lament.** -**ing,** *s.* शोकः, विलापः, परिदेवनं.

Beware, *v. i.* सावधान-अप्रमत्त-अवहित *a* भू 1 P;: 'b. of your enemies' शत्रुविषये सावधानो भव; 'b. lest you will be seduced by pleasures' सावधानो भव नोचेद्विषयैः प्रलोभ्येथाः; or तथा प्रयतेथा यथानाक्षिप्यसे विषयैः (Ka. 109).

Beweep, Bewet, *See* **Weep, Wet.**

Bewilder, *v. t.* आकुलीकृ 8 U, विक्लवीकृ, व्या-सं-मुह् c., संभ्रम् c. (भ्रमयति), जडीकृ. -**ed,** *a.* विक्लव, आकुलीभूत, आ-व्या-कुल, विमूढ, विह्वल, संभ्रांत; 'b. what to do' किंकर्तव्यतामूढः, प्रतिपत्तिमूढः. -**ment,** *s.* संभ्रमः, वैक्लव्यं, संमोहः, व्याकुलत्वं.

Bewitch, *v. t.* मुह् c., सं-वि-परि°, वशीकृ 8 U, मद् c. (मनो मदयंति ये Mal. 2); मंत्रेण वशीकृ. 2 मनो हृ or आकृष् 1 P. -**ing,** *a.* मोहन (नी *f.*), हारिन्. -**ment,** *s.* मोहनं, मोहः, वशीकरणं, माया, आकर्षणं.

Bewray, *See* **Betray.**

Beyond, *prep.* परतः (with abl.) अतिक्रम्य, अतीत्य, (with acc.); 'b. the forest is the Kailàsa' तदरण्यमतिक्रम्य कैलासगिरिः (Ka. 121); 'Oh! Change b. belief' अहो विश्वासातिक्रांतो (अविश्वास्यः) दशाविपर्यासः; 'b comprehension' अगम्य, दुर्ज्ञेय, दुर्बोध; 'b. expectations' मनोरथानामभूमिः (S. 7); gen. ex. by अति pr.; अधिकं, 'b. measure' अतिमात्र; 'b. human power' अतिमानुषं; 'b. this continent' द्वीपांतरे; 'lives b. his means' आयाधिकं व्ययं करोति. -*adv.* दूरे, परे-रं; 'go or pass b.' अतिक्रम् 1 U, अति-इ 2 P.

Bias, *s.* स्पृहा, अभिलाषः. 2 शीलं, भावः. 3 पक्षपातः, पक्षपातित्वं. 4 प्रोत्साहनं, प्रवर्तनं. -*v. t.* प्रवृत्, c., प्रणुद् 6 P, प्रोत्सह् c. 2 साचीकृ 8 U; दुष् c. (दूषयति).

Bibber, *s.* मद्यपायिन् *m.*, सुरापः, मद्यपः.

Bibliography, *s.* पुस्तकविद्या.

Bibliomania, *s.* दुर्लभपुस्तकसंग्रहणोन्मादः or -व्यग्रता.

Bibulous, *a.* जलशोषक.

Bicentenary, *a.* द्विशतसांवत्सरिक.

Bicker, *v. i.* कलहं कृ 8 U, विवद् 1 A. वाग्युद्धं कृ. -**ing,** *s.* कलहः, विवादः, कलिः. 2 डिंबाहवः.

Bicycle, *s.* द्विचक्रं वाहनं.

Bid, *v. t.* आ-व्या-दिश् 6 P, आज्ञा c. (ज्ञापयति). 2 मूल्यं ख्या c. (ख्यापयति) or उद्घुष् 10. 3 निमंत्र् 10 A; 'b. welcome' स्वागतं वद् 1 P, or व्याहृ 1 P; 'b. adieu or farewell' आमंत्र् 10 A, आप्रच्छ् 6 A; 'b. defiance' धृष् 5 P, आह्वे 1 A. -**der,** *s.* क्रेतृ *m.* -**ding,** *s.* आज्ञा, आदेशः, शासनं. 2 मूल्यख्यापनं, अर्घघोषणा.

Bide, *v. t.* स्था 1 P, वृत् 1 A. -*v. t.* प्रतीक्ष् 1 A. 2 सह् 1 A.

Bidental, *a.* द्विदत्, द्विरद.

Biennial, *a.* द्विवार्षिक (का *f.*), द्विवर्षीण, द्वैवर्षिक.

Bier, *s.* शवयानं, कटः, खाटः -टी.

Bifold, *a.* द्विगुण, द्वैध (धी *f.*).

Biformed, *a.* द्विरूप.

Bifurcate, *v. t.* द्विधा कृ 8 U, विभिद् 7 P or c. -**ed,** *a.* द्व्यग्र. 2 विश्लेषित, द्विधा कृत.

Big, *a.* महाकाय, बृहत्काय (of animate creatures); महाप्रमाण, अतिप्रमाण, स्थूल, विपुल, बृहत्, पृथु (थुः, थ्वी *f.*). 2 Pregnant q. v. 3 संकुल, पूर्ण, संकीर्ण; आकीर्ण; 'as b. as' परिमाण, परिमित, मात्र, in comp; बिल्वमात्र 'b. as Bilwa.' -**ness,** *s.* स्थूलता, वैपुल्यं &c. 2 परिमाणं, प्रमाणं.

Bigamy, *s.* (एककाले) द्विपत्नीकरणं; द्विभर्तृकरणं. -**ist,** *s.* द्विपत्नीकः; द्विभर्तृका.

Bight, *s.* अ(आ)खातं.

Bigotry, *s.* स्वमतासक्ति *f.*, स्वमताग्रहः. सनिर्बंधं स्वमतालंबनं. -**Bigoted,** *a.* **Bigot,** *s.* निर्बंधशील, (अविचार्य) स्वमतरक्षिन्, निर्बंधेन स्वमतावलंबिन्.

Bijou, *s.* क्षुद्र-अलंकारः-भूषणं.

Bilbo, *See* **Sword.**

Bile, *s.* पित्तं, मायुः. -**ous,** पैत्तिक (की *f.*), मायुमय (यी *f.*).

Bilingual, *a.* द्विभाषावादिन्.

Bilinguous, *a.* द्विजिह्व.

Bilk, *See* **Cheat.**

Bill, *s.* पत्रं, लेखः. 2 चंचु (चू) *f.*, तुंडं. 3 दात्रं, स्तंबघ्नः. -*v. t.* *See* **Kiss**, or **Embrace**; 'b. of fare,' भोजनवस्तुपत्रिका.

Billet, *s.* पत्रं, लेखः, लेख्यं. 2 काष्ठखंडं. -*v. t.* सैन्यानि वस् c.

Billion, *s.* खर्वः.

Billow, *s.* महोर्मि *f.*, कल्लोलः, तरंगः. -*v. i.* तरंगायते (D.). **-y**, *a.* कल्लोलमालाकुल, प्रचलदूर्मिमालाकुल; तरंगित.

Bimetallic, *a.* द्विधातुक, द्विधातुमय.

Bin, *s.* कुशूलः, धान्यकोष्ठः.

Binary, *a.* द्विगुण, द्वैध (धी *f.*).

Bind, *v. t.* बंध् 9 P, (lit. and fig.); नि-सं-यम् 1 P; 'bound by affection' स्नेहनिबद्धः; नियंत्र् 10; 'I am not bound by these rules' नाहमेभिर्विधिभिर्नियंत्रितोस्मि. 2 आनह् 4 P, पिनह्; 'b. together' सं-बंध्, संश्लिष् c.; ग्रंथ् 9 P, संहृ 1 P, संयुज् 7 U, 10; 'b. oneself' प्रतिज्ञा 9 U, प्रतिश्रु 5 P; 'b. by oath' शप् c.; 'b. on' ex. by pot. pass., part., or अर्ह् 1 P; 'the protection of your wife is b. ing on you' त्वया भार्यापोषणमवश्यमेव कर्तव्यं. **-ing**, *s.* बंधः, बंधनं, वेष्टनं, पट्टः, आवरणं. **-Bound**, *a.* बद्ध, निबद्ध, संयत, नियंत्रित, आनद्ध; 'you are b. to obey my orders' त्वया ममादेशा अनुरोद्धव्या एव, आदेशाननुरोद्धुमर्हसि; 'where are you b., कुत्र गंतुं कृतनिश्चयोसि-कुत्र गंतुकामोसि.

Binocular, *a.* द्विनेत्र, द्विनयन.

Biography, *s.* चरितं, जीवनवृत्तांतः. **-er**, *s.* वृत्तांतलेखकः-आख्यातृ *m.*, चरितनिवेदकः.

Biology, *s.* प्राणिशास्त्रं.

Bipartition, *s.* द्विधाकरणं.

Biped, *s.* द्विपाद् *m.*, or द्विपदः.

Biplane, *s.* द्विपृष्ठ विमानं or आकाशयानं.

Birch, *s.* भूर्जः, मृदुत्वचः, प्रतिविषा. **-en**, *a.* भूर्जमय (यी *f.*), भूर्जनिर्मित.

Bird, *s.* विहगः, विहंगः-गमः, पक्षिन् *m.*, खगः, शकुनः, पतत्रिन् *m.*, गरुत्मत् *m.*, द्विजः, पत्रिन् *m.*, शकुंतिः, अंडजः, पतंगः, शकुनिः; 'bird's eye view' उच्चस्थानादालोकनं, स्थूलदर्शनं, असूक्ष्मदृष्टिः.

Birth, *s.* जन्मन् *n.*, उद्भवः, संभवः, उत्पत्ति *f.*, जनि *f.*, उत्पादनं, प्रसूति *f.*; 'rich from his b.' गर्भेश्वरः; 'high or noble b.' कुलं, कुलीनता, अभिजातता, अभिजनः, कुले जन्म. 2 वंशः, कुलं, अन्वयः. 3 योनि *f.*, मूलं; 'pride of b.' कुलाभिमानः; 'blind from b.' जात्यंध, जन्मांध, जनुषांध. **-day**, *s.* जन्मदिवसः-दिनं. **-place**, *s.* जन्मस्थानं-भूमि *f.* **-right**, *s.* जन्मतो लब्धोधिकारः; पैतृकं स्वत्वं.

Biscuit, *s.* अपूपः, पिष्टकः, पूपः.

Bisect, *v. t.* समांशद्वयेन विभज् 1U, द्विखंडीकृ 8 U, द्विधा छिद् 7 P.

Bishop, *s.* धर्माध्यक्षः. **-ric**, *a.* धर्माधिकारः.

Bison, *s.* वनवृषभः.

Bit, *s.* खलीनः-नं, कविका. 2 खंडः, लवः, भागः; 'not a b.' न मनागपि, न स्तोकांशेनापि; गंधः (क्रियायाः गंधमात्रस्यापि अनुप्रवेश इह नोपपद्यते S. B. 74). 3 पिंडः, ग्रासः. -*v. t.* खलीनेन नियंत्र् 10.

Bitch, *s.* शुनी, कुक्कुरी, सरमा.

Bite, *v. t.* दंश् 1 P; 'bit off a large piece' दंतैर्महाखंडं संदष्टवान्-चर्वितवान्; उत्पट् 10, चर्व् 1 P, खाद् 1 P. 2 शीतेन पीड् 10. 3 अधिक्षिप् 6 P, *See* **Censure**. 4 पीड् 10, अर्द् 1 P, 10. -*s.* दंशः, दंशनं. 2 दंतपदं, दशनांकः. **-ing**, *s.* दंशनं; 'b. of conscience' मनसोनुतापः. -*a.* दंशक. 2 पीडाकर (री *f.*).

Bitter, *a.* कटु, तिक्त. 2 (Touching) मर्मभिद्-छिद्. 3 उग्र, निष्ठुर, परुष, तीक्ष्ण, कठोर. **-ly**, *adv.* निष्ठुरं, परुषं. 2 अत्यंतं. 3 प्रमुक्तकंठं (weeping b.). **-ness**, *s.* कटुता, शुक्तता, तीक्ष्णता. 2 दुःखातिरेकः, उग्रशोकः; 'in b. of soul' दुर्मनायमानचित्त *a.*, समन्युना चेतसा. 3 कठोरता, परुषता, निष्ठुरता. 4 मात्सर्यं, पैशुन्यं.

Bitumen, *s.* शिलाजतु *n.*, गिरिपुष्पकं, शैलेयं, गिरिजं, अश्मजं, अर्घ्यं.

Bivalve, *a.* द्विकोष.

Bizarre, *a.* *See* **Grotesque**.

Blab, *v. i.* रहस्यं भिद् 7 P. **-ber**, *s.* रहस्यभेदकः.

Black, *a.* कृष्ण, श्याम, कृष्णवर्ण, काल. 2 निष्प्रभ, तिमिर, असित, नील, मेचक. 3 (fig.) निंद्य, घोर, दारुण; 'b. deed' अपयशोमलिनं कर्म; 'b. guard' दुर्वृत्तः, दुराचारः, अधमः, खलः. -*s.* कृष्णः, कृष्णवर्णः; 'clothed in b.' नीलवस्त्रः. **-en**, *v. t.* कृष्णीकृ 8 U, श्यामी-नीलीकृ. 2 दुष् c. (दूषयति), कलंकयति (D.), *See* **Stain**. **-ish**, *a.* ईषत्कृष्ण, आनील. **-ness**, *s.* कृष्णिमन् *m.*, श्यामत्वं, नीलता, कालिमन् *m.*, तमस् *n.*, तिमिरं. **-smith**, *s.* कर्मकारः, लोहकारः, अयस्कारः.

Bladder, *s.* मूत्राशयः, वस्ति *m.*, *f.*

Blade, *s.* (Of a sword) धारा, पत्रं, फलं. 2 (Of grass) दलं, कांडं, अंकुरः. 3 स्कंधास्थि *n.*

Blain, *s.* स्फोटः, व्रणः-णं.

Blame, *v. t.* निंद् 1 P, गर्ह् 1, 10 A, उपालभ् 1 A; दोषं क्षिप् 6 P, or आरुह् c. (रोपयति), *See* **Censure**, 'I am not to b.' नाहमपराधी, न ममायं दोषः. -*s.* दोषः, अपराधः. 2 गर्हा, आक्षेपः, उपालंभः, निंदा, जुगुप्सा; 'lays the b. on another' अन्यस्मिन्दोषं

क्षिपति. **-able,** *a.* निंद्य, निंदनीय, गर्हणीय, गर्ह्य, वाच्य; ' he is not b. or to blame ' स न दोषास्पदं-दोषपात्रं. **-er,** *s.* निंदकः, परिवादकः, अधिक्षेपकः, **-less,** *a.* अनिंद्य, निर्दोष, निष्कलंक, विशुद्ध (pure). **-lessness,** *s.* अनिंद्यता, अनवद्यता (अहो अनवद्यता रूपस्य M. 2), अवाच्यता, दोषाभावः.

Blanch, *v. t.* शुक्लीकृ 8 U, धवलीकृ. 2 निस्तुषयति (D.), त्वचं निष्कृष् or अपनी 1 P. 3 Avoid, q. v.

Bland, *a.* मृदु, कोमल, मसृण, सौम्य श्लक्ष्ण; ' b. in speech ' प्रियंवद, **-ish,** *v. i.* शा-(सां)त्व् 10, चाटूक्तिभिः तुष् c., अनुनी 1 P, उपच्छंद् 10. **-ishment,** *s.* विलासः, विभ्रमः. 2 प्रियवाक्यं, चाटूक्ति *f.*, मधुरभाषितं, उपच्छंदनं, अनुनयः.

Blank, *a.* शुभ्र, शुक्ल; ' b. with fear ' भयविवर्णः-विवर्णाननः. 2 शून्य, रिक्त, लेखारहित. 3 एकांत, अत्यंत; ' b. despair ' एकांततो नैराश्यं. 4 अनुप्रास-यमक-हीन (verse). **-s.** लेखाशून्यं पत्रं. 2 शून्यता; रिक्तं, शून्यं.

Blanket, *s.* कंबलः, ऊर्णायुः, रल्लकः

Blare, *v. i.* उच्चैः नद् *s.* उच्चनादः, उद्घोषः.

Blarney, *s.* *See* **Flattery.**

Blaspheme, *v. t.* ईश्वरं निंद् 1 P or अवमन् 4 A, or अभिशप् 1 U. **-ous,** *a.* ईश्वरनिंदक, पाषंडीय. **-y,** *s.* पाषंडता, ईश्वरनिंदा.

Blast, *s.* वात्या, वातः, वायुवेगः, प्रभंजनः, जवानिलः. 2 ध्मानं (of horns). 3 विनाशः, क्षयः, अपायः. **-v. t.** विनश् c., विहन् 2 P, म्लानीकृ 8 U, विशॄ c., क्षै c. (क्षपयति); ' b. ed by lightning ' अशनि-विद्युत्-हत **-er,** *s.* विनाशकः.

Blatant, *s.* *See* **Noisy.**

Blaze, *v. i.* ज्वल् 1 P, प्र-उत्°-, दीप् 4 A, सं-उत्-प्र-°; ' b. ing ' उज्ज्वल, प्रदीप्त, देदीप्यमान, भास्वर, *See* **Bright,** ' b. abroad ' प्रकाश् c,. प्रख्या c. (ख्यापयति). **-s.** प्रभा, अर्चिस् *f.*, *n.*, दीप्ति *f.*, ज्वाला; 'b. of light'' रश्मि-अंशु-जालं.

Blazon, *v. t.* भूष् 10, अलंकृ 8 U. 2 प्रख्या c. (ख्यापयति), प्रकाश् c., उद्घुष् 10.

Bleach, *v. t.* निर्णिज् 3 U, धाव् 1 P, 10, धवली-कृ 8 U. **-ed,** *a.* धौत, निर्णिक्त. **-er,** *s.* धावकः, वस्त्रनिर्णेजकः.

Bleak, *a.* अतिशीत (winter); शिशिर, हैमंत (ती *f.*), हिमशीत. 2 (fig.) निरानंद, असुभग.

Blear-eyed, *a.* क्लिन्नाक्ष, चुल्ल, चिल्ल, पिल्ल; ' b. eye ' चुल्लः &c.

Bleat, *v. i.* रेभ् 1 A, मेंमें शब्दं कृ 8 U, उ 1 A. **-ing,** *s.* रेभणं, मेषरुतं, उरभ्रनादः.

Bleed, *v. t.* रक्तं-रुधिरं &c. (blood) मुच् c. or स्रु c. or मोक्ष् 10, with gen. of person or part bled; ' they b. the wound ' क्षते रक्तमोक्षणं कुर्वंति. **-v. i.** रक्तं-रुधिरं स्रु 1 P, or मुच् 6 P, or प्रवह् 1 P; 'his hand b. s' तस्य हस्ताद्रुधिरं स्रवति; 'b. ing profusely' रुधिरप्राग्भारनिस्यंदिन् (Mal. 5); ' to b. for one's country ' स्वदेशार्थ जीवितं त्यज् 1 P. **-er,** रक्तस्रावकः-मोचकः. **-ing,** *s.* रक्तस्रावः, रक्तमोक्षणं, रक्तस्रुति *f.*, रुधिरक्षरणं.

Blemish, *s.* दोषः, कलंकः, छिद्रं; 'un-b. ed' निष्कलंक, निर्दोष. 2 अपयशस् *n.*, अकीर्ति *f.* **-v. t.** मलिनयति (D.), कलंकयति (D.), दुष् c. (दूषयति).

Blench, *v. i.* सहसा संकुच् 1 P. 2 सहसा अपसृ 1 P or अपक्रम् 1 U, 4 P or निवृत् 1 A; पराङ्मुख (खी *v.*) भू 1 P.

Blend, *v. t.* मिश्र् 10, संयुज् 10, एकत्र कृ 8 U; ' to be b. ed ' संकॄ pass.; संमिल् 6 P, एकीभू 1 P. **-ed,** *a.* संमिश्र, व्यामिश्र, संकीर्ण संसृष्ट, मिश्रीकृत. 2 एकरूप, एकीभूत.

Bless, *v. t.* Gen. ex. by Imperative or Benedictive of verb; ' I b. that you may get a son ' पुत्रं लभस्व or लप्सीष्ठाः 2 आशास् 2 A, आशिषं दा 3 U; वितॄ 1 P (with loc.); त्वयि वितरतु भद्रं (U. 3) 'b. you with auspicious good. 3 सुखिन्-धन्य *a.* कृ 8 U, ' was b. ed with a son' सुतलाभेन कृती बभूव. **-ed,** *a.* धन्य, महाभाग; कल्याण (णी *f.*), मंगल, सुखिन्, सुखभाज्; ' of b. memory or name ' सुगृहीतनामन् *a.* (म्नी *f.*), पुण्यश्लोक. **-edness,** *s.* धन्यता, कृतार्थता. 2 परमानंदः, परमसुखं; परं पदं, अपवर्गः. **-ing,** *s.* आशिस् *f.* आशीर्वादः; आशीर्वचनं. 2 वरः, हितं, उपकारः, कुशलं, धन्यत्वं; लाभः, सुखं.

Blight, *v. t.* विफलीकृ 8 U, नश् c., *See* **Blast**; ' schemes of policy b. ed by opposing fate' विगुणविधियोगान्नयाः फलैर्हीनाः (Mu. 6). **-s.** नाशः, क्षयः.

Blind, *a.* अंध; ' born b. ' जन्मांधः, ' b. following the b. ' अंधपरंपरा; 'b. of one eye' अक्ष्णा काणः. 2 अज्ञान, हतज्ञान. **-v. t.** अंधीकृ 8 U, अंधयति (D.); ' b. ed by rage ' क्रोधांधः; 'b. ed by lust ' कामांधः &c. **-s.** तिरस्करिणी, व्यवधानं, यवनिका. 2 छद्मन् *n.*, कपटं. **-fold,** *v. t.* वस्त्रेण नयने पिधा 3 U or बंध् 9 P or अवरुध् 7 U : 'b. ed' बद्धनेत्र, अवरुद्धनयन. **-ly,** *adv.* अंधवत्, असमीक्ष्य, रभसा, साहसेन. **-ness,** *s.* अंधता. 2 अज्ञानं, मोहः.

Blink, *v. i.* निमील् 1 P, निमिष् 6 P. **-s.**, **-ing,** निमि(मे)षः, दृष्टिनिपातः, निमीलनं.

Bliss, *s.* परमसुखं, सुखातिशयः, प्रहर्षः, धन्यता. अत्यंतसुखं. 2 अपवर्गः; *See* **Beatitude.**

-ful, *a.* आनंदमय (यी *f.*), धन्य, सानंद, परमसुखभाज् ; सुखावह. **-fully,** *adv.* परमानंदपूर्वकं, सानंदं, ससुखं. **-less,** *a.* सुखहीन-रहित, निरानंद.

Blister, *s.* त्वक्स्फोटः, शोफः; व्रणः-णं, 'b. on the foot' पादस्फोटः, विपादिका. 2 स्फोटजननः उपनाहः. **-***v. t.* स्फोटं उत्पद् c.

Blithe, Blithesome, *a.* हृष्ट, प्रमुदित, सानंद, प्रसन्नवदन. **-ly,** *adv.* सहर्षं, सानंदं, हृष्टमनसा. **-ness,** *s.* प्रहर्षः, आह्लादः, आनंदः.

Blizzard, *s.* सहिमवात्या, हिमवर्षयुतः प्रभंजनः.

Bloat, *v. t.* श्वि c., आप्यै c., पीनीकृ 8 U. **-***v. i.* स्फाय् 1 A, श्वि 1 P, आप्यै 1 A. **-ed,** *a.* शून, पीन, स्फीत, आप्यायित. 2 दृप्त.

Block, *s.* काष्ठं, शिला (of stone); 'b. of snow' शिलीभूतं हिमं, घनं हिमं. 2 वध्यशिलाकाष्ठं. 3 उपरोधः, प्रत्यूहः, अंतरायः. 4 पिंडः, भारः. **-up,** *v. t.* नि-,अव-,प्रति-,रुध् 7 U, स्तंभ् 9 P, प्रतिबंध् 9 P, आवृ 5 U, (आवृत्य पंथानमजस्य तस्थौ R. vii. 31). **-ade,** *v. t.* रुध् 7 U, *See* **Besiege.** **-***s.* उप-अव-रोधः, परिवेष्टनं. **-head,** *s.* मृत्पिंडबुद्धिः, स्थूलधीः, मूढः, दुर्बुद्धिः, मूर्खः.

Blood, *s.* रक्तं, रुधिरं, शोणितं, लोहितं, अस्रं, असृज् *n.*, 'shed b.' रुधिरं पत् c.; 'take one's b.' हन् 2 P. 2 गोत्रं, वंशः, कुलं; 'of whole b.' सोदर, सोदर्य, सगर्भ ; सनाभि ; 'of noble b.' कुलीन, अभिजात; 'of royal b.' राजकुलप्रसूत. 3 (Temper) शीलं; 'not-b. ed' तीव्रकोप, सुलभकोप ; 'b. rising to the cheeks' कोपप्रदीप्तानन:. **-***v. t.* रक्तेन लिप् 6 P or अंज् 7 P. **-less,** *a.* रक्तहीन. 2 रक्तस्रावं विना. **-letter,** *s.* रक्तस्रावकः, रुधिरमोक्षकः. **-red,** *a.* रक्त-लोहितवर्ण. **-shed,** *s.* रक्तस्रावः-पातः, नृहत्या. **-shot,** *a.* रक्तपूर्ण, शोणिताप्लुत. **-thirsty,** *a.* रुधिरप्रिय ; जिघांसु, वधोद्यत. **-vessel,** *s.* रक्तवाहिनी, नाडी, शिरा, असृग्वहा, धमनी. **-y,** *a.* रक्तमय (यी *f.*), रक्ताक्त. 2 क्रूर, मारात्मक, नृशंस; 'a b. battle it was' तस्मिन् युद्धे महारक्तस्रावोऽभूत्.

Bloom, *s. See* **Blossom** below ; 'b. of youth' यौवनभरः, नवयौवनं; 'in the b. ing youth' प्रथमे वयसि, नवयौवने. 2 रागः (कपोलरागः). **-***v. i.* फुल्ल् 1 P, विकस् 1 P, स्फुट् 6 P, 2 वर्ध् 1 A, एध् 1 A.

Blossom, *s.* पुष्पं, कुसुमं, मुकुलः-लं, प्रसवः, **-***v. i.* स्फुट् 6 P, प्रफुल्ल् 1 P, भिद् pass.; विकस् 1 P, मुकुलैः संभृद्ध *a.* भू. **-ed, -ing,** *a.* स्फुटित, प्रफुल्ल, विकसित, भिन्न, विकच, स्फुटितकुसुम ; स्मित.

Blot, *s.* कलंकः, दोषः, लक्ष्मन् *n.*, अपयशस् *n.* 2 लोपः, व्यामर्षः. **-***v. t.* मलिनयति (D.), दुष् c. (दूषयति), कलंकयति (D.), कृष्णीकृ 8 U. 2 अस्पष्टीकृ ; 'b. out' विनश् c., उच्छिद् 7 P, विलुप् *u.*, व्यामृज् c., व्यामृश् c. 'b. ing paper' मसीशोषकः, °कं पत्रं.

Blotch, *s.* किलासं, सिध्मं ; स्फोटः, विस्फोटः व्रणः-णं, सिध्मन् *n.*; 'having b. es' किलासिन्, सिध्मल. **-***v. t.* मलिनयति (D.).

Blow, *s.* आ-अभि-घातः, प्रहारः ; पातनं. निर्घातः; 'Oh ! the hard b. of Fate' अहह दारुणो दैवनिर्घातः (U. 2); 'b. with the fist' मुष्टिघातः-प्रहारः; 'to strike a b.' मुष्टिना तड् 10 or हन् 2 P or प्रहृ 1 P or अभि-आ-हन् 2 P ; युध् 4 A, युद्धार्थं संमिल् 6 P. 2 स्फुटनं, विकासः, फुल्लनं. **-***v. i. See* **Blossom**; oft. by स्मि 1 A; 'b. n Pâtala flower' स्मितपाटलं. 2 वा 2 P, वह् 1 P, प्रवह्. 3 श्वस् 2 P, उच्छ्वस्, विनिश्वस्. **-***v. t.* उद्-हन् 2 P, उद्-धू 9 U, उत्-क्षिप् 6 P, वह्. 2 उत्-, श्वि c., स्फाय् c. (स्फावयति).; 'dust b. n by wind' अनिलोद्धतं रजः. 3 (As an instrument) ध्मा 1 P, मुखमारुतेन पूर् 10. (स्नानशंखानामापूर्यमाणानां Ka. 16); 'b. hot and cold' निग्रहानुग्रहौ (युगपत्) प्रकटयति (D.). **-away,** उद्-हन्, उद्धृ, उत्क्षिप्. **-out,** निर्वा c. (निर्वापयति). **-up,** वि-उत्-धू, सहसा उन्मूल् 10. **-upon,** वीज् 10. **-ing,** *s.* विकासः, व्याकोशः, स्फुटता, प्रोत्फुल्लता. 2 नादः; ध्मानं. **-pipe,** *s.* धमनी; वेणुधमनी.

Blubber, *s.* तिमिमेदस् *n.* **-***v. i.* अतिरोदनात् उच्छूनमुख *a.* (खी *f.*) भू. **-ed,** *a.* उच्छून, स्फीत.

Bludgeon, *s.* लगुडः, गदा.

Blue, *a.* नील, श्याम. **-***s.* नीलः, नीलिमन् *m.*, नीलवर्णः. **-ish,** *a.* आनील, ईषन्नील.

Bluff, *a.* स्थूल; *See* **Big.** 2 रूक्ष, परुष, उग्र.

Blunder, *s.* प्रमादः, स्खलितं, दोषः. **-***v. i.* प्रमद् 4 P, स्खल् 1 P, भ्रम् 1, 4 P. **-er,** *s.* प्रमादिन् *m.*, स्खलनशीलः. **-ing,** *a.* प्रमादिन्, प्रमत्त, अनवधान, अदक्ष. **-ingly,** *adv.* सप्रमादं, स्खलनपूर्वं.

Blunt, *a.* धाराहीन, अतीक्ष्ण, कुंठित, निस्तेजस्. 2 स्थूल, घन; मंद, अविदग्ध. 3 सरल, अजिह्म; ऋजुप्रकृति. 4 रूक्ष, परुष, कर्कश, असभ्य. **-***v. t.* कुंठीकृ 8 U, तीक्ष्णतां विलुप् c. ; कृ with (*a.*) ; तेजो हृ 1 P. 2 न्यूनीकृ, शम् c. (शमयति). **-ly,** *adv.* सरलतया, अजिह्मं ; परुषोक्त्या, सपारुष्यं; अविदग्धं **-ness,** *s.* अतीक्ष्णता, स्थूलता, पारुष्यं, &c.

Blur, *s.* कलंकः, मलं, दूषणं. **-***v. t.* मलिनयति (D.). मलेन लिप् 6 P.

Blurt, *v. t.* असमीक्ष्य-अविचार्य-वद् 1 P.

Blush, *v. i.* लज्जां नट् 10, ह्री 3 P, लज्ज् 6 A, त्रप् 1 A; व्रीडया-त्रपया-अधोमुख *a.* (खी *f.*) भू 1 P. **2** अरुणीभू, लोहितायते (D.). –*v. t.* अरुणीकृ 8 U. –*s.* अरुणिमन् *m.*, रक्तिमन् *m.*, कपोलरागः. **2** लज्जा, व्रीडा, त्रपा, ह्रीः; ‘ put to b. ’ ह्री c. (ह्रेपयति). **-ing,** *a.* प्रफुल्ल, विकसित; ‘ bears b. honors ’ संमानरूपाणि विकसितकुसुमानि धारयति, संमानरूपपुष्पभरेणानतः. **2** (Blushful) लज्जित, सव्रीड, सत्रप, लज्जावनत, ह्रीपरिगत, त्रपाधोमुख (खी *f.*).

Bluster, *v. i.* गर्ज् 1 P, तुमुलं-कोलाहलं कृ 8 U, उच्चैः आरट् 1 P, उत्क्रुश् 1 P. **2** विकत्थ् 1 A, श्लाघ् 1 A. **3** तर्ज् 10 A, भर्त्स् 10 A. **-er,** *s.* कलहकारः, दांभिकः, विकत्थिन्; आत्मश्लाघापरः. :–*s.*, **-ing,** *s.* गर्जनं, तुमुलं, कोलाहलः; उच्चैः आरटनं, उत्क्रोशः.

Boa-constrictor, *s.* अजगरः, शयुः, वाहसः.

Boar, *s.* वराहः, किरिः-रः, शू(सू)करः, कोलः, घृ(गृ)ष्टिः, पोत्रिन् *m.*, किटिः, दंष्ट्रिन् *m.*, घोणिन् *m.*, स्तब्धरोमन् *m.*, क्रोडः, भूदारः. **-ish,** *a.* वाराह (ही *f.*). **2** असभ्य, ग्राम्य.

Board, *s.* फलकः-कं; भोजनासनं, काष्ठखंडं. **2** ग्रासः, भोजनं, आहारः. **3** सभा, परिषद् *f.*, समाजः, गणः, वर्गः. **4** नौकातलं-पृष्ठं; ‘ to go on b. a ship ’ पोतं आ-अधि-रुह् 1 P; ‘ on b. ’ नौकारूढ *a.*, नौतले. **5** अष्टापदं, शारिफलं. –*v. t.* बलात् नावं आरुह् 1 P. **2** फलकैः आस्तृ-स्तॄ 5, 9 U. **-er,** *s.* निरूपितमूल्येन भोक्तृ *m.*

Boast, *v. i.* विकत्थ् 1 A दृप् 4 P, (with instr.) नात्मना दृप्यति; आत्मानं श्लाघ् 1 A, गर्वं वह् 1 P (with gen.); (मुधा यौवनगर्वं वहसि M. 4). **-er,** *s.* आत्मश्लाघिन् *m.*, विकत्थनशीलः, शूरंमन्यः. **-ful,** *a.* आत्मश्लाघापर, विकत्थन, दृप्त, गर्वित, अवलिप्त. **-fully,** *adv.* गर्वेण, सदर्पं, विकत्थनपूर्वं. **-ing,** *s.* आत्मश्लाघा, अहंकारोक्ति *f.*, दर्पः, विकत्थनं, गर्वः. **-ingly,** *adv.* सगर्वं, सदर्पं.

Boat, *s* नौः, तरीः, तरणि-णी *f.*; ‘ a small b. ’ उडुपं, नौका, प्लवः, कोलः; ‘ b. man ’ *s.* नाविकः, पोतवाहः, औडुपिकः; ‘ b. swain ’ *s.* मुख्यनाविकः, कर्णधारः.

Bob, *v. t.* तड् 10; *See* **Beat. 2** Crop, q. v. –*v. i.* इतस्ततो लुट् 6 P, 1 A, स्फुर् 6 P, चंच् 1 P.

Bobbin, *s.* तंतुकीलः, कपालनाडिका.

Bobtail, *s.* छिन्नपुच्छधारिन् *m.* छिन्नपुच्छः.

Bode, *v. t.* शुभाशुभं सूच् 10; आविद् c., कथ् 10., प्राक् शंस् 1 P, *See* **Predict;** ‘absence of delay b.s future success ’ अभ्याक्षेपो भविष्यंत्याः कार्यसिद्धेर्हि लक्षणं (R. x. 6); ‘ b.s evil to the country ’ जनपदस्य अनिष्टशंसि-सूचक, अशुभचिह्न-लक्षणं. **-ment,** *s.* शुभाशुभलक्षणं; पूर्वचिह्नं, निमित्तं.

Bodice, *s.* कंचुकः, चोलः, कूर्पासकः-कं.

Bodkin, *s.* सूचि-ची *f.* **2** छुरिका, वेधनिका, कृपाणिका।

Body, *s.* शरीरं, कायः, देहः, विग्रहः, अंगं, वपुस् *n.*, कलेवरं, तनु-नू *f.*, गात्रं; ‘dead b. ’ शवः-वं,, कुणपः. **2** (Some b.) कः or का or किम्-अपि or चित् or चन; जनाः, लोकः. **3** पदार्थः, वस्तु *n.* **4** समवायः, समूहः, संघातः, वृंदं, समाजः, समुदायः; ‘ in a b. ’ समेत *a.*, संहत *a.*, एकत्र मिलित *a.* **5** समागमः, श्रेणी. **6** कांडः-डं, स्कंधः; ‘ b. of the house’ गर्भः, अभ्यंतरं, उदरं; b. of troops’ सैन्यदलं; ‘ b. guard ’ आसन्नपरिचारकारिका, परिवारगणः. **-Bodiless,** *a.* अ (अन्) in comp. with (*s.*); अनंग, &c. **-Bodily,** *a.* शारीरिक-दैहिक-कायिक (की *f.*); gen. (*s.*) in comp. ; ‘ b. pain ’ शरीरवेदना, देहक्लेशः &c. –*adv.* सशरीरं, सांगं. **2** साकल्येन.

Bog, *s.* अनूपः, कच्छभूः, पंकः. **-Boggy,** पंकिल, आनूप (पी *f.*).

Boggle, *v. i.* वि-आ-शंक् 1 A, संदिह् 2 U, विकल्प् 1 A. **-er,** *s.* शंकितमतिः, शंकाशीलः

Bogus, *a.* छाद्मिक.

Bogy, *s.* पिशाचः, भूतः.

Boil, *v. t.* पच् 1 P, उत्क्वथ् 1 P, श्रा 2 P. –*v. i.* क्वथ् pass., तप्-पच् pass. ; ‘ b.ing with anger ’ कोपपरीतमानसः, संतप्तचित्तः. **2** फेनायते (D.). –*s.* व्रणः-णं, स्फोटः, विस्फोटः, पिटकः, पिट(टि)का, गंडः. **-ed,** *a.* उत्क्वथ, पक्व, स्थालीपक्व. **2** श्राण, शृत. **-er,** *s.* स्थाली, पिठरः-रं; उखा.

Boisterous, *a.* गर्जनकारिन्; प्रचंड, उत्कट; ‘ b. noise ’ कोलाहलः, तुमुलरवः, उच्चैराक्रोशः. **2** कलह-तुमुल-कारिन्; ‘ b. laugh ’ अट्टहासः. **-ly,** *adv.* प्रचंडं, उत्कटं, कोलाहलेन. **-ness,** *s.* प्रचंडता, &c.

Bold, *a.* शूर, साहसिक (की *f.*), साहसपर. **2** (Of things) साहसाभ्यस्त, साहसं, (इति वचनं साहसमात्रं S. B. 79). **3** (Rude) धृष्ट, निर्लज्ज, अविनीत. **4** प्रगल्भ, निर्विशंक, निर्भय, निर्भीक. **5** सुप्रकाश, स्पष्ट; ‘ he made b. to say ’ स निर्भयमुवाच; ‘ to be b. ’ धृष् 5 P. **-ly,** *adv.* साहसेन, निर्भयं, प्रगल्भं; धृष्टतया. **-ness,** *s.* साहसं, शौर्यं. **2** धृष्टता, अविनयः. **3** प्रगल्भता, निर्भयता.

Bole, *s.* स्कंधः, प्रकांडः.

Boll, *s.* नाडि-डी *f.* ; कांडः-डं.

Bolster, *s.* उपधानं, उपबर्हः ; बधः; आलंबः. –*v. t.* (up) संस्तंभ् 9 P. समालंब् 1 A.

Bolt, *s*. अर्गलाबंधः, अर्गलं, कीलकं, कीलः-लं. 2 शूलः-लं, शंकुः, शरः. -*v. t.* अर्गलेन रुध् 7 U or पिधा 3 U or बंध् 9 P; कीलयति (D.). 2 तितउना क्षुभ् c. or चल् c. -*v. i.* (away, out) सहसा-अलक्षित निर्गम्-निःसृ 1 P, or अपक्रम् 1 U, 4 P, or अपया 2 P.

Bolus, *s*. गुली, गुलिका.

Bomb, *s*. अग्न्यस्त्रं. **-ard,** *v. t.* अग्न्यस्त्रेण अवमृद् 9 P, or विद्रु 9 U, 10, or चूर्ण् 10.

Bombast, *s*. दर्पवचनं, अतिशयोक्ति *f.*, असारं वाक्यं, निःसारा उक्तिः. **-ic, -ical,** *a*. असार; दर्पध्मात.

Bonafide, *a*. निर्व्याज, निर्व्यलीक. 2 *adv*. वस्तुतः, तत्त्वतः. **-s,** *s*. निर्व्याजता, निर्व्यलीकता.

Bond, *s*. बंधः, बंधनं, पाशः, जालं; (fig. also); निगडाः (pl.); 'b. of love' प्रेमबंधः-पाशः. 2 संश्लेषः, संहति *f.*, संधिः, संबंधः. 3 प्रतिज्ञापत्रं-लेख्यं, समयपत्रं. 4 समयः, नियमः, संविद् *f*. **-age,** *s*. बंधनं, दासत्वं; 'died in b.' कारागृहे-दासावस्थायां मृतः; 'bond-maid' दासी, चेटी; 'bondman' दासः, भृत्यः, किंकरः.

Bonbon, *s*. मोदकः, शर्करान्वितं द्राक्षं.

Bone, *s*. अस्थि. *n.*; 'set a b.' त्रुटितास्थि संधा 3 U. **-less,** *a*. अस्थिहीन, निरस्थि. **-y,** *a*. अस्थिमय (यी *f.*). 2 अस्थिमत्, अस्थिपूर्ण.

Bonfire, *s*. जयसूचकः अग्निः.

Bonhomie, *s*. सौजन्यं, सुजनता.

Bonmot, *s*. नर्मवचनं, रसिकोक्ति *f*.

Bonnet, *s*. स्त्रीधृतं शिरोवेष्टनं, शिरस्कं.

Bonny, *a*. सुंदर (री *f.*); रूपवत् *See* **Beautiful.** 2 हृष्ट, सुप्रीत, प्रमुदित. 3 हृष्टपुष्ट, सुललित.

Bonton, *s*. विनीताचारः, सुजनता.

Bonus, *s*. वेतनाधिकं दानं.

Bonvivant, *s*. सुखैकवृत्ति *m*.

Booby, *s*. मंदबुद्धिः, मूढः, मूर्खः.

Book, *s*. पुस्तकं, ग्रंथः; 'part of a b.' अध्यायः, पर्वन् *n.*; 'b. case' ग्रंथाधारः, ग्रंथकुटा; 'b. mate' सहाध्यायिन् *m.*; 'b. worm' ग्रंथवाचनासक्तः. -*v. t.* लेख्ये आरुह् c. **-ish,** *a*. पुस्तकपठनाल्लब्धः; व्यवहारविसंवादिन्, अव्यवहार्य.

Boom, *s*. वातवसनयष्टि, *f*. 2 नौकाश्रयद्वारावरोधकं.

Boon, *s*. वरः, प्रसादः, अनुग्रहः. -*a*. हृष्ट, विलासिन्, उदार, प्रमुदित. 'b. companion,' *s*. सहपायिन् *m.*, सहभोजिन् *m*.

Boor, *s*. ग्राम्यः जनः, ग्रामिकः, वृषलः. **-ish,** *a*. ग्राम्य, अशिष्ट, असभ्य.

Boot, *v. t.* or *s*. *See* **Avail.** -*s*. उपानह् *f.*, पादुका, पादत्रं. **-less,** *a*. निष्फल, व्यर्थ, निरर्थक, मोघ, निर्गुण.

Booth, *s*. पटमंडपः, उपकार्या, पटभवनं.

Booty, *s*. लोप्त्रं, लुंठितं, लुंठनं.

Borax, *s*. रसशोधनः, विहं.

Border, *s*. पर्यंतः-तं, प्रांतः, परिसरभूमि *f.*, उत्संगः, उपांतः. 2 (Of a garment) अंचलः, दशा. 3 समंतः, सीमा, सामंतं. 4 तीरं, कूलं, तटं (of a river); 'b. of a forest' वनांतः. -*v. i.* (on, upon) Ex. by वृत् 1 A, स्था 1 P, with (*s.*); जनस्थानपर्यंतानि दीर्घारण्यानि (U. 2) 'large forests b. ing on Janasthāna'; 'his age b. s on 20' विंशतिवर्षवयोवस्थां स्पृशति, विंशतिवर्षदेशीयोऽसौ. 2 कल्प, प्राय, in comp.; 'his condition b. s on poverty' तस्य दशा दारिद्र्यात्किंचिदूना, दारिद्र्यकल्पा. -*v. t.* प्रांतयति (D.), पर्यंतं कृ 8 U: पर्यंते निविश् c.; 'garment b. ed with silk' निर्मितकौशेयप्रांतं वसनं. **-ing,** *a*. प्रत्यंत, पर्यंतस्थ, निकटस्थ.

Bore, *s*. छिद्रं, रंध्रं. 2 वेधनी. 3 सुषिरं, छिद्रव्यासः. 4 वेलोर्मि *f.*, वेलातरंगः. -*v. t.* व्यध् 4 P, छिद्रं कृ 8 U. **-er,** *s*. वेधकः.

Boreal, *a*. उदीचीन, उत्तर.

Boreas, *s*. उत्तरवायुः.

Borrow, *v. t.* ऋणं कृ 8 U, or प्रार्थ् 10 A or ग्रह् 9 P. 2 अन्यस्माद् ग्रह् or आदा 3 A, or लभ् 1 A. **-er,** *s*. ऋणकर्तृ-गृहीतृ *m.*, ऋणयाचकः.

Bosom, *s*. वक्षस् *n.*, उरस् *n.*, क्रोडं, वक्षःस्थलं. 2 गर्भः, अभ्यंतरं. 3 हृदयं, चित्तं, मनस् *n.*; 'b. friend' हृदयंगमः सखा, प्रियसुहृद्. 4 स्तनः, कुचः, वक्षोजः.

Boss, *s*. गंडः. 2 नियामकः. **-ed,** *a*. गंडानुविद्ध.

Botany, *s*. उद्भिद्विद्या, औषधिशास्त्रं, वनस्पतिशास्त्रं. **-ist,** *s*. औषधिशास्त्रज्ञः.

Botch, *s*. व्रणः-णं, स्फोटः. 2 छिद्रं, दोषः. -*v. t.* जीर्णवस्त्राणि सिव् 4 P, सूच्या संधा 3 U.

Both, *pron. a*. उभौ, उभे; उभय-द्वि in comp.; उभयं, द्वयं; 'b. sides' उभयपक्षौ; 'on b. sides' उभयतः; 'in b. ways' उभयथा; 'in b. places' उभयत्र. 2 Ex. by च-च, तथा; 'does b. good and bad' शुभं चाशुभं च विदधाति.

Bother, *v. t.* क्लिश् 9 P, पीड् 10, बाध् 1 A.

Bottle, *s*. काचकूपी-पात्रं-भाजनं. -*v. t.* काचकूप्यां निविश् c.

Bottom, *s*. तलं, अधोभागः; 'examine it to the b.' आमूलं-तलं परीक्षस्व तत्; 'you are at the b. of this plot' अस्य कपटप्रपंचस्य त्वं मूल-प्रधान-कारणं. त्वं प्रधानः प्रवर्तकः. 2

दरी, उपत्यका, निम्नभूः, पादः. 3 मलं, शेषं, अवशेषं. -*v. i.* (upon) आलंब् 1 A, मूल in comp. **-less,** *a.* अगाध, अतलस्पर्श.

Boudoir, *s.* नेपथ्यगृहं.

Bouffant, *a.* नेपथ्य-वेश-आध्मात.

Bough, *s.* शाखा, विटपः.

Boulder, *s.* *See* '**Rock.**'

Bounce, *v. i.* प्रपत् 1 P, अभि-उत्-प्लु 1 A, सत्वरं-सवेगं-धाव् 1 P or पलाय् 1 A. **2** स्वन्-ध्वन् 1 P. **3** **Boast,** *q. v.* -*s.* स्फोटः, ध्वनिः, अकस्मादाघातः.

Bound, *s.* प्लुति *f.*, प्लुतं, वल्गनं. **2** मर्यादा, सीमन् *f.*, सीमा, प्रांतः, पर्यंतः, अंतः. **3** प्रतिघातः, उत्पतनं. -*v. t.* Ex. by सीमा, प्रांत; 'b. ed on the south by the ocean' अस्य दक्षिणा सीमा सागरः; 'b. ed by dales on all sides' दरीपरिगतः; *See* **Border. 2** नियम् 1 P, निग्रह् 9 P. -*v. i.* उत्प्लु 1 A, वल्ग् 1 P. **-up,** उत्पत् 1 P. **-less,** *a.* अनंत, अमित, निःसीम, निरवधि. **-Boundary,** *s.* सीमा, सीमन् *f.*, मर्यादा, पर्यंतः, प्रांतः, अवधिः.

Bounteous, Bountiful, *a.* वदान्य, उदार, मुक्तहस्त, दान-त्याग-शील. **-ly,** *adv.* अतित्यागेन, उदारवत्, मुक्तहस्तं. **-Bounty, -ness,** *s.* औदार्यं, वदान्यता, मुक्तहस्तता, त्यागिता. **2** प्रदानं, पारितोषिकं. **3** कृपा, अनुग्रहः, प्रसादः.

Bouquet, *s.* कुसुमस्तबकः, पुष्पगुच्छः.

Bourn, *See* **Boundary.**

Bout, *s.* वारः; 'drinking b.' संपीति *f.* **2** कलहः.

Bovine, *a.* गव्य.

Bow, *v. i.* नम् 1 P, प्रणम् (acc. or dat.); अभिवद् c., अभिवंद् 1 A, प्रह्वीभू; चरणयोः पत् 1 P. **2** अंगीकृ 8 U, अभ्युप-इ 2 P, °गम् 1 P; oft. by प्रमाणं; 'I b. to your decision' आर्यमिश्राः प्रमाणं (M. 1) or भवतो निर्णयो मे प्रमाणं. -*v. t.* अव-आवि-नम् c. (नमयति), प्रह्वी-नम्रीकृ; 'b. ing the head down' प्रणम्य शिरसा; 'b. ed down with age' जरानमितकायः; 'b. ing down the head on the ground' अवनितलनिवेशितलोल-शिरस् *a.*; -*s.* प्रणामः, प्रणति *f.*, नमस्कारः. **2** धनुस् *n.*, चापः-पं, कार्मुकं, शरासनं, कोदंडं, इष्वासः, शरावापः; 'b. man' धन्विन् *m.*, धनुष्मत् *m.*, धनुर्धरः, धनुर्भृत् *m.*, धानुष्कः, निषंगिन् *m.*; 'b. string' *s.* ज्या, मौर्वी, गुणः, शिंजिनी; 'b. shot' बाणगोचरं, शरपथः-विषयः. -*interj.* नमः. (with dat.).

Bowels, *s.* अंत्राणि (pl.). **2** (fig.) अभ्यंतरं, गर्भः.

Bower, *s.* कुंजः-जं. लतामंडपः. **2** कुटीरः, पर्णशाला. -*v. t.* परिवेष्ट् 1 A, परिवृ 5 U or c. **-y,** *a.* कुंजवत्, लतापरिच्छन्न.

Bowl, *s.* पात्रं, भाजनं, शरावः. **2** गुलिका. **3** विषं. -*v. i.* गुलिकाभिः क्रीड् 1 P.

Box, *s.* पेटिका, समुद्गकः, संपुटः, पिटकः, मंजूषा. **2** मुष्टिप्रहारः-घातः, पाणिघातः. -*v. i.* मुष्टीमुष्टि प्रहृ 1 P; बाहूबाहवि-युध् 4 A or तड् 10: मल्लयुद्धं कृ 8 U. -*v. t.* मुष्टिना प्रहृ or तड्. **2** संपुटके निधा 3 U. **-er,** *s.* मल्लयोधः, बाहुयोधिन् *m.* **-ing,** *s.* मल्लयुद्धं, बाहुयुद्धं, बाहूबाहवि *ind.*

Boy, *s.* बालः-लकः, शिशुः, कुमारः-रकः, दारकः. **-hood,** *s.* बाल्यं, कौमारं; शैशव, बालभावः. **-ish,** *a.* बालिश, बालेय. **2** शिशुयोग्य; बालसदृश (शी *f.*), बालभावसुलभ; 'b. nature' बालभावः, शिशुत्वं, बालिशता.

Boycot, *s.* व्यवसायबहिष्कारः -*v. t.* व्यवसायाद्बहिष्कृ 8 U.

Brabble, *See* **Quarrel.**

Brace, *s.* युग्मं, युगं, युगलं, द्वयं, युगुलं. **2** बंधः-धनं, चर्मबंधः. -*v. t.* बंध् 9 P. **2** दृढीकृ 8 U, संस्तंभ् 9 P or c., शक्ति-बलं-वृध् c. **-ing,** *a.* शक्ति-बल-वर्धक.

Bracelet, *s.* कंकणं, कटकः-कं, आवापकः, पारिहार्यः, हस्तसूत्रं, वलयः-यं; करभूषणं; 'marriage b.' विवाहकौतुकं.

Bracket, *s.* नागदंतः. **2** अर्धचंद्रद्वयं.

Brackish, *a.* क्षार, क्षाररसयुक्त.

Brag, *v. i.* विकत्थ्-, श्लाघ् 1 A; *See* **Boast.** -*s.* आत्मश्लाघा, विकत्थनं, वृथास्तुति *f.* **-ingly,** *adv.* साहंकारं, आत्मश्लाघापूर्वं. **-Braggart, (Braggadocio)** *s.*, *a.*, विकत्थनशीलः, आत्मश्लाघिन् *m.*, आत्मश्लाघापरः, पिंडीशूरः.

Brahman, *s.* ब्राह्मणः, विप्रः, द्विजः, द्विजन्मन् *m.*, अग्रजन्मन् *m.*, भूसुरः, भूदेवः; 'a pseudo b' ब्राह्मणब्रुवः. **-ical,** *a.* ब्राह्म (ह्मी *f.*); ब्राह्मणजातीय.

Braid, *s.* कबरी, वेणि-णी *f.*, धम्मिल्लः, केशबंधः-पाशः. -*v. i.* वेणीकृ 8 U, वेणीरूपेण केशान् संग्रंथ् 9 P or रच् 10. **2** संग्रंथ्, वे 1 P, संश्लिष् c., संसिव् 4 P.

Braille, *s.* अंधलिपि *f.*

Delf, *s.* मृद्भांडं, मृण्मयद्रव्यं, कौलालकं.

Deliberate, *v. i.* विचर् c., चिंत् 10, विमृश् 6 P, संमंत्र् 10 A, विकॢप् c.; *See* Consider. –*a.* कामतः-विचारपूर्वकं-कृत, विमृश्यकृत. 2 विमृश्यकारिन्, स्ववहित, असाहसिक, अप्रमत्त. –**ion,** *s.* विचार-रणं-रणा, चिंता, मंत्रणं-णा, विमर्शः, समीक्षा, वितर्कः, विवेचनं, चर्चा. –**ive,** *a.* विचारशील, विचारिन्, विमर्शिन्. –**ly,** *adv.* जानत् with अपि or एव, बुद्धिपुरःसरं कामतः, विचारपूर्वकं 2 विमृश्य, समीक्ष्य, अवधानेन, असहसा, अप्रमत्तं. –**ness,** *s.* समीक्ष्य-विमृश्य-कारित्वं, अप्रमादः, सावधानता, अवेक्षा.

Delicate, *a.* मधुर, स्वादु, मिष्ट. 2 ललित, चारु, शोभन. 3 (Soft) मृदु, कोमल, सुकुमार, तनु, श्लक्ष्ण, लघु, प्रतनु, विरल, पारे,-पेलव; 'd. of person' कोमलांग (गी *f.*), मृदुशरीर; 'a d. woman' तन्वी, तन्वंगी, पेलवांगी. 4 विशिष्ट, उत्कृष्ट, उत्तम. 5 सभ्य, विनीत, शिष्ट, 'of a d. constitution' प्रकृतिकोमल, जन्मरोगिन्. –**ly,** *adv.* ललितं, सुकुमारं; मृदुतया. –**Delicacy,** *s.* माधुर्यं, स्वादुता, सौरस्यं. 2 लालित्यं, लावण्यं. 3 सौकुमार्य, मार्दवं, पेलवता, तनुता. 4 आदरः, विनयः, शिष्टाचारः, सुशीलता, सौजन्यं. 5 प्रकृतिदुर्बलता. 6 स्वाद्वन्नं, भोजनविशेषः, विशिष्टान्नं

Delicious, *s.* स्वादु, मिष्ट, रुचिकर (री *f.*), मधुर, सुरस, आस्वादवत्. 2 (of beauty &c.) मनोरम-हर, मधुर, कमनीय, रमणीय, हारिन्, चित्ताकर्षिन्. –**ly,** *adv.* स्वादु, मधुरं, मनोरमं. –**ness,** *s.* स्वादुता, माधुर्यं, रम्यता, &c.

Delight, *s.* आह्लादः, आ-प्र-मोदः, सुखं, हर्षः, प्रीति *f.*, प्र-सं-मदः, उल्लासः, शर्मन्, आनंदः, संतोषः, तृप्ति *f.*, मुद्-दा *f.*; 'takes no d. in sports' नाभिनंदति केलिकलाः (Mal. 3); 'thrill of d.' पुलकः, रोमांचः; 'thrilling with d.' आनंदपुलकिततनुः. 2 आनंदनं, आनंददः, हर्षकरः, आनंदहेतुः. –*v. i.* 'to be d.ed' मुद् 1 A, हृष् 4 P, आनंद् 1 P, ह्लाद् 1 A, रम् 1 A, प्री 4 A, सं-परि-तुष् 4 P, उल्लस् 1 P –*v. t.* सुखयति (D.) causal of roots above. –**ed,** *a.* सानंद, प्रीत, सहर्ष, मुदान्वित, हृष्ट, आह्लन्न, आनंदित, प्रमुदित, सोल्लास, आह्लादित, उल्लसित, साह्लाद. –**ful,** *a.* प्रमोदिन्, प्रामोदिक (की *f.*), आनंदप्रद, हर्षजनन (नी *f.*), आह्लादक, आनंदक, सुखदः रुचिर, कांत, रम्य, रमणीय, मनोहर-रम. –**fully,** *adv.* सानंदं, सहर्षं, साह्लादं; रम्यं, कांतं.

Delimit, *v. t.* मर्यादी कृ 8 U.

Delineate, *v. t.* वर्ण् 10; *See* Describe. 2 आलिख् 6 P, चित्र् 10, चित्रे निविश् c. –**ed,** *a.* चित्रलिखित, चित्रगत, आलिखित, वर्णित. –**ion,** *s.* आलेखनं, वर्णनं. 2 आलेख्यं, चित्रं, चित्रारंभः.

Delinquency, *s.* दोषः-अपराधः, पापं, दुष्कर्मन् *n.*, पापचरितं, अपक्रिया, दुष्कृति *f.* –**Delinquent,** *s.* पापिन्-पापकृत्-अपराधिन् *m.*, सदोषः, कृतापराधः.

Deliquesce, *v. i.* द्रवीभू 1 P, विली 9 P.

Deliquium, *s.* विलयनं, द्रवः.

Delirium, *s.* चित्तभ्रमः, चैतन्यनाशः, ज्ञानभ्रांति *f.* –**Delirious,** *a.* भ्रांतचित्त, नष्टचेतन, चैतन्यरहित.

Deliver, *v. t.* मुच् c., वि-प्र-मोक्ष् 10, उद्-हृ-धृ 1 P, निस्तॄ c., रक्ष् 1 P, परि-त्रै 1 A. 2 समृ c (अर्पयति), न्यस् 4P, प्रतिपद् c., प्र-दा 3 U, 1 P, संक्रम् c., आरुह् c. (रोपयति), हस्ते निक्षिप् 6 P, हस्तं प्राप् c., हस्तगत-गामिन् *a.* कृ 8 U. (तस्य वसुधामपि हस्तगामिनीमकरोत् R. viii 1); 'shall d. it into his hand (to him)' इमं अस्य हस्तं, प्रापयिष्यामि (S. 3); 'd. ed charge of office' स्वाधिकारं अन्यहस्ते न्यक्षिपत्. 3 उद्-ईर् c., उच्चर् c., उदाहृ 1 P, व्याहृ, वद् 1 P. 4 (Of a message) निविद् c. कथ् 10, आख्या 2 P, आचक्ष् 2 A, शंस् 1 P. 5 (Give back) उत्सृज् 6 P, प्रतिदा, निर्यत् c., (हस्तन्यासं निर्यातय V. 5)

'd. a woman' प्रसवं कृ c., सू c.; 'to be d.ed of' प्रसू 2 A, जन् c. (जनयति), उत्पद् c.; 'was d.ed of a son' सा पुत्रं प्रासूत. **-ance,** s. मोचनं, मोक्षः, मुक्ति f., उद्धारः, परित्राणं, रक्षणं, निस्तारणं, मोक्षणं, विमुक्तिः-मोचन. **-er,** s. मोचकः, रक्षकः, त्रातृ m., मुक्तिदातृ m., तारकः, उद्धर्तृ m. 2 निवेदकः, आख्यायकः. **-y,** s. मुक्ति f.; *See* Deliverance, above. 2 अर्पणं, निक्षेपणं, प्रतिपादनं, संक्रामणं, न्यसनं, प्रदानं. 3 उच्चारणं, उदीरणं, व्याहारः-हरणं; 'a fluent d.' अस्खलितभाषणं, अप्रतिहतभाषणौघः-वाक्सरणिः. 4 निवेदनं, विज्ञापनं, विज्ञप्ति f., कथनं. 5 उत्सर्गः, निर्यातनं, वितरणं. 6 प्रसवः, प्रसूति f., गर्भमोचनं; 'd. bed' अरिष्टशय्या, 'a woman near her d.' आसन्न-प्राप्त-प्रसवा; 'place of d.' अरिष्टं, सूतिकागृहं.

Dell, s. दरी, गुहा, कंदरः.

Delude, v. t. मुह् c., वंच् 10, प्रलुभ् c., आकृष् 1 P, वि-सं-भ्रम् c. (भ्रमयति); *See* Cheat also. **-er,** s. मोहकः, वंचकः, प्रतारकः, मायिन् m. **-Delusion,** s. मोहः, भ्रमः, आभासः, माया, मतिभ्रमः, इंद्रजालं, विवर्तः; 'the world is all a d.' विश्वमिदं मायामयं, असारं, विवर्त एव. 2 वंचनं, प्रतारणा, प्रलोभनं, कपटं. **-Delusive,-Delusory,** a. मायामय (यी f.), असार, मायिन्, मोहक, ऐंद्रजालिक (की f.), मोहिन्, मोह-भ्रांति-जनक.

Deluge, s. आप्लावः, संप्लवः, जलप्रलयः, भूतसंप्लवः, तोयविप्लवः; 'universal d.' प्रलयः, महासंप्लवः, संवर्तः, क्षयः, कल्पांतः. 2 धारासंपातः, वारिपूरः, अविरलधारासारः, अतिवृष्टिः f. 3 उत्पातः, आकस्मिकी आपद्. -v. t. प्लु c., आ-सं°, निमस्ज् c. (मज्जयति).

Delve, v. t. खन् 1 P, नि-अव°; उर्वीं भिद् 7 P. -s. खातं, विवरं, बिलं, गर्तः-र्तः. **-er,** s. खनकः, खनितृ m.

Demagogue, s. प्राकृतजननायकः, प्रजानायकः.

Demain, Demesne, s. स्वाधीना भूमिः.

Demand, v. t. प्रच्छ् 6 P, अनुयुज् 7 A, ज्ञा deside. (जिज्ञासते); 'd.ed his name' किं तव नामेति पप्रच्छ; 'd. a boon' वरं वृ-वृ-5, 9 U. 2 **Claim,** q. v. 3 अर्ह् 1 P; oft. by pot. pass. part.; 'Oh Goddess, Godâvari the matter d.s thy care (attention)' भगवति गोदावरि तत्र त्वया सावधानया भवितव्यं (U. 3); अयमर्थो विक्षामर्हति 'd.s consideration'; 'this offence d.s an atonement of serious expense' भूरिद्रव्यव्ययेनायं दोषः प्रमार्ष्टुं शक्यः, भूरिधनव्ययसाध्यप्रायश्चित्तः दोषः. -s. प्रश्नः, अनुयोगः, पृच्छा, जिज्ञासा. 2 अभियोगः, प्रार्थना, याचना; 'on d.' दातुं पृष्टः सन्. **-ant,-er,** s. प्रार्थयितृ m., याचितृ m., अभियोक्तृ m., अर्थिन् m.

Demarkation, s. सीमा-मर्यादा-परिच्छेदः.

Demean (oneself), v. i. वृत्तिं अनुष्ठा 1 P, चेष्ट् 1 A, वृत् 1 A, व्यवहृ 1 P; *See* Act. **-our,** s. वृत्ति f., आचरणं, आचारः, चेष्टितं, व्यवहारः.

Dementate, v. t. उन्मद् c. संज्ञां अपहृ 1 P. -a. उन्मत्त, नष्टसंज्ञ, मूढचित्त.

Demerit, s. अगुणः, दोषः, न्यूनता.

Demi, अर्ध, सामि *ind.* in comp.

Demi-god, s. नरदेवः, विद्याधरः, यक्षः, गंधर्वः, उपदेवता, देवयोनिः

Demi-man, s. अर्धपुरुषः-नरः, किन्नरः.

Demise, s. मृत्युः, मरणं, उपरति f. 2 समर्पणं, विधिवत् प्रदानं. -v. t. मृत्युपत्रेण प्रदा 3 U.

Demission, s. अवपातः, अवसादनं, अपकर्षणं.

Demobilize, v. t. *See* **'Disband.'**

Democracy, s. प्रजाप्रभुत्वं, प्रजासत्तात्मकं राज्यं, प्रजातंत्रं. **-Democrat,** s. प्रजातंत्रवादिन् m., प्रजापक्षानुकूलः, प्रजाप्रभुत्वानुग्राहकः, प्रजापक्षावलंबिन् m. **-tical,** a. सार्वलौकिक (की f.), प्रजातंत्रीय.

Demolish, v. t. विनश् c., उच्छिद् 7 P, अवसद् c., ध्वंस् c., प्र-वि-°; उन्मूल् 10, उत्पट् 10. **-er,** s. विनाशकः, उच्छेदकः. **-Demolition,** s. विनाशः, उच्छेदः, प्र-वि-ध्वंसः, उन्मूलनं, उत्पाटनं, अवसादनं.

Demon, s. दानवः, असुरः, रक्षस् n., राक्षसः, दैत्यः, दनुजः, दैतेयः, सुरद्विष्; भूतः, पिशाचः, रात्रि(त्रिं)चरः, निशाचरः, यातुधानः. **-iac,** s. भूताविष्टः, वेतालोपहतः. -a., **-iacal,** a. राक्षस (सी f.), पैशाच (ची f.), आसुर (री f.), (s.) in comp. **-ology,** s. भूतपिशाच-विद्या.

Demonstrate, v. t. साध् c., सिध् c. (साधयति), प्रदृश् c., प्रतिपद् c., उपपद् c., प्रमाणयति (D.); निर्णी 1 P, निर्दिश् 6 P. **-ion,** s. साधनं, सिद्धि f., उपपत्ति f., प्रतिपादनं. 2 निर्णयः; प्रामाण्यं, सिद्धांतः; 'ocular d.' प्रत्यक्षप्रमाणं-चाक्षुषज्ञानं-प्रमाणं. **-ive,** a. दर्शक, निर्देशक, निर्णायक, प्रतिपादक, सिद्धांतकरण. **-ively,** adv. सिद्धिपूर्वं, सप्रमाणं, सुव्यक्तं, सोपपत्तिकं. **-or,** s. निर्देशकः, प्रतिपादकः, प्रदर्शकः.

Demoralize, v. t. धर्माद्-आचाराद्-भ्रंश् c. or च्यु c., आचारं दुष् c. (दूषयति), भ्रष्टीकृ 8 U, दुर्वृत्त a. कृ. **-ation,** s. आचारभ्रष्टता धर्मच्युति f., धर्म-आचार-विप्लवः, अपकर्षः.

Demulcent, a. शामक, शांतिद. 2 स्निग्ध, चिक्कण.

Demur, v. i. शंक् 1 A, वि-आ°; विचर् c., विकृप् c., विलंब् 1 A, मनसा दोलायते (D.); सवितर्कं व्याक्षिप् c. -s. आशंका-

संदेहः, वितर्कः, विचारणं, विकल्पः; 'without d.' अविचारितं, अविलंबं.

Demure, *a.* विनीत, अतिनम्र, गंभीर, धीर, शांत, सलज्ज, सव्रीड, अवनत; 'with d. looks' सव्रीडवदन. **-ly,** *adv.* सलज्जं, सव्रीडं, धीरं, सविनयं. **-ness,** *s.* विनयः, नम्रता, गांभीर्यं, त्रपा, लज्जा, व्रीडा, ह्रीः.

Den, *s.* बिलं, विवरं, गुहा, गह्वरं, कंदरः, कुहरं.

Dengue, *s.* संधिकसंनिपात,

Denizen, *s.* नि-वासिन् *m.*, ओकस् in comp.; 'd.s of heaven' दिवौकसः, &c. 2 पौरः, नागरः, नगरजनः, स्वतंत्रजनः.

Denominate, *v. t.* वद्-भण्-गद् आह्वे 1 P, व्यपादिश् 6 P, अभिधा 3 U, वच् 2 P, ख्या 2 P; *See* **Call** also. **-ion,** *s.* नामन् *n.*, अभिधानं, संज्ञा, आख्या. **-ive,** *a.* अभिधायिन्, आख्यायक, (in grammar) नामधातुः. **-or,** *s.* नामकृत्-नामदातृ *m.* 2 हरः, हारः, छेदः; 'of the same d.' समच्छेद; 'reduced to the same d.' सवर्णित.

Denote, *v. t.* निर्दिश् 6 P, सूच् 10, उपलक्ष् 10, वच् 2 P, अभिधा 3 U, द्युत् c., गम् c. (गमयति); oft. ex. by अर्थ in comp.; *See* **Mean;** 'the word क्षेत्र here d.s body' अत्र क्षेत्रशब्दः शरीरार्थे-र्थः. **-ation,** *s.* निर्देशः; सूचनं; अभिधा-धानं, उपलक्षणं-णा. **-ing, -ative,** *a.* सूचक, दर्शक, वाचक, अभिधायक, गमक.

Denouement, *s.* कार्यं, निर्वहणं, निष्ठा.

Denounce, *v. t.* (अमंगलं or अनिष्टं) प्रकाश् c. ख्या c., (ख्यापयति), आ-नि-विद् c., कथ् 10. 2 प्रकाशं तर्ज् 10 A, भर्त्स् 10A, अभिशप् 1 U, अभिशंस् 1 P, निंद् 1 P, गर्ह् 1, 10 A, आक्रुश् 1 P. **-er,** *s.* अनिष्टावेदकः. 2 अधिक्षेपकः, निंदकः. **-ment, Denunciation,** *s.* अनिष्टख्यापनं-प्रकाशनं. 2 निर्भर्त्सना-नं, आक्रोशः, अभिशंसन, निंदा, गर्हा.

Denovean }
Denovo } *adv.* पुनर्, भूयः.

Dense, *a.* घन, निबिड, सांद्र, अविरल, निरंतर, अनंतर, गाढ, गहन. 2 सुसंहत, दृढ, पीवर. **-ity,** *s.* घनता, सांद्रता, आनंतर्यं; पीवरता.

Dent, *s.* प्रहार-आघात-चिह्नं.

Dental, *a.* दंत्य; 'a d. letter' दंत्यं.

Dented, Dentated, *a.* दंतुर, भंगुर, अनुक्रकच.

Dentifrice, *s.* दंतशोधनं-धावनं.

Dentist, *s.* दंतवैद्यः-चिकित्सकः.

Dentition, *s.* दंतोद्भेदः, दंतवृद्धि *f.*

Denude, Denudate, *v. t.* नग्नीकृ 8 U, विवस्त्रीकृ विवस्त्रयति (D.), वस्त्रं अपहृ 1 P, शून्यीकृ; निर् in comp.; 'a tree d.ed of leaves' निष्पत्रो or निष्पत्रीकृतो वृक्षः.

Deny, *v. t.* अपलप् 1 P, अपवद् 1 P, न स्वीकृ-अंगी-कृ 8 U, निषिध् 1 P, प्रत्याख्या 2 P, नि-अप-ह्नु 2 A, प्रत्यादिश् 6 P. **-al,** *s.* अप-नि-ह्नवः, प्रत्यादेशः, निषेधः, अस्वीकारः, प्रत्याख्यानं, अपलापः; 'self d.' आत्मसंयमः, आत्मनिग्रहः. **-er,** *s.* नि-ह्नोतृ *m.*, अपलापिन् *m.*, प्रत्यादेशकः.

Deobstruct, *v. t.* निर्विघ्नीकृ 8 U, विघ्नान् हृ or अपनी 1 P.

Deodand, *s.* देवोपहारः.

Deodorize, *v. t.* दुर्गंधं हृ or अपनी 1 P.

Depaint, *See* **Paint.**

Depart, *v. i.* प्रस्था 1 A, प्रया 2 P, वि-निर्-गम् 1 P, अपक्रम् 1 U, 4 P, अपया, अपइ 2 P, अपगम् अपसृ-सृप् 1 P, 'whose life has d.ed' वि-गत-जीवितः. 2 प्र-इ, देहं उत्सृज् 6 P, विपद् 4 A, मृ 6 A, संस्था 1 A; *See* **Die.** **-***v. t.* त्यज् 1 P, हा 3 P, उत्सृज्. **-ed,** *a.* अपगत, व्यपेत 'not d. from the meaning' अर्थादनपेत, अर्थ्य. 2 प्रेत, मृत, दिवंगत, संस्थित, विपन्न. **-ment,** *s.* भागः, विच्छेदः, प्र-वि-भागः. 2 विषयः, प्रकरणं, अंगं. 3 अधिकारः, नियोगः, कर्मन् *n.*, व्यापारः. 4 देशः, विषयः, मंडलं. **-ure,** *s.* अपगमः, अपयानं, प्रस्थानं, प्रयाणं, अपसरणं, अपसृति *f.*, निर्गमः, अपक्रमः. 2 देहत्यागः, संस्थिति *f.*, मरणं, उपरति *f.*

Depend, *v. i.* अवलंब् 1 A, प्रलंब्. 2 अव-आलंब्, आश्रि 1 U, संश्रि; निबंधन, तंत्र, अधीन, आयत्त, वश, in comp.; 'every thing d.s on fate' सर्वं दैवाधीनं-यत्तं; मम प्राणास्त्वदाशानिबंधनाः (M. 4); oft. by अपेक्ष् 1 A, व्यपेक्ष्; *See* below. 3 अनु-उप-जीव् 1 P. 4 (rely) विश्वस् 2 P (with loc.); सम्-ऋ c. (अर्पयति.); 'I d. upon you alone' त्वय्येव मे विश्वासः; 'd. upon it, I shall starve myself to death' मया प्रायोपवेशनं कृतं विद्धि (P. IV. 1); 'd. upon it' असंशयं, नियतं, नूनं, खलु. 5 संबंध्-, प्र-अनु-संज् pass., समनु-इ 2 P. **-ance, -ence,** *s.* अवलंबनं, आश्रयः, संश्रयः, निष्ठा, तंत्रता, निबंधनं, अधीनता; 'mutual d.' परस्परनिबंधनं, अन्योन्याश्रयः. 2 पराधीनता, परवशता, परवत्ता, पारतंत्र्यं, परायत्तत्वं. 3 विश्वासः, प्रत्ययः. 4 संबंधः, अनुषंगः, समन्वयः, संपर्कः. **-ency,** *s.* आयत्तता, अधीनता, &c. 2 अधीनः प्रदेशः, अन्यतंत्रं राज्यं. **-ant, -ent,** *a.* प्रलंब. 2 अधीन, आयत्त, आश्रित, अवलंबिन्, वश, संबद्ध, निघ्न, तंत्र in comp. 3 (d. on another) पराश्रित, पराधीन, परतंत्र, परायत्त, परवश, परवत्; 'd. on a cause' निमित्तसव्यपेक्षः (Mal.

-s. उप-अनु-जीविन् *m.*, आश्रितः, परायत्तो जनः, भृत्यः, परिवारः.

Depict, *v. t.* आलिख् 6 P, वर्ण् 10, निर्दिश् 6 P.

Depilation, *s.* लो(रो)महरणं, उल्लुंचनं. **-Depilatory,** *a.* केशनाशक, लोमहारिन्.

Depilous, *a.* अकेश, रो(लो)महीन.

Deplete, *v. t.* शून्यीकृ 8 U, रिच् c. निःशिष् c. **-ion,** *s.* अवक्षयः, निःशेषता, रिक्तता, शून्यत्वं, शून्यीकरणं.

Deplore, *v. t.* शुच् 1 P, विलप् 1 P, परिदेव् 1 A, परिदिव् 10 A; *See* **Lament.** **-ably,** *adv.* शोच्यप्रकारेण, शोचनीयं. **-er,** *s.* परिदेवकः, अनुशोचकः.

Deploy, *v. t.* विस्तॄ 9 U (सैन्यव्यूहान्).

Deplume, *v. t.* पक्षान् उत्पट् 10 or उद्धृ 1 P, निष्पक्षीकृ 8 U. **-ation,** *s.* पक्षोत्पाटनं.

Depone, *v. i.* सशपथं वद् 1 P or कथ् 10, शपथपूर्वं उपक्षिप् 6 P or उपन्यस् 4 U. **-ent,** *s.* साक्षिन् *m.* **2** अकर्तरि क्रिया.

Depopulate, *v. t.* निर्जनीकृ 8 U, विजनीकृ, नरशून्य *a.* कृ; उपपीड् 10, बाध् 1 A, समुच्छिद् 7 P. **-ion,** *s.* निर्जनीकरणं. **2** उपप्लवः, उच्छेदः, उपपीडनं, बाधा. **-or,** *s.* उच्छेदकः, उपपीडकः, विप्लवकारिन् *m.*

Deport, *v. t.* प्रव्रज् c., निः-प्र-वि-वस् c., देशांतरं गम् c. (गमयति). **-***v. i.* (oneself) आचर्-व्यवहृ 1 P, वृत् 1 A; *See* **Act.** **-ation,** *s.* प्र-वि-वासनं, प्रव्राजनं. **-ment,** *s.* वृत्ति *f.*, आचरणं, चेष्टितं, व्यवहारः, वृत्तं.

Depose, *v. t.* (राज्यात् or अधिकारात्) अवरुह् c. (रोपयति), भ्रंश् c., पत् c., च्यु c. **-***v. i.* साक्ष्यं दा 3 U, वद् 1 P, वच् 2 P, कथ् 10. **-ition,** *s.* साक्ष्यं, साक्ष्यदानं. **2** (Deposal) राज्यभ्रंशः-च्युति *f.*, राज्यावरोपणं, अधिकारच्युतिः-भ्रंशः.

Deposit, *v. t.* निक्षिप् 6 P, न्यस् 4 P, निधा 3 U, आधा, ऋ c. (अर्पयति), आधीकृ 8 U. **-***s.* न्यासः, निक्षेपः, आधिः, उपनिधिः. **2** किट्टं, शेषः, खलं, कालुष्यं, मलः-लं. **-ary,** *s.* निक्षेपग्राहकः, न्यासधारिन् *m.* **2** विश्वासस्थानं-पात्रं-भूमि *f.* **-or,** *s.* निक्षेपिन् *m.*, न्यासकर्तृ *m.* **-ory,** *s.* आधारः, आशयः, निधानं, निधिः, भाजनं, आगारं, संग्रहस्थानं.

Depot, *s.* अगारं, शाला, स्थानं, आलयः, 'book d.' पुस्तकालयः, ग्रंथशाला; 'military d.' युद्धसामग्र्यागारं.

Deprave, *v. t.* दुष् c. (दूषयति) भ्रंश् c. मलिनीकृ 8 U, कलुषयति (D.). **-ed,** *a.* दुराचार, भ्रष्ट, दुष्ट, खंडितवृत्त, दुरात्मन्, पापचेतस् दुर्वृत्त, भ्रष्टशील, कलुषाचार. **-edness,-ity,** *s.* दुष्टता, भ्रष्टता, दुष्टभावता, दौरात्म्यं, दुराचारता, दौर्जन्यं, कालुष्यं, दुर्वृत्तता.

Deprecate, *v. t.* (प्रार्थनापूर्वकं) निवार् 10, व्यावृत् c., मा भूदिति याच् 1 A. **2** अनुशुच् 1 P. **-ion,** *s.* निवारणार्थं प्रार्थनास्तवः. **-ive,-atory,** *a.* अनिष्टनिवारक.

Depreciate, *v. t.* अर्घतः पत् c., अवमन् 4 A, लघूकृ 8 U, लघु मन्, मूल्यं न्यूनीकृ, अवक्षिप् 6 P, अपलप् 1 P, अपकृष् 1 P. **-ion,** *s.* लघूकरणं, अवमानना, अपकर्षः, अपलापः.

Depredate, *v. t.* अपहृ 1 P, लुंट्-ठ् 1 P, 10, उपप्लु 1 A, उपद्रुत्य ग्रह् 9 P. **-ion,** *s.* उपप्लवः, अपहरणं, लुंठनं, लोप्त्रग्रहणं. **-or,** *s.* विप्लवकारिन् *m.*, अपहारकः.

Deprehend, *See* **Apprehend.**

Depress, *v. t.* अवनम् c. (नमयति), पत् c., अपकृष् 1 P, अवपीड् 10, निम्नीकृ 8 U, अवसद् c., भ्रंश् c., अवगाह् 1 A. **2** विषादं नी 1 P, विषद् c., विषण्णीकृ; 'd.ed behind' पश्चादवगाढां (S. 3); 'd. ed in spirits' विषण्ण, म्लान, मुक्तावयव, खिन्नचित्त; *See* **Dejected.** **-ion,** *s.* पातः, अवनमनं, अपकर्षः-र्षणं. **2** विषादः, खिन्नता, अवसादः, उद्वेगः, दौर्मनस्यं, म्लानि *f.*, 'd. of spirits' सत्वभ्रंशः.

Deprive, *v. t.* अपनी 1 P, अपहृ 1 P, (with gen. of person); भ्रंश् c., च्यु c. (with abl.); वियुज् 7 A, 10, विनाकृ 8 U, (with instr. of the object deprived). **-ation,** *s.* हरणं, अपचयः, क्षयः, लोपः, हानि *f.*, नाशः. **-ed,** *a.* हृत, अपहृत, हीन, वियुक्त, भ्रष्ट, विरहित, विनाकृत (gen. in comp.); वीत-लुप्त निर् in comp.; 'd. of wealth' निर्धन, लुप्तवित्त; 'd. of authority' भ्रष्टाधिकार, पदभ्रष्ट; 'to be d.' हा pass.; परिहा, वियुज् pass.

Depure, Dupurate, *See* **Purify.**

Depute, *v. t.* नियुज् 7 A, 10, प्रेर् c., प्रेष् c., प्रहि 5 P, समादिश् 6 P (of a person); निक्षिप् 6 P, न्यस् 4 P, (of business). **-ation,** *s.* नियोजनं, प्रेरणं, प्रेषणं. **2** नियुक्ताः-समादिष्टाः (pl.), नियोगिगणः, नियुक्तजनाः. **-y,** *s.* प्रतिनिधिः, प्रतिहस्तः-स्तकः, नियोगिन् *m.*; नियुक्तः, प्रतिपुरुषः.

Deracinate, *See* **Eradicate.**

Derail, *v.* लोहमार्गात् निःसृ 1 P, or c.

Derange, *v. t.* विपर्यस् 4 U, विक्षिप् 6 P, क्रमं-व्यवस्थां-भंज् 7 P, or उपहन् 2 P. विक्षुभ् c., संकॄ 6 P, आकुलीकृ 8 U. **-ed,** *a.* व्यस्त, अनवस्थित, भग्नक्रम, अव्यवस्थित, विक्षिप्त, संकीर्ण; 'd. in mind' उन्मत्त, भ्रांतचित्त. **-ment,** *s.* व्युत्क्रमः, प्रक्रमभंगः, अव्यवस्था, व्यस्तता, अक्रमः, विसूत्रता, वैलक्षण्यं; 'd. of mind' मतिभ्रमः चित्तविप्लवः, मतिविपर्यासः.

Derelict, *a.* त्यक्त, उत्सृष्ट, परित्यक्त. **-ion,** *s.* त्यागः, उत्सर्गः, उपेक्षा.

Deride, *v. t.* वि-उप-अव-हस् 1 P, उपहासास्पदी कृ 8 U, अवज्ञा 9 U, भर्त्स् 10 A, गर्ह् 1, 10 A; 'to be d. ed' उपहास्यतां गम् 1 P, उपहासास्पदं भू 1 P; 'are d.ed by all' सर्वजनस्योपहास्यतामुपयांति (Ka. 108). **-er,** *s.* उपहासकः, अवक्षेपकः. **-ingly,** *adv.* अवहासेन, उपहासपूर्वं. सोपहासं. **-Derision,** *s.* उप-अव-हासः, अवमानना, धिक्कारः, अवज्ञा, गर्हणं, निर्भर्त्सनं. **-Derisive,** *a.* सोपहास, अवहासगर्भ, अवहासिन्; उपहास्य; गर्ह्य.

Derive, *v. t.* निष्कृष् 1 P, उद्-भू c., जन् c. (जनयति). उत्पद् c., 2 प्राप् 5 P, लभ् 1 A, Ge , q. v.) 3 व्युत्पद् c. निर्वच् 2 P, 10, व्युत्पत्तिं वद् 1 P. **-ed,** *a.* उत्पन्न, उद्भूत; oft. ex. by प्र-,भव-मूल-उद्भव-ज in comp.; 'the race d. ed from the Sun' सूर्यप्रभवो वंशः; 'to be d. ed' उत्पद् 4 A, प्रभू 1 P, जन् 4 A, उद्-भू, निर्गम् 1 P. **-ation,** *s.* व्युत्पत्ति *f.*, निर्वचनं, शब्दोत्पत्ति *f.*, शब्दयोनि *f.* 2 प्रभवः, उद्भवः. योनि *f.*, मूलं, निर्गमः. **-ative,** *a.* व्युत्पन्न; यौगिक (की *f.*); 'd. suffixes' तद्धितप्रत्ययाः. **-***s.* साधितः शब्दः, व्युत्पन्नः शब्दः.

Dermis, *s.* *See* **Skin.**

Derogate, *v. t.* अल्पीकृ 8 U, न्यूनीकृ, लघयति (D.); *See* **Depreciate. -ion,** *s.* लघूकरणं, अपमानः, गौरवन्यूनता अवमानना, लाघवं. **-ory,** *a.* अननुरूप, अकीर्तिकर, लाघवकारिन्, असदृश शी *f.*), अयशस्कर (री *f.*).

Dervise, *s.* संन्यासिन् *m.* (महंमदीयः).

Descant, *v. i.* सविस्तरं व्याख्या 2 P, वि-वृ 5 U, विस्तरेण वर्ण् 10. **2** गै 1 P, वर्ण् 10. **-***s.* वचनं, वादः, प्रवादः, भाषितं. **2** गीतं.

Descend, *v. i.* अवतॄ-अवरुह्-अवपत् 1 P, निपत्, च्यु 1 A, भ्रंश् 1 A, 4 P. **2** आ-अभि-गम् 1 P, प्रविश् 6 P. **3** (upon) अभिद्रु 1 P, अभियाः 1 P, आक्रम् 1 U, 4 P; *See* **Attack. 4** (from) उत्पद् 4 A. प्र-उद्-भू 1 P, जन् 4A; *See* **Derive.** वंश-कुल क्रमेण आगम् 1 P, or या 2 P, परंपरया प्राप् pass.; 'd. into details' सविस्तरं वर्ण् 10, विस्तरशः वद् 1 P, प्रपंच नि (D.). **-***v. t.* Causal of roots (1) above. **-ant,** *s.* वंश्यः, वंशजः, अपत्यं, संतति *f.* प्रकृति *f*, संतानः; 'd. s.' पुत्रपौत्राः, कुलसंततिः, वंशः, अन्वयः, कुलं; 'male d.' पुत्रसंतानः. **-ed,** *a.* अवतीर्ण, अधोगत; 'lineally d.' कुलक्रमागत, वंशपरंपराप्राप्त, क्रमायात, पितृप्राप्त; 'to be d.' उत्पद्. जन्, ;en. by derivative affixes; 'd. from Puru' पौरवः. **-ent,** *a.* अवरोहिन्, अधोगामिन्. **-Descent,** *s.* अवतरणं. अवपातः, अवरोहः-हणं, अवतारः. **2** आक्रमः, अवस्कंदः, अभिद्रवणं. **3** जन्मन् *n.*, उत्पत्ति *f.*, वंशः, उद्भवः, कुलं; 'of noble d.' कुलीन, कुलोत्पन्न, महाकुलप्रसूत, अभिजात, अभिजनवत्. **4** संतति *f.*, अन्वयः, आवलि-ली *f.*, संतानः-नं. **5** वंशक्रमागमः, अन्वयागमः. **6** अवसर्पिणी भूमिः, प्रवणस्थानं.

Descension, *s.* अवपातः, अधःगमनं, अधःपतनं.

Describe. *v. t.* वर्ण् 10, निर्दिश् 6 P, वि-वृ 5 U, कृत् 10, कथ् 10, निरूप् 10, वच्. 2 P, व्याख्या 2 P; 'her splendour can't be d. ed' तस्याः श्रीर्वचनानामविषया. **2** (Draw) लिख् 6 P. **-Description,** *s.* वर्णनं-ना, निर्देशः, व्याख्यानं, कथनं, निरूपणं, विवरणं. **-Descriptive,** *a.* निर्देशक, वाचक, अभिधायिन्, निर्देशिन्. **2** वर्णनपर.

Descry, *v. t.* दूराद् आलोकृ 1 A, 10 or दृश् 1 P, or ईक्ष् 1 A, निवर्ण् 10, आलक्ष् 10. **2** ज्ञा 9 U, अवगम् 1 P; *See* **Know.**

Desecrate, *v. t.* दुष् c. (दूषयति), अपवित्रीकृ 8 U, पुण्यत्वं लुप् c., संस्कारहीन *a.* कृ. **-ion,** *s.* दूषणं, संस्कारदूषणं, अपवित्रीकरणं.

Desert, *s.* मरुः, मरुस्थलं-ली, वालुकाप्रदेशः, धन्वन् *m.* **2** गुणः, पुण्यं, योग्यता, पात्रत्वं, पुण्यापुण्यं, अर्हत्वं, **-***a.* निर्जन, निर्मानुष (षी *f.*), वन्य, खिल, निर्जल, शून्य, आरण्यक. **-***v. t.* त्यज् 1 P, हा 3 P, उत्-विसृज् 6 P, रह् 10, (रहयति). अपव्यध् 4 P, **-***v. i.* सेनां त्यक्त्वा पलाय् 1 A. **-er,** *s.* त्यागिन् सेनात्यागिन् *m.*, परावर्तकः. रणपराङ्मुखः, पलायिन् *m.* **-ion,** *s.* त्यागः, उत्सर्गः; सेनात्यागः, निर्गमनं, अपक्रमणं. **-less,** *a.* निर्गुण, अनर्ह, अयुक्त, अपात्र.

Deserve, *v. t.* अर्ह् 1 P, अर्ह-उचित-योग्य *a.* in comp.; oft. by pot. pass. part. **-ed,** *a.* योग्य, उचित, अर्ह. **-edly,** *adv.* उचितं, योग्यं, न्यायतः. **-er, -ing,** *a.* अर्हत् गुणवत्, अर्ह, उचित, योग्य, पात्र; 'd. of' ex. by pot. pass. part. 'd. of pity' अनुकंप्य, &c. **-***s.* गुणः, पात्रता, योग्यता, अर्हत्वं.

Deshabille, *See* **Dishabille.**

Desiccate. *v. t.* शुष् c., आचम् 1 P, **-***v. i.* शुष् 4 P, **-ion,** *s.* शोषणं, परिशोषः. **-ive,** *a* शोषक. **-Dessicants,** *s.* व्रणशोषकाः.

Desiderate, *See* **Desire. -ive,** *a.* इच्छार्थक, सन्नंत. **-Desideratum,** *s.* अभिष्टवस्त्वभावः.

Design, *v. t.* परि-सं-कल्प् c., अनुसंधा 3 U, व्यवसो 4 P, अभि-प्र-इ 2 P. उद्दिश् 6 P; चिंत् 10, घट् c. (घटयति), मनः-मतिं कृ.

8 U. 2 प्र-वि-नि-युज् 7 A, 10. 3 आलिख् 6 P, सूत्रपातं कृ. -s. अभिप्रायः, अर्थः, आकांक्षा, उद्देशः, संकल्पः, आशयः, हेतुः, चिकीर्षितं, प्रयोजनं, कार्यं. 2 उपायः, चिंता, कल्पना, घटना, विधानं, व्यवसायः. 3 आलिखनं, सूत्रपातः, संस्कारः. **-edly,** *adv.* कामतः, यथाकामं, इच्छातः, बुद्धिपुरःसरं. **-er,** *s.* चिंतकः परिकल्पकः. 2 आलेखकः, सूत्रपातकः. **-ing,** *a.* उपजापिन्, मायिन्, छलिन्, वंचनशील, प्रतारक, विदग्ध, कपटपटु, धूर्त. **-less,** *a.* निरर्थक, निष्प्रयोजन.

Designate, *v. t.* उपलक्ष् 10, अप-व्यप-दिश् 6 P, निर्दिश्, सूच् 10, सुत c., अभिधा 3 U, निर्वच् 2 P, गम् c. (गमयति). 2 नियुज् 7 A, 10, परि-सं-क्लृप् c. **-ing,** *s.* लक्षणं, उपलक्षणं, चिह्नं, निरूपणं, अभिधानं, संज्ञा, आख्या, नामन् *n.*

Desire, *v. t.* इष् 6 P, वांछ् 1 P, कम् 10 A, स्पृह् 10 (with dat.), ईह् 1 A, आकांक्ष् 1 U, अभिलष् 1, 4 P oft. ex. by desid. of roots. 2 अर्थ् 10 A, याच् 1 A, वृ 5 U. -s. इच्छा, अभिलाषः, कामः, ईहा, आकांक्षा, समीहितं, आशा, इष्टं, ईप्सितं, मनोरथः, स्पृहा, अभीष्टं; 'according to one's d.' यथाकामं, यथेष्टं, स्वेच्छातः, स्वच्छंदं, स्वरुच्या; 'ardent d.' लालसा, औत्सुक्यं, उत्कंठा, लोभः, तृष्णा. **-able,** *a.* स्पृहणीय, काम्य. 2 इष्ट, प्रशस्त, श्रेयस्. **-ous,** *a.* सस्पृह, वांछिन्, इच्छु, ईप्सु; oft. by desid. forms; 'd. to speak' विवक्षुः; 'd. to take' जिघृक्षुः or by काम or मनस् in comp. with inf.; 'd. to take' आदातुकामः -मनाः.

Desist, *v. i.* विरम् 1 P, निवृत् 1 A, विश्रम् 4 P, (with abl.) *See* **Cease. -ance,** *s.* विरामः, निवृत्ति *f.*, विश्रमः.

Desk, *s.* लिखनफलकः, लेखनाधारः.

Desolate, *a.* निर्मानुष (षी *f.*), निर्जन, शून्य, विविक्त, वसतिहीन, विजन. 2 उच्छिन्न, जीर्ण, उद्ध्वस्त, उत्सन्न. 3 असहाय, निराश्रय, अगतिक, अनाथ. -*v. t.* उच्छिद् 7 P, अवसद् c., निर्जनीकृ 8 U; उपपीड् 10, शून्यीकृ, प्रमथ् 1 A. **-ion,** *s.* उच्छेदः, अवसादनं, वसतिनाशः, निर्जनीकरणं. 2 शून्यता, निर्जनत्वं, विविक्तता.

Despair, *v. i.* निराश *a.* भू 1 P, आशां हा 3 P, नैराश्यं गम्-व्रज् 1 P, विषद् 1 P, भग्नाश *a.* भू; 'd.ed of success' जयविषये निराशीभूत. -s. नैराश्यं, निराशता, आशाहीनता, वैक्लव्यं, विषादः; 'being in d.' त्यक्ताश, गताश. **-Desperate,** *a.* निराश, आशातीत, त्यक्ताश, आशाहीन. 2 जीवितनिरपेक्ष, आततायिन्, निर्भय, साहसिक (की *f.*) 3 निष्प्रतीकार, उग्र, संरब्ध, साहसद्योतक, अत्यंत; 'a d. act' साहसं, आततायिता. **-ly,** *adv.* जीवितनिरपेक्षं, प्रसह्य, उग्रं, उन्मत्तवत्. 2 अति-सु pr.; अत्यंतं, भृशं. **-ness,** साहसिकता, उन्मादः, संरंभः जीवितनिरपेक्षता.

Despatch, *v. t.* (सत्वरं) प्रेष् c., प्रहि 5 P. प्रस्था c. (प्रस्थापयति), विसृज् 6 P. 2 शीघ्रं, झटिति संपद् c. त्वर् c. (त्वरयति), आशु संविधा 3 U. 3 हन् 2 U. व्यापद् c.; *See* **Kill.** -s. त्वरा, शीघ्रता, शीघ्रकारित्वं, अदीर्घसूत्रता. 2 पत्रं, राजलेखः-लेख्यं, वाचिकपत्रं. 3 धावकः, प्रजविन् *m.*, वार्ताहरः, दूतः. **-ful,** *a.* त्वराशील, शीघ्रकारिन्, अविलंबिन्, अदीर्घसूत्र.

Desperado, *s.* साहसिकः, प्रसह्यचौरः, साहसिन् *m.*, आततायिन् *m.*, वधोद्यतः.

Despise, *v. t.* अवज्ञा 9 U, तिरस्कृ 8 U, अवमन् 4 A, परिभू 1 P. अवधीर् 10; *See* **Contemn. -er,** *s.* अवमंतृ *m.*, अवज्ञातृ *m.*, निंदकः. **-ingly,** *adv.* सावज्ञं, सावमानं. **-Despicable,** *a.* अवमान्य, अवज्ञेय, गर्ह्य, निंद्य, नीच, निकृष्ट, अधम, तुच्छ, कुत्सित, क्षुद्र.

Despite, *s.* द्वेषः, जुगुप्सा, मात्सर्यं, ईर्ष्या, अभ्यसूया, असूया. 2 प्रतिरोधः, प्रतिकारः; 'in d. of' (prep.) अनादृत्य, अवगणय्य, or gen. abs.; 'd. the (presence of the) teacher' पश्यतोपि गुरोः; *See* 'in spite of' under **Spite. -ful,** *a.* द्वेषिन्, सासूय, अभ्यसूयक, मत्सरिन्, द्रोहबुद्धि. **-fully,** *adv.* सद्वेषं, सद्रोहं, ईर्ष्यया. **-fulness,** *s.* मात्सर्यं, असूया, दौर्जन्यं, द्रोहः, द्रोहबुद्धि *f.*

Despoil, *v. t.* हृ 1 P, अपहृ; *See* **Deprive;** 'd.ed of everything' हृतसर्वस्व. **-er,** *s.* अपहारकः. **-Despoliation,** *s.* अपहरणं.

Despond, *v. i.* निर्विद् 4 A, नैराश्यं-निर्वेदं-विषादं-गम् 1 P or आपद् 4 A, विषद् 1 P, आशां त्यज् 1 P, अंगानि मुच् 6 P. **-ency,** *s.* निर्वेदः, विषादः, नैराश्यं, उद्वेगः, अवसादः, विषण्णता. **-ent, -ing,** *a.* निर्विण्ण, विषण्ण, निराश, त्यक्ताश, म्लान, उद्विग्न; 'do not take a d. view' मा भवानंगानि मुंचतु (V. 2). **-ingly,** *adv.* सविषादं, सनिर्वेदं.

Despot, *s.* प्रजापीडकः, लोकोपप्लवकः, 2 अधीश्वरः, सम्राज् *m.*, सार्वभौमः, चक्रवर्तिन् *m.* **-ic, -ical,** *a.* स्वतंत्र, निष्प्रतिबंध, अनियंत्रण, अनियत, निरवग्रह. **-ically,** *adv.* स्वैरं, स्वेच्छातः, कामचारेण. **-ism,** *s.* प्रजापीडनं, निष्ठुरशासनं, प्रजोपप्लवः, स्वेच्छाचारित्वं, स्वेच्छाप्रभुत्वं; निर्यंत्रणाराज्यसरणिः *f.*

Despumate, *v. i.* उत्सिच् pass., फेनायते (D.)

Dessert, *v. t.* (भोजनांते) फलाहारः.

Destine, *v. t.* (**Destinate**) निरूप् 10, परि-प्र-कल्प् c., निर्दिश् 6 P, नियुज् 7 A, 10.

समुपस्था 1 U, (न जाने भोक्तारं कमिह समुपस्थास्यति विधिः S. 2); oft. ex. by pot. pass. part., with or without अवश्यं, नूनं; 'he is d. ed to be a king' अनेनावश्यं राज्ञा भवितव्यं; 'man is d. ed to die' मनुष्या नश्वराः; 'who is able to avoid what is d. ed for him' लिखितमपि ललाटे प्रोज्झितुं कः समर्थः; तथा भवितव्यतया च तस्य तस्य वस्तुनः (Ka. 143) 'every thing being d. ed to occur' &c. **-ation,** *s.* ईप्सितं स्थानं, इष्टः प्रदेशः, निरूपित-निर्दिष्ट-स्थानं. 2 उपयोगः, प्रयोजनं, उद्देशः; अर्थः, अभिप्रायः. **-y,** *s.* दैवं, भवितव्यता, नियति, *f.*, भाग्यं, भागधेयं; विधातृ *m.*, विधिः, दिष्टं, अदृष्टं, प्राक्तनं.

Destitute, *a.* निर्धन, अर्थहीन, निराश्रय, दुर्गत, अशरण, दीन, अकिंचन, दुःस्थित. 2 (of) हीन, रहित, वर्जित, शून्य, वियुक्त, हृत, विहीन, परिहीण, with instr. or in comp.; gen. by निर्-अ-वि- in comp.; 'd. of courage' धैर्यहीन-शून्य, &c.; निरुत्साह 'd. of energy'; 'd. of hands and feet' अपाणिपाद. **-ion,** *s.* दैन्यं, धनाभावः, अकिंचनत्वं, दारिद्र्यं, निराश्रयता. 2 हीनत्वं, राहित्यं, शून्यत्वं, अभावः, विरहः, वियोगः.

Destroy, *v. t.* नश् c., प्र-वि°; अव-उत्-सद् c., ध्वंस् c., प्र-वि°; विलुप् c., क्षै c. (क्षपयति), क्षि 5 P or c., संहृ 1 P, उत्-निर्-मूल् c., उच्छिद् 7 P, प्रतिहन् 2 P. 2 (persons &c.) हन् 2 P, निषूद् 10, व्यापद् c., मृ c.; 'to be d. ed' वि-, नश्, 4 P, ध्वंस् 1 A, क्षयं या-इ 2 P, or गम् 1 P. प्र-वि-ली 4 A. **-er,** *s.* नाशकः, हंतृ *m.*, निषूदनः, घातिन् *m.*, अंतकः, ध्वंसकः, हन्-अपह in comp; 'd. of Vritra' वृत्रहा, वृत्रनिषूदनः; 'd. of every thing' कृतांतः. **-Destructible,** *a.* नश्वर, विध्वंसिन्, भंगुर, क्षयिन्. **-Destruction,** *s.* नाशः, विनाशः, प्रणाशः; प्र-, वि-, ध्वंसः, क्षयः, उच्छेदः, संहारः; उद्दलनं, उत्पाटनं. 2 निषूदनं, घातः, वधः; 'd. of the whole world' प्रलयः, प्रत्यवहारः, कल्पांतः, संवर्तः. **-Destructive,** *a.* विनाशिन्, क्षयकर (री *f.*), घातिन्, अंतकर, घातुक, अपह-घ्न (घ्नी *f.*) in comp.: 'd. to life' जीवितापह, प्राणहर, निधनकारिन्.

Desuetude, *s.* विरति *f.*, निवृत्ति *f.*, विच्छेदः, विरामः, प्रवृत्तिविच्छेदः.

Desultory, *a.* असतत, उच्छृंखल, अस्थिर, लोल, अनियत, चंचल, अनवस्थित, अव्यवस्थित.

Detach, *v. t.* विश्लिष् c., विभिद् 7 P, विच्छिद् 7 P, वियुज् 7 A, 10. पृथक् कृ 8 U; *See* **Separate.** **-ed,** *a.* वियुक्त, विभिन्न, विच्छिन्न; असंसक्त, असंलग्न, गतसंग, विश्लिष्ट, असंगत. **-ment,** *s.* विभागः, वियोगः, विच्छेदः, विश्लेषः, विभेदः. 2 सैन्यदलं, गुल्मः-ल्मं.

Detail, *s.* विस्तरः, विस्तारः; वाग्विस्तरः, प्रपंचः. 2 वृत्तांताख्यानं; 'in d.' or 'd. ed' सविस्तर (*a.*), विस्तरेण, विस्तरतः-शः, सविस्तरं. -*v. t.* सविस्तरं-विस्तरेण-वर्ण् 10 or आख्या 2 P. or कथ् 10, प्रपंचयति (D.).

Detain, *v. t.* धृ 1 P, निरुध् 7 U; जामातृयज्ञेन वयं निरुद्धाः (U. 1) 'd. ed by reason of' &c. 2 निवार् 10, निग्रह् 9 P. 3 (In custody) आसिध् 1 P, बंध् 9 P, निरुध्. **-Detention,** *s.* धरणं, निग्रहः, संरोधः, निरोधः. 2 आसेधः, प्रति-नि-रोधः, बंधनं, बलात्कारेण धरणं.

Detect, *v. t.* निरूप् 10, ज्ञा 9 U, अनुसंधा 3 U, अधि-अव-गम् 1 P; दृश् 1 P, उपलभ् 1 A, आसद् c. 2 धृ 1 P, प्रकाश् c., व्यंज् 7 P; 'd. ed in a crime' दृष्टदोष; निर्णीतापराध. **-ion,** *s.* ज्ञानं, निरूपणं, अनुसंधानं, उपलंभः, अवगमनं. **-ive,** *a.* (Officer) चरः, चारः, प्रणिधिः, अपसर्पः; *See* **Spy**

Deter, *v. t.* (सभयं) निवृत् c., निवार् 10, विरम् c. (रमयति), भी c., निरुध् 7 U; *See* **Prevent.** **-ment,** *s.* निवर्तनं, निवारणं.

Deterge, *v. t.* शुध् c., मलं अपनी 1 P, परिमृज् 2 P. **-ent,** *a.* शोधन (नी *f.*), परिमार्जक.

Deteriorate, *v. i.* क्षि-हा pass., ह्रस् 1 P, क्षयं गम् 1 P; दुष् 4 P, भ्रंश् 4 P, 1 A, अपकृष् pass. -*v. t.* अपकृष् 1 P, दुष् c. (दूषयति), विकृ 8 U, ह्रस् c. **-ion,** *s.* क्षयः, अपचयः, विकारः, विकृति *f.*, ह्रासः, भ्रष्टता. 2 अपकर्षः, दूषणं.

Determine, *v. t.* निश्चि 5 U, स्था c. (स्थापयति), संक्लृप् c., निरूप् 10, निर्णी 1 P, निर्-अव-धृ 10, निर्दिश् 6 P. लक्ष् 10, परिच्छिद् 7 P. 2 निरूप्, अनुसंधा 3 U, निर्णी (a dispute &c.). -*v. i.* व्यव-अव-सो 4 P, निश्चयं कृ 8 U; 'd. ed to go' गमने कृतसंकल्प, गंतुं व्यवसित. **-ate,** *a.* स्थिर, दृढ, निर्धारित, निश्चित, निर्णीत, नियत, सिद्ध, व्यवस्थित. 2 निश्चायक, निर्णायक. 3 (of persons) कृतनिश्चय, दृढसंकल्प, व्यवसित. **-ately,** *adv.* सनिश्चयं, सनिर्णयं, नूनं. **-ation,** *s.* निश्चयः, निर्णयः, संकल्पः, निर्धारणं, व्यवसायः, विचारः, निरूपणं, परिच्छेदः, अवधारणं-णा. 2 अभिनिवेशः, अध्यवसायः, निर्बंधः. **-ative,** *a.* निर्णायक, निर्धारक. **-ed,** *a.* निश्चित, निर्णीत, सिद्ध, नियत, व्यवस्थित, परिच्छिन्न, अवधारित. 2 (of persons) स्थिरनिश्चय, दृढ-कृत-संकल्प, अभिनिविष्ट, कृतनिश्चय. **-edly,**

adv. स्थिरचेतसा, दृढं, दृढनिश्चयेन. **-or,** *s.* निर्णयकृत् *m.*, निर्णेतृ *m.*

Detest, *v. t.* विद्विष् 2 U, गर्ह् 1, 10 A, गुप् desid. (जुगुप्सते) (with abl.); *See* **Abhor.** **-able,** *a.* जुगुप्सित, गर्हित, निंद्य, गर्हणीय, विद्वेष्य. **-ation,** *s.* गर्हा, जुगुप्सा, घृणा, विद्वेषः. **-er,** *s.* द्वेषिन् *m.*, विद्वेष्टृ *m.*

Dethrone, *v. t.* राज्यात् भ्रंश् c. or च्यु c. or अवपत् c. or अवरुह् c. (रोपयति). **-ment,** *s.* राज्यभ्रंशः-च्युति *f.*

Detonate, *v. i.* सहसा स्तन् 1 P or ध्वन् 1 P. **-ion,** *s.* स्तनितं, आकस्मिकध्वनि *m.*

Detort, *See* **Pervert.**

Detract, *v.* अपकृष्-अपनी 1 P. 2 अपलप् 1 P, अपवद्-भाष् 1 A, अधिक्षिप् 6 P, निंद् 1 P, असूयति (D.) (with dat.); मूल्यं न्यूनीकृ 8 U; लघूकृ; *See* **Depreciate.** **-ion,** *s.* अपकर्षः, लघूकरणं, ह्रासः. 2 असूया, अप-परि-वादः, आक्षेपः, गुणनिंदा, पैशुन्यं, परदोषाविष्करणं, मात्सर्यं. **-or,** *s.* अपवादकः, अधिक्षेपकः, निंदकः, असूयकः, परिवादरतः. **-ory,** *a.* अपवादिन्, निंदक, अभ्यसूयक; पिशुन.

Detriment, *s.* हानि *f.*, अपकारः, क्षति *f.*, नाशः, अपायः, बाधा, विरोधः. **-al,** *a.* हानिकर (री *f.*), विरोधिन्, अपायकारक.

Detrude, *v. t.* अवपत् c., अधः क्षिप् 6 P, भ्रंश् c. **-Detrusion,** *s.* अवपातनं.

Detruncate, *v. t.* अवच्छिद् 7 P, निकृत् 6 P, वि-लू 9 U. **-ion,** *s.* अवच्छेदः, निकर्तनं.

Deuce, *s.* द्वयं, द्विकं. 2 पिशाचः, भूतः.

Devastate, *v. t.* उच्छिद् 7 P, उत्-अव-सद् c.; उपपीड् 10, वि-उप-प्लु 1 A, प्रबाध् 1 A, निर्जनीकृ 8 U. **-ion,** *s.* उच्छेदः, उपप्लवः, प्रबाधनं, विनाशः, निर्जनीकरणं.

Develop, *v. t.* पुष् 1, 4, 9 P, प्र-उप-चि 5 U, प्र-सं-वृध् c.; 'she d. ed her lovely limbs' पुपोष लावण्यमयान् विशेषान् (K. I. 25); also प्रचीयमानावयवा R. III. 7) उपचितांगी. 2 विकस् c., विस्तृ c., उद्भिद् c.: तस्य (कार्यनिक्षेपस्य) विस्तारमिच्छन् (Mu. 4) 'wishing to d. it.' **-v. i.** प्र-उप-चि pass., उद्भिद् pass., क्रमशः विकस् 1 P, क्रमेण प्र-सं-वृध् 1 A. **-ment,** *s.* प्रचयः, उपचयः, संवर्धनं; विस्तारः, विकासः, उद्भेदः.

Devergence, *See* **Divergence.**

Deviate, *v. i.* अति-व्यति-इ 2 P, अतिक्रम् 1 U, 4 P, अति-व्यभि-चर् 1 P; 'did not d. even an inch from the beaten path' क्षुण्णाद्वर्त्मनो रेखामात्रमपि न व्यतीयुः (R. I. 17); अप-या-इ 2 P, चल् 1 P, प्र-वि-°; च्यु 1 A, भ्रंश् 4 P, 1 A, (with abl.). **-ion,** *s.* अतिक्रमः, विचलनं, च्युति *f.*, भ्रेषः, भ्रंशः, व्यभिचारः, त्यागः; 'd. from the right path' उत्पथयानं, विमार्गगमनं.

Device, *s.* उपायः, युक्ति *f.*, प्रयोगः, कल्पना, साधनं. 2 अप-व्यप-देशः, छलं, माया, छद्मन् *n.*, कैतवं, व्याजः. 3 लक्षणं, चिह्नं, अंकः. 4 निर्माणशक्ति *f.*, कल्पनाचातुर्यं.

Devil, *s.* भूतः, वेतालः, पिशाचः; 'I shall not raise a d. for my own destruction' नाहमात्मविनाशाय वेतालोत्थापनं करिष्यामि.

Devious, *a.* वक्र, कुटिल, जिह्म. 2 मर्यादातिक्रामिन्, व्यभिचारिन्.

Devise, *v.* चिंत् 10, उप-सं-क्लृप् c., निरूप् 10, युज् 7 U, 10, आ-पर्या-लोच् 10, घट् c. 2 इच्छापत्रेण प्रदा 3 U. **-s.** इच्छापत्रेण रिक्थदानं. **-er,** *s.* धनाधिकारिन्, *m.* **-er,** *s.* उपायज्ञः, परिकल्पकः, प्रयोजकः.

Devoid, (of), *a. See* **Destitute** (of).

Devoir, *s.* स्वकर्तव्यं, कर्तव्यता, धर्मः. 2 सत्कारः, आदरः, पूजा, संमानः.

Devolve, *v. t.* निक्षिप् 6 P, न्यस् 4 P, संक्रम् c., सम्-ऋ c. (अर्पयति), आरुह् (रोपयति) 'having d. ed their property upon their sons' पुत्रसंक्रांतलक्ष्मीकाः (U. 1); गुणवत्सुतरोपितश्रियः (R. VIII. 11). 2 प्रपत् c., प्रसृ-प्रवह् c. **-v. i.** आगम् 1 P, आया 2 P, पत् 1 P, संक्रम् 1 U, 4 P; न्यस्-निक्षिप्-समृ c. pass.; 'after his death the kingdom d. ed upon his eldest son' मृते तस्मिंस्तस्य ज्येष्ठपुत्रो राजपदभाग्बभूव. 2 अधः पत् 1 P, अवपत्. **-Devolution,** *s.* निक्षेपणं, समर्पणं, संक्रामणं.

Devote, *v. t.* प्र-विनि-युज् 7 A, 10, सम्-ऋ c. (अर्पयति), निक्षिप् 6 P, उत्सृज् 6 P, सं-उप-क्लृप् c. 2 (Oneself to) आसंज्-अनुरंज्-pass., मनः युज् or बंध् 9 P or अभिनिविश् c., आसक्त-अभिनिविष्ट *a.* भू (all with loc.); भज् 1 U, आसेव् 1 A. 3 नाशाय क्लृप् c; *See* **Doom.** **-ed,** *a.* सक्त, आ-प्र-व्या-सक्त; नि-, रत, अभिनिविष्ट, समाहित, पर-तत्पर-परायण in comp. 2 भक्त, दृढभक्ति, अनुरक्त, अनुरागिन्; 'd. to the king' राजनिष्ठ, नृपासक्तचित्त; 'a d. wife' एकपत्नी, पतिव्रता, साध्वी, सती, 'a d. husband' भार्यानिरतः, पत्नीसेविन् *m.* 'a d. friend' स्थिरप्रेम मित्रं, रूढसख्यः सुहृद्. **-edly,** *adv* चित्तैकाग्रतया, भक्त्या, निष्ठया, अभिनिविष्टं, मनोभिनिवेशेन, मनोयोगेन, सुसमाहितं. **-edness,** *s* आसक्ति *f.*, भक्ति *f.*, अभिनिवेशः, परायणता. **-ee,** *s.* तापसः, यतिः, योगिन् *m.*, तपस्विन् *m.*, मुनिः, व्रतिन् *m.* 2 भक्तजनः, प्रणयिजनः:, उपासकः, भक्तः. **-ion,** *s.* अभियोगः, अभिनिवेशः, अनुरागः,

सेवा, उपासना, प्रसक्ति *f.*, आसक्ति *f.*, भक्तिः, निरति *f.*, परायणता. 2 नियमः, धर्मक्रिया, तपस् *n.* ईश्वरभक्तिः, सेवा. 'self-d.' आत्मोत्सर्गः-परित्यागः; 'd. to a husband' पातिव्रत्यं, पतिसेवा; 'to perform d. s' तपश्चर् 1 P or तप् 4 A, तपस्यति (D.). -ional, *a.* धर्मपर, धर्मनिष्ठ, भजनशील. 2 धर्मक्रियाविषयक, तपोमय (यी *f.*).

Devour, *v. t.* भक्ष् 10, अद् 2 P, खाद् 1 P, ग्रस् 1 A, गॄ 6 P. 2 उपयुज् 10, उपयोगेन विनश् *c.* **-er,** *s.* भक्षकः, खादकः.

Devout, *a.* धार्मिक, धर्म-परायणशील, धर्मनिष्ठ, धर्मात्मन्, भक्त, ईश्वरनिरत, पुण्यशील, प्रयतात्मन्, पुण्यात्मन्. **-ly,** *adv.* भक्त्या, भक्तिपूर्वकं, भक्तिपुरःसरं, श्रद्धान्वितं. **-ness,** *s.* धार्मिकता, धर्मात्मता, ईश्वरनिष्ठता, भक्ति *f.*

Dew, *s.* नीहारः, अवश्यायः, तुषारः, प्रालेयं, हिम-रात्रि-ख-जलं. **-***v. t.* नीहारेण सिच् 6 P or प्रोक्ष् 1 P; 'd. drop' तुषारकणः-बिंदुः-शीकरः, and sim. comps. **-y,** *a.* तुषारमय (यी *f.*), अवश्यायावसिक्त; तुषारकणोपम.

Dexterous, *a.* कुशल, निपुण, पटु, दक्ष, लघुहस्त, करदक्ष. **-ly,** *adv.* निपुणं, दक्षतया, सपाटवं, हस्तलाघवेन. **-Dexterity,** *s.* दक्षता, पटुता, नैपुण्यं, हस्तकौशलं, हस्तलाघवं.

Dextral. *a.* दक्षिण, अपसव्य, दक्षिणपार्श्वस्थ.

Diabetes, *s.* मधुमेहः, प्रमेहः, बहुमूत्ररोगः.

Diabolical, *a.* पैशाच (ची *f.*), पिशाचोपम. 2 घोर, दारुण, पापिष्ठ, अतिघोर-पाप, अतिनिंद्य.

Diacoustics, *s.* ध्वनिविद्या.

Diadem, *s.* मुकुटं, किरीटः-टं, मौलिः, उष्णीषः-षं, शिरोवेष्टनं. 'd. ed' किरीटिन्, किरीटधारिन्.

Diagnosis, *s.* रोगनिर्णयः निरूपणं, रोगनिदानं, मीमांसा, चिकित्सा.

Diagnostic, *s.* रोगलक्षणं-चिह्नं.

Diagonal, *s.* कर्णः, श्रुति *f.* **-ly,** *adv.* कोणाकोणि, कर्णाकर्णि.

Diagram, *s.* चित्रं.

Dial, *s.* शंकुयंत्रं, सूर्यघटी.

Dialect, *s.* प्राकृतभाषा, भाषा (as opposed to संस्कृत). 2 भाषणं, वचनं, उक्ति *f.*

Dialectic, *s.* तर्कः, न्यायः, हेतुविद्या, आन्वीक्षिकी विद्या. **-al,** *a.* तार्किक (की *f.*), न्यायिन्. **-ian,** *s.* तार्किकः, नैयायिकः, न्यायविद् *m.*

Dialogue. *s.* संलापः, संवादः, संकथा, संभाषणं, प्रश्नोत्तरं, कथोपकथनं. **-Dialogist,** *s.* संवादकः, उत्तरप्रत्युत्तरदायकः.

Diameter. *s.* व्यासः, विष्कंभः. **-Diametrically,** *adv.* विपरीतं, प्रतिकूलं, अत्यंतं, एकांततः.

Diamond, *s.* वज्रः-ज्रं, हीरं, हीरकः; 'd. cutter' हीरकारः-मार्जकः.

Diapason, *s.* स्वराष्टकं, स्वरग्रामः.

Diaper, *s.* चित्रितं क्षौमं. **-***v. t.* क्षौमं चित्र् 10 or चित्रीकृ, &c.

Diaphanic, *a.* स्वच्छ, विशद; *See* **Clear.**

Diaphoretic, *a.* स्वेदन (नी *f.*), स्वेदजनक, घर्मोत्पादक; 'd. medicine' स्वेदनं.

Diaphragm, *s.* शरीरमध्यदेशः.

Diarrhœa, *s.* अतिसारः, प्रवाहिका; ग्रहणी-, रुज् *f.*

Diary, *s.* दिनपत्रिका, दैनिकवृत्तपुस्तकं.

Diatribe, *s.* अधिक्षेपः, कुत्सात्मको लेखः.

Dibble, *s.* लघुखनित्रं.

Dice, *s.* plural of **Die,** *s. q. v.*

Dictate, *v. t.* आज्ञापूर्वकं कथ् 10, आदिश् 6 P, आज्ञा *c.* (ज्ञापयति). 2 सूच् 10, प्रोत्सह् *c.*, प्रचुद् 10, प्रेर् *c.*; 'd. ed by good motives' सदाशयप्रेरित. **-***s.* आज्ञा, आदेशः, शासनं. 2 चोदनं-ना, प्रेरणं-णा. **-ion,** प्रोत्साहनं. 2 आज्ञापनं, आज्ञापूर्वकं कथनं. **-or,** *s.* एकाधिपतिः, अनन्याधीनः शास्ता, अनियंत्रणः प्रभुः. 2 आदेशकः, शासितृ *m.* **-orial,** *a.* अवलिप्त; *See* **Arrogant.**

Diction, *s.* भाषा, वाणी, वाक्सरणि *f.*, वचोविन्यासः.

Dictionary, *s.* कोशः-षः, शब्दसंग्रहः; अभिधानं.

Dictum, *s.* वचनं, आदेशः, विधिः, नियमः.

Didactic,-al, *a.* उपदेशपर, प्रबोधक.

Die, *s.* अक्षः, पाशकः, देवनः; 'a loaded d.' कूटाक्षः. **-Dice,** (*pl.*) अक्षाः, &c. **-***v. i.* अक्षैः दिव् 4 P, ग्लह् 1 P. **-er,** *s.* अक्षधूर्तः, अक्षदेविन् *m.*, धूर्तः, कितवः. **-ing,** *s.* द्यूतं, अक्षक्रीडा; 'd. board' अष्टापदं, शारिफलं; 'd. box' अक्षधारः; 'the die is cast' कृतं दैवाधीनं (अप्रतिविधेयं) कर्म, अधुना यद्भावि तद्भवतु.

Die, *v. i.* मृ 6 A, प्राणान्-असून्-जीवितं त्यज् 1 P or उत्सृज् 6 P or हा 3 P, पंचत्वं या 2 P or गम् 1 P, उपरम् 1 P; परासु-गतासु *a.* भू 1 P, देहं-तनुं त्यज्, प्र-इ 2 P, विपद् 4 A, संस्था 1 A, प्रमी pass. 2 विनश् 4 P, म्लै 4 A, ध्वंस् 1 A क्षि pass., अवसद् 1 P. 3 म्लै 1 P, विद्रा pass. **-Dead,** *a.* मृत, उपरत, संस्थित, प्रेत, परेत, परासु, गतासु, विपन्न, गतप्राण, विचेतन, प्राणहीन, प्रमीत. 2 निश्चल, निश्चेष्ट, जड, निस्तेजस्, निःसत्व, असार, निष्फल. 3 सुप्त, स्तब्ध (as of limbs); 'd. body' शवं, मृतशरीरं; कुणपः; 'd. language' अप्रचलिता भाषा; 'd. sleep' घोर-गाढ-निद्रा; 'd. loss' परिपूर्णा-सकला हानिः; 'd. letter' लुप्तार्थं वचनं, 'd. soul' निरभिमानः आत्मा. **-***s.* (Of night) मध्यरात्रः, निशीथः, अर्धरात्रः. 2 मध्यं; *See* **Depth.** **-en,** *v. t.* दुर्बलीकृ 8 U, शिथिलीकृ, तेजो हृ 1 P, नश् *c.*,

म्लानीकृ. **-v.** *i.* म्लै 1 P, शिथिलीभू. **-ly,** *a.* प्राणापहारक, जीवितापह, मारात्मक, निधनकारिन्, प्राणांतक, प्राणहारिन्, प्राणनाशक, जीवितघ्न (घ्नी *f.*). **2** अशाम्य; ‘ d. enmity ’ आमरणांतिकं वैरं, अशाम्यं वैरं; ‘ d. poison ’ हाला(ल)हलं विषं. **-***adv.* मृतवत्; प्राणांतिकं; ‘d. wounded ’ भिन्नमर्मन्; ‘d. pale ’ प्रेतसवर्ण. **-ness,** *s.* दौर्बल्यं, निःसत्वता, जडत्वं, स्तंभः; वैकल्यं, विरक्ति, *f.*, शिथिलता. **-Death,** *s.* मरणं, मृत्युः, उपरमः, निधनः-नं, अंतः, पंचत्वं-त्ता, संस्थिति *f.*, कालधर्मः, दिष्टांतः, प्रलयः, अत्ययः, नाशः, प्राणनाशः, तनुत्यागः, &c. **2** यमः, कालः, कृतांतः. **3** वधः, घातः, व्यापादनं; ‘ he was pelted to d. ’ सलोष्ठघातं हतः; ‘ he was sentenced to d. ’ तस्य प्राणदंड आदिष्टः; ‘ to put to d. ’ हन् 2 P, व्यापद् c., वधं आदेश् 6 P; ‘ a violent d. ’ अपमृत्युः ; अपघातः; ‘ angel of d. ’ यमदूतः; ‘d. by fasting ’ प्रायः, प्रायोपवेशनं; ‘ d. bed ’ मृत्युशय्या. **-less,** *a.* अमर, अनश्वर, अमर्त्य, चिरस्थायिन्.

Diet, *s.* आहारः, अन्नं, भोजनं, भक्ष्यं. **2** पथ्यं, पथ्यान्नं., पथ्याशित्वं. **3** राजसभा, शिष्टसभा. **-***v. t.* पुष् c., भृ 3 U. **2** पथ्यं निर्दिश् 6 P.

Differ, *v. i.* भिद् pass., प्र-वि-; विशिष् pass., (न कारणात्स्वाद्बिभिदे कुमारः R. v. 35); gen. ex. by (*s.*); ‘ they two do not d. ’ न तयोर्भेदः, विशेषः, &c. **2** अन्यथा मन् 4 A, न संमन्, विवद् 1 A, भिन्नमत *a.* भू, विप्रतिपद् 4 A, (एवं हि विप्रतिपन्नाः प्राणेयत्तां प्रति श्रुतयः S. B. 702); ‘ I d. from you ’ मम मतं त्वन्मताद्भिन्नं. **3** विप्रति-रुध् pass. **-ence,** *s.* भेदः, विशेषः, अंतरं, (with gen.). **2** पार्थक्यं, इतरत्वं, भिन्नत्वं, व्यतिरेकः; ‘ that makes no d. ’ तेन न कोपि विशेषो जायते. **3** विरोधः. वैपरीत्यं, विपर्ययः, वैलक्षण्यं. **4** विप्रतिपत्ति *f.*, मतिभेदः, विसंवादः, वैमत्यं; कलिः, कलहः, विवादः. **5** असाम्यं, असादृश्य; ‘ d. in quantity ’ वैषम्यं. **-ent,** *a.* भिन्न, वि-प्रभिन्न, इतर-अन्य-पर-*pron. a.*, व्यतिरिक्त, विपरीत, पृथक्, विशिष्ट, (with abl.); अंतर in comp. : ‘ she is not d. from my body (myself) ’ अव्यतिरिक्तेयमस्मच्छरीरात् (Ka. 151); ‘ a d. sense ’ अर्थांतरं. **2** असदृश (शी *f.*), असमान. विषम, असम. **3** विविध, नानाप्रकार, नाना in comp. ; तत्तत् *pron. a.*, ‘ d. S′ástras ’ तानि तानि शास्त्राणि; ‘ in a d. way ’ अन्यथा, भिन्नप्रकारेण. **-ential,** *a.* भेदकर (री *f.*), विशेषक. **-ently,** *adv.* अन्यथा, इतरथा, भिन्नरूपेण; अन्यप्रकारेण, पृथक्.

र, कठिन, दुष्कर, दुःसाध्य. कष्ट. **2** गहन, विषम, दुर्बोध, असुगम, कष्टज्ञेय गूढार्थ, दुर्ज्ञेय. **3** (With inf.) ex. by दुर्, दुःख, कष्ट, in comp.; ‘d. to get दुष्प्राप, दुराप, कष्टसाध्य; दुरारोह, दुःखछेद्य, &c.; ‘ a d. case ’ सशल्योर्थः; ‘ a d. road’ दुर्गसंचा (च)रः, संक्रमः ; ‘a d. place’ विषमस्थानं, दुर्गं, दुर्गमस्थलं. **-ly,** *adv.* दुःखेन, कष्टेन, कृच्छ्रेण, कष्टं, आयासेन, दुर्, pr. **-y,** *s.* असौकर्यं, वैषम्य, कठिनता, दुष्करत्वं, कष्टता, दुःसाध्यता. **2** आयासः, वैक्लव्यं, विरोधः. **3** कृच्छ्रं, संकटं, विघ्नः, आयासः, दुर्गं, दुःखं, विरोधः, क्लेशः, बाधा, कष्टः एं. **4** विषमपदं, असुबोधं-दुर्बोधं पदं, असुगमं स्थानं; ‘ without d. ’ अनायासेन, सुखं; ’ with d. ’ कथमपि, कथं कथमपि, कथंचित्, दुःखेन, कृच्छ्रेण; ‘ a commentary explaining the d. es ’ विषमपदविमर्शिनी टीका; ‘ beset with d. es ’ सशल्य, सकंटक; ’ overcoming d. es ’ दुर्गलंघनं.

Diffidence, *s.* अविश्वासः, अप्रत्ययः, आ-, शंका. **2** (In oneself) अप्रगल्भता, विनयः, ह्रीः, लज्जा. **-Diffident,** *a.* अविश्वासिन्, शंकाशील, अप्रत्यय, साशंक; ‘ the mind feels d. of itself ’ आत्मन्यप्रत्ययं चेतः (S. 1). **2** अप्रगल्भ, अधृष्ट, विनीत, ह्रीमत्, लज्जावत्. **-ly,** *adv.* अप्रगल्भं, साशंकं, लज्जया, सविनयं.

Diffract, *v. t.* वियुज् 7 A, 10, विश्लिष् c.

Diffuse, *v. t.* प्रसृ c., वि-परि-स्तृ c., विसृप् c., प्रचर् c. विकॄ 6 P, तन् 8 U, अभि-प्र-चृध् c. **2** प्र-स्रु c., विद्रु c., प्रक्षिप् P. **3** (Itself) व्याप् 5 P, विसृ-विसृप् 1 P विस्तॄ pass., व्यश् 5 A, सर्वत्र गम् 1 P. or प्रविश् 6 P. **-***a.* वितत, सविस्तर, विस्तृत, असंक्षिप्त, विस्तीर्ण, सप्रपंच. **-ly,** *adv.* सविस्तरं, विस्तरेण, विस्तरशः, प्रपंचेन, असंक्षेपतः, असमासेन. **-ion,** *s.* प्रसारः, प्र-वि-सरः, विस्तारः, अभिवृद्धि *f.*, वितति *f.*, प्रचारणं, प्रसरणं. **-ive,** *a.* वि-प्र-सारिन्, व्यापक, व्यापिन्, प्रसरणशील. **-iveness,** *s.* विस्तारः, विस्तृति *f.*, व्यापकत्वं. **2** वाग्विस्तारः, प्रपंचः, वाक्यविस्तरः.

Dig, *v. t.* खन् 1 P: ‘ d. down ’ (भूमिं) अवदृ 10, भिद् 7 U; ‘ d. in ’ निखन्. **2** निर्भिद्, छिद् 10, व्यध् 4 P. **-ger,** *s.* खनकः, खनितृ *m.*

Digest, *v. t.* (जठरं) जॄ c. (जरयति), पच् 1 P, परिपाकं नी 1 P. परिणम् c. (णमयति), दह् 1 P. **2** क्रमेण-यथाक्रमं-विन्यस् 4 U or रच् 10 or ग्रंथ् 9 P or लिख् 6 P. **3** मनसा विचर् c. or चिंत् 10. **4** Suffer, q. v. **-***v. i.* जॄ 4 P, पच् pass., परिणम् 1 P **-er,** *s.* पाचकं, जारणं, अग्निवर्धनं, रोचनं. रोचकं. **-ion,** *s.* पाकः; वि-परि-पाकः, पचनं, परिणामः. **2** जठराग्निः, जठरानलः, अग्निः; ‘ slowness of d. ’ अग्निमांद्यं; ‘ having a good d. ' प्रदीप्ताग्निः. **-ive,** *a.* पाचन (नी *f.*), पाचक, अग्निवर्धक, परिपाकिन्.

Dight, *See* **Adorn.**

Digit, *s.* कला, लेखा, रेखा. 2 अंकः.

Dignity, *s.* महिमन् *m.*, माहात्म्यं, औदार्यं. 2 अनुभावः, प्रतापः, तेजस् *n.*, प्रौढि *f.*, प्रौढत्वं-त्ता. 3 प्रतिष्ठा, गौरवं, पदं, उत्कृष्ट-परमपदं, उत्कर्षः, उन्नति *f.*, आभिजात्यं, प्रतिपत्ति *f.*, ओजस्विता, उच्चत्वं, कुलीनता; ' d. of style ' ओजस् *n.* 4 मानः, अभिमानः, गर्वः, दर्पः; ' d. of expression ' प्रौढत्वं वचसां. **-Dignify,** *v. t.* संमन् c., सत्कृ 8 U, पूज् 10. 2 उत्कृष्टपदे नियुज् 7 A, 10, परमपदं प्राप् c., उत्कर्षं नी 1 P. **-ed,** *a.* महानुभाव, अनुभाववत्, ग(गं)भीर, ओजस्विन्, प्रौढ, महाप्रताप; ' d. in mien ' गंभीराकृति. 2 मानिन्, महाशय, महेच्छ. 3 उत्कृष्टपदनियुक्त, प्रतिपत्तिमत्, परमपदारूढ. **-Dignitary,** *s.* मान्यजनः, शिष्टजनः, कुलीनपुरुषः.

Digress, *v. i.* प्रस्तुतं न अनुसंधा 3 U, अप्रस्तुतं वद्-भण् 1 P or वच् 2 P, प्रकृतं-कथायोगं त्यज् 1 P; ' you are d. ing ' न त्वया प्रस्तुतमनुसंधीयते. 2 उत्क्रम् 1 U, 4 P, विचल् 1 P, प्रच्यु 1 A, भ्रंश् 1 A. 4 P; *See* **Deviate.** **-ion,** *s.* प्रकृतत्यागः, अप्रस्तुतानुसंधानं; प्रसंगः, प्रासंगिकं वचनं; ' enough of d. ' अलं प्रासंगिकेन or प्रसंगेन, प्रकृतमेवानुसंधीयतां. 2 उत्क्रमः, विचलनं, भ्रंशः, च्युति *f.*, त्यागः. **-ive,** *a.* अनन्वित, अप्रस्तुत, अप्रकृत, असंगत, असंबद्ध.

Dike, *s.* सेतुः, सेतुबंधः, पिंडलः, धरणः, कूलकः-क. 2 कुल्या, परिखा, खातं, प्रगालः-ली.

Dilacerate, *See* **Tear.**

Dilapidate, *v. i.* जॄ 4 P, विनश् 4 P. क्षि-उच्छिद्-pass., अवसद् 1 P. **-***v. t.* उच्छिद् 7 P, अवसद् c., प्रध्वंस् c. क्षि c., विनश् c ; *See* **Destroy.** **-ion,** *s.* क्षयः, ध्वंसः, नाशः, उच्छेदः, अवसादः.

Dilate, *v. t.* विस्तॄ c., वितन् 8 U, प्र-वि-सृ c., दीर्घीकृ 8 U. 2 (upon) प्रपंचयति (D.), सविस्तरं विवृ 5 U, or व्याचक्ष् 2 A, अति-विवृ. **-***v. i.* वितन्-विस्तॄ-विवृ pass., आयतीभू, दीर्घीभू. **-ed,** *a.* वितत, व्यायत; उत्फुल्ल, विकसित. **-ion,** *s.* विस्तारः, वितति *f.*, विस्तरणं, विवृति *f.*: विकासः-सनं. उत्फुल्लता.

Dilatory, *a.* दीर्घसूत्रिन्, दीर्घसूत्र, विलंबिन्, मंद, मंथर, चिरक्रिय, अक्षिप्रकारिन्. **-ly,** *adv.* सविलंबं, मंदमंदं, कालक्षेपेण. **-ness,** *s.* दीर्घसूत्रता, विलंबः, कालक्षेपः, मांद्यं, कार्यजडता.

Dilemma, *s.* उभयसंभवः, विकल्पः.

Diligent, *a.* उद्योगिन्, व्यवसायिन्, उद्युक्त, सोद्योग, उद्यमिन्, अनलस, अभिनिविष्ट, उद्यम-व्यवसाय-पर, उद्योगतत्पर. 2 (of things), अनवरत, सतत, नित्यप्रवृत्त, प्र-आ-सक्त, अभ्यस्त, प्रसित, अविच्छिन्न. **-ly,** *adv.* प्रयत्नतः, सोद्योगं, सोद्यमं; अनवरतं, प्रसक्तं. **-Diligence,** *s.* उद्यमः, अध्यव-व्यवसायः, उद्योगः, अभियोगः, अभिनिवेशः, प्रयत्नः, अभ्यासः, प्रसक्ति *f.*, उत्साहः. 2 सातत्यं, अविच्छेदः, अविरामः, नैरंतर्यं.

Dill, *s.* शालेयः, मधुरिका.

Dilute, *v. t.* जलेन मिश्र् 10, or संसृज् 6 P, विली c., तनूकृ 8 U, क्षीणीकृ; मिश्रणेन शक्तिं तनूकृ. **-ion,** *s.* जलसंसर्गः, जलमिश्रणं; तनूकरणं. **-Diluent,** *s.* विलयनं, तनूकरणं.

Dim, *a.* मंदद्युति, मंदप्रभ, मलिनकांति, मलिन, निष्प्रभ, निस्तेजस्, सतिमिर. 2 अप्रकाश, अव्यक्त, अस्पष्ट, दुरालोक, दुर्दृष्ट; ' seeing d.-ly ' हतदृष्टि, अस्पष्टदृश्; ' of d. understanding ' मंदमति, जड-स्थूल-धी-बुद्धि, &c. **-***v. t.* अंधीकृ 8 U, अस्पष्टीकृ, कलुषीकृ, निष्प्रभीकृ, मलिनयति (D.). **-ly,** *adv.* अस्पष्टं, अव्यक्तं, निष्प्रभं, मालिनं. **-ness,** *s.* तिमिरं, अस्पष्टता, तेजोहानि *f.*, दुरालोकता, मालिन्यं, अस्पष्टता. 2 स्थूलमतिता, बुद्धिमांद्यं.

Dimension, *s.* प्रमाणं, परिमाणं, मात्रा, मानं, विस्तारः.

Diminish, *v. t.*, *v. i.* *See* **Decrease.** **-Diminution,** *s.* न्यूनीकरणं, ह्रासः, क्षयः, अपचयः, अवसादः, हानि *f.* **-Diminutive,** *a.* अल्पकाय, क्षुद्र, अल्प, स्तोक, सूक्ष्म, लघु. 2 अल्पार्थ (प्रत्ययः); 'कन् is a d. termination' अल्पार्थे कन्.

Dimity, *s.* दृढं कार्पासवस्त्रं.

Dimple, *s.* कपोलभंगः, गंडतरंगः; कपोलोर्मि *f.* ऊर्मि *f.*, भंगुरता, दंतुरता, भंगः, तरंगः. **-Dimply,** *a.* भंगुर, ऊर्मिमत्, दंतुर.

Din, *s.* कलकलः, निनादः, कोलाहलः, तुमुलरवः, निः-स्वनः, उच्चघोषः, तुमुलः. **-***v. t.* (श्रवणपुटं) जर्जरीकृ 8 U, कर्णौ उपहन् 2 P or जर्जरयति (D.): *See* **Stun.**

Dine, *v. i.* भुज् 7 A, आहारं-भोजनं सेव् 1 A, or निर्वृत् c., शरीरस्थितिं कृ 8 U or क्लृप् c. **-***v. t.* भुज् c., अश् c. **-Dinner,** *s.* भोजनं, आहारः, अशनं; *See* **Food.** 2 उत्सवः, जग्धि *f.*, भोजनोत्सवः.

Ding, *v. t.* शब्दायते (D.), नद्-स्वन्-क्वण् 1 P; 'ding dong' घंटानादः-शब्दः; किंकिणीरवः-शब्दः-नादः, सततनादः.

Dingle, *See* **Dale.**

Dingy, *See* **Black.**

Dint, *s.* प्रहारः, आघातः, अभिघातः. 2 बलं, प्रभावः, सामर्थ्यं; ' by d. of ' बलेन, प्रभावेण, सामर्थ्यात्, योगेन. **-***v. t.* प्रहारेण अंक् 10 or चिह्न् 10.

Diocesan, *s.* प्रधानधर्माध्यक्षः.

Diorthesis, *s.* वक्रांगचिकित्सा.

Dip, *v. i.* नि-,मस्ज् 6 P (with loc.); अव-वि-गाह् 1 A, प्र-नि-विश् 6 P, आप्लु 1 A, (acc.). 2 व्यापृ 6 A, व्यापृत *a.* भू. **-*v. t.*** अवगाह् c., मस्ज् c. (मज्जयति), प्रवेश् c. 2 सिच् 6 P, क्लिद् c., आर्द्रीकृ 8 U; 'd. in a business' ईषत् व्यापृ or प्रवृत् 1 A; 'd. into books' चुंब् 1 P; अल्पशः अधि-इ 2 A. **-*s.*** निमज्जनं, अवगाहः, प्रवेशः. 2 अवपातः, नम्रता, आनति *f.*

Diphtheria, *s.* मांससंतानिका.

Diphthong, *s.* स्वरद्वयं, संयुक्तस्वरः, संध्यक्षरं.

Diploma, *s.* पदवी अधिकार-दायकं पत्रं.

Diplomacy, *s.* सामन् *n.*, नीति *f.*, दौत्यकर्मन् *n.* 2 राजदूतमंडलं-समूहः. **-Diplomatical,** *a.* दूतकार्यविषय. **-Diplomatist,** *s.* सामप्रयोगज्ञः, राजनीतिकुशलः, दौत्यकार्यनिपुणः, सामकुशलः.

Dipsomania, *s.* मद्यासक्ति *f.*

Dire,-ful, *a.* दारुण. घोर, उग्र, तीव्र. 2 भीषण, क्रूर, भयानक, रौद्र. **-ness,** *s.* दारुणत्वं, घोरता, रौद्रता.

Fun, *s.* परि(री)हासः, नर्मन् *n.*, क्रीडा, खेला, केलि *f.*, प्रहसनं, क्रीडाकौतुकं; 'said in f.' नर्मभाषितं, नर्मालापः. **-Funny,** *a.* हास्यजनक, विनोदनशील, रसिक, कौतुककारिन्, नर्म-परिहास- in comp. 2 उपहास्य; अपरूप.

Funambulist, *s.* रज्जु-चारिन् *m.*--नर्तकः.

Function, *s.* व्यापारः, कर्मन् *n.*, कार्यं, कृत्यं, चेष्टा, क्रिया, चेष्टितं, व्यवसायः, व्यवहारः, वृत्ति *f.*, प्रवृत्ति *f.* 2 नियोगः, अधिकारः, पदं. 3 आचरणं, अनुष्ठानं, करणं. 4 गुणः, धर्मः, स्वभावः. 5 इंद्रियं, शक्ति *f.*, कर्मेंद्रियं. **-ary,** *s.* नियोगिन् *m.*, अधिकारिन् *m.* कार्यनिर्वाहकः, नियुक्तः, अधिकृतः.

Fund, *s.* संचयः, पुंजः, राशिः, समुदायः, निचयः, संयोगः, संनिपातः; *See* **Collection.** 2 मूलधनं, नीवि-वी *f.* -*v. t.* सं-चि 5 U, संग्रह् 9 P, पुंजीकृ 8 U, राशीकृ.

Fundament, *s.* गुदं, पायुः, अपानं, मलद्वारं. 2 अधोभागः, तलं.

Fundamental, *a.* प्रधान, सार, सारभूत, गुर्वर्थ, मौलिक, मूल in comp.; 'f. cause' मूलकारणं; 'f. principle' मूलतत्त्वं. -*s.* प्रधान-मूल-तत्त्वं, मूलं, तत्त्वं, सारः.

Funeral, *s.* और्ध्वदैहिकी क्रिया, अंत्येष्टि *f.*, प्रेतकार्य-कृत्यं, प्रेतनिर्हारः, अंत्यक्रिया, उत्तरक्रिया-कर्मन् *n.*, और्ध्वदैहिकं, श्राद्धादि कर्म. -*a.* और्ध्वदेहिक, और्ध्वदैहिक(की *f.*), better by (*s.*); 'f. pile' चिता, चिति-ती *f.* चित्या.

Fungus, *s.* विड्जं, गोमयजं, शिलींध्रं, शा(सा)लेयः, शीतशिवः, छत्रा, मधुरिका, मिसि-शि-सी-शी- *f.*, मिश्रेया.

Funicle, *s.* क्षुद्ररज्जु *f.*, क्षुद्रगुणः, सूत्रं.

Funk, *s.* महद्भयं, संत्रासः. **-y,** *a.* भीत, संत्रस्त.

Funnel, *s.* धूममार्गः-पथः-द्वारं. 2 नाली, प्रणाली-लिका, नाडि-डी *f.*

Fur, *s.* रो(लो)मन् *n.*, तनुरुहः-हं, पशुलोमन् *n.*; 'f. on the tongue' कुलकं, मलं. **-red,** *a.* लोमावृत, लोमान्वित. 2 समल.

Furbish, *v. t.* तिज् c., निः-तप् c., प्रमृज् 2 P or c., धाव् 10, परिष्कृ 8 U. **-ed,** *a.* निर्धौत, प्रमृष्ट, निष्टप्त. **-er,** *s.* तेजकः, मार्जकः, निर्णेजकः; 'f. of weapons' शस्त्रमार्जः, असिधावकः. **-ing,** *s.* धावनं, परिष्कारः, तेजनं.

Furcated, *a.* द्व्यग्र.

Furl, *v. t.* सं-वेष्ट् c., सं-वृ 5 U, संपुटीकृ 8 U, सं-वृ 1 P.

Furlong, *s.* नल्वः.

Furlough, *s.* कर्मत्याग-कर्मविराम-अनुज्ञा. 2 कर्मनिवृत्ति *f.*

Furmenty, *s.* क्षीरान्नं, परमान्नं, पायसं

Furnace, *s.* अग्निकुंडं, अधिश्रयणी, अंति(दि)का, उद्ध्मानं; 'a portable f.' *See* **Hearth**.

Furnish, *v. t.* (उपकरणैः) संयुज् 10 or सनाथीकृ 8 U; (उपस्करं) उप-क्लृप् c., उपपद् c., सं-भृ 3 U, वि-धा 3 U; gen. ex. by स or सनाथ in comp.; 'f. ed with arrows' सशरं (धनुः); मणिशिलापट्टसनाथं लतागृहं (V. 2) 'f. ed with a marble slab'; 'to f. with arms' शस्त्रास्त्रैः संनह् 4 P or सज्जीकृ. **-ed,** *a.* सं-,युक्त, समन्वित, उपेत, उप-परि-क्लृप्त, सनाथ, संभृत, स in comp. 2 सोपस्कर, सोपकरण, उपस्करादियुक्त. 3 सन्नद्ध, सज्जीकृत. **-Furniture,** *s.* उपस्करः, उपकरणं, परिच्छदः, सामग्री, सज्जा, संभारः, उपचारः, परिबर्हः; 'on sofas with all f.' उपचारवत्सु मंचेषु (R. vi. 1.); परिबर्हवंति वेश्मानि (R. xiv. 15); 'household. f.' गृहोपस्करः, पारिणाह्यं.

Furor, *s. See* **Fury.**

Furore, *s* अत्याश्चर्यं, महद्विस्मयः,

Furrow, *s.* सीता, हलिः, लांगलमार्गः-पद्धति *f.*, हलरेखा. 2 रे(ले)खा, सुषिरं. 3 वदनरेखा, वलि-ली *f.* **-v. t.** (हलेन) कृष् 1 P, (लांगलेन) लिख् 6 P or रेखाः कृ 8 U. **-ed,** *a.* सीत्य, कृष्ट हल्यवत

Further, *a.* दूरतर, दूरस्थ, दवीयस्. 2 अधिक, अपर, अधिकतर, पर. **-adv** दूरतरं, अधिकदूरं, अग्रे-ग्रतः, पुरतः, अग्रेतरां, पुरस्तात्; 'a little f. on' स्तोकांतरं, अग्रतः, किंचिदग्रे; 'f. and f.' अधिकाधिकं, उत्तरोत्तरं. 2 अपरं, अन्यच्च, अपरं च, किं च, अपि च, अपरं तु. **-v. t.** प्र-सं-वृध् c., अनुग्रह् 9 P, उपकृ 8 U, त्वर् c., (त्वरयति), पुरस्कृ, प्रवृत् c., साहाय्यं दा 3 U, उत्कृष् 1 P, उन्नतिं-उत्कर्षं-नी 1 P. **-ance,** *s.* सं-प्र-वर्धनं, प्रवर्तनं, अभि-प्र-वृद्धि *f.*, अनुग्रहः, उपकारः, साहाय्यं, उत्कर्षः. **-er,** *s.* उपकारकः, प्रवर्धकः. **-more,** *See* (*adv.*).

Furthest, *a.* दविष्ठ, दूरतम. **-adv.** सुदूरं, दविष्ठं.

Furtive, *a.* चौर्येण गृहीत, अपहृत, छलापहृत, निभृतं कृत. **-ly,** *adv.* चौरवत्, उपांशु, रहसि, निभृतं, छलेन.

Fury, *s.* मत्तता, उन्मत्तता, चंडता, उग्रता, औत्कट्यं. 2 संरंभः, कोपः, क्रोधः, रोषः, आवेशः, अमर्षः. 3 महावेगः, अत्यंतवेगः-जवः, बलं, आवेशः. 4 चंडी, दुर्गा. **-Furious,** *a* प्र-,चंड, तीव्र, उग्र, प्रबल, महावेगवत्. 2 उन्मत्त, मत्त, मदोत्कट, मदकल, समद, उद्दाममद, उन्मादसंरब्ध, उत्कट. 3 कोपाकुल. संरब्ध, क्रोधाविष्ट, कोपपरीत, रोषण, इद्धकोप, जातामर्ष. **-ly,** *adv.* उग्रं, चंडं महावेगेन, संरंभेण. **-ness,** *s* संरंभः, उग्रता उन्मादः, कोपाकुलत्व.

Fuscous, *a.* आकृष्ण, आनलि.

Fuse, *v. t.* वि-द्रु c., विली c., जलसात् कृ 8 U. 2 एकरूप *a.* कृ, संमिश्र् 10, सायुज्यं कृ, संयुज् 10, सदृशीकृ. **-v. i.** वि-द्रु 1 P, वि-ली 4 A, द्रवीभू, गल्-स्रु- 1 P. 2 सदृशीभू, सायुज्यं प्राप् 5 P, एकरूप *a.* भू. **-ible,** *a.* द्राव्य, विलयनीय, द्रवशील, क्षरणशील. **-ion,** *s.* द्रावः, विलयनं, विलयः, द्रवत्वं, क्षरणं. 2 एकरूपता, सदृशीभावः, एकभावः, संमिश्रणं, संकरः, संयोगः.

Fuss, *s.* आडंबरः, तुमुलं, कोलाहलः, संभ्रमः. **-y,** *a.* संभ्रमकारिन्.

Fust, *s.* स्तंभः, स्तंभदंडः. 2 उग्र-पूति-गंधः, दुर्गंधः. **-Fusty,** *a.* पूति, पूतिगंधि, उग्रगंध. **-ness,** *s.* पूति *f.*, दुर्गंधः.

Fustian, *s.* स्थूलशाटकः, वराशिः, स्थूलपट्टवस्त्रं-कार्पासं. 2 अतिशयोक्ति *f.*, गर्वोक्तिः, दर्पवचनं, सदर्पावाच्-उक्ति *f.* **-a.** स्थूलकार्पासिक (की *f.*). 2 अतिगर्वित, दर्पाध्मात, सगर्व.

Futile, *a.* निरर्थक, मोघ, व्यर्थ, निर्गुण. 2 असार, लघ्वर्थ, निःसार, निःसत्त्व, फल्गु, तृणप्राय, तुच्छ. **-ity,** *s.* मोघता, लाघवं, असारता, &c.

Future, *a.* भविष्यत्, उत्तर, अनागत, आगामिन्, भाविन्, उत्तरकालीन, श्वस्तन (नी *f.*); 'f. time' अनागतवेला, उत्तरकालः, आयति

f. 2 पारलौकिक-पारत्रिक-आमुष्मिक (की *f.*), अमुत्रत्य, परलोकगत. -*s.*, -**ity**, *s.* भावि-उत्तर-कालः, भविष्यत्-आगामि-कालः, भाविन् *n.*, अनागतं, अनागतकालः, आयति *f.*, उदर्कः; 'past, present and f.' समतीतं च भवच्च भावि च (R. viii. 78); 'ignorant of the f.' अश्वस्तनविद्, उदर्कानभिज्ञ.

G.

Gaberdine, *s.* वराशिः, स्थूलशाटकः.

Gabble,-er, *See* **Babble,-er.**

Gabel, *s.* करः, राजस्वं, शुल्कः-ल्कं, बलिः.

Gable, *s.* गृह-प्रासाद-शिखरं.

Gad, *s.* बाणाग्रं, शूलाग्रं; अग्रं, कर्णः. 2 कीलः, लोहकीलः. -*v. i.* अट् 1 P, परिभ्रम् 1, 4 P. -**ding**, *s.* परि-, अटनं-भ्रमणं.

Gad-fly, *s.* दंशकः, गोमक्षिका, दंशः-शी, वनमक्षिका.

Gaffer, *s.* वृद्धजनः; अशिष्टाचारः.

Gag, *s.* मुखबंधनी-पिधानं, रोधनं. -*v. t.* मुखं बंध् 9 P or निरुध् 7 U or पि-धा 3 U.

Gage, *s.* पणः, आधिः, परिपणनं. 2 मानं, प-परि-माणं. 3 मापनयंत्रं. 4 आह्वानं. -*v. i.* पण् 1 A, प्रति-ज्ञा 9 U, अंगीकृ 8 U, प्रतिपद् 4 A, सशपथं प्रतिज्ञा.

Gaggle, *v. i.* कलं रु 2 P; कूज् 1 P.

Gain, *v. i.* लभ् 1 A, अर्ज् 1 P or c., आप् 5 P, आ-समा-सद् c.; *See* **Get**; 'g. ground' उप-चि pass., प्रवृध् 1 A; प्ररुह् 1 P; 'g. over' साध् c., वशं नी 1 P (धनदानादिना); अनुरंज् c., ग्रह् 9 U; 'g. over to one's side' स्वपक्षं ग्रह् c.; 'g. a battle' युद्धे जयं लभ्; 'g. the day' जयं प्राप्, विजयिन् *a.* भू; 'g. upon one's steps' समासद् c.; *See* **Overtake.** -*v. t.* क्रमशः प्रसृप् or प्रगम् 1 P. -*s.* लाभः, प्राप्ति *f.*, फलं, आयः, अर्थः, उत्पन्नं, फलोदयः, अर्जनं. -**er**, *s.* अर्जकः; प्राप्तलाभः; फलप्रापकः. -**ful**, *a.* फलद; लाभजनक, अर्थोत्पादक. -**ly**, *adv.* दक्षं, चतुरं, सपाटवं.

Gainsay, *v. t.* विरुध् 7 U; नि-प्रति-षिध् 1 P, प्रत्या ख्या 2 P, प्रत्यादिश् 6 P, अपवद् 1 U, अपलप् 1 P, अधरीकृ 8 U, निरा-कृ, बाध् 1 A, निरस् 4 U. -**er**, *s.* अपवादकः, निषेधकः.

Gairish, *a.* अतिशोभन, रूपगर्वित. -**ness**, *s.* अतिशोभा, रूपगर्वः, दंभः.

Gait, *s.* गति *f.* गमनं, : गतं, चारः; 'graceful in g.' हंसगति, चारुगामिन्.

Gala, *s.* उत्सवः, उत्सवदिवसः, पर्वदिनं.

Galaxy, *s.* सुरनदी, आकाशगंगा, स्वर्गंगा, वियद्गंगा. 2 सुवस्तुमंडलं.

Gale, *s.* वातः, वायुः, पवनः; 'strong g.' वात्या, वाताली, चंडवातः, जवानिलः, वेगानिलः, प्रकंपनः, ध्राजि *f.*

Gall, *s.* क्षतं, विषं; दंशः; (fig.) पीडा, दुष्टभावः, संबाधा. 2 पित्तं, मायुः. 3 कटुता, तिग्मता, कठोरता, अरुंतुदत्वं. -*v. t.* चर्म घृष् 1 P or कृष् 1 P. 2 सं-परि-तप् c., पीड् 10, बाध् 1 A, क्लिश् 9 P, अर्द् 1 P, मर्माणि कृत् 6 P or भिद् 7 P. -*v. i.* आत्मानं तप् c. -**ing**, *a.* परुष, मर्मच्छिद्-भिद्, अरुंतुद.

Gallant, *a.* शोभन, सुभगदर्शन; सभ्य, सभ्याचार, सुशील; दक्षिण; स्त्र्युपचारपर-दक्ष. 2 वीर, शूर, विक्रांत, महावीर्य; *See* **Brave.** -*s.* वल्लभः, रमणः, कामुकः, कामिजनः, कामिन् *m.*, नायकः, दयितः. 2 जारः, विटः, उपपतिः. 3 सभ्याचारः, सुजनः; स्त्र्युपचारशीलः-परः. -**ry**, *s.* दाक्षिण्यं; कामचेष्टा, शृंगारविलसितं, स्त्र्युपासना, स्त्र्युपचारः. 2 वीर्यं, शौर्यं, धामन् *n.*, विक्रमः, पौरुषं. 3 उदारता, माहात्म्यं. -**ly**, *adv.* सविक्रमं, सवीर्यं, शूरवीर-वत्. 2 रमणवत्.

Gallery, *s.* मंचाः (pl.), मंचसनाथः कोष्ठः. 2 छन्नपथः-मार्गः. 3 अलिंदः-दकः.

Gallinaceous (fowl), *s.* कुक्कुटः, ताम्रचूडः, चरणायुधः.

Gallinule, *s.* दात्यूहः, कालकंठकः.

Gallop, *v. i.* वल्ग् 1 P, प्लुतगत्या चल् or धाव् 1 A, प्लु 1 A. -*s.* प्लुतं, वल्गितं, प्लवनं.

Gallows, *s.* वधस्तंभः, वध्यशिला-काष्ठं; वधघातस्थानं, वध्यस्थलं. 'met his death on the g.' शूलमारोपितः.

Galoche, *s.* काष्ठपादुका, पादुका.

Galvanize, *v. t.* विद्युच्छक्त्या आकृष् 1 P or उपहन् 2 P.

Gamble, *v. i.* दिव् 4 P (अक्षैः अक्षान् वा); अक्षैःक्रीड् 1 P. -**er**, *s.* द्यूतकारः, देवितृ *m.*, द्यूतकृत् *m.*, धूर्तः, अक्षदेविन् *m.*, कितवः, अक्षधूर्तः. -**ing**, *s.* द्यूतं, दुरोदरं, पणः, अक्षवती, अक्षक्रीडा-द्यूतं, कैतवं, देवनं, द्यूतसेवा, 'g.-house' द्यूतशाला-सभा; 'he who keeps a g.-house' सभिकः, द्यूतकारकः.

Gambol, *v. i.* क्रीड् 1 P, नृत् 4 P, इतस्ततः वल्ग् 1 P, प्लु 1 A. -*s.* नृत्यं, क्रीडा, लास्यं लीला, केलि *f.*, खेला.

Game, *s.* क्रीडा, खेला, केलि *f.*, लीला, विलासः, परि(री)हासः. 2 वन्यपश्वादि, जांगलः, वन्यपक्षिन् *m.* 3 मृगया. 4 संकल्पः, व्यवसायः, कल्पना, संदिग्धव्यवसायः. -*v. i.* क्रीड् 1 P, दिव् 4 P; 'G.-cock' चरणायुधः, योधकुक्कुटः; 'g.-keeper' वन्यपक्षिपालकः; 'g.-leg' पंगुपादः. -**ing**, *s.* द्यूतं. -**ster**, *s.* धूर्तः; *See under* **Gamble.**

-some, *a.* क्रीडा-लीला-पर, विलासशील, विलासिन्, परिहासशील, उल्लासिन्, परिहासिन्, विनोदिन्, नर्मालापिन्.

Gammer, *s.* वृद्धा स्त्री.

Gammon, *s.* वल्लूरं, उत्तप्तं, सूकरशुष्कमांसं. 2 चर्मपट्ट-शारि-क्रीडा. 3 **Deceit**, q. v. -*v. t.* सूकरमांसं लवणीकृ 8 U. 2 **Cheat**, q. v.

Gamut, *s.* ग्रामः.

Gander, *s.* हंसः, चक्रांगः, चक्रवाकः, चक्रः; श्वेतगरुत् *m.*, मानसौकस् *m.*, राजहंसः (white).

Ganesh, *s.* गणेशः, गणपतिः, विनायकः, विघ्नेशः, विघ्नराजः, द्वैमातुरः, गणाधिपः, एकदंतः, हेरंबः, लंबोदरः, गजाननः, गजास्यः, गजदंतः.

Gang, *s.* गणः, संघः, निवहः; *See* **Collection**.

Ganges, *s.* गंगा, मंदाकिनी, त्रिपद्गंगा, स्वर्णदी, सुरदीर्घिका, जाह्नवी, जह्नुतनया-कन्या, भागीरथी, अमरापगा, सुरनदी, त्रिस्रोतस् *f.*, त्रिपथगा.

Ganglion, *s.* शिरास्फोटः.

Gangrene, *s.* पूतिमांसं; मांसपाकः; कोथः. -*v. i.* कोथीभू 1 P, पूतीभू.

Gangway, *s.* आरोहावरोहणपथः.

Gaol, **-er**, *See* **Jail**, **-er**.

Gap, *s.* छिद्रं, भंगः, विच्छेदः, भेदः, रंध्रं, छेदः, विवरं, गर्तः-र्ता.

Gape, *v. i.* वि-प्र-जृंभ् 1 A; जभ्-जंभ् 1 A, मुखं व्यादा 3 A. **2** वि-,दल् 1 P, स्फुट् 1 P. -*s.*, **-ing**, *s.* जृंभः-भा, जृंभणं, जृंभिका, जृंभितं, हर्मन् *n.*, हाफिका, मुखव्यादानं. **-ing**, *a.* जृंभिन्, जृंभित, व्यात्तमुख.

Garb, *s.* वेशः-षः, वस्त्रं, वसनं, वासस् *n.*, परिधानं, प्रसाधनं; 'putting on the g. of virtue' धर्मकंचुकप्रवेशिनः (S. 5).

Garbage, *s.* उच्छिष्टं, मलं.

Garble, *v. t.* साचीकृ 8 U; सत्यं गुह् 1 U, विकृ, वक्रीकृ.

Garden, *s.* उद्यानं, उपवनं; 'g. near a house' गृहारामः, निष्कुटः, गृहवाटिका; 'pleasure-g.' क्रीडोपवनं, आरामः, प्रमदवनं, आक्रीडः; 'flower-g.' पुष्पवनं-वाटः-वाटिका, कुसुमाकरः; 'fruit-g.' फलवृक्षवाटिका; 'vegetable g.' शाकवाटिका, शाकशाकटं, शाकशाकिनं; 'g.-wall' उद्यानपरिसरः-प्राकारः. **-er**, *s.* उद्यानपालकः-रक्षकः, मालाकारः, मालिकः, मालिन् *m.* **-ing**, *s.* उद्यानकर्मन् *n.*, उद्यानसेवनं-कर्षणं, फलोत्पत्तिकर्मन् *n.*

Gargle, *v. i.* (जलं) आचम् 1 P, उप-स्पृश् 6 P, जलेन मुखं मृज् 2 P or धाव् 1 P. -*s.* आचमनीयं, आचाम्यं.

Garish, *a.* *See* **Gairish**.

Garland, *s.* माला, स्रज् *f.*, माल्यं, आपीडः; शेखरः, हारः; 'g. worn in the hair' गर्भकः; 'g. hanging from the crest' प्रभ्रष्टकं, शिखालंबि माल्यं; 'g. worn straight' प्रालंबः-बिका; 'g. worn sideways' वैकक्षिकं; 'g. of pearls' हारः, मुक्तावली, मौक्तिकसरः.

Garlic, *s.* ल(र)शुनं, रसोनः-नकः, महौषधं, गृंजनं, अरिष्टः, महाकंदः, सोनहः.

Garment, *s.* वस्त्रं, वासस् *n.*, वसनं, पटः, परिधानं, परिच्छदः, अंबरं, प्रच्छादनं; वेशः-षः; 'under or lower g.' अंतरीयं, अधोंशुकं, उपसंव्यानं, परिधानं, अधोवासस् *n.*-वसनं; 'upper g.' उत्तरीयं, प्रावा(व)रः, उत्तरासंगः, बृहतिका, संव्यानं; 'g. as a protection from wind and cold' नीशारः.

Garner, *s.* कुशू(सू)लः, धान्यागारं, धान्यकोष्ठः, कंडोलः-लकः; पिटः. -*v. t.* कंडोले निविश् c. or नि-धा 3 U.

Garnet, *s.* रक्तमणि *m.*

Garnish, *v. t.* भूष् 10, मंड् 10, अलंकृ 8 U, परिष्कृ, शुभ् c. -*s.*, **-ment**, **-Garniture**, *s.* प्रसाधनं, भूषणं, अलंकारः, मंडनं, आभरणं; उपकरणानि (pl.), सज्जा.

Garret, *s.* शिरोगृहं, चंद्रशाला, अट्टः, अट्टालः.

Garrison, *s.* दुर्गरक्षकाः (pl.); दुर्गसैन्यं-बलं. राक्षिणः-रक्षकाः (pl.); रक्षिवर्गः. -*v. t.* रक्षा; पुरुषैः युज् 10, (दुर्गे) राक्षिणः निविश् c. or-स्था c. (स्थापयति).

Garrulous, *a.* अतिवक्तृ, वावदूक; बहुभाषिन्-वादिन्, वाचाल, वाजाट, जल्पाक, मुखर. **-ness**, **Garrulity**, *s.* वाचालता, वावदूकता, अतिवादः, बहुभाषित्वं, अतिजल्पनं.

Garter, *s.* पादावरणबंधनी, जंघाबंधनी.

Garth, *s.* अंगणं, प्रांगणं. **2** उपवनं. **3** धरगः.

Garuda, *s.* गरुडः, गरुत्मत् *m.*, तार्क्ष्यः, वैनतेयः, खगेश्वरः, नागांतकः, विष्णुरथः, सुपर्णः, पन्नगाशनः, भुजगदारणः, भुजगरिपुः.

Gas, *s.* वायुः. **-eous**, *a.* वायुरूप.

Gash, *s.* दीर्घच्छेदः, दीर्घ-गंभीर-क्षतं.

Gasometer, *s.* वायुमापनयंत्रं.

Gasp, *v. i.* कृच्छ्रेण श्वस् or अन् 2 P, दुःखेन श्वस्, स्थूलस्थूलं निश्वस्. -*s.* उच्छ्वासः, निश्वासः, कृच्छ्रोच्छ्वासः, कष्टश्वासः.

Gastric, *a.* जाठर (री *f.*), उदरीय, जठरीय; उदर-जठर in comp.; 'g. juice' जठराग्निः.

Gastronome, *s.* औदरिकः, उदरंभरिः, कुक्षिंभरिः, उदरपरायणः; *See* **Glutton**. **-Gastronomy**, *s.* उदरपरायणता, उदरसेवा.

Gate, *s.* द्वारं, प्रतिहारः, द्वार् *f.*; 'g.-way' तोरणः-णं, गोपुरं; निर्गमः, द्वारपथः; for other comps. ; *See* **Door**.

Gather, *v. t.* चि 5 U, सं-अव-प्र-आ-°; समा-हृ 1 P, समा-नी 1 P, संग्रह् 9 P, सं-भृ 1, 3 U, एकीकृ 8 U; *See* **Collect**; 'g. flowers' पुष्पाणि चि or लू 9 U. **2** ज्ञा 9 U, अनु-मा 3 A. 2 P, ऊह् 1 A, अवगम् 1 P. **3** उद्-वृ 5 U, उद्धृ 1 P. *-v. i.* संगम् 1 A, सं-इ 2 P, संमिल् 6 P, सन्नि-पत् 1 P, एकत्र मिल्, एकस्थ *a.* भू 1 P, एकीभू **2** उपचि pass., प्र-वि-वृध् 1 A, एध् 1A. **3** पूयं बंध् 9 P, पूय् 1 A. *-s.* पुटः, चूणः. **-er,** *s.* अवचायिन् *m.*, संग्राहकः; 'g. of taxes' शौल्किकः, करग्राहकः. **-ing,** *s.* चयः, अव-सं-चयः, संग्रहणं. **2** समूहः, गणः, संघः, समागमः, निवहः, संघातः; जनसमूहः, लोकनिवहः-संघः.

Gaud, *s.* बाह्यशोभा. **-y,** *a.* उज्ज्वल, शोभन, नानावर्ण, चित्र; 'having a g. dress' उज्ज्वलवेशधारिन्, आर्य-उदार-नेपथ्यभृत् *-s.* **Festival,** q. v. **-ness,** *s.* अतिशोभा, औज्ज्वल्यं, चित्रता, नानावर्णता.

Gauge, *See* **Measure.**

Gaunt, *a.* क्षाम, कृश, क्षीण, शुष्कमांस, क्षुत्क्षाम, कृश-क्षीण-देह.

Gauntlet, *s.* हस्तत्राणं; 'throw down the g.' युद्धार्थं आह्वे 1 A; 'take up the g.' युद्धाह्वानं स्वीकृ or उरीकृ 8 U.

Gawk, *s* मूर्खः; *See* **Fool.** **2** **Cuckoo,** q. v.

Gawky, *a.* स्थूल-दीर्घ-देह, स्थूल.

Gay, *a.* प्रमोदिन्, प्रहृष्ट, आनंदित, उल्लासित, प्रमुदित, सानंद, प्रफुल्ल, अनुत्सुक, सोल्लास. **2** विलासिन्, परिहासशील, विनोदन-शील-पर, केलिपर. **3** **Gaudy,** q. v. **-Gaiety,** *s.* प्रमोदः, उल्लासः, प्रहर्षः, आनंदः, आह्लादः. **2** उत्सवः; *See* **Festival.** **-Gaily,** *adv.* सहर्षं, सोल्लासं, सानंद, प्रफुल्लतया. **2** उज्ज्वलं, शोभनं.

Gaze, *v. i.* निर्-ईक्ष् 1 A, निर्वर्ण् 10, निध्यै 1 P, बद्ध-स्थिर-दृष्ट्या दृश् 1 P or आलोक् 1 A, 10; दृष्टिं or लक्षं बंध् 9 P. (loc.); 'g. ing up to heaven' नभोदत्तदृष्टि; 'g. ing in all directions' दिक्षु दृष्टिं क्षिप्त्वा. *s.* निरीक्षणं, निर्वर्णनं, आ-अव-लोकनं; दृष्टि *f.*, प्रेक्षणं, दर्शनं; बद्ध-स्थिर-अनिमेष-दृष्टिः; 'with a fixed g.' अनिमेषनयन, बद्धदृष्टि *a.*

Gazelle, *s.* मृगः, हरिणः.

Gazette, *s* वार्ताहरः, वार्तापत्रं.

Gear, *s.* उपकरणं, सामग्री, सज्जा, प्रसाधनं. **2** कार्यं, व्यापारः; 'out of g.' विलग्न, असंगत, असंबद्ध.

Gelatinous, *a.* सांद्र, पीन, श्यान, संलग्नशील.

Geld, *v. t.* वृषणौ छिद् 7 P or कृत् 6 P or उत्पट् 10. **-ing,** *s.* छिन्नमुष्कः (अश्वः).

Gelid, *a.* अतिशीत, हिम, शिशिर.

Gem, *s.* रत्नं, मणि *m. f.* **2** **Bud,** q. v. *-v. t.* रत्नैः शुभ् c. **-med,** *a.* रत्नखचित, मणिभूषित, रत्नानुविद्ध. **-my,** *a.* मणिमय (यी *f.*), रत्नभासिन्, रत्नोज्ज्वल.

Gemmate, *a.* मुकुलित, बद्धपल्लव.

Gemini, *s.* मिथुनं, द्वंद्वं, युगं, युगुलं, युग्मं, द्वयं, यमकं-लं; यमौ, यमजौ-लौ. **-Geminate,** **-Geminous,** *a.* द्विगुण, द्विरावृत्त, द्विक; यम, यमज-ल.

Gender, *s* लिंगं, प्रकृति *f.* *-v. t.* **Beget,** q. v. *-v. i.* **Copulate,** q. v.

Geneology, *s.* वंशावलि-ली *f.*, वंशक्रमः, वंशश्रेणी-परंपरा-वृक्षः; oft. ex. by वंशः, अन्वयः. **-ical,** *a.* (*s.*) in comp. **-ist,** *s.* अन्वयज्ञः, वंशक्रमज्ञः, वंशावलिरचकः.

General, *a.* सामान्य, साधारण, सर्वजनीय-न, सार्वत्रिक-सार्वलौकिक-औत्सर्गिक- (की *f.*), सर्व-बहु-सामान्य, व्यापक, सर्वव्यापिन्, अविशेषक, प्रायिक, सर्वत्र प्रचलित; 'a g. rule' उत्सर्गः; 'a g. practice' लोकाचारः, जनरूढि *f.*, जनव्यवहारः, लोकः; 'against g. practice' लोकविरुद्धं; 'g. opinion' बहुमतं; 'g. reader' चुंबकः. *-s.* सेनापतिः, सेनाध्यक्षः, चमूपतिः, सेनानीः, बलाध्यक्षः-नायकः. **-ity,** *s.* बहुतरभागः, मुख्यांशः, प्रधानभागः; better by 'g. ly' 'the g. of beasts' प्रायः सर्वे पशवः. **2** सामान्यता, साधारण्यं. **-ize,** *v. t.* जातीः निर्दिश् 6 P, जातिशः गणीकृ 8 U, साधारणधर्मं प्रदृश् c., वर्गीकृ. **2** सामान्यतः वद् 1 P, उत्सर्गरूपेण कथ् or निरूप् 10. **-ization,** *s.* जातिनिर्देशः, गणीकरणं, सामान्यधर्मकथनं, सामान्यवादः. **-ly,** *adv.* 'in g.' प्रायः, प्रायेण, प्रायशः, सामान्यतः, बहुशः, भूयसा, भूयिष्ठं, साधारण्येन; oft. ex. by हि. **-ness,** *s.* व्यापकत्वं, सामान्यता. **-ship,** *s.* सैनापत्यं, सेनाध्यक्षत्वं. **2** रणकौशलं, युद्धनैपुण्यं, बलविन्यासकौशलं.

Generate, *v. t.* उत्पद् c., प्र-सू 2, 4 A, आवह् 1 P, सं-उद्-भू c., जन् c. (जनयति); *See* **Cause** also. **-ion,** *s.* उत्पादनं, प्रसवः, जननं, जन्मन् *n.*, उत्पत्ति *f.*, प्रसूति *f.*, संभवः, उद्भवः. **2** अन्वयः, कुलं, वंशः, जाति *f*, संतानः, संतति *f.* **3** पुरुषाः, पुरुषपरंपरा, वंशश्रेणी; 'former g. s' पूर्वे पुरुषाः; 'a pair, one g. removed from the creator' स्रष्टुरेकांतरं द्वंद्व (S. 7). **4** समकालीनपुरुषाः. **-ive,** *a.* उत्पादक, जनक; 'g. organ' उपस्थः योनि *f.* **-or,** *s.* जनयितृ *m.*, जनकः उत्पादकः, जन्मप्रदः-दातृ *m.*

Generic,-al. *a.* जातिगत, सामान्य, साधारण, व्यापक, वर्गीय; 'g. property' जातिधर्मः,

-लक्षणं-स्वभावः, जातित्वं, सामान्यधर्मः-लक्षणं. -**ally**, *adv.* जातिमुद्दिश्य, सामान्यतः.

Generous, *a.* उदार, वदा(द)न्य, त्यागशील, अवदात, दानशील, दानरत, दानशौंड, स्थूललक्ष्य, बहुप्रद. 2 महात्मन्, उदारधी-चेतस्, महामनस्, उदारचरित, महेच्छ, महाशय. 3 कुलीन, महाकुल, अभिजात. -**ness**, -**Generosity**, *s.* औदार्य, त्यागिता, त्यागः, दानशीलं, वदान्यता. 2 उदारात्मता, महात्मता, माहात्म्यं.

Genesis, *s.* उत्पत्ति *f.*, आदि *m.*

Genial, *a.* सुखप्रद, आनंदद, सुखावह, रम्य, रमणीय, मनोहर-रम, रुचिर, प्रसन्न, सुखकर (री *f.*), उत्साहवर्धक, जीवद. 2 प्रसवकारिन्, जनक. 3 प्रसन्नचित्त, सोल्लास, उदार. -**ly**, *adv.* प्रसन्नं, सानंदं, सहर्षं, सोल्लासं, प्रफुल्लं. -**ness**, *s.* रम्यता, उल्लासः, प्रसादः, प्रसन्नता.

Geniculated, *a.* ग्रंथिल.

Genie, *s.* भूतः, पिशाचः.

Genital, *a.* जननसंबंधिन्, जनन in comp.; 'g. organ' जननेंद्रियं, उपस्थः, योनि *f.*, शिश्नं.

Genitive, *s.* षष्ठी विभक्तिः.

Genitor, *See* **Generator.**

Genius, *s.* धीशक्ति *f.*, मति *f.*, बुद्धि *f.*, धीः, मति-बुद्धि-प्रभावः-सामर्थ्यं, मतिप्रकर्षः. 2 धीसंपन्नः, धीमत् *m.*, धीशक्तियुतः, गुणवत् *m.* 3 कल्पना-निर्माण-शक्तिः. 4 प्रकृति *f.*, स्वभावः, शीलं. 5 लक्षणं, विशेषचिह्नं, वृत्ति *f.*, स्वधर्मः. 6 भूतः, पिशाचः, वेतालः; *See* **Demon**; 'dramatic g' नाट्यशक्तिः-कल्पना; 'good g.' सुदैवं; 'evil g.' दुर्दैवं.

Genteel, *a.* विनीत, दक्षिण, सभ्य, सुजन, सुशील, आर्य, आर्य-साधु-वृत्त, शिष्टाचार, आर्यचरित, सदाचार. 2 कुलीन, अभिजात, कुलोत्पन्न. 3 चारु, ललित, सुभग. -**ly**, *adv.* आर्यवत्, सुजनवत्. -**ness**, -**Gentility**, *s.* विनयः, दाक्षिण्यं, आर्यता, सौजन्यं, सुशीलता, सभ्यता, साधुता. 2 आभिजात्यं, कुलोत्कर्षः. 3 लालित्यं, चारुता.

Gentian, *s.* किराततः, चिर(रा)तिक्तः, भूनिंबः, हिमकः, किराततिक्तः, अनार्यतिक्तः.

Gentile, *a.*, *s.* अन्य-भिन्न-देशीय, देवार्चक. 2 सगोत्र, गोत्रज, ज्ञातीय.

Gentle, *a.* भद्र, कल्याण (णी *f.*); शिव, सुख. 2 कोमल, मृदु, मसृण, अपरुष, सुकुमार, अचंड, मृदुल, मंद, सौम्य; 'a g. laugh' मंदस्मितं, ईषद्धासः; 'g. breeze' मंदानिलः, मृदुपवनः; 'g. means' सामोपचारः, सामन् *n.*, मृदूपायः; 'g. words' प्रिय-मृदु-वचनं. 3 महाकुल, कुलीन, अभिजात, सुजन्मन्, साधु-आर्य-वंशज, कुल in comp.; 'a girl of g. blood' कुलकन्यका कुलप्रसूता. 4 (In addressing) अयि, भद्र, सौम्य, आर्य; 'g. lightning' अयि विद्युत्; 'g. folk' आर्यमिश्राः, आर्याः, साधुजनाः. 5 शांत, दांत. -**ness**, *s.* मृदुता, कोमलता, सौम्यता, सौकुमार्यं, मंदता; 'g. of manners' आचारसौजन्यं, आर्यवृत्तिः. -**Gently**, *adv.* मृदु, सदयं, अजातव्यथं, यथासुखं; 'shall rub g.' यथासुखं संवाहयामि (S. 3). 2 मंदं मंदं, शनैः शनैः, शनैः, अपरुषं, अचंडं. 3 निभृतं, अलक्षितं, मंदं. -**Gentleman**, *s.* आर्यः, सुजनः, साधुजनः, आर्यवृत्तः, कुलीनः; सुविनीतः, महाजनः, आर्य-कुलीन-जनः, भद्रः, महानुभावः; oft. by श्री in comp. -**like**, -**ly**, *a.* सभ्य, विनीत, शिष्ट, सुशील, आर्य; 'g. manner' आर्यवृत्तिः, सौजन्यं; 'in a g. manner' नागरिकवृत्त्या (S. 5).

Gentry, *s.* विशिष्टजनाः, आर्याः, आर्यलोकाः-जनाः, कुलीनवर्गः-जनाः, सुजनता.

Genuflect, *v. t.* जानु नम् c. -**ion**, *s.* जानुभ्यां आनतिः *f.*, जानुनतिः.

Genuine, *a.* अकृतक, अकृत्रिम, अकल्पित, निर्व्याज, निर्व्यलीक, अकपट, निष्कपट, अवितथ, सत्य, यथार्थ. -**ly**, *adv.* सत्यं, निष्कपटं, निर्व्याजं. -**ness**, *s.* सत्यता, यथार्थता, निर्व्याजत्वं, अकृत्रिमता.

Genus, *s.* जाति *f.*, गणः, वर्गः.

Geography, *s.* भूगोलविद्या-शास्त्रं, भूपृष्ठविद्या. -**er**, *s.* भूगोलशास्त्रज्ञः, भूपृष्ठविद्याज्ञः. -**ical**, *a.* भूगोलशास्त्रविषयक.

Geology, *s.* भूतत्त्वं, भूगर्भशास्त्रं, भूतत्त्वविद्या. -**ical**, *a.* भूतत्त्वविषयक. -**ist**, *s.* भूतत्त्वज्ञः.

Geometry, *s.* ज्यामिति *f.*, रेखागणना-गणितं, भूमितिः. -**ic**, -**ical**, *a.* (*s.*) in comp.; 'g. proof' रेखागणितेन उपपत्तिः. -**ician**, *s.* भूमितिज्ञः.

Georgic, *s.* कृषि-काव्यं-गीतं.

Germ, *s.* अंकुरः, अभिनवोद्भिद् *m.* 2 बीजं, मूलं, योनि *f.*, आदिः, प्रभवः बीजकारणं. -**Germinate**, *v. i.* उद्भिद् pass., प्ररुह् 1 P, स्फुट् 6 P, विकस् 1 P. -**ing**, *a.* उद्भिद्-द्-ज्ज, अंकुरित. -**ion**, *s.* उद्भेदः, स्फुटनं.

Germane, *a.* सनाभि, संपर्किन्, संपृक्त.

Gestation, *s.* गर्भ-धारणं-वहनं-पोषणं; गर्भिणीभावः.

Gesticulate, *v. i.* अंगानि विक्षिप् 6 P or संचल् c. -*v. t.* अभि-नी 1 P, नि-, रूप् 10, सूच् 10, नट् 10; *See* **Act.** -**ion**, *s.* अभिनयः; अंगविक्षेपः, चेष्टा, सूचना, अंगहारः, हावः, संकेतसूचनं. -**or**, *s.* अंगविक्षेपकः.

Gesture, *s* चेष्टा, व्यापारः, इंगितं, भावः, अभिनयः, विलासः, विभ्रमः, अंगविक्षेपः, हावः; हस्तादिचालनं

Get, *v. t.* लभ् 1 A, आप् 5 P, अर्ज् 1 P or c., आ-समा-सद् c., विद् 6 U, प्रति-आ-पद् 4 A, अश् 5 A, अधिगम् 1 P, ग्रह् 9 U, आ-धा 3 A. **2** (To be produced) जन् 4 A, उत्पद् 4 A, सं-उद्-भू 1 P, प्र-सू 2, 4 A, (with genitive of person); ' I have got a pain in my teeth ' दंतपीडा मे उत्पन्ना-जाता. **3** धृ 1 P, 10, भृ 3 U; धा 3 U; ' I have got that book with me ' तत्पुस्तकं मत्सकाशे वर्तते; *See* **Bear** also. **4** (Cause) ex. by causal; ' g. it done by him ', तं तत्कारय; oft. by अनुनी 1 P, प्रोत्सह् c., प्रवृत् c.; ' g. ahead ' अग्रेसरीभू; ' g. clear of ' मुच् pass.; ' g. rid of' आत्मानं मुच् c., (with abl.) by निर् in comp. ; ' g. abroad ' प्रसृ-प्रसृप्- 1 P, बहुलीभू 1 P: *See* under **Abroad.** **-among,** मध्ये प्रविश् 6 P or गम्. **-at,** प्राप्, आगम्, आ-या 2 P, उप-स्था 1 U. **-away,** अपसृ 1 P, अप-इ 2 P, अपक्रम् 1 U, 4 P; चल् 1 P, अप-या गम्; ' g. away, you fool ' अपेहि रे मूर्ख. **-back,** प्रतिलभ्, प्रत्या-दा, &c. **-beyond,** तॄ 1 P, अति-इ, अतिक्रम्. **-down,** अवतॄ, अवरुह् 1 P, अधो गम्, नि-अव-पत् 1 P; (*v. t.*) अवतॄ c., अवरुह् c., &c. **-in,** प्रविश् 6 P. **-into,** पत्; संकटे पतितः ' got into troubles' ; आरुह् 1 P (a car &c.); ' he got into debt' ऋणग्रस्तो बभूव; 'g. ing into deep mud ' पंकपूरमासाद्य. **-off,** (*v. i.*) निः-सृ, निर्गम्, अप-या, अप-क्रम्, निस्तॄ. **2** अवतॄ, अवरुह्; (*v. t.*) निरस् 4 U, अप-नी 1 P. **-on,** प्रवृत् 1 A, प्रचल्, प्र-सृ; ' they long got on well ' चिरं ते सुखेन अवर्तत or कालं निन्युः. **-out,** निर्गम्, अप-इ, निः-सृ. **2** त्यज् 1 P, मुच् 6 P; ' g. out of bed now ' अधुना मुंच शय्यां. **-over, -through,** संतॄ; पारं-अंतं-गम्, अतिक्रम्, निस्तॄ, तीर् 10; आरुह्. **2** समाप् c.; *See* **Complete.** **-together,** संचि 5 U; समा-नी, संग्रह्; *See* **Collect.** **-up,** उत्-स्था; प्रबुध् 4 A, शयनं त्यज् 1 P or मुच्; (*v. t.*) सज्जीकृ 8 U, विरच् 10; उपक्लृप् c. **-upon,** अधि-आ-रुह्. **-ter,** *s.* प्रापकः, लब्धृ *m.*, अर्जकः. **-ting,** *s.* लाभः, अवाप्ति *f.*, अर्जनं, अधिगमः-मनं, आगमः, आसादनं.

Gewgaw, *s.* क्रीडनकं, अल्पमूल्यं द्रव्यं or आभरणं. *-a.* निःसार, बहिरेव मनोहर.

Geyser, *s.* उष्णोदक-निर्झरः-स्रोतस् *n.*

Ghastly, *a.* प्रेत-शव-तुल्य, विवर्ण, शवसरूप-सवर्ण. **2** कराल, विकट, भीम, उग्र, दारुण, भयानक, भीमदर्शन, करालवदन, घोराकृति. **-ness,** *s.* प्रेतसारूप्यं, वैवर्ण्यं; विकटत्वं, दारुणत्वं.

Ghee, *s.* घृतं, आज्यं, हविस् *n.*, सर्पिस् *n.*, तनूनपं.

Ghost, *s.* भूतः, पिशाचः, वेतालः, निशाचरः, प्रेतनरः. **2** आत्मन् *m.*; ' give up the g. ' मृ 6 A; *See* **Die.** **-like,** *a.* प्रेत-भूत-सरूप, प्रेततुल्य. **-ly,** *a.* भूतविषयक-संबंधिन्. **2** पारत्रिक (की *f.*), आत्मविषय, पारमार्थिक (की *f.*).

Giant, *s.* महापुरुषः, विकटविग्रहः, बृहच्छरीरः, भीमविग्रहः, बृहत्कायः, अतिशक्त्युपेतः, राक्षसः. **2** दैत्यः, दानवः; *See* **Demon.** *-a.*, **-like,** *a.* अतिस्थूल, प्रकांडदेह, स्थूल-प्रमाण, अतिमहत्, बृहत्काय, महाशरीर, विकट. **-ess,** *s.* राक्षसी, बृहच्छरीरा. **-Gigantic,** *a.* अतिमानुष (षी *f.*), राक्षस-परिमाण, भीमविग्रह, अतिमहत्-बृहत्, स्थूलकाय, विकट.

Gibber, *v. i.* *See* **Babble.** **-ish,** *s.* असंबद्धवचनं, प्रलापः, प्रजल्पितं, मृषार्थक वाक्यं. *-a.* मृषार्थकं, अनर्थकं.

Gibbet, *s.* वध्यकाष्ठं-शिला, वध-घात-स्थानं. *-v. t.* वधं आदिश् 6 P, उद्-बंध् 9 P.

Gibbous, *a.* न्युब्ज, वक्र, आभोगवत्, बिंबाकार.

Gibe, *See* **Abuse.**

Giddy, *a.* भ्रमिन्, भ्रामररोगिन्, विभ्रांत, भ्रमणशील; better ex. by भ्रम् 1, 4 P. **2** भ्रमकारिन्, मत्त, उन्मादिन्. **3** (Fig.) चपल, चचल, लोल, अस्थिर; *See* **Fickle.** **4** उद्धत, उन्मत्त, उत्सिक्त, गर्वित. **-ly,** *adv.* अविचार्य, लौल्यात्, चापल्येन. **-ness,** *s.* भ्र(भ्रा)मरं, भ्रमः-मि *f.*, घूर्णनं, घूर्णि *f.* **2** चापल्यं, लौल्यं, अस्थैर्यं, &c.

Gift, *See* under **Give.**

Gig, *s.* भ्रमरं. **2** लघुयानं-रथः. **3** क्षुद्र-लघु-नौका.

Giggle, *v. i.* मूर्खवत् हस् 1 P.

Gild, *v. t.* स्वर्णेन रंज् c., हेमरसेन-द्रवेण लिप् 6 P, सुवर्णयति (D.); बाह्यतेजसा रंज् c. **2** प्रकाश् c., विद्युत् c., विराज् c. **-ing,** *s.* स्वर्णरंजनं, स्वर्णच्छवः.
-ed,-Gilt, *a.* सुवर्णित, हेमरसखचित, स्वर्ण-मंडित, स्वर्णप्रतिबद्ध. **2** रंजित, विराजित.

Gill, *s.* श्वासेंद्रियं, अधोगंडः.

Gimcrack, *s.* क्रीडनकं, क्रीडावस्तु *n.*

Gimlet, *s.* वेधनिका, आस्फोटनी.

Gin, *s.* **Liquor,** q. v. **2** पाशः, उन्माथः, कूटयंत्रं, बंधनं, वागुरा.

Ginger, *s.* आर्द्रकं, शृंगवेरं, गुल्ममूलं; 'dry g.' शुंठि-ठी *f.*, विश्वं-श्वा *f.*, नागरं, विश्वभेषजं, महौषधं; ' g. beer or wine ' आर्द्रकासवं. आर्द्रकमद्यं-पानं; ' g.-bread ' आर्द्रकापिष्टक

Gingerly, *adv.* असहसा, सावधानं, शनैः.

Gingle, *See* **Jingle.**

Gipsy, *s.* याक्षिणी, विप्रश्निका, ईक्षणिका.

Giraffe, *s.* चित्रोष्ट्रः.

Gird, *v. t.* परि-अधि-वेष्ट् c., परि-वृ 5 U or c. **2** आ-बंध् 9 P, परि-धा 3 U, सं-पि-नह् 4 P; 'g. round the body' शरीरं प्रावृ or आ-च्छद् 10, परि-बंध् or परि-धा; 'g. up one's loins' परिकरं बंध्; 'girt by the (golden) lightning, as by a yellow garb' विद्युत्प्रभारचितपीतपटोत्तरीयः (Mr. 5). **–***s. See* **Cramp. –ed, –Girt,** *a.* बद्ध, आनद्ध, परिवेष्टित, परिवृत; वलय-मेखला-रसना in comp.; 'sea-g. earth' समुद्र-रसना-उदधिवलया-पृथ्वी.

Girdle, *s.* मेखला, रश(स)ना, कांचि-ची *f.*, सप्तकी, सारसनं (of women); कटिसूत्रं, कटिवलयं, कक्ष्या-क्षा, परिकरः, कटिबंधनी, शृंखलः-ला-लं (of men). **2** वेष्टनं, परि-आ-वेष्टनं, मंडलं, वलयः-यं, चक्रवालं., **3** राशिचक्रं. **–***v. t.* परि-वेष्ट् c., परि-वृ 5 U, मेखलया बंध् 9 P; *See* **Gird.**

Girl, *s.* कन्या, बाला, बालिका, कुमारी, दारिका, वासूः, *See* **Daughter** also; one born from a g.' कानीनः, कन्यकाजातः. **–hood,** *s.* बालभावः, बाल्यं, कुमारीत्वं. **–ish,** *s.* कन्यानुरूप, बालेय.

Girth, *s.* वरत्रा, नध्री, वध्री; दू(चू)ष्या, कक्षा-क्ष्या.

Gist, *s.* फलितार्थः, निष्कर्षः, भावः, फलितं, परमार्थः, पिंडितार्थः.

Give, *v. t.* दा 1 P, 3 U, ऋ c. (अर्पयति), प्रतिपद् c., दद् 1 A, विश्रण् 10, उत्-वि-सृज् 6 P, (with dat. of person); निक्षिप् 6 P, संक्रम् c. (with loc.); त्यज् 1 P, दिश् 6 P. **2** (Produce) ex by भू 1 P, संपद् 4 A, जन् 4 A; '3 repeated 2 times g. s 6' द्विरावृत्तास्त्रयः षट् भवंति-संपद्यंते 'g. chase' अनुसृ-अनुधाव् 1 P; 'g. ear' अव-धा 3 U, कर्णं दा, श्रु 5 P; 'g. ground' अपक्रम् 1 U, 4 P; अपसृ, परा-नि-वृत् 1 A; त्यक्त्वा गम् 1 P; 'g. one's self up to' सेव् 1 A, भज् 1 A; आसंज् pass., आसक्त-निरत-निविष्ट-*a.* भू, (with loc.); 'g. offence' अपराध् 4, 5 P, विप्रियं-प्रतिकूलं-कृ 8 U or आचर् 1 P; 'g. utterance' उदीर् 10, उच्चर् c., उदाहृ 1 P **–away,** (in marriage) प्रतिपद् c., उत्सृज्, प्र-दा. **2** विश्रण्, दानेन क्षै c. (क्षपयति). **–back,** प्रतिदा, प्रति-ऋ c., निर्यत् 10. **–forth,** प्रथ् 10, प्रकाश् c., निविद् c., ख्या c. (ख्यापयति). **–in,** अनुमन् 4 A, अनुमुद् 1 A; स्वाग्रहं त्यज्. **–off, Abandon,** q. v. **–out,** निविद् c., प्रकाश् c., घुष् 10, प्रथ् 10, प्र-ख्या c. **2** त्रुच् 6 P, विसृज्, उद्वम् 1 P उद्-गृ 6 P, निःसृ c. **–over,** त्यज्, उत्सृज्, निवृत् 1 A, विरम् 1 P, (with abl.). **2** असाध्य *a.* इति मत्वा त्यज्; आशां त्यज्; (*v. i.*) शम् 4 P, पत् 1 P; 'when the winds g. over' शांते पवने. **–up,** त्यज्, हा 3 P, उत्-वि-सृज्. **2** निवृत्, विरम्; 'g. up for lost' नष्टप्राय *a.* मन् 4 A. **–way,** शम् 4 P, निवृत्, विरम्, शिथिलीभू. **2** भंज् pass., अवसद् 1 P; 'the cord gave way' रज्जुर्भग्ना; 'the wall gave way' भित्तिरवसन्ना. **3** अव(प)सृ, अप-इ, मार्गं दा or त्यज्, अपक्रम्, अप-या. **4** वशं गम्-इ-या, अधीन-वश-आयत्त *a.* भू; 'do not g. way to grief' शुचो वशं मा गमः, शोकाधीनो मा भूः, वैक्लव्यं मावलंबस्व. **–er,** *s.* दातृ *m.*, त्यागिन् *m.*; gen. ex. by दायक, द, प्रद, दायिन्, in comp.; 'g. of milk' पयोदायिनी, दुग्धप्रदा, &c. **–ing,** *s.* दानं, विसर्जनं, उत्सर्गः, त्यागः, वितरणं, अर्पणं, प्रतिपादनं, विश्राणनं. **–Gift,** *s.* दानं, प्रतिपादनं; *See* above. **2** दानं, उपहारः, उपायनं, उपदा, प्रीतिदानं, प्राभृतं, प्रदेशनं, उपग्राह्यं; 'one deserving a g.' दाक्षिणीय, दाक्षिणार्ह, दक्षिण्य; 'marriage-g.' यौतकं, सुदायः. **3** गुणः, शक्ति *f.* **–ed,** *a.* उपेत, सं-उप-पन्न, विशिष्ट, युक्त, अन्वित, शालिन् in comp. **2** गुणोपेत, गुणसंपन्न, गुणिन्, गुणवत्.

Glacial, *a.* हिमरूप, हैम (मी *f.*), हिम.

Glacier, *s.* हिमानी, हिमसंहति *f.*

Glacis, *s.* प्रवण-निम्न-भूमि *f.*

Glad, *a.* प्र-, सं-, हृष्ट, आनंदित, प्रीत, सानंद, प्रमुदित, तृप्त, सोल्लास, उल्लसित, प्रसन्न. **2** हर्षजनक, हर्ष-आनंद-कर (री *f.*); नंदक, रमणीय, प्रमोदिन्; 'I am g.' हंत, दिष्ट्या. **–den,** *v. t.* आ-, नंद् c., प्री 9 P, 10; *See* **Delight. –dening** *a.* हर्षद, प्रीतिप्रद, हर्षकर, प्रमोदिन्. **–ly,** *adv.* सहर्षं, सानंदं, सप्रमोदं, हृष्टमनसा, संतोषेण, प्रीत्या, साह्लादं. **–ness,** *s.* हर्षः, प्रमोदः, आह्लादः, संतोषः, प्रीति *f.*, उल्लासः, चित्तप्रसादः, तुष्टि *f.* **–some,** *See* (*a.*).

Glade, *s.* वन-गुल्मः-पथः-मार्गः, तरुगहनमार्गः.

Gladiator, *s.* असिक्रीडकः, आसिकः, मल्लः. **–Gladiature,** असिक्रीडा-युद्धं.

Glair, *s.* अंडशुक्लं.

Glamour, *a. See* 'Enchantment.'

Glance, *s.* दृष्टिपातः, ईक्षणं, वीक्षितं, नयनपातः-विक्षेपः, दृक्पातः, आलोकितं; 'side-long g.' नयनोपांतविलोकितं, साचिविलोकितं, अपांग-दर्शनं-दृष्टि *f.*, कटाक्षः; 'at the very first g.' सकृद्दृष्टिपातेन, प्रथममेव; good at the first g.' आपाततो रमणीय, आपातरमणीय. **2** अर्धवीक्षणं,

ईषद्दृष्टिः. 3 स्फुरितं, स्फुरणं, द्युति *f.* —*v. i.* दृष्टिं क्षिप् 6 P, चक्षुः-दृष्टिं *f.*-दा 3U or पत् c. (with loc.); 'g.-ing at the antelope' कृष्णसारे ददच्चक्षुः (S. 1). 2 लघु निर्घृष् 1 P, लघु हत्वा अति-इ 2 P. 3 (जवेन) परिस्फुर् 6 P or विलस् 1 P. **—ingly,** *adv.* लघु, ईषत्, अल्पमात्रं, स्तोकं. 2 दृक्पातेन, तिर्यक्, साचि, कटाक्षेण.

Gland, *s* अधिमांसं, मांसपिंडः, पिंडः.

Glanders, *s.* क्षयथुः.

Glare, *s.* तेजस् *n.*, दीप्ति *f.*, द्युति *f.*, प्रखर-अति-तेजः, अतिप्रभा-द्युतिः-दीप्तिः, नेत्रप्रतिघातिनी प्रभा. 2 उग्रदृष्टि *f.*, क्रोधेद्धदृष्टिः. —*v. i.* संदीप् 4 A, प्रद्युत् 1 A, उज्ज्वल् 1 P, अतितेजसा स्फुर् 6 P or दृष्टिं प्रतिहन् 2 P or संतप् c.; दीप् freq. (देदीप्यते). 2 उग्रदृष्टिं पत् c., कोपेन दृश् 1 P or ईक्ष् 1 A. **—ing,** *a.* संदीप्त, उज्ज्वल, अतिभास्वत्, देदीप्यमान. 2 सुस्पष्ट. सुप्रकाश, प्रत्यक्ष, पुरःस्फुरत्. **—ingly,** *adv.* सुस्पष्टं, सुप्रकाशं.

Glass, *s.* काचः, स्फटिकः, क्षारः. 2 (Cup) चषकः-कं, काचपात्रं-भाजनं. 3 आदर्शः, दर्पणः, मुकुरः. —*a.* काचमय (यी *f.*), काचनिर्मित, काच in comp.; 'g.-blower' काचधमकः; 'g.-grinder' काचपरिष्कारकः; 'g. house,' काचनिर्माणशाला-स्थानं; 'g.-man' काचविक्रयिन् *m.*; 'g.-work' काचनिर्माण-कर्मन् *n.* **—like,** *a.* काचोपम, काचतुल्य. **—y,** *a.* स्फटिकोपम, काचवत्स्वच्छ, काचाविमल, स्फटिकप्रभ, स्फाटिक (की *f.*), सुप्रसन्न. 2 श्लक्ष्ण, स्निग्ध. **—Glaze,** *v. t.* काचयति (D.), काचेन आच्छद् 10. 2 श्लक्ष्णीकृ 8 U, स्निग्धीकृ, श्लक्ष्णयति (D.), —*s.* स्निग्धता, श्लक्ष्णता, **—Glazier,** *a* काचसंधातृ *m.*, काचबंधकः.

Glaucous, *a.* घनश्याम, मेघनील, समुद्रवर्ण.

Glaze, *v. t. See* under **Glass.**

Gleam, *v. i* परि-,स्फुर् 6 P, विलस् 1 P, क्षणमात्रं प्रकाश् 1 A or उज्ज्वल् 1 P; *See* **Shine** also. —*s.* प्रभा, कांति *f.*, तेजस् *n.*, औज्ज्वल्यं. 2 स्फुरणं, स्फुरितं, क्षणप्रभा-कांतिः, अचिरप्रभा, क्षणज्योतिस् *n.* 3 रश्मिः, करः, किरणः, अंशुः; 'not a g. of hope' न आशालवोपि. **—y,** *a.* क्षण-अचिर-प्रभ, चलद्युति, कंपितप्रभ, क्षणद्योतिन्.

Glean, *v. t.* (bits &c.) उंछ् 6 P, शिल् 6 P, उद्-ग्रस् 9 P or c., अवशेषं चि 5 U or संग्रह् 9 P. 2 संकल् 10 संग्रह्, उद्धृ 1 P. —*s.* धान्यशेषः, शेषधान्यसंचयः. **—er,** *s.* उंछशीलः-वृत्तिः, उंछनकृत् *m.* 2 संग्रहीतृ *m.* **—ing,** *s.* उंछः, शिलं, उंछशिलं, ऋतं. 2 संग्रहः, संकलनं, उद्धारः.

Glebe, *s.* मृद् *f.*, मृत्तिका; स्थलं-ली, भूमि *f.*

Glee, *See* **Delight.**

Gleet, *s.* इक्षु-मधु-मेहः, मेहविकारः.

Glen, *s.* दरी, कंदरः-रा; अद्रिद्रोणी, उपत्यका.

Glib, *a.* वाक्चपल, त्वरित-द्रुत-वाच्; चपल, लोल. 2 पिच्छिल, मसृण, स्निग्ध, श्लक्ष्ण, चिक्कण. —*v. t* **Castrate,** q. v. 2 श्लक्ष्णीकृ 8 U. **—ly,** *adv* चपलतया, वाक्चापल्येन. 2 श्लक्ष्णं. **—ness,** *s.* वाक्चापल्यं, चापल्यं. 2 श्लक्ष्णता, मसृणता.

Glide, *v. t.* सृप् 1 P, सं-वि-प्र°, प्र-वि-सृ 1 P; मंदं इ-या 2 P or गम् 1 P, शनैः प्रसृ or चल् 1 P: अलक्षितं-निभृतं गम् or या or अति-इ; *See* **Steal.** 2 वह् 1 P, स्रु 1 P; स्यंद् 1 A, री 4 A. **-ing,** *s.* संसर्पः-र्पणं, स्रवणं, निस्यंदः-स्रवनं.

Glimmer, *v. i.* मंदं मंदं ज्वल् 1 P or दीप् 4 A; मंदप्रभया-अचिरप्रभया प्रकाश् 1 A or द्युत् 1 A or स्फुर् 6 P. —*s.*, **Glim,** *s.* मंदप्रभा-तेजस् *n.*, मंद-आचिर-द्युति *f.*, -दीप्ति *f.*, स्फुरणं, स्फुरितं. **—ing,** *a.* मंदप्रभ द्युति, तेजस्, ईषत्स्फुरित, पांडुद्युति-किरण, मंदच्छाय. 2 मंद, असुप्रकाश, अव्यक्त, अस्पष्ट.

Glimpse, *s.* क्षण-मुहूर्त-दर्शनं; ईषद्दृष्टि *f.*, अर्धवीक्षणं, अल्पो दृक्पातः. 2 क्षण-अचिर-प्रभा; *See* **Gleam.**

Glint, *v. i.* प्रकाश् 1 A. —*v. t.* द्युत् c.

Glisten, Glister, *v. i.* स्फुर् 6 P, प्रकाश् 1 A, द्युत् 1 A. **—ing,** *a.* मसृण, चिक्कण, श्लक्ष्ण, स्निग्ध.

Glitter, *v. i.* द्युत्-प्रकाश् 1 A; भास् 1 A, भा 2 P; स्फुर् 6 P; *See* **Shine.** —*s.* दीप्ति-द्युति-रुचि-कांति-*f.*, प्रभा, तेजस् *n.*; ज्योतिस् *n.*, वर्चस् *n*, आभा. **—ing,** *a.* प्रभावत्, उज्ज्वल, भासमान, विद्योतिन्, भासुर.

Gloaming, *s.* संध्या; संध्यासमयः.

Gloat, *v, i.* संतृप् 4 P, संतुष् 4 P; आत्मानं संतृप् c. or संतुष् c., लोभात् निरीक्ष् 1 A or निर्वर्ण् 10.

Globe, *s.* गोलः-लं; वर्तुलः-लं; मंडलं; चक्रं. 2 भूमंडलं, भूगोलः, क्षितिमंडलं-तलं. **—Globate, -Globular,** *a.* वर्तुल, गोलाकार, गोलाकृति, वृत्त, निस्तल, मंडलाकार, गोल. **—ly,** *adv.* मंडलरूपेण, मंडलवत्, गोलाकारेण. **—Globule,** *s.* बिंदुः, लघुगोलः, गोलकः.

Glomerate, *v. t.* मंडलीकृ 8 U, गोलीकृ, पिंडीकृ.

Gloom, *s.* अंधकारः, तमस् *n.*, तमिस्रं-स्रा, तिमिरं, ध्वांतं; अवतमसं, ईषत्तमः (partial g). 2 निष्प्रभत्वं, विषादः, छाया. —*v. t.* **Darken,** q. v. **—Gloomy,** *a.* सतिमिर, तमोवृत, सांधकार, तिमिरावगुंठित. 2 दुर्दर्शन, मलिनप्रभ, अप्रभ, निष्प्रभ, निरालोक, मलिन. 3 विषण्ण, दीन, अवसन्न, सविषाद, निरानंद, म्लान, खिन्न, उद्विग्न. **—ly** *adv.* निष्प्रभं, सांधकारं. 2 सविषादं, सखेदं, सोद्वेगं. **-ness,** *s.* निष्प्रभत्वं, &c. 2 विषादः, दैन्यं, अवसादः, चित्तोद्वेगः, खेदः, म्लानता, उद्वेगः.

Glory, *s.* कीर्ति *f.*, यशस् *n.*, ख्याति *f.*, विश्रुति *f.* महिमन् *m.*, प्रतापः, ओजस्विता. 2 श्रीः, तेजस् *n.* शोभा, द्युति *f.*; 'g. of youth' यौवनश्रीः. 3 माहात्म्यं, गौरवं, प्रतिष्ठा, पूजा, मानः. 4 प्रशंसा, स्तुति *f.*, श्लाघा, स्तवः, स्तुतिवाक्यं 5 रत्नं, अवतंसः तिलकः, ललामं. 6 **Absolution,** q. v.; 'vain g' अहंकारः, विकत्थनं-ना, दर्पः, गर्वः, आत्मश्लाघा; 'g. to you, Oh king' जयतु जयतु देवः; 'g. of victory' जयोदाहरणं. **-***v. i.* अत्यंतं प्रमुद् 1 A or आनंद् 1 P, उल्लस् 1 P: 'you g. in disobeying your father' पितुरवज्ञानं आत्मगौरवं मन्यसे. 2 विकत्थ् 1 A, दृप् 4 P, आत्मानं श्लाघ् 1 A; 'I do g. in that name' तन्नामधारी कृतिनमात्मानं मन्ये खलु. **-Glorify,** *v. t.* उत्-सं-कृत् 10. प्रशंस् 1 P, श्लाघ्, स्तु 2 U: गुणान् वर्ण् 10 or कृत् or प्रकाश् c., कीर्तिं गै 1 P. 2 स्वर्गं आरुह् c., परमपदं प्राप् c. **-ication,** *s.* गुणवर्णनं-ना, प्रशंसा, स्तुतिवादः, गुणकीर्तनं, यशःख्यापनं. **-Glorious,** *a.* यशस्वत्, कीर्तिमत्, महायशस्, प्रथित, विश्रुत, ख्यात, यशस्विन्, उदग्रयशस्. 2 कीर्तिकर-यशस्कर (री *f.*), श्लाघावह, प्रशस्य. 3 तेजस्विन्, महत्, महोज्ज्वल, श्रीमत्, प्रतापवत्, महोदय, अतिशोभन, ओजस्विन्, सुप्रभ, वर्चस्विन्. 4 विशिष्ट, परम, उत्तम, उत्कृष्ट, प्रशस्ततम, श्रेष्ठ. **-ly,** *adv.* सप्रतापं, कीर्तियुक्तं, परमं, उत्कृष्टं.

Gloss, *s.* टीका, टिप्पनी भाष्यं, व्याख्यानं, वृत्ति *f.*, विवरण. 2 बाह्यशोभा-कांति-रुचि *f.*, बहिराभा, कृत्रिमच्छवि *f.*, कल्पितशोभा. **-***v. t.* टीकया व्या-ख्या 2 P or वि-वृ 5 U; भाष्यं लिख् 6 P. 2 बाह्यतः शुभ् c.; स्निग्धी-मसृणी-कृ 8 U; बाह्यशोभां दा 3 U or उत्पद् c. **-y,** *a.* स्निग्ध, चिक्कण, श्लक्ष्ण, मसृण. 2 बाह्यप्रभ, बाह्यतः शोभित, आपातरुचिर, बहीरमणीय.

Glossary, *s.* कोशः-षः. शब्दसंग्रहः-कोशः, निघंटुः, अभिधानं, समाम्नायः; पशुसमाम्नायः 'g. of words relating to beasts.' **-ist,** *s.* कोशलेखकः; संकलयितृ *m.*

Glottis, *s.* प्रति-अलि-उप-जिह्वा.

Glove, *s* करच्छदः, हस्तत्राणं-परिधानं, हस्ताच्छादनं.

Glow, *s.* तापः, आतपः, दाहः, उष्मन् *m.*, दीप्ति-द्युति *f*, तेजस् *n.*, उत्तापः. 2 रक्तता, रक्तिमन् *m.*, रागः, अरुणिमन् *m.* **-***v. i.* दीप् 4 A, प्रकाश् 1 A, ज्वल् 1 P, तप् 1 P, 4 A, दह् pass.; अरुणीभू 1 P, रंज् pass., रक्तीभू; 'g. ing with rage' क्रोधेद्ध, रोषसंतप्त, प्रदीप्तक्रोध; ज्वलन्निव ब्रह्ममयेन तेजसा (K. v. 30) 'as if g. ing with Brahmanic lustre.' **-ing,** *a.* सं-, प्र-, दीप्त, ज्वलित, उत्तप्त, देदीप्यमान, उज्ज्वल, चंड; रक्त अरुण; 'in g. colours' उज्ज्वलरूपेण, हृदयहारितया, हृदयंगम, मनोरम; 'with g. eyes' दीप्ताक्ष *a.* **-ingly,** *adv* तेजसा, उत्तापेन, चंडं, दीप्त्या. **-worm** *s.* खद्योतः, ज्योतिरिंगणः, प्रभाकीट.

Glower, *v. t.* सभ्रूभंगं प्रेक्ष् 1 A.

Gloze, *See* **Flatter.**

Glue, *s.* संश्लेषणद्रव्यं, लेपः. **-***v. t.* सं-धा 3 U, संश्लिष् c., संयुज् 7 U, 10. संलग्नीकृ 8 U. **-y,** *a.* श्यान, सांद्र, चिक्कण.

Glum, *a.* प्रतीप-वाम-वक्र-शील.

Glut, *v. t.* भक्ष् 10, ग्रस् 1 A, निगॄ 6 P, अतिमात्रं तृप् c, अत्यंतं पूर् 10, सौहित्यं जन् c. (जनयति). **-***s.* अतितृप्ति *f.*, अतिसौहित्यं, निर्वेदः. 2 अतिरेकः, उद्रेकः. अतिबाहुल्यं, प्राचुर्यं.

Glutinate, *v. t.* लेपेन संश्लिष् c or संयुज् 7 U, 10.

Glutinous, *a.* श्यान, सांद्र, चिक्कण, स्निग्ध, संलग्नशील.

Glutton, *s.* औदरिकः, उदरंभरिः, घस्मरः, आद्यूनः, कुक्षिंभरिः, अत्याहारिन् *m.*: *See* below. **-ous,-ish,** *a.* औदरिक (की *f.*), अत्याहारिन्, बहुभोजिन्, अत्याहारप्रिय, भक्षक, घस्मर, अद्मर, आद्यून, कुक्षिंभरि, उदरंभरि, गृध्नु, लोलुप-भ, अतिलुब्ध, अतृप्त. **-ously,** *adv.* अत्याहारेण, लोलुपतया. **-y,** *s.* अत्याहारः, घस्मरता, गृध्नुता, जिह्वालौल्यं, अतृप्ति *f.*, औदरिकता.

Gnarl, *v. i.* गर्ज् 1 P.

Gnarled, *a.* ग्रंथिल, ग्रंथि-पर्व-विशिष्ट.

Gnash, *v. t.* (The teeth) दंतैर्दंतान् निष्पीड् 10 or विघट्ट् c. or घृष् 1 P, निष्पिष् 7 P, or सं-दंश् 1 P, क्ष्विड् 1 P. **-ing,** *s.* दंतनिष्पेषः-घर्षणं, क्ष्वेडनं.

Gnat, *s.* मशकः, दंशः, माचिका, वनमक्षिका.

Gnaw, *v. t.* दंश् 1 P, चर्व् 1 P or c., अल्पशः भक्ष् 10 or खाद् 1 P; चर्वणेन कृत् 6 P. **-ing,** *s.* चर्वणं, दंशनं.

Gnome, *s.* सूक्तिः. 2 भूतः, पिशाचः

Gnomon, *s.* शंकुः; कीलः-लकः.

Go, *v. i.* गम् 1 P, या-इ 2 P, व्रज् 1 P, चल्-चर् 1 P, पद् 4 A. ऋ 1, 3 P; सृ 1, 3 P; क्रम् 1 U, 4 P; (as water) वह् 1 P, स्रु 1 P, स्यंद् 1 A. 2 (Fare) वृत् 1 A, स्था 1 P; 'how g. es it with her' कस्तस्या वृत्तांतः. 3 (As prospective future) ex. by fut. part., मनः or काम with inf. or desid. forms; *See* **About**; 'g. astray' भ्रम् 1, 4 P; उत्पथं या, सन्मार्गात् च्यु 1 A or भ्रंश् 1 A, 4 P; उत्क्रम्, अति-व्यभि-चर्; 'g. on foot' पद्भ्यां व्रज्; 'g. on horse-back' अश्वेन संचर्; 'as the story g. es' किल,

'g. for nothing' (go to dogs) विफलीभू; 'g. to bed' शय्यां भज्-सेव् 1 A; 'she is far gone in love' दूरगतमन्मथा सा (S. 3), अतिभूमिं गतोऽस्या अनुरागः; 'g.- between' मध्यस्थः, मध्यपुरुषः; (female g.) शंभली, कुट्टिनी; सुरतदूती; 'g. by' निर्गमः, पलायनं, व्यपदेशः; 'g.-cart' क्रीडाशकटः. **-about**, परिगम्-इ &c. 2 यत् 1 A, उद्यम् 1 A, व्यव-सो 4 P, आरभ् 1 A, उपक्रम् 1 A. 3 अनुष्ठा, वि-धा 3 U, *See* **Execute**. **-away**, अप-इ-सृ-क्रम्-गम्-या-सृप्, प्र-इ, स्था 1 A. **-between**, मध्ये स्था or वृत्, अंतः-इ. **-by**, अति-इ, समीपतः गम्. 2 अनुगम्, अनुवृत्, अनुरुध् 4 A, अनु-सृ; 'he g.-es by the name of' इति ख्यातः or ज्ञातः; उमाख्यां सुमुखी जगाम (K. I. 26) 'went by the name of' &c. **-down**, अधो गम्. 2 अस्तं गम्-या; (fig.) नाशं-क्षयं-या; प्र-ली 4 A, ध्वंस् 1 A. **-forth,-forward**, निर्गम्, निःसृ-क्रम्, प्र-सृ, प्र-स्था, प्र-या. **-in**, प्र-आ-विश् 6 P, अंतर्गम्-या. 2 (for) संमन् 4 A, उरी-अंगी-कृ 8 U, प्रति-पद् 4 A. **-off**, अपगम् &c. 2 प्र-इ, मृ 6 A; परलोकं या. **-on**, प्र-वृत्, प्रगम्-या-सृप्. 2 प्र-स्तु 2 U, प्रारभ् 1 A; 'g. on with your study' प्रवर्ततां-प्रस्तूयतां-अध्ययनं. **-out**, निर्गम्, निःसृ, &c., बहिर्गम्. 2 (Of light) निर्वा 2 P or c. pass.: शम् 4 P. **-over**, वच् c., अधि-इ 2 A; (to one's self) अनुवच् c. 2 परि-ईक्ष् 1 A. 3 आक्रम्, लंघ् 1 A, 10. 4 अन्यपक्षं सं-आ-श्रि 1 U: स्वपक्षाद् भ्रंश् 1 A, 4 P. **-round**, परि-इ गम्; प्रदक्षिणीकृ. **-through**, अनुभू, उपागम्, वि-धा, अनु-ष्ठा, कृ, निर्वह् c.; सेव् 1 A, आचर्. 2 पारं गम्, समाप् c.: अव-सो 4 P. 3 प्र-निर्-विश्, निर्भिद् 7 P; भित्त्वा निर्गम्; व्यध् 4 P. **-to, up to**, उप-सृ-इ-गम्-या, उप-स्था, प्रति-पद् &c. 2 (*Interj.*) धिक्, अपेहि, अपसर. **-up**, उद्-इ, उत्पद्, ऊर्ध्वं गम्. **-er**, *s.* गामिन्-गंतृ *m.*, चरः, यायिन् *m.* in comp. **-ing**, *s.* गमनं, यानं, सरणं, चलनं, व्रजनं, गति *f.*, अयनं, &c.

Goad, *s.* अंकुशः, सृ(शृ)णि *f.* **-*v. t.*** अंकुशेन तुद् 6 P or प्रचुद् 10. 2 प्रचुद्, प्रणुद् c., प्रोत्सह् c., प्रेर् c., प्रवृत् c., उद्युज् 10, उत्तिज् c.

Goal, *s.* अंतः, अंतस्थानं, अवधिः, अवसानभूमि *f.*; 'g. of ambition' आशावधिः. 2 आशयः, अभिप्रायः, उद्देशः.

Goat, *s.* अजः, छागः, छगलकः, बस्तः, शुभः; 'she-g.' अजा, छागी; 'g.-herd' अजाजीवः, जाबालः, अजपालः-लकः, छागपोषकः; 'a flock of g.s' आजकं. **-ish**, *a.* अजगंध.

Gobbet, *s.* कवलः, ग्रासः.

Gobble, *v. t.* सत्वरं ग्रस् 1 A or भक्ष् 10.

Goblet, *s.* चषकः-कं, पानपात्रं-भाजनं, कंसः-सं.

Goblin, *s.* भूतः, वेतालः, पिशाचः, राक्षसः, निशाचरः, रात्रि(त्रिं)चरः.

God, *s.* देवः, सुरः, अमरः, निर्जरः, विबुधः, सुपर्वन् *m.*, सुमनस् *m.* त्रिदिवेशः, दिवौकस् *m.*, आदितेयः, दिविषद् *m.*, लेखः, अदितिनंदनः, आदित्यः, ऋभुः, अस्वप्नः, अमर्त्यः, अमृतांधस् *m.* बर्हिर्मुखः, क्रतुभुज् *m.*, गीर्वाणः, दानवारिः, वृंदारकः, दैवतः-तं; 'great g.' परमेश्वरः, परमात्मन् *m.* 'god-dess' देवी, भगवती, सुरांगना, देवपत्नी; in comp. words ex. by धर्म; 'g.-father' धर्मपितृ *m.*, so धर्ममातृ *f.* धर्मपुत्रः-त्री, धर्मकन्या-सुता, &c **-less**, *a.* निरीश्वर, नास्तिक, अनीश्वरवादिन्. **-lessness**, *s.* मिथ्यादृष्टि *f.*, नास्तिकता. **-like**, *a.* देवतुल्य-रूप, देवोपम, दिव्य. **-ly**, *a.* धार्मिक (की *f.*), धर्मनिष्ठ-परायण, पुण्यशील, पुण्यात्मन्, ईश्वरभक्त-पूजक. **-liness**, *s.* धर्मसेवा, पुण्यशीलता, ईश्वरभक्ति *f.*, श्रद्धा, &c. **-ship**, *s.* देवत्वं, देवभावः. **-Godsend**, *s.* ईश्वरप्रेरित *a.* द्रव्य, ईश्वरप्रसादः, सौभाग्यं, लक्ष्मीदत्तं.

Goggle, *v. i.* नयने विक्षिप् 6 P or लुल् c.; 'g. eye' लोलनयनं; 'g.-eyed' लोलनयन, वक्र-तिर्यक्-दृष्टि.

Goitre, *s.* गडुः.

Gold, *s.* सुवर्णं, स्वर्णं, कनकं, कांचन, हेमन् *n.*, चामीकरं, जातरूपं, हिरण्यं, हाटकं, तपनीयं, शातकुंभं, गांगेयं, भर्मन् *n.*, कर्बुरं, महारजतं, रुक्मं, कार्तस्वरं, जांबूनदं, अष्टापदः-दं; 'g. for ornaments' शृंगिः, शृंगिकनकं; 'g.-beater or drawer' सुवर्णोद्वर्तनकृत् *m.*; 'g.-dust' कांचनभूः, कनकरागः; 'g.-smith' स्वर्ण-सुवर्ण-कारः, कलादः, नाडिंधमः, रुक्मकारकः; 'g.-thread' कनकसूत्रं. **-*a.*, -en**, *a.* हैम (मी *f.*), सौवर्ण (र्णी *f.*), (*s.*) in comp., or by मय (यी *f.*) affixed to (*s.*).

Golf, *s.* कंदुकक्रीडा-लीला.

Gong, *s.* घनं, कांस्यं.

Gonorrhœa, *s.* शुक्रदोषः.

Good, *a.* भद्र, साधु, प्रशस्त, प्रशस्य, शुभ, कल्याण (णी *f.*), सत्, वर, शोभन, गुणवत्, निर्दोष; oft. by सु or सत् in comp. 2 धर्मशील, साधु-आर्य-वृत्त, सदाचार, सच्चरित, सुकृतिन्, पुण्य, पुण्यात्मन्, पुण्यशील, धार्मिक (की *f.*). 3 योग्य, उचित, युक्त, उपयुक्त, हित; gen. ex. by pot. pass. part. 4 सुजन, हितकाम, प्रियकारिन्, उपकारक, हित, प्रियकर. 5 अन्यून, अदूषित, अक्षत, संपूर्ण. 6 बहु, प्रचुर, महत्, अनल्प, भूरि, सु or अति pr.; 'a g. fellow' भद्रः, सौम्यः; 'my g. sir,' भद्र, सौम्य; 'g. quality' गुणः, स-

द्रुणः; 'g. wishes' आशिस् *f.*, आशीर्वादः-वचनं; 'g. and bad' शुभाशुभ; 'so g. as' अनुग्रह-पूर्वकं, कृपया; 'for g.' अत्यंतं, असन्निवृत्त्यै; 'a g. deal' भृशं, अतीव, सु or अति pr.; 'g. morning to you' शुभस्ते प्रभातकालः; 'it will be g. for you' तव कल्याणाय भवेत्, कल्याणमावहेत्; 'is g. unto weariness' आयासजनकमेव, श्रममात्रदायकं; g. for nothing' निरुपयोग, निर्गुण, निष्फल; 'as g. as' समं. -s. उपकारः, उपकृति *f.* **2** हितं, भूति *f.*, भद्रं, शुभं, कल्याणं, कुशलं, श्रेयस् *n.*, क्षेमं; oft. by अर्थ; 'for the g. of the people' प्रजार्थं, लोकहिताय, प्रजाभूतये, &c. **3** उपयोगः, लाभः, फलं; oft. ex by किं, अर्थ, अलं, with inst.; 'what is the g. of seeing her' किं तया दृष्टया (S. 2), कोऽर्थस्तस्या दर्शनेन; 'what g. do you get by weeping' अलं परिदेवनेन. **4** सुकृतं, पुण्यं, धर्मः, सुचरितं, साधुवृत्तं, सदाचारः; 'to do g.' उपकृ 8 U; हितं-कल्याणं-कृ; क्षेमं आवह् 1 P; 'g. and evil (bad)' शुभाशुभं, हिताहितं. -*interj.* साधु, सुष्ठु, सम्यक्, बाढं, कामं, भवतु, तथास्तु, तथेति; युज्यते. अनुमतं मम (V. 2). 'G.-breeding' साधुता, सौजन्यं, विनयः, सभ्यता, 'possessed of g.-breeding' सुशील, सुविनीत, सुजन, अभिजात; 'g.-conditioned' सुस्थ, सुस्थित; 'g. fortune or luck' *See* **Fortune**; 'g.-humour' सद्भावः, उल्लासः, चित्तप्रसादः, उल्लासवृत्ति *f.*, आनंदः, प्रमोदः; 'g.-nature' सद्भावः, सुस्वभावः, सौजन्यं, सुशीलता; सुप्रकृति *f.*; 'g.-humoured or g.-natured' हृष्टचित्त, प्रसन्नचित्त, सोल्लास, सानंद, सुस्वभाव, सुशील, सुप्रकृति, सुजन, सद्भाववत्, साधुशील, धर्मात्मन्, पुण्यात्मन्, सुहृदय; 'g.-looking' दर्शनीय, सुरूप, सुदर्शन, सुभग, प्रियदर्शन, प्रेक्षणीय, रम्याकार, सुवदन; 'g.-manners' विनयः, विनीतता, मर्यादा, सुनीति-रीति *f.*; सभ्यता, शिष्टाचारः, सुशीलता, सौजन्यं, सुसत्-चरित्रं, सदाचारः, साधुवृत्तं; 'g.-sense' विवेकः, ज्ञानं, प्रज्ञता, प्रबुद्धता, प्रबोधः. सौजन्यं, सद्भावः, सुशीलता; 'g.-will' हितेच्छा, हितकाम्या, प्रीति *f.*, प्रियता, अनुकूलता, भक्ति *f.*, अनुरागः. **-ly,** *a.* चारु, सुंदर (री *f.*), सुरूप, सुदृश्य, प्रेक्षणीय, लावण्यवत्, रम्य, रमणीय, मनोरम-हर, रुचिर. **2** अनल्प, महत्, प्रचुर, बहु, अल्पेतर. **-ness,** *s.* साधुता, प्रशस्तता, गुणवत्ता, श्रेष्ठता, विशिष्टता. **2** साधुशीलता, सदाचारता, धार्मिकत्वं. **3** सुशीलता, दया, कृपालुत्वं, सद्भावः, सौजन्यं, सुजनता; 'tendency to g.' सत्त्वगुणः.

Goods, *s* द्रव्यं, द्रव्यराशिः, विभवः, सामग्री, वस्तुजातं, द्रव्याणि-वस्तूनि (pl.). **2** भांडकं, भांडसमुदायः, पण्यं, भांडानि (pl.); 'household g.' गृहोपस्करः, गृहोपकरणानि.

Goose, *s.* हंसः (सी *f.*), चक्रांगः (गी *f.*), वरटः-टा; कलहंसः (सी *f.*); *See* **Gander;** 'ruddy g.' चक्रवाकः (की *f.*), चक्रः रथांगः, कोकः, द्वंद्वचरः. **2 Fool,** q. v.

Gorbellied, *a.* महोदर, बृहत्कुक्षि, तुंदिन, स्थूलोदर; *See* **Corpulent.**

Gore, *s.* रक्तं, शोणितं, रुधिरं, असृज् *n.*, लोहितं. **2** रक्तगुल्मः, रक्तपिंडः. **3** संधितवस्त्रखंडः. -*v. t.* व्यध् 4 P, निर्भिद् 7 P, छिद् 7 P, वि-दृ 10, क्षण् 5 P, उल्लिख् 6 P. **-ed,** *a.* छिन्नत्वच्, क्षतचर्मन्. **-y,** *a.* रक्ताक्त, असृग्दिग्ध. **2** रुधिरप्रिय, मारात्मक.

Gorge, *s.* कंठः, गलः. **2** रंध्रं, दुर्गमार्गः, संकटसंबाध-पथः, संचारः, संकटं, गिरिकंदरः.-*v. t.* उद्-ग्रस् 1 A, गॄ 6 P. **2** (One's self) कुक्षिं पूर् 10, अत्यंतं तृप् c., अन्नादिना परिपॄ 3 P.

Gorgeous, *a.* शोभन, उज्ज्वल, अतिशोभन, विभ्राजमान, तेजस्विन्, सुप्रभ, एकांतरमणीयचारु, महाप्रभ-दीप्ति, विचित्र. **-ly,** *adv.* अतितेजसा, उज्ज्वलं. **-ness,** *s.* औज्ज्वल्यं, अति-प्रभा-तेजस् *n.*, सुप्रभा.

Gorget, *s.* ग्रीवा-गल-त्राणं.

Gormand, *See* **Glutton. -ize,** *v. i.* अत्याहारं or अतिभोजनं कृ 8 U. **-izer,** *s* *See* **Glutton.**

Gosling, *s.* हंसशिशुः-शावकः.

Gospel, *s.* सुवार्ता, शुभवार्ता.

Gossamer, *s.* ऊर्णनाभजालतंतु *m.*

Gossip, *s.* वावदूकः, प्रलापिन् *m.*, जल्पकः. **2** पानमित्रं, सहपायिन् *m.* **3** वार्ता, जनप्रवादः, जल्पः, जल्पितं, प्रलापः, प्रजल्पः, वृथाकथा-संलापः. -*v. i.* प्रजल्प् 1 P, प्रलप् 1 P.

Gouge, *v. t.* (नयनं) उत्पट् 10, उद्धृ 1 P.

Gourd, *s.* अ(आ)लाबु-बू *f.*, तुंबि-बी *f.*, लाबु-बू *f.*, तुंबा. **2** (Vessel of g.) कमंडलुः; 'bitter g.' इक्ष्वाकु *f.*, कटुतुंबी.

Gourmand, *See* **Gormand.**

Gourmet. *s.* आस्वादपरायणः.

Gout, *s.* वातरक्तं, वातशोणितं. **-y,** *a.* वातग्रस्त, वातरोगोपहत, वातरोगिन्, वातकिन्.

Govern, *v. t.* प्र-शास् 2 P, परि-पा c. (पालयति), ईश् 2 A (with gen.); गुप् 1 P, तंत्र् 10 A, नियम् 1 P; *See* **Rule. 2** वि-धा 3 U, वि-नी 1 P, निग्रह् 9 P, सं-नि-यम्, आ-वृ 5 U, वशीकृ 8 U, दम् c. (दमयति), सं-हृ 1 P, नि-यंत्र् 10; *See* **Control. 3** (In grammar) अनु-इ 2 P, वि-धा; 'g.-ed by another' परायत्त, पराधीन, परतंत्र, विधेय. **-ment,** *s.* नियमनं, सं-नि-यमः, निग्रहः. **2** शासनं, परिपालनं; 'during the g. of Rama' रामे महीं शासति. **3** प्रभुत्वं,

ईशत्वं, ऐश्वर्यं, आधिपत्यं, स्वामित्वं. 4 राज्यं. 5 (Rulers) राजन् *m.*, प्रभुः, ईशः, राजमंत्रिगणः-सचिवाः; 'g. affairs' राज्यकार्याणि; 'form of g.' राज्यरीति-पद्धति *f.* **-or,** *s.* शासितृ *m.*, शासकः, ईशः, अधिपतिः, अधिष्ठातृ *m.*, अधिपः, अधिकृतः. 2 (Of a province) भोगपतिः. **-orship,** *s.* आधिपत्यं, प्रभुत्वं.

Gown, *s.* शाटः-टी, शाटकः, कटिवस्त्रं; 'girl's g.' अर्धोरुकं, चंडातकः-कं

Grab, *s.* ग्रहः,धरणं, संग्रहः. *-v.* *See.* **Snatch.**

Grabble, *v.* स्पृश्-परामृश् 6 P. 2 भूमौ देहं क्षिप् 6 P.

Health, *s.* कुशलं, अरोगः, सुस्थता, वार्त्तं, रोगाभावः, निरामयत्वं, सुस्थिति *f.*, आरोग्यं, स्वास्थ्यं, अनामयं, कल्यत्वं-ता, शरीरसुखं, अरोगिता. 2 प्रकृति *f.*, शरीरावस्था, शरीरस्थितिः-प्रकृतिः; 'of a delicate h.' प्रकृतिकोमल-दुर्बल; 'he is in good h.' सुस्थोसौ, कुशलमस्य. -**ful**, -**y**, *a.* आरोग्यवत्, अरोगिन्, नीरोग, नीरुज-ज्, स्वस्थ, व्याधिरहित, निरामय, वार्त्त, सुस्थ, कल्य, कुशलिन्, निर्व्याधि; 'became as h. as before' पूर्ववत् प्रकृतिस्थः समजायत. 2 आरोग्य-सुख-कर (री *f.*), पथ्य, हित, स्वास्थ्यजनक, सुखावह -**fulness**, *See* (*s.*).

Heap, *s.* राशिः, नि-सं-चयः; चिति *f.*, निकरः, स्तोमः, पुंजः, गणः, ओघः, संभारः; *See* **Collection**. -*v. t.* राशीकृ 8 U, सं-आ-प्र-चि 5 U, एकीकृ, समाक्षिप् 6 P, सं-भृ 3 U, पिंडीकृ, आ-समा-स्तृ 5 U; *See* **Collect**; 'why do you h. accusations (calumnies) upon us ' किमस्मान् संभृतदोषैरधिक्षिपथ (S. 5)

Hear, *v. t.* श्रु 5 P, समा-आ-कर्ण् 10, निशम् 4 P or c. (शामयति); ' h. cases ' व्यवहारान् दृश् 1 P, कार्याणि अवेक्ष् 1 A or विचर् c. or अनुसं-धा 3 U. -*v. i.* वार्तां श्रु; ' I have not heard from him for a long time ' चिरं तद्वार्ता मया न श्रुता. -**er**, *s.* श्रोतृ *m.*, श्रावकः, आकर्णयितृ *m.* -**ing**, *s.* श्रवणं, श्रुति *f.*, आकर्णनं, निशामनं. 2 (In law) दर्शनं, अवेक्षणं, अनुसंधानं; ' the organ of h. ' श्रवणेंद्रियं, श्रोत्रं; ' within h. ' श्रवणगोचरे, श्रुतिपथवर्तिन्. -**Hearsay**, *s.* जनश्रुति *f.*, कर्णपरंपरा, जनवादः-प्रवादः, किंवदंती; ' know it by h. ':इति कर्णपरंपरया श्रुतं.

Hearken, *See* **Hear.**

Hearse, *s.* प्रेत-शव-यानं-वाहनं.

Heart, *s.* हृदयं, हृद् *n.* 2 (The substance) बुक्का, अग्रमांसं, बुक्काग्रमांसं. 3 (Mind) चित्तं, मनस् *n.*, चेतस् *n.*, मानसं, हृदयं, अंतःकरणं, आत्मन् *m.*, अंतरात्मन् *m.*, स्वांतं. 4 उरस् *n.*, वक्षस् *n.*, वक्षःस्थलं. 5 मर्मन् *n.* 6 स्नेहः, प्रणयः, रागः, भावः. 7 उदरं, गर्भः, अभ्यंतरं, अंतर् in comp. 8 सत्त्वं, धैर्यं, पौरुषं, तेजस् *n.*; ' take h. ' आ-समा-श्वस् 2 P; धैर्यं अवलंब् 1 A, अवष्टंभ् 9 P; ' learn or get by h. ' कंठस्थ *a.* कृ 8 U, अभ्यस् 4 P; ' keep in the h. ' चित्तेकृ, अवधृ 10; ' out of h. ' दीन-खिन्न-चित्त; ' at h. ' अंतः; ' with all one's h. ' ' h. and soul ' प्रकामं, कामं, सोत्साहं, सर्वात्मना; ' he has applied himself to the work h. and soul ' सर्वात्मना तस्मिन्कर्मणि स व्यापृतः; ' to one's h. 's content ' यथेच्छं, पर्याप्तं, आचित्ततोषं, कामं, प्रकामं, निकामं, इष्टं, यथेप्सितं; 'from the h. ' निर्व्याजं, सोत्साहं, निर्व्यलीकं; ' h.-ache ' हृदयसंतापः, मनो-

व्याधिः, हृदयव्यथा-पीडा-वेदना, मनस्तापः, मानसी व्यथा; ' h.-broken ' भग्नमानस, अंतर्भिन्न, भिन्नहृदय; ' h.-burn हृदयवेदना, मनस्तापः; हृल्लासः, अम्लपित्तं; ' h.-ease ' हृदयस्वास्थ्यं-सुखं, चित्तशांति, निर्वृति *f.*; ' h.-felt ' अव्याज, निर्व्याज, वास्तविक (की *f.*), अकृत्रिम; ' h.-breaking,-rending,-wounding ' मर्मभिद्-स्पृश्-च्छिद्, हृदय-मर्म-भेदिन्-च्छेदिन्, हृदिस्पृश्, अरुंतुद, चित्तोद्वेगजनक; ' h.-robbing ' मनोहर, चित्तहारिन्; ' h.-sick ' दुर्मनस्, उद्विग्नचित्त, खिन्न-विषण्ण-हृदय; *See* **Dejected**; ' h.-struck,-wounded ' विद्धमर्मन्, क्षत-विद्ध-हृदय; ' h.-whole ' अक्षत-अभिन्न-हृदय. **-less,** *a.* निर्वीर्य, निस्तेजस्; भीरुहृदय, निस्सत्त्व, निष्पौरुष, क्लीब. 2 निर्दय, क्रूर, कठोरहृदय, निर्घृण. **-lessly,** *adv.* निर्वीर्यं, क्लीबवत्. 2 निर्दयं, क्रूरतया. **-lessness,** *s.* अपौरुषं, क्लीबता, निर्वीर्यत्वं. 2 निर्दयत्वं, कठोरता. **-Hearty,** *a.* सरल, निर्व्यलीक, निष्कपट, निर्व्याज, शुद्धांतःकरण; *See* **Frank.** 2 अकृत्रिम, अकृतक, सोत्साह, उत्सुक, सोल्लास, सस्नेह, हृद्य; हृदयंगम, स्नेहनिर्भर; ' a h. friend ' हृदयंगमः सखा. 3 वीर्यवत्, सपौरुष; कल्य, सुस्थ. **-ly,** *adv.* निर्व्यलीकं, निष्कपटं, निर्व्याजं. 2 सोल्लासं, सोत्साहं, सकामं, सर्वात्मना, संतुष्टचेतसा, कामतः, सानंदं, साह्लादं, चित्तसंतोषेण. 3 सवीर्यं. **-ness,** *s.* सारल्यं, अकृत्रिमता, अव्याजत्वं; उत्साहः, औत्सुक्यं, वीर्यं, तेजस् *n.*, पौरुषं.

Hearth, *s.* अग्निकुंडं, चुल्लि-ल्ली *f.*, अंतिका, अंधिका, उद्धानं, उध्मानं, अधिश्रयणी, अश्मंतं. 2 (Portable fire-place) अंगारधानिका, अंगारशकटी, हसनी, हसंती.

Heat, *v. t.* तप् c., परि-प्र-सं ; उद्-,दीप् c., ज्वल् c., संधुक्ष् 10; दह् 1 P. **-***s.* तापः, सं-उत्-परि-तापः, दाहः; उष्णता, उष्मः, तिग्मता, प्रखरत्वं, ऊ-उष्मन् *m.*, चंडता. 2 आतपः, घर्मः, निदाघः; ' affected by h. ' उष्णालु; 'expose to the sun's h.' सूर्यातपे दा 3 U. 3 (Summer) ग्रीष्मः, निदाघः, घर्मकालः, उष्णकालः, निदाघसमयः. 4 उत्तापः, संक्षोभः, चंडता, तीक्ष्णता, तीव्रता, उग्रता, व्यग्रता. 5 संरंभः, मदः, क्रोधः, उद्दीपनं, संधुक्षणं; आवेशः, आक्रमः; ' in the h. of excitement ' रोषावेशेन. 6 कपोलरागः; ' h. of youth ' यौवनगर्वः-दर्पः, यौवनोन्मादः, तारुण्यमदः. **-ing,** *s.* तापनं, दीपनं. **-***a.* तापक, दीपन.

Heath, *s.* जंगलभूमि *f.*, वनभूमिः. 2 प्रचारः.

Heathen, *s.* मूर्ति-प्रतिमा-पूजकः-उपासकः-अर्चकः. **-***a.*, **-ish,** *a.* प्रतिमापूजकानुरूप. 2 **Barbarous,** q. v. **-ism,** *s.* मूर्तिपूजा-अर्चनं-उपासना.

Heave, *v. t.* उन्नम् c. (नमयति), उन्नी 1 P, उच्छ्रि 1 U, उद्-हृ-धृ 1 P, उद्यम् 1 A, उत्था c. (उत्थापयति), उत्क्षिप् 6 P, उत्तुल् 10; 'h. a sigh' निश्वस् 2 P, दीर्घं निश्वस्; ' h.-ing deeply ' दीर्घ-स्थूल-स्थूलं-निश्वस्य. **-***v. i.* स्पंद् 1 A, स्फुर् 6 P, कंप् 1 A, वेप् 1 A. 2 निश्वस्, कृच्छ्रेण उच्छ्वस्. 3 उत्सृप् 1 P, प्र-लुठ् 6 P, 1 A, लुल् 1 P. तरंगायते (D.), उन्नम् 1 P. **-***s.* उन्नमनं, उत्क्षेपः, उत्तोलनं, उद्धरणं. **-ing,** *s.* स्पंदनं, स्फुरणं, कंपनं, वेपथुः. 2 निश्वासः, कृच्छ्रेण उच्छ्वासः, दीर्घनिश्वासः. 3 उत्सर्पणं, प्रलोठनं, लोलनं, उन्नमनं. **-***a.* स्पंदमान, उत्सर्पिन्, लोल.

Heaven, *s.* दिव् *f.*, द्यो *f.*, स्वर्गः, त्रिदिवः-वं, सुरलोकः, त्रिदशालयः, त्रिविष्टपं, नाकः, स्वर् *ind.*; ' h. of Vishnu ' वैकुंठं; ' this is a h. on earth' भूस्वर्गायमानमेतत्स्थलं, स्थानांतरगतः स्वर्गः (V. 2). 2 आकाशः-शं, नभस् *n.*, गगनं-गं; *See* **Sky.** 3 **God,** q. v.; परमेश्वरः, विधिः, ईश्वरः; 'h. and earth' द्यावापृथिव्यौ, द्यावाभूमी, रोदसी-स्यौ, द्यावाक्षमे; ' h.-born ' दिविज, स्वर्गीय, स्वर्गोत्पन्न. **-ly,** *a.* दिव्य, स्वर्गीय, अपार्थिव (वी *f.*), स्वर्ग्य, त्रिदिवस्थ, दिविष्ठ, ' h. body ' नक्षत्रं; ' h. voice ' आकाशवाणी, अशरीरिणी वाक्; ' h. nymph ' सुरांगना, स्वर्योषित्, दिव्यांगना. 2 परम, उत्तम. **-wards,** *adv.* स्वर्गाभिमुखं, अभिगगनं.

Heavy, *a.* गुरु, भारवत्. 2 गाढ, दीर्घ, गुरु, तीक्ष्ण, महत् तीव्र, अत्यंत, उग्र, दारुण, उच्चंड, महा-सु-अति- in comp.; 'h. shower' महासारः. अतिवृष्टि *f.* 3 आकुल, क्षुब्ध; 'h. sea' सागरक्षोभः, क्षुब्धसागरः, ऊर्मिमालाकुलः सागरः 4 अवसन्न, खिन्न, दीन, चिंताकुल, विषण्ण. 5 मंद, स्थूल, जड, मंथर, अलस, मंदधी-मति, जड-स्थूल-बुद्धि-धी; ' h.-headed ' मंद-स्थूल-धी; ' h.-laden ' गुरुभाराक्रांत, सुभारवत्. **-ly,** *adv.* गुरुभारेण, गुरुतया. 2 भृशं, तीव्रं, बलवत्, अत्यंतं, सु-अति pr.; *See* **Exceedingly.** 3 सविषादं, मंदं, शनैःशनैः. **-ness,** *s.* गुरुता, गुरुत्वं, भारः, गरिमन् *m.*, विषादः, दैन्यं, मांद्यं, स्थूलता, &c.

Hebetate, *v. t.* *See* **Blunt, Dull.**

Hecatomb, *s.* शतबलिदानं.

Hectic, *a.* संतत, अविरत. 2 ज्वरसूचक, अंतर्दाहसूचक.

Hector, *s.* विकत्थिन् *m.*, आत्मश्लाघिन् *m.*, पिंडीशूरः, शूरंमन्यः. 2 कलहकारः, भर्त्सकः. **-***v. i.* विकत्थ् 1 A, प्रगल्भ् 1 A; *See* **Boast.** 2 तर्ज्-भर्त्स् 10 A.

Hedge, *s.* वृति *f.*, प्राचीरं, प्राकारः, आवरणं, वेष्टनं, आवारः, क्षेत्रावरोधकं, क्षेत्रवेष्टनं; ' h.-born' अंत्यज, हीन-जाति-वर्ण, अधम-नीच-जातीय; ' h.-hog ' शल्यः, शल्यकंठः; ' h.-

sparrow ' कलविंकः, चटकः. *–v. t.* वृत्या परिवेष्ट् c. or आवृ 5 U or अवरुधू 7 U.

Hedonic, *a.* सुखपर-विषयक.

Heed, *v. t.* आदृ 6 A, अवेक्ष् 1 A. गण् 10, मन् c., अभिनंद् 1 P; सेव् 1 A. **2** अव-धा 3 U, मनो दा 3 U, सावधान *a.* भू, श्रु 5 P; *See* **Hear.** *–s.* अवधानं,अवेक्षा, सावधानता, मनोयोगः; ' take h.' सावधानो भव. **–ful, –less,** *a. See* **Careful,–less.**

Heel, *s.* पार्ष्णि *m. f.*, पादतलं-मूलं;'to be at one's h.s' पार्ष्णि ग्रह् 9 U, अनुसृ, पदं अनुगम् 1 P; ' I shall be close upon your h. s' अहमनुपदमागत एव (S. 3) 'to take to or show h. s ' पलाय् 1 A, अपक्रम् 1 U, 4 P; ' betake to h. s ' जंघाचलमवलंब् 1 A; ' h. s over head ' अवाक्शिरस् *a.*, ऊर्ध्वपाद *a. –v. i.* एकपार्श्वे पत् 1 P or परिवृत् 1 A or प्र-लंब् 1 A.

Heft, *s.* उद्योगः, यत्नः, उत्साहः. **2** मुष्टि *m f.*, त्सरुः.

Hegemony, *s.* नायकत्वं, आधिपत्यं.

Heifer, *s.* वत्सतरी, वत्सा ; ' h. one year old ' एकहायनी ; so द्विहायनी, त्रिहायणी.

Heigh-ho, *interj.* हंहो, अहा, भो भोः, रे रे.

Height, *See* under **High.**

Heinous, *a.* घोर, दारुण, अतिनिंद्य, गर्ह्यतम, अतिदुष्ट, महत्, अतिपापिन्, अतिघोर, पापिष्ठ. **–ly,** *adv.* घोरं, दारुणं. **–ness,** *s.* घोरता, दारुणत्वं.

Heir, *s.* दायादः, रिक्थहरः,अंशहरः-हारिन् *m.*, रिक्थभागिन् *m.*, रिक्थिन् *m.*, धनाधिकारिन् *m.*,उत्तराधिकारिन् *m.*, अंशभाक्,अंशिन् *m.*; ' sole h.' समग्रधन-भाक्; ' h.-apparent ' युवराजः; ' h.-loom क्रमायातं जंगमद्रव्यं. **–ess,** *s.* धनाधिकारिणी, *&c.* **–less,** *a.* दायादशून्य-हीन. **–ship,** *s.* धनाधिकारित्वं.

Heliolatry, *s.* सूर्योपासना.

Heliotrope, *s.* सूर्यकमलं, श्रीहस्तिनी.

Hell, *s.* नरकः, निरयः, नारकः, दुर्गति *f.* **2** पातालं, रसातलं, अधोलोकः, अधोभुवनं; ' h.-tortures ' कारणा, यातना. तीव्रवेदना; ' river of h. ' वैतरणी. **–ish,** *a.* नारक (की *f.*), नरकीय, नारकीय (यी *f.*), नरकस्थ. **2 Cruel,** q. v. **3** अतिनिंद्य, दुष्टतम.

Helm, *s.* कर्णः, नौनिपातः-तकः, अरित्रं **2 Helmet,** q. v.; ' placed at the h. of (royal) affairs ' राज्यधुरायां स्थापित. **–Helmsman,** *s.* कर्णधारः, नाविकः.

Helmet. *s.* शिरस्त्रं, शिरस्कं, शिरोभूषणं, शिरस्त्राणं, शीर्षकं ण्यं.

Help, *s.* साहाय्यं, उपकारः, उपकृतं-कृति *f.*, साहित्यं, अनुग्रहः, आनुकूल्यं. **2** गति *f.*, आश्रयः, शरणं; ' help ! help ! ' परित्रायध्वं, परित्रायध्वं. *–v. t.* साहाय्यं कृ 8 U, सहायः भू, अनुग्रह् 9 P, उपकृ (gen.); न हि दीपो परस्परस्योपकुरुतः (S. B. 420); तान्यपि तत्त्वज्ञानायोपकुर्वीति (S. B. 447) ' h. a right understanding'. **2** संवृध् c., प्रवृत् c., पुरस्कृ, उत्तुज् 10; ' h. ed him on his legs' उत्थातुं तस्य साहाय्यं चकार; ' God h. s those who h. themselves ' दैवमुद्यमायत्तं, विना पुरुषकारेण दैवं न सिध्यति; दैवं पुरुषकारेण साध्यसिद्धिनिबंधनं; न स्वयं दैवमादत्ते पुरुषार्थमपेक्षते (S. R. 104); ' can't h. ' का गतिः, किमन्यच्छरणं; 'to h. himself to a mouthful ' ग्रासग्रहणेन आत्मानं तर्पयितुं; ' a h. ing hand ' हस्तावलंबः-बनं; दैवेनेत्थं दत्तहस्तावलंबे प्रारंभे (Rat. 1): ' he could not h. laughing ' हासं निग्रहीतुं न शशाक; ' I cannot h. going ' मयावश्यं गंतव्यं; ' to h. at table ' परिविष् 10. **–er,** *s.* उपकारकः, उपकर्तृ *m.*, सहायः. **–ful,** *a.* उपयोगिन्, सहाय, उपकारक, साहाय्यकारिन्. **–less,** *a.* अनाथ, निराश्रय, अगतिक, अशरण, गतिहीन. निरवलंब, असहाय. **2** अप्रतिकार्य, अपरिहार्य, अप्रतिविधेय, निरुपाय; ' we are simply h. in that matter ' तस्मिन्विषये अस्माकमन्या गतिरेव नास्ति. **–Helpmate,** *s.* सहधर्मिणी. **2** सहायः, सहकारिन् *m*

Helve, *s.* दंडः, मुष्टि *m. f.*

Hem, *s.* अंचलः, वसनप्रांतः, वस्त्रयः-दशाः (pl.). **2** उत्कासनं. *–v. t.* अंचलं सिव् 4 P. **2** (in) परिवेष्ट् 1 A or c., परि-वृ 5 U or c., निरुध् 7 U

Hemicrania, *s.* अर्धावभेदकः

Hemicycle, *s.* गोलार्धं.

Hemiplegy, *s.* पक्षाघातः, पक्षवायुः.

Hemisphere, *s.* गोलार्धं, अर्धगोलः.

Hemistich, *s.* श्लोकार्धं, अर्धश्लोकः.

Hemorrhage, *s.* रक्त-रुधिर-स्रावः, रक्तक्षरणं.

Hemorrhoids, *s.* अर्शस् *n.*, गुदकीलः.

Hemp, *s.* शणं, भंगा, मातुलानी. **–en,** *a.* शाण (णी *f.*), शण in comp.

Hen, *s.* कुक्कुटी; ' h.-hearted ' भीरु, भीरुहृदय, कातर, कापुरुष; ' h.-house ' कुक्कुटपालिका; ' h.-pecked ' स्त्रीवश, स्त्रीविधेय, स्त्रीजित, स्त्रीवश्य, स्त्रीवशवर्तिन्, भार्याटिक; ' h.-roost ' कुक्कुटालयः.

Hence, *adv.* इतः, अस्मात् स्थानात्. **2** अतः, एतस्मात् कारणात्, तस्मात्; अत एव. **3** (From h.) अतःपरं, अतः or इतः-परं or ऊर्ध्वं; अद्यप्रभृति; ' hence ! ' अपेहि, अपगच्छ, अपसर; ' h.-forth,-forward ' अतः or इतः-परं or ऊर्ध्वं; अद्यप्रभृति, अद्यारभ्य, अद्यावधि.

Hepatic, *a.* यकृत्संबंधिन्.

Heptagon, *s.* सप्तभुजा-सप्तकोणा-आकृतिः.

Herald, *s.* घोषकः, बंदिन् *m.*, राजदूतः. **2** (fig.) अग्रदूतः, प्रथमवार्ताहरः, अग्रेसरः. **–Heraldry,** *s.* वंशावलीज्ञानं.

Herb, *s.* ओषधि-धी *f.*, शाकः, शाकलता, हरितकं. **-Herbage,** *s.* तृणं, शस्यं, घासः, यवसं. **-Herbal,** *s.* वृक्षायुर्वेदः.

Herculean, *a.* भगीरथ in comp.; 'h. efforts' भगीरथप्रयत्नाः. **2** अतिप्रबल, अतिशक्तिमत्.

Herd, *s.* यूथं, गणः, संघः, वृंदं, कदंबः, कुलं, समूहः, व्रजः, निवहः; 'h. of cattle' गोकुलं, पाशवं, गोवृंदं, गोत्रा; 'h. of oxen' औक्षणं; 'h. of calves' वात्सकं; 'h. of elephants' हास्तिकं. **-***v. i.* यूथेन चर् 1 P, यूथशः संमिल् 6 P or संगम् 1 A, एकीभू, एकत्र भू or मिल्. **-Herdsman,** *s.* गोरक्षकः, गोपालः, गोपः, गोधुक्, आभीरः, गोसंख्यः, वल्लवः.

Here, *adv.* अत्र, इह (gen. in this world). **2** इह लोके; ex. by demon. pron.; 'h. comes your mother' एषागच्छति ते माता; 'h. am I' अयमस्मि. **-***Interj.* भो भोः; 'h. and there' इतस्ततः; अंतरांतरा, असमग्रं, असंपूर्णं; 'h. about' इतो नातिदूरे, इह समीपे; 'h.-after' इतः परं-ऊर्ध्वं, अतः, परतः, परस्तात्, अनंतरं, पश्चात्, उत्तरतः, उत्तरत्र, अग्रे, उपरिष्टात्, अतः परं; (in the next world) परत्र, अमुत्र, परलोके; (*s.*) उत्तरकालः, पर-भावि-आगामि-कालः; 'h.-at' अत्रांतरे, अथ; 'h.-by' अनेन, तस्मात्, 'h.-in' अत्र, अत्र-स्थाने-विषये; 'h.-before' इतः पूर्वं, पूर्वकाले, पुरा, प्राक्, अतीत-गत-काले; 'h.-upon' ततः, अनंतरं, तदुपरि, तच्छ्रुत्वा.

Hereditary, *a.* पितृपैतामह (ही *f.*), पित्र्य, पैतृक (की *f.*), परंपरीण-य, परंपरागत, परंपराप्राप्त, क्रमायात, क्रमागत, कुलक्रमागत, अन्वयागत; 'h. disease' संचारि रोगः; 'h. servant' मूलभृत्यः, मौलः; 'h. succession' क्रमागतत्वं. **-ly,** *adv.* कुलक्रमेण, वंशक्रमेण, परंपरया, पारंपर्येण.

Hereditament, *s.* दायः, रिक्थाधिकारः.

Heredity, *s.* पैतृक *a.* गुणः

Heresy, *s.* पाषंडमार्गः, नास्तिकता, मिथ्यादृष्टि *f.*, विधर्मः, विधर्मसेवा, परधर्माश्रयः, अपथं, विपथः. **-Heretic,** *s.* पाषं(खं)डः, नास्तिकः, विधर्मसेविन् *m.*, परधर्मावलंबिन् *m.*, देवनिंदकः, उपधर्मसेविन् *m.*, स्वधर्मभ्रष्टः-च्युतः, पतितः. **-al,** *a.* धर्मविरुद्ध, विपथ-विधर्म-गामिन्. **-ally,** *adv.* पाषंडवत्, नास्तिकवत्.

Heritable, *a.* पितृप्राप्य, दाययोग्य.

Heritage, *s.* दायः, पैतृकं धनं, रिक्थं, पैतृकद्रव्याधिकारः.

Hermaphrodite, *s.* स्त्रीपुरुषलक्षणान्वितः.

Hermetic,-al, *a.* रसायनीय, रसायनज. **2** सुदृढ. **-ly,** *adv.* सुदृढं, गाढं.

Hermit, *s.* यतिः, तापसः, तपस्विन् *m.*, मुनिः, आरण्यकः, वन-अरण्य-वासिन् *m.*, वानप्रस्थः, वैखानसः. **-age,** *s.* आश्रमः, उटजः-जं, पर्णशाला.

Hernia, *s.* अंत्रवृद्धि *f.*; अंत्रस्रंसः.

Hero, *s.* वीरः, शूरः, भटः, विक्रांतपुरुषः, प्र-महा-वीरः, जेतृ *m.*, रथिन् *m.*, अतिरथः, शौटीरः. **2** (In dramas &c.) नायकः, कथापुरुषः; 'h. es of Râmayana' रामायणकथापुरुषाः or-नायकाः. **-ic,-ical,** *a.* वीर, शूर, प्रवीर, विक्रांत, वीर्यवत्, अमितौजस्, महावीर्य; 'a h. deed' पराक्रमः, विक्रमः, अवदातं कर्म. **2** वीरचरित्रविषयक, वीररसप्रधान. **-ically,** *adv.* सविक्रमं, सवीर्यं, शूरवत्. **-ism,** *s.* वीर्यं, शूरत्वं, शौर्यं, परा-वि-क्रमः, धामन् *n.*, ओजस् *n.*, रणोत्साहः, पौरुषं, साहसं, वीर्यवत्त्वं, शौटीर्यं. **-Heroine,** *s.* नायिका.

Heron, *s.* बकः, सारसः, लोहपृष्ठः, क्रौंचः.

Herpes, *s. See* **Itch.**

Hesitate, *v. i.* वि-आ-शंक् 1 A, दोलायते (D.), विचर् c., विकल्प् 1 A or c., विलंब् 1 A, चिर(रा)यति-आंदोलयति (D.); *See* **Doubt** also. **2 Falter,** q. v. **-ingly,** *adv.* संशय्य, सविकल्पं, ससंशयं, साशंकं. **2** स्खलनपूर्वकं. **-ion,** *s.* शंका, संशयः, विकल्पः, आ-वि-परि-शंका, विचारः, संदेहः, वितर्कः, द्वापरः, अनिर्णयः, विचिकित्सा. **2** (In speaking) स्खलनं, स्वरभेदः-भंगः, स्खलद्वचनं, गद्गदवाच् *f.*

Hesperian, *a. See* **Western.**

Hest, *s. See* **Command.**

Heteroclite, *a.* विधिविरुद्ध, निपातित.

Heterodox, *a.* भिन्न-मत-धर्मन्, धर्मविरुद्ध, विपरीत, विधर्मिन्, वैधर्मिक (की *f.*), अपथ-वर्तिन्-गामिन्. **-y,** *s.* विधर्मः, भिन्नमतं-धर्मः,

Heterogeneous, *a.* भिन्न, विजातीय, पृथग्विध, भिन्नजातीय, विरुद्ध; *See* **Different.**

Hew, *v. t.* छिद् 7 P, कृत् 6 P, लू 9 U, *See* **Cut.** **-er,** *s.* छेदकः, छेदिन् *m.*, छिद् in comp. **-Hewn,** *a.* छिन्न, दात, वृक्ण, लून कृत्त, दित, छात.

Hexagon, *s.* षट्कोणः, षडस्रः.

Hexametre, *s.* षट्पदी-चरणः.

Hexapod, *s.* षट्पदः.

Hey, *interj.* अहो, ननु, हाहा.

Heyday, *interj.* नमः, स्वस्ति (with dat.); अहो, भोः, **-***s.* उल्लासः, प्रमोदः, हर्षः, मुदा, परिहासः; 'h. of youth' नवं-प्रथमं-यौवनं.

Hiatus, *s.* भंगः, भेदः, छेदः, विच्छेदः.

Hibernal, *a.* हैमंत (ती *f.*), हैमंतिक (की *f.*). **-Hibernate,** *v. i.* शीतकालं or हेमंतं नी 1 P.

Hiccough, Hiccup, *s.* हिक्का, हिध्मा. **-***v. i.* हिक्क् 1 U.

Hide, *s.* चर्मन् *n.*, अजिनं, दृतिः, कृत्ति *f.*, पशु-चर्मन् *n.*-त्वच् *f.* ; 'h.-bound' दृढमुष्टि, कृपण; अवश्य, अविनय, कठोर, कठिन. –*v. t.* प्रच्छद् 10, गुह् 1 U, गुप् 1 P, अंतर्धा 3 U, तिरोधा, स्थग् 10, अपह्नु c.; *See* **Conceal.** –*v. i.* गुह्-गुप् pass., गुप्त-निलीन-*a.* भू 1 P, नि-ली 4 A, तिरोभू, तिरोधा pass.; 'h. s behind the bushes' विटपांतरितस्तिष्ठति-भवति. **–Hid,–Hidden,** *a.* गूढ, गुप्त, प्रच्छन्न, छादित, अतर्हित, तिरोहित, अंतरित, अपवारित, निभृत, स्थगित, लीन, निलीन. **–ing,** *s.* गोपनं, गुप्ति *f.*, प्रच्छादनं, स्थगनं, तिरोधानं; 'h.-place' निभृत-गूढ-स्थानं, गुप्तिः, निभृतं.

Hideous, *a.* बीभत्स, विकृत, घोर, भीषण, कराल, उग्रदर्शन, कराल-मुख-वदन, कदाकार, भीम-घोर-दर्शन-आकृति, उग्र-घोर-रूप, दुर्दर्शन; 'Oh ! this is indeed a h. spectacle' हंत बीभत्समेवाग्रतो वर्तते (Mal. 5). **–ly,** *adv.* उग्रं, घोररूपेण, बीभत्सं. **–ness,** *s.* घोरता, करालता, उग्रता.

Hie, *v. i.* त्वर् 1 A, सत्वरं गम् 1 P.

Hiemal, *a. See* **Hibernal.**

Hiemate, *v. i. See* **Hibernate.**

Hierarch, *s.* पुरोहितेश्वरः, आचार्यवरः. **–y,** *s.* आचार्याधिपत्यं, धर्माध्यापकप्रभुत्वं.

Hieroglyph,-ic, *s.* गूढाक्षरं, बीजाक्षरं.

Hierophant, *s.* मंत्रव्याख्यातृ *m.*, आचार्यः.

Higgle, *v. i.* पण् 1 A, व्यव-हृ 1 P. 2 **Haggle,** q. v.

High, *a.* उच्च, उन्नत, उच्छ्रित, समुच्छ्रित, सोच्छ्राय, तुंग, प्रांशु, उदग्र, उत्तुंग, उद्गत, उन्नम्र, ऊर्ध्व. 2 उत्तम, विशिष्ट, मुख्य, श्रेष्ठ, परम, अग्र्य, महा-प्रधान-in comp.; *See* **Principal.** 3 प्रचंड, तीक्ष्ण, तीव्र, बलवत्, तरस्विन्, प्रबल; *See* **Strong.** 4 उदात्त, उत्ताल; 'a h. tone' उदात्तः, उच्च-तार-स्वरः, तारः. 5 (Of h. rank) विशिष्ट, उत्कृष्ट, उत्कृष्ट-विशिष्ट-पदस्थ, उत्तम-परम-पदभाज्, लब्धप्रतिष्ठ, प्रतिपत्तिमत्, सगौरव. 6 (Of h. family) कुलीन, महाकुल, अभिजात, आभिजनवत्, कुलज, महाकुलप्रसूत. 7 गर्वोद्धत, दर्पाध्मात, सावलेप, गर्वित, अवलिप्त, उत्सिक्त. 8 गहन; 'h. water' प्रवृद्धा वेला; 'it is h. noon' (नभसः) मध्यनलंकरोति भानुः; 'h. and low' उच्चावच, अधरोत्तर, उत्तमाधम, उन्नतानत, नतोन्नत, निम्नोन्नत; 'h.-er and h.-er' अधिकाधिकं, उत्तरोत्तरं; 'h. price' महामूल्य; 'h.ground' उन्नतभूः; 'as h. as' मात्र (त्री *f.*), द्वयस (सी *f.*), दघ्न (घ्नी *f.*) in comp.; 'he has a h. opinion of you' स त्वां बहु मन्यते. –*adv.* उच्चैः, उच्चं, अति-सु pr.; ऊर्ध्वं, उपरि, उत्तमं, परमं; 'on h.' ऊर्ध्वं, उपरि; 'from on h.' उपरिष्टात्; 'the sea runs h.' बलवत्क्षुब्धः सागरः. 'H.-birth' कुलीनता, कुलोत्कर्षः, आभिजात्यं; 'h.-blest' अतिपुण्यवत्, महाभाग, अतिधन्य, परमसुखभाज्; 'h.-blown' अत्युच्छून, अतिस्फीत; ' 'h.-born' कुलीन, महाकुल-जात-प्रसूत, अभिजात, सुजात, अभिजनवत्, सद्वंश्य, श्रेष्ठ-उत्तम-कुलोद्भव; 'h.-bred' कुलीन, शिष्टाचार, सुजन, सुशील, सद्भावविशिष्ट, सौजन्योपेत, सदाचार, साधुवृत्त; 'h.-built' सोच्छ्राय, उच्च; 'h.-day' उत्सवदिनं, उद्धर्षदिवसः; 'h.-fed' अतिपुष्ट, हृष्टपुष्ट; 'h.-flying' अपरिमित; 'h.-hand' औद्धत्यं, गर्वः, उद्दामत्वं, निर्यंत्रणत्वं; 'h.-handed' उद्धत, सगर्व, उद्दाम, अनियंत्रण, उच्छृंखल, स्वैरिन्; 'h.-hung' ऊर्ध्वबद्ध; 'h.-land' अधित्यका, उन्नतभूमि *f.*; (*a.*) पर्वतीय, उन्नत; 'h.-lander' पर्वतीयः, पर्वतवासिन् *m.*; 'h.-mettled' महासत्त्व, उरुसत्त्व, ओजस्विन्, अदीनचित्त, तेजस्विन्; गर्वित, अतिमदान्वित; 'h.-minded' महात्मन्, महामनस्क. उदार-धी-चेतस्-चरित, महेच्छ, महाशय; 'h.–principled' साधुचरित्र, पुण्यात्मन्, पुण्यशील; 'h.-priest' पुरोहिताध्यक्षः; 'h.-prized' महामूल्य, महार्घ, बहुमत; 'h.-red' घनारुण, अतिरक्त; 'h.-road,-street,-way' राजमार्गः-पथः, महापथः-मार्गः, घंटापथः, संसरणं, रथ्या, विशिखा, प्रतोली; 'h.-seasoned' सुवासित; 'h.-spirited' महा-उरु-सत्त्व, अदीनवृत्ति, ओजस्विन्, ऊर्जित, महेच्छ; 'a h.-spirited speech, ऊर्जिताश्रयं वचनं (Ki. II. 1); 'h. -treason राजद्रोहः, राजापथ्यकारित्वं; 'h.-wrought' यत्न-संस्कृत, प्रयत्नपरिष्कृत; 'h.-wayman' परिपंथिन् *m.*, दस्युः, वाटपाटच्चरः, पादविकघ्नः. **–est,** *a.* उच्चैस्तम, तुंगतम, उत्तम, परम. **–ly,** *adv.* उच्चैः. 2 भृशं, अत्यंतं, नितांतं, परमं, परं, अतीव, अति-सु pr.; *See* **Exceedingly,** 'h. pleased' परमानंद-भाज्, हर्षकाष्ठां गत. **–ness,** *s.* देवः (वी *f.*), अत्र-तत्र-भवत् (ती *f.*). **–Height,** *s.* उच्छ्रायः, उच्छ्रयः, उत्सेधः, आरोहः, उन्नयः, तुंगता, उच्चता; उत्कर्षः, उन्नति *f.* 2 उच्च-स्थानं, उत्सेधः, उन्नतभूभागः, गिरिः, पर्वतः. 3 शिखरं, अग्रं, शृंगं, शिखा, चूडा. 4 (परा) काष्ठा, कोटिः; अतिभूमिः; परमावधिः, उत्तमावधिः; 'being in the h. of joy' आनंदकोटिमधिगत. 5 कुलोत्कर्षः, परमपदं, श्रेष्ठत्वं, विशिष्टता; 'the h. of winter' शिशिरमध्यं, कठोरीभूतः शिशिरः. **–en,** *v. t.* उन्नी 1 P, उत्कृष् 1 P. 2 वृध् c, उपचि 5 U, श्वि c., स्फाय् c (स्फावयति); *See* **Add to.**

Hilarity, *s.* आनंदः, उल्लासः, प्रमोदः, कौतुकं, आह्लादः, उत्सवः; *See* **Delight. Hilareous,** *a.* सोल्लास, सानंद.

Hill, *s.* गिरिः, पर्वतः, अद्रिः, शैलपादः; ' h. near a mountain' पादः, प्रत्यंतपर्वतः. **-ock**, *s.* वप्रः, उन्नतभूभागः; वामलूरः, वल्मीकः-कं, नाकुः, मृत्तिकाचयः. **-y**, *a.* पर्वतमय (यी *f.*), सपर्वत, पर्वतीय, उन्नतानत, विषम.

Hilt, *s.* त्सरुः, मुष्टि *m. f.*, खड्गमुष्टिः.

Hind, *s.* मृगी, हरिणी, कुरंगी, एणी, पृषती. 2 ग्राम्यजनः, ग्रामिकः, वृषलः

Hind, Hinder, *a.* पश्चिम, जघन्य, पश्चात् in comp., चरम, अपर, अवर; ' h. part ' पश्चाद्भागः, पृष्ठदेशः- भागः, पृष्ठं, नितंबः, पश्चिमभागः.

Hinder, *v. t.* नि-विनि-वार् 10 or वृ c., नि-प्रति-षिध् 1 P, रुध् 7 U, नि उप-अव-सं-प्रति°, स्तंभ् 9 P, बाध् 1 A, वि-प्रति-हन् 2 P, प्रतिबंध् 9 P. **-ance**, *s.* प्रतिषेधः, निवारणं, प्रतिबंधः, विघ्नः, अंतरायः, प्रत्यूहः, प्रतिरोधः, व्याघातः, बाधा, विष्टंभः. **-er**, *s.* निवारकः, प्रतिबंधकः, विघ्नकृत् *m.*

Hinge, *s.* केंद्रं, द्वारसंधिः-ग्रंथिः. -*v. i.* (upon) अवलंब् 1 A, अपेक्ष् 1 A; *See* **Depend.**

Hint, *s.* इंगितं, आकूतं, सूचना, संज्ञा, भावः, संकेतः, आशयः. 2 उपन्यासः, उपक्षेपः. -*v. t.* इंगितेन सूच् 10, उपन्यस् 4 U, सूच्, उपाक्षिप् 6 P, उद्दिश् 6 P. साकूतं निर्दिश् or उपन्यस्.

Hip, *s.* कटि-टी *f.*, नितंबः, श्रोणि-णी *f.*, कटः, प्रोथः, जघनं, श्रोणिफलकं. **-ped**, *a.* विषण्ण, खिन्न.

Hippopotamus, *s.* करियादस् *n.*

Hire, *v. t.* वेतनेन-मूल्यदानेन नि-प्र-युज् 7 A, 10 or व्या-पृ c. or उप-भुज् 7 P or सेव् 1 A or ग्रह् 9 U, परिक्री 9 A, भट् 1 P or c., भृतिं दा 3 U; ' h. labourers ' कर्मकरान् उपनी 1 A, or कर्मणि व्यापृ c.; ' a h. ed labourer ' भृतिभुज् *m.*, भरण्यभुज् *m.*, भृतकः; ' a person h. ed ' कृत-कल्पित-वेतनः. -*s.* वेतनेन ग्रहणं or व्यापारणं, वेतनदानं. 2 भृति *f.*, भृत्या, भरण्यं, वेतनं, भाटकं, मूल्यं, कर्मण्या, विधा, भर्मन् *n.*, निर्वेशः, पणः, निष्क्रयः; ' for h. ' पण्य, वेतनेन ग्राह्य, साधारण; ' a woman for h. ' पण्यांगना, पण्यस्त्री; ' a teacher for h.' भृतकाध्यापकः. **-ling**, *s.* 'worker for h. ' भृतकः, भृतिभुज् *m.*, भरण्यभुज् *m.*, वैतनिकः; कर्मकरः, भृत्यः.

Hirple, *v. i.* *See* **Limp.** -*s* खंजवत्-लंगगति *f.*

Hirsute, *a.* लोमश, प्रचुरलोमन्.

Hiss, *v. i.* फूत्कारं कृ 8 U or उद्-गॄ 6 P, सीत्कारं कृ, सर्पवत् श्वस् 2 P; ' h. off ' सीत्कारेण असंतोषं सूच् 10 or दृश् c. **-s.**, **-ing**, *s.* फूत्कारः, सीत्कारः, सर्पश्वासः-नादः.

Hist, *adv.* तूष्णीं भव, वाचंयम *a.* भव.

History, *s.* इतिहासः, पुरावृत्तं, पुराभूतं, पुराणोपाख्यानं, उपाख्यानं, चरित्रवर्णनं. 2 वृत्तांतः, उदंतः, समाचारः, वार्ता. **-ic**, **-ical**, *a.* ऐतिहासिक (की *f.*), पुरावृत्तविषयक, पौराणिक (की *f.*). **-ically**, *adv.* इतिहासानुसारेण. **-Historian**, **-Historiographer**, *s.* इतिहास-पुरावृत्त-लेखकः-रचकः, पुराणरचकः, चरित्रलेखकः, ऐतिहासिकः.

Histrionic,-al, *a.* नाटकीय, रंग-नाटक-योग्य, रंगानुरूप.

Hit, *v. t.* प्र-हृ 1 P, तड् 10; अभि-नि-आ-हन् 2 P, तुद् 6 P, व्यध् 4 P. 2 (Upon) (दैवात्) आ-सद् c., प्राप् 5 P, अधिगम् 1 P, लभ् 1 A; ' arrows h. a moving mark ' इषवः सिध्यंति लक्ष्ये चले (S. 2). -*v. i.* संघट्ट् 1 A, समा-प्रति-हन्, अभिसं-पत् 1 P. -*s.* प्रहारः, आघातः, ताडनं, घातः. 2 दैवघटना, संगति *f.*, दैवं.

Hitch, *v. t* ग्रह् 9 U, धृ 1 U, 10, आकृष् 1 P. -*v. i.* ग्रह्-धृ-pass. 2 **Hop**, *q. v.* -*s.* अंतरायः, प्रत्यूहः; *See* **Obstacle.**

Hithe, *s.* घट्टः, तरस्थानं.

Hither, *adv.* अत्र, इह, इतः. **-most**, *a.* आसन्नतम, नेदिष्ठ, अत्यंतिक. **-ward**, *adv.* इतः, अत्र. **-Hitherto**, *adv.* अद्ययावत्, आवर्तमानकालात्, अद्यावधि, एतत्कालपर्यंतं.

Hive, *s.* मधुकोषः, करंडः, छत्रकः, चषालः. -*v. t.* मधुकोषे निधा 3 U or निविश् c.

Hoar, *a.* धवल, शुभ्र, सित, श्वेत, शुक्ल; *See* **White**; ' h.-frost ' तुषारः, अवश्यायः; *See* **Frost.**

Hoard, *s.* संचयः, निचयः, निवहः, पुंजः, राशिः, गणः, संघः, संग्रहः, निधिः; *See* **Multitude.** -*v. t.* संचि 5 U, संग्रह् 9 U, समा-हृ 1 P, राशीकृ 8 U, पुंजीकृ.

Hoarse, *a.* रूक्ष, परुष, कर्कश; भग्न, सगद्गद. **-ly**, *adv.* रूक्षस्वरेण, स्वरभंगेन, सगद्गदं. **-ness**, *s.* भंगः, भेदः, रूक्षता; स्वरभंगः-रूक्षता.

Hoary, *a.* सित, धवल, श्वेत, शुक्ल, गौर (री *f.*), शुभ्र. 2 पलित, पक्व-पलित-केश.

Hoax, *s.* वंचनं-ना, प्रतारणं-णा, छलं, कपटं, विप्रलंभः. -*v. t.* वंच् 10, प्र-तॄ c., विप्र-लभ् 1 A.

Hob, *s.* वृषलः, ग्राम्यः, जानपदः.

Hobble, *v. i.* *See* **Limp.**

Hobbledehoy, *s.* युवन् *m.*

Hobby, *s.* प्रियवस्तु-द्रव्यं, चिरकाम्यं; निर्बंधः, अभीष्टमनोरथः, लहरी, छंदः, अभिरुचि *f.*; ' h.-horse ' क्रीडाश्वः, क्रीडाद्रव्यं, क्रीडनकं.

Hobgoblin, *s.* भूतः, पिशाचः, वेतालः, राक्षसः; *See* **Demon, Devil.**

Hocus, *v. t.* *See* **Hoax.** **-pocus**, *s.* मंत्रतंत्रं, कुहकः, इंद्रजालं.

Hod, *s.* लेपाधारः, सुधाभाजनं.

Hodge-podge, *s.* संकरः, सन्निपातः, नानाद्रव्यसमूहः, प्रकीर्णकं.

Hoe, *s.* खनित्रं, अवदारणः, स्तंबघ्नः. —*v. t.* खनित्रेण खन् 1 P, भूमिं भिद् 7 P, अवदृ 10.

Hog, *s.* वराहः, किरिः, शू(सू)करः; *See* **Boar**; 'village h.' विट्चरः, ग्राम्यः; 'h.-herd' शूकरपालः-पोषकः; 'h.-sty' शूकरस्थानं-वासः. **-gish,** *a.* शूकरोपम, शूकरीय, वाराह (ही *f.*), सूकरगुणविशिष्ट.

Hogo, *s.* अति-तीक्ष्ण-स्वादः.

Hog-weed, *s.* शोथघ्नी, पुनर्नवा, शोथजित् *f.*

Hoiden, *s.* प्रगल्भा, निर्लज्जा.

Hoist, *v. t.* उन्नम् c. (नमयति), उद्गम् c., उच्छ्रि c., उद्यम् 1 A, उन्नी 1 P, उद्-धृ-हृ 1 P, उत्तुल् 10, उत्था c. (उत्थापयति.)

Hold, *v. t.* धृ 1 P, 10, अव-लंब् 1 A, आ-दा 3 A, ग्रह् 9 U, परामृश् 6 P, हस्तेन धृ or अवलंब्. 2 स्तंभ् 9 P, नि-अव-रुध् 7 U, बलाद् धृ. 3 (possess) भृ 3 U, आ-धा 3 U; *See* **Have.** 4 (Contain) धृ, परिग्रह्, आ-धा, समाविश् c., भृ, आ-दा. 5 पा c. (पालयति), रक्ष् 1 P, न त्यज् 1 P. 6 (As a festival) अनुष्ठा 1 P, सेव् 1 A, पा c. (पालयति), कृ 8 U, सं-पद् c., निर्वह् c., वि-धा, यथाविधि कृ, अभिनंद् c. 7 मन् 4 A, गण् 10; *See* **Consider,** 'I h. them of no account' का-कियती-मात्रा तेषां मत्पुरतः, तानहं तृणाय मन्ये or तृणीकरोमि; 'h. an opinion' मतं अवलंब् or आश्रि 1 U, मन्; 'h. one's tongue' जिह्वां धृ or रक्ष्; 'h. your tongue' वाचंयमो भव, वाचं नियच्छ, तूष्णीं-जोषं-आस्स्व; 'h. a meeting' सभां मिल् c. or समा-ह्वे 1 P; 'a meeting was held' परिषद् मिलिता; 'h. in esteem' बहु मन्; 'h. in contempt' अवगण्, अवमन्, तृणीकृ, तृणाय मन्; 'h. a council' सभां निमंत्र् 10 A or आह्वे; 'h. a consultation' संमंत्र्, मंत्रणां कृ; 'I h. you responsible for this act' अस्य त्वयोत्तरं दातव्यं. —*v. i.* स्था 1 P, स्थिरीभू, सं-स्था 1 A; चिरस्थायीभू, स्थायीभू. 2 अनुबंध् 9 P or pass.; सं-संज् pass., संलग्नीभू, आलंब् 1 A. 3 विरम् 1 P, निवृत् 1 A (with abl.); आत्मानं संयम् 1 A or निग्रह्, परिहृ 1 P, त्यज्; 'hold hold!' विरम विरम, मा मा एवं, मा तावत्. 4 अधीन *a.* भू, आश्रि, अव-आ-लंब्. 5 (As a rule) गम्, न व्यभिचर् 1 P; 'this rule h.s everywhere' सर्वगामी-अव्यभिचारी-अयं नियमः. —*s.* धरणं, धृति *f.*, ग्रहः-हणं, अवलंबः-बनं, हस्तेन ग्रहणं-धरणं; 'letting go the h.' मुक्त-स्रस्त-हस्त, मुक्तग्रह. 2 कारा, कारागृहं, कारागारं, बंधनस्थानं, गुप्ति *f.* 3 आधारः, आ-अव-लंबः-बनं, उपस्तंभः, आश्रयः. 4 दुर्गं, कोटः. 5 मुष्टि *m. f.*, वारंगः. 6 आस्पदं, पदं, अधिकारः, वशः-शं; 'red colour takes a firm h. on a white cloth' रागः शुक्लपटे स्थायीभवति (P. I. 1); 'had a h. on the mind of the people' स लोकस्य मन आददे (R. iv. 8); 'the advice took no h. on (her) mind' लेभेंतरं चेतसि नोपदेशः (R. vi. 66). **-back,** नि-वृ c., वार् 10, संहृ 1 P, निग्रह्, विकल्प् 1 A, विचर् c.; *See* **Hesitate.** **-forth,** दृश् c., पुरो निधा. **-in,** निग्रह्, प्रति-संहृ, नि-सं-यम्. **-off,** विलंब् 1 A, विकल्प्. **-on,** प्रवृत् c., न विरम्, न मुच् 6 P, न त्यज्, उद्वह् 1 P, निर्वह् c. **-out,** प्रसृ c., वितन् 8 U, दीर्घीकृ. 2 दृश् c., उपन्यस् 4 U, उपाक्षिप् 6 P, उप-स्था c. (स्थापयति); (*v. i.*) चिरं यावत्सह् 1 A or युध् 4 A or प्रतिकृ. **-together,** संबंध् pass., संश्लिष् 4 P, संलग् 1 P **-up,** उन्नम् c. (नमयति), उद्यम्, उच्छ्रि 1 U or c., ऊर्ध्वीकृ. 2 उत्तंभ्, अवष्टंभ्; आ-अव-लंब्, भृ, धृ. **-er,** *s.* धारकः, धारयितृ *m.*, ग्राहकः, धरः-आधारः- in comp. **-ing,** *s.* धरणं, ग्रहणं, &c. —*a.* धारिन्, धर in comp.; oft. by हस्त in comp.; 'h. a sword' कृपाणपाणिः. **-Holdfast,** *s.* ग्राहकः, ग्रहणी, बंधनी, कुडुपः. 2 दृढ-बद्ध-मुष्टिः, अमुक्तहस्तः.

Hole, *s.* विवरं, बिलं, छिद्रं, रंध्रं, सुशि(षि)रं, कुहरं, निर्व्यथनं, रोकं, वपा, सुषि *f.*; श्वभ्रं, गर्तः-र्ता, अवटः (in the ground). 2 कंदरः-रं-रा, गुहा, गह्वरं, दरी, खातं (of mountains). 3 (Of garments &c. or fig.) रंध्रं, छिद्रं; 'a rat digs a h. and a snake uses it' एकः परिश्रमं करोति, अन्यस्तत्फलमुपभुंक्ते; 'picking h.s (in the character &c.) of others' छिद्रान्वेषिन्, दोषैकदृश्, पुरोभागिन्, रंध्रानुसारिन्; 'full of h.s' अनेकरंध्र, बहुविवर.

Hollow, *a.* रिक्त-शून्य-गर्भ, अंतःशून्य, शून्यमध्य-उदर; उदराकृति, सुषिर, पुटाकार. 2 असार, निःसत्व, निःसार, फल्गु, शून्य. 3 मोघ, निरर्थक, निष्फल. 4 असत्य, वितथ, मिथ्या, in comp. 5 ग(गं)भीर, मंद्र, मंद. —*s.* (Of trees) कोटरः-रं, क्रोडः, निष्कुहः. 2 विवरं, गुहा, बिलं, कुहरं, अवटः; *See* **Hole.** 3 गर्भः, उदरं, अभ्यंतरं, क्रोडं. 4 खातं, खातभूः, गर्तः-र्ता. 5 दरी, कंदरः, अद्रिद्रोणी, कंदरभूः. 6 कुल्या, प्रणाली; 'h. of the hand' पुटः, करपुटः-कोषः

‘ h. of the navel ’ नाभिगर्ता, नाभ्यावर्तः; ‘ ground full of h. s ’ उत्खातिनी भूमिः (S. 1); ‘ natural h. ’ देवखातं; ‘ h. of the ear ’ ऋषभः, ‘ h. s in the buttocks ’ जघनकूपकौ, गर्तौ. -*v. t.* उत्खन् 1 P, पुटीकृ 8 U. **-ness,** *s.* शून्यता, असारता, असत्यता, &c.

Holocaust, *s.* होमः.

Holy, *a.* पुण्य, पवित्र, परिपूत, साधु, शुचि, विमल; पुण्यात्मन्, शुचिव्रत, धार्मिक (की *f.*), धर्म-पुण्य-शील, धर्मात्मन्, शुद्धमति; ‘ h. study ’ वेदाध्ययनं; ‘ h. wisdom ’ ब्रह्मज्ञानं; ‘ h. writing ’ श्रुतिः, वेदाः, निगमः; ‘ h. land ’ पुण्यभूमिः; ‘ h. place of pilgrimage ’ तीर्थं, क्षेत्रं, पुण्यस्थानं-तीर्थं. **-ly,** *adv.* पुण्यं, पवित्रतया, शुचिवत्. **-ness,** *s.* पवित्रता, पुण्यता, शुचिता, वैमल्यं, पुण्यशीलता, धार्मिकत्वं; ‘ his or her h. ’ भगवान्, भगवती. **-Holiday,** *s.* पुण्याहं, पुण्यदिनं. 2 अनध्यायः, अनध्याय-दिवसः-महोत्सवः. 3 उत्सवः, पर्वन् *n.*, उद्धर्षः, उत्सव-उद्धर्ष-दिनं; ‘ h. people ’ यात्राजनः.

Homage, *s.* नमस्कारः, अभिवंदनं, प्रणामः, प्रणति *f.*, पूजा, अर्चनं, उपासना, प्रणिपातः, सेवांजलिः; सेवा, आदरः, प्रभुभक्ति *f.*; ‘ pay or do h. ’ प्रणम् 1 P, वंद् 1 A, प्रणिपत् 1 P; *See* **Bow.**

Home, *s.* गृहं, वासः, वासस्थानं-भूमि *f.*, स्वगृहं, स्व or निज-गेहं-देशः-वासः-स्थानं-भवनं ; *See* **House;** ‘devoted to h.’ गृहासक्तचित्त. -*adv.* गृहं, गृहं प्रति; ‘the words went h. to his heart’ तद्वचः तस्य हृदयमर्मास्पृशत्; ‘touching h.’ मर्मस्पृश्-भिद्; ‘ goes h. to me ’ मामेव लक्षीकरोति (S. 7); ‘ h. -born ’ गृहजात; ‘ h.-bound ’ गृहगामिन्; ‘ h.-bred ’ गृहज-जात, गृह्य; ‘ h.-made ’ गृहनिर्मित, गृहोत्पन्न; ‘h.-sick ’ गृहविरहार्त; ‘ h.-stall, ’ -stead ’ गृहं, वासः; वेश्मभूः, वास्तु *m.* *n.* **-less,** *a.* निरालय, निराश्रय, निर्गृह. **-ly,** *a.* गृह्य, गृहज. 2 ग्राम्य, ग्रामीण-य, अशिष्ट, प्राकृत, असभ्य, अश्लील, असंस्कृत. -*adv.* ग्राम्यवत्, असभ्यतया, अशिष्टप्रकारेण. **-ward,** *adv.* गृहाभिमुखं, अभिगृहं.

Homicide, *s.* नृहत्या, मनुष्यवधः. 2 (Person) मनुष्यघातिन् *m.*, नृहंतृ *m.*, मनुष्यघातकः. **-al,** *a* नृघातिन्.

Homily, *s.* धर्मवाक्यं.

Homogeneal, Homogeneous, *a.* समान-जाति-जातीय, स-एक-जाति, सवर्ण, एक-स-धर्मन्, समान-भाव, एक-स-जातीय; ‘ h. vowels ’ सवर्णाः.

Homologous, *a.* तुल्य-सम-परिमाण.

Homonym, भिन्नार्थः शब्दः; ‘ a collection of h. s ’ भिन्नार्थवर्गः. **-ous,** *a.* भिन्नार्थ, अनेकार्थ.

Hone, *s.* शाणः, शाणाश्मन् *m.*

Honest, *a.* शुचि, ऋजु, सरल, अमायिन्, दक्षिण, अकुटिल, अजिह्म, शुद्धमति-भाव, शुद्धात्मन्, अकपट, निष्कपट, निर्व्याज, निर्व्यलीक, अव्याज, विमलात्मन्. दंभहीन, न्याय्य, न्याय्याचार, सच्चरित, न्यायवर्तिन्, साधुवृत्त-शील, साधु, प्रांजल, सत्यवृत्त, सत्यशील, सत्यवादिन्. 2 अवितथ, सत्य, अकृत्रिम, अकृतक; *See* **Frank** also; ‘ h. gains ’ न्यायार्जित; ‘ h. statement’ निर्व्याजं वचनं. **-ly,** *adv.* सरलं, न्यायेन, न्यायतः, शुचितया, निष्कपटं, निर्व्याजं, अमायया, निर्व्यलीकं. **-y,** *s.* शुचिता, आर्जवं, निष्कापट्यं, सारल्यं, अकौटिल्यं, दाक्षिण्यं, अमाया, अकपट, अव्याजः, शुद्धभावः, वैमल्यं, निर्व्यलीकता, अजिह्मता, सत्यता, अकृतकता; ‘ h. is the best policy ’ भावशुद्धिः एव साधिष्ठा आचारसरणिः, सारल्यं सत्तमो मार्गः.

Honey, *s.* मधु *n.*, क्षौद्रं, माक्षिकं, सारघं; ‘ h. of flowers ’ पुष्पासवं, पुष्परसः-सारः, कुसुममधु; ‘h.-bee’ मधुमक्षिका, सरघा; ‘ h.-comb ’ मधुकोशः, करंडः; ‘ h.-moon ’ आनंदमासः; ‘ h.-tongued ’ मधुरभाषिन्, मधुरवाच्. -*v. t.* मधुरीकृ 8 U. -*v. i.* उपलल् 10; *See* **Fawn.** **-ed,** *a.* मधुमधुर, सुधास्यंदिन्, मधुर.

Honor, *v. t.* पूज् 10 अर्च् 1 P, 10, मन् c., संभू c., सत्कृ 8 U, पुरस्कृ, मह् 1 P, 10, आदृ 6 A. 2 सेव् 1 A, श्रु desid. (शुश्रूषते), आराध् c ; ‘ h. ed the invitation ’ निमंत्रणमाद्रियत, सगौरवं स्वीचकार. 3 अनुग्रह् 9 P, प्रसद् 1 P (with loc). -*s.* मानः, संमानः, पूजा, अर्चनं, अर्हणा, संभावना, आदरः, सत्कारः. 2 सेवा, शुश्रूषा, आराधनं. 3 ख्याति *f.*, कीर्ति *f.*, यशस् *n.*, प्रतिष्ठा, गौरवं, प्रतिपत्ति *f.*, उत्कर्षः, उत्कृष्ट-प्रधान-पदं, उन्नति *f.*: कुलीनता, आभिजात्यं, प्राधान्यं, श्रेष्ठत्वं; ‘ your or his h. ’ अत्र-तत्र-भवान्; भवत्. **-able,** *a.* पूज्य, मान्य, माननीय, पूजार्ह, आदरणीय. 2 सु-प्र-वि-ख्यात, विश्रुत, सुप्रसिद्ध, प्रतिपत्तिमत्, महायशस्. 3 यशस्कर-कीर्तिकर (री *f.*), प्रतिष्ठावह, श्लाघ्य, प्रशस्य, मानद, गौरवान्वित. 4 कुलीन, अभिजात, महाकुल, उदारचित्त-चरित; *See* **Noble.** 5 शुचि, न्याय्याचार, सच्चरित, साधुवृत्त, पुण्यात्मन्, शुचिव्रत; *See* **Honest.** **-ary,** *a.* मानद, कीर्तिकर, यशस्कर, प्रशस्य. 2 अलाभकर, मानमात्रदायिन्. **-Honorably,** *adv.* समानं, सगौरवं, श्लाघ्यप्रकारेण, प्रशंसापूर्वं, सुयशसा, प्रतिष्ठापूर्वं. 2 शुचिवत्, धार्मिकतया, ऋजुतया, सरलतया, न्यायतः.

Honorarium, *s.* दक्षिणा.

Hood, *s.* फणा-णः, फटा, स्फटा; ‘ expands the h. ’ फणां कुरुते (S. 6); ‘ expanded

h. ' भोगः. 2 फणाकृति शिरस्कं. *-v. t.* शिरस्त्राणेन पिधा 3 U or प्रावृ 5 U.

Hoodwink, *v. t.* (नयने) वस्त्रेण पिधा 3 U or आच्छद् 10 or आवृ 5 U.

Hoof, *s.* खुरः, शफः-फं, क्षुरः, खिंखः, निघृष्वः. **-ed,** *a.* खुरिन्, खुरयुक्त, शफयुक्त.

Hook, *s.* आकर्षणी, ग्रहणी, धरणी; ' fish-h. ' बडिशं-शा-शी, मत्स्यवेधनी; ' h. for elephants ' अंकुशः, शृ(सृ)णि *f.* *-v. t.* बडिशेन धृ 1 P or ग्रह् 9 U. **-ed,** *a.* वक्र, कुटिल, कुंचित, अंकुशाकार, जिह्म; *See* **Crooked.**

Hoop, *s.* चक्रं, वलयः-यं. 2 क्रीडाचक्रं. *-v. t.* लोहवलयैः युज् 10. 2 उच्चैः घुष् 10.

Hoot, *s.* घु(घू)त्कारः. 2 धिक्कारः, उच्चैः अप्रशंसा-सूचनं, दीर्घघोषः. *-v. i.* घूत्काररवं कृ 8 U, उच्चैः आरट् 1 P or घुष् 10, दीर्घं रु 2 P; ' h. at ' उच्चैः अवज्ञां-धिक्कारं-सूच् 10.

Hop, *v. i.* प्लु 1 A, वल्ग् 1 U, एकपादेन नृत् 4 P. *-s.* प्लुतं, वाल्गितं, प्लवः, एकपादेन नृत्यं.

Hope, *v. t.* आशंस् 1 A, उत्-प्रति-अप-ईक्ष् 1 A, स्पृह् 10, प्रत्याकांक्ष् 1 P, वांछ् 1 P, आशां धृ or वह् 1 P; in implied questions, gen. ex. by अपि, कच्चित् or अपि नाम; ' I h. this lotus-leaf breeze pleases you ' अपि सुखायते ते नलिनीपत्रवातः (S. 3); अपि नाम रामभद्रः पुनरपीदं वनमलंकुर्यात् (U. 2), कच्चिन्मृगीणामनघा प्रसूतिः (R. v. 7); ' I h. not ' न खलु; न खलु तामभिकुद्धो गुरुः (V. 3) ' I h. the preceptor did not get angry with her'; ' I scarcely h. ed to see you here ' न खलु मे आसीदाशंसा यदत्र भवंतं प्रेक्षिष्ये. *-s.* आशा प्रत्याशा, आशंसा, आकांक्षा, अपेक्षा, प्रतीक्षा, उदीक्षणं; स्पृहा, मनोरथः, वांछा, इच्छा, आशाबंधः. 2 (Giving h.) आश्वासनं, आश्वासः ; ' having h. s fulfilled ' पूर्णाश; ' a vain h. ' वृथाभिलाषः, मोघाशा, ' h.-ing against h. ' अतीव दूरापेतं. **-ful,** *a.* आशान्वित, आशावत्, आशायुक्त, आशाबद्ध, स्पृहयालु, अपेक्षिन् सप्रत्याश, आशाविष्ट. 2 (Giving hopes) आशाजनन (नी *f.*), आशाकारिन्. **-fully,** *adv.* साशंसं, सप्रत्याशं. **-less,**

T ,

त्यक्ताश, निरपेक्ष. **-lessly,** *adv.* नैराश्यात्, सनैराश्य.

Hora, *s.* मुहूर्तः, घटिका. **-al,-ary,** *a.* मौहूर्तिक (की *f.*).

Horde, *s.* महान् गणः, बृहत्संघः, महौघः, स्तोमः; *See* **Multitude.**

Horizon, *s.* क्षितिजं, दिङ्मंडलं, दिक्चक्रं, अंबरांतः; चक्रं, मंडलं; ' the eastern h. ' प्राची-ऐंद्री-दिक्, प्राचीमूलं. **-Horizontal,** *a.* सम, दिगंतसम, अनुप्रस्थ; ' h. plane ' समभूभागः, समा भूमिः. **-ly,** *adv.* समं, अनुप्रस्थं.

Horn, *s.* शृंगं, विषाणः-णं, कूणिका; ' h. of a buffalo ' गवलं. 2 काहलः-ला, शंखः. 3 चंद्राग्रं, चंद्रशिखा. **-ed,** *a.* शृंगिन्, विषाणिन्, शृंगयुक्त-विशिष्ट. 2 शृंगाकार, शृंगाकृति. **-y,** *a.* शार्ंग (र्गी *f.*). 2 कठिन; *See* **hard.**

Hornet, *s.* वरटा, बृहद्भ्रमरः.

Horologue, *s.* घटी, कालमापनयंत्रं.

Horoscope, *s.* जन्मपत्रिका, जन्मपत्रं, जन्मयोगपत्रं.

Horror, *s.* त्रासः, संत्रासः, साध्वसं, भयकंपः, भयसंहर्षः. 2 बीभत्सता, रौद्रता, घोरता, भैरवं, भयानक, भीष्मं, भीषणं. **-Horrific,** *a.* भीषण, उग्र, भयानक, भयावह. **-Horrid, Horrible,** *a.* घोर, दारुण, भीम, भयानक, उग्र, भीषण. कराल, विकट; *See* **Fearful.** **-ly,** *adv.* घोरं, दारुणं, रौद्रं, उग्रतया; बीभत्सतया. **-Horrify,** *v. t.* **Frighten,** q. v. **-ed,** *a.* साध्वसोपहत, भीत, संत्रस्त, भयसंहृष्ट.

Horripilate, *v. t.* पुलकयति-कंटकयति-रोमांचयति (D), रोमाणि उद्गम् c. or उद्-हृष् c. **-ed,** *a.* पुलकित, कंटकित, सपुलक, रोमांचित. **-ion,** *s.* पुलकः, रोमांचः, रोमहर्षः-र्षणं, रोमोद्गमः-द्गतत्वं, पुलकोद्भेदः, उद्धर्षणं.

Horse, *s.* अश्वः, तुरगः, तुरंगः-गमः, हयः, सप्तिः, वाजिन् *m.*, वाहः, अर्वन् *m.*, घोटकः, वीतिः; गंधर्वः, सैंधवः; ' a well-bred h. ' आजानेयः, कुलीनः, भूमिरक्षकः, सिंधुवारः; ' a well-trained h. ' साधुवाहिन् *m.*, विनीतः; ' a white h. ' कर्कः; ' a bay h. ' उकनाहः, कियाहः; 'a fleet h.' जवनः, जवाधिकः; 'a pack h.' पृष्ठ्यः, स्थौरिन् *m.*, स्थोरिन् *m.*; 'a h. for a sacrifice' ययुः, अश्वमेधीयः; ' a chariot-h. ' रथ्यः; ' h.'s pace ' गतिः, धारा; (namely) आस्कंदितं ' full gallop '; धो(धौ)रितकं, धोरितं ' trot or ambling '; रेचितं ' cantering '; वल्गितं ' vaulting'; प्लुतं 'bounding or capering'; 'h.'s nose' घोणा, प्रोथः-थं; ' h.s' tail' पुच्छः-च्छं, लूमं, लांगूलं; 'h.'s tail hair ' बालधिः, बालहस्तः; ' a number of h. s ' आश्वं, अश्वीयं; ' relating to a h. ' अश्वीय, आश्विक (की *f.*); ' h.-soldiers ' आश्वं, आश्विकं, अश्वारोहगणः; ' h.-back ' अश्वपृष्ठं; ' go on h.-back ' अश्वेन गम् or चर् 1 P; ' going on h.-back ' तुरंगयायिन्, सादिन्; ' h.-bean ' मुद्गः, माषः, शिंबा; ' h.-breaking ' अश्वशिक्षा-दमनं-विनयः; ' h.-breaker ' अश्वविनेतृ *m.*-शिक्षकः; 'h.-

dealer' अश्वव्यापारिन् *m.*, हयज्ञः; 'h.-driving' अश्वसारथ्यं, रथवाहनकौशलं; 'h.-laugh' अट्टहासः, अतिहासः, अतिहसितं, आच्छुरितं; 'h.-man' अश्वारोहः, तुरंगस्थः, सादिन् *m.*, तुरगिन् *m.*, हयारूढः, अश्वारूढः, 'h.-manship' अश्वारोहणकौशलं-विद्या, अश्वविद्या, अश्वहृदयं; 'h.-shoe' अश्वपादत्रं; 'h.-trappings' आदानं, अश्वपरिष्टोमः, अश्वास्तरणं; 'h.-whip' कशा, अश्वताडनी, प्रतिष्कषः-शः, चर्मदंडः; (*v. t.*) कशया तड् 10 or प्र-हृ 1 P.

Hortation, *See* **Exhortation.**

Horticulture, *s.* उद्यानविद्या, उद्यानपालनं. **-ist,** *s.* उद्यानविद्याज्ञः.

Hose, *s.* और्णं पादत्राणं. **-Hosier,** *s.* और्णपादत्रविक्रायिन् *m.*

Hospitable, *a.* आतिथेय (यी *f.*), सत्कारशील, अतिथिपूजक, आतिथ्यकारिन्. **-Hospitably.** *adv.* सादरं, सप्रश्रयं, सबहुमानं, आतिथेयसत्कारेण, सत्कार-आतिथ्य-पूर्वं; 'to receive h.' सत्कृ 8 U, पूज् 10, स-भू c.

Hospital, *s.* आतुरशाला, रुग्णागारं, आरोग्यचिकित्सा-शाला, रुजोपायशाला.

Hospitality, *s.* आतिथ्यं, आतिथ्यकर्मन् *n.*, अतिथिसत्कारः-पूजा-सेवा-क्रिया; सत्कारः, सत्क्रिया, सत्कृति *f.*, उपचारः, पूजा, सेवनं.

Host, *s.* गणः, संघः, समूहः, ओघः, निवहः; *See* **Multitude. 2** चमूः, सेना, अनीकं, वरूथिनी. **3** गृहिन् *m.*, भोजनदायिन् *m.*, निमंत्रणकृत्, निमंत्रकः, आतिथ्यकृत्. **-age,** *s.* विश्वासस्थानं, शरीरबंधकः; 'retaining 4 hares as h. s' चतुरः शशकान् विश्वासस्थाने धृत्वा (P. 1. 8). **-ess,** *s.* गृहिणी, भोजनदात्री, आतिथ्यकारिणी.

Hostel, Hostelry, *s.* पथिकाश्रमः, उत्तरणगृहं-शाला.

Hostile, *a.* विपक्ष, विरुद्ध, वैरिन, प्रत्यर्थिन्, प्रतिकूल, विपरीत, विद्वेषिन्, अहित, प्रतिरोधिन् 'a h. invasion' शत्रुविग्रहः, शत्रुयानं; 'to be h.' विरुध् 7 U, द्विष् 2 U; पर्यवस्था 1 A, प्रतिकूलयति-वैरायते (D.), विपक्षी-प्रत्यर्थी-भू. **-ly,** *adv.* शत्रुवत्, विपक्षवत्. **-ity,** *s.* विपक्षता, वैरं, शत्रुता, वैरभावः, विरोधः, प्रतिद्वंद्वं, विद्वेषः; 'in a state of constant h.' सदाबद्धवैर *a.*; 'natural h' स्वभाव-जाति-वैरं, शाश्वतिकः विरोधः. **2** विग्रहः, युद्धं, संग्रामः, युद्धभावः.

Hostler, *s.* अश्वपालकः.

Hot, *a.* उष्ण, आतपाक्रांत, आतपवत्, तप्त, सं-उत्-तप्त, सोष्ण; प्रखर, उग्र, तिग्म, चंड, खर, तीव्र, तीक्ष्ण. **2** ग्रीष्म, नैदाघ (घी *f*), घर्म in comp. **3** शीघ्र-सुलभ-कोपिन्, क्रोधिन्, संरंभिन्. **4** साहसिन्, तीक्ष्णकर्मन्; 'h. weather or season' ग्रीष्मः, निदाघः, घर्म-ग्रीष्म-उष्णकालः; 'to make h.' तप् c.; 'to be h.' तप् 1 P, 4 A, उष्णीभू; 'h.-bed' उष्णस्थलं, (fig.) क्षेत्रं; h.-blooded or -headed' चंडप्रकृति-शील, संरंभिन्, शीघ्रकोपिन्, उत्तप्त, उच्चंड, तीक्ष्णकर्मन्, साहसिक, साहसिन्. **-ly,** *adv.* तीक्ष्णं, तीव्रं, उच्चंडं, उग्रं, उष्णं; सोत्तापं; व्यग्रं, सोत्साहं, सोत्कटं. **-ness,** *s.* उष्णता, तापः, प्रखरता, उग्रता, चंडता, तिग्मता, औष्ण्यं, निदाघः, घर्मता. **2** उत्तापः, तीक्ष्णता, संरंभः, व्यग्रता; 'h. of temper' शीघ्रकोपित्वं, चंडता.

Hotch-potch, *s.* प्रकीर्णकं, नानाशाकादिसंमिश्रणं.

Hotel, *s.* पथिकाश्रमः, भोजनगृहं.

Hotspur, *s.* संरंभिन् *m.*, साहसिकः.

Hough, *s.* जंघास्थिशिरा.

Hound, *s.* विश्वकद्रुः, मृगदंशकः, आखेटिकः, मृगयाकुक्कुरः.

Hour, *s.* घटी, घटिका, नाडिका; 'h.-drum' नाडिकाविच्छेदपटहः. **2** (H. s) कालः; 'at all h. s' सदा, सर्वदा; 'in an evil h.' अशुभे लग्ने-मुहूर्ते; 'an h. and a half.' अर्धयामः. **-ly,** *a.* प्रतिघटिकं *adv.*

Houri, *s.* दिव्यांगना, स्वर्गकन्या, दिव्ययोषित्.

House, *s.* गृहं, गेहं, अ(आ)गारं, सदनं, वेश्मन्-सद्मन् *n.*, निकेतनं, मंदिरं, वासः, आ-निवासः, भवनं, आयतनं, नि-आ-लयः, ओकस्-धामन् *n.*, वसति *f.*, निवासस्थानं, आवसथः, उदवसितं, निकाय्यः, निशांतं, व(प)स्त्यं; 'body of a h.' गर्भागारं, वासगृहं. **2** कुलं, अन्वयः, वंशः. **3** गृहजनः, कुटुंबं, परिवारः; 'h.-breaker' कुड्यच्छेदिन् *m.*, भित्ति-संधि-चौरः, कपाटघ्नः, गृहभेदकः; 'h.-dog गृहकुक्कुरः; 'h.-door' गृहद्वारं; 'h.-hold' परिवारः, कुटुंबं-चक्रं, परिजनः, गृहपरिजनः, परिवारः; (*a.*) गृह्य, ex. by गृह in comp.; 'h.-hold duties' गृहकार्याणि, गृहाचाराः; 'h.-hold gods' कुलदेवताः; 'h.-holder' गृहिन् *m.*, गृहस्थः, गृहपतिः, गृहमेधिन् *m.*, कुटुंबिन् *m.*, गेहिन् *m.*; 'h.-hold stuff' गृहोपस्कारः, गृहसामग्री; 'h.-keeper' गृहावेक्षकः (-क्षिका *f.*); 'h.-keeping' गृहव्यापारः-कार्य-कर्मन् *n.* 'h.-maid' दासी गृहदासी-मार्जनी; 'h.-room' वासस्थानं, वेश्मन् *n.* 'h.-warming' गृहप्रवेशः; 'h.-wife' गृहिणी, गेहिनी, गृहकार्यकुशला-दक्षा, गृहमेधिनी; 'h.-wifery' गृहकार्यकुशलता-नैपुण्यं, गृहकर्मानुष्ठानं, परिमितव्ययः. **-less,** *a.* गृहहीन-शून्य, निरालय, अशरण, निराश्रय, निर्गृह.

Housing, *s.* परिस्तो(ष्टो)मः, सज्जा, कल्पना, कुथः, आस्तरः, प्रसाधनं.

Hovel, *s.* उटजः-जं, कुटीरः, कुटी, पर्णशाला, तृणकुटी.

Hover, *v. i.* परितः विसृप् 1 P or डी 1 A, आकाशे व्यावृत् 1 A or विसृप् or विचल् 1 P, परिभ्रम् 1, 4 P; 'h. about' मंडले चर् 1 P, (द्वीपस्योपरि मंडले चराति Mr. 3); मंडलाकारेण भ्रम्. 2 (fig.) विशंक् 1 A, विकल्प् 1 A, विचर् c. **-ing,** *s.* परिभ्रमणं, मंडलावृत्ति *f.*

How, *adv.* कथं, केन प्रकारेण-रूपेण. 2 कियत् (in 'how long, ' 'how far'); 'h. much' कियत्; 'h. many' कति (pl.); 'h. long' कियच्चिरं, कियंतं कालं; 'h. many kinds' कतिविधाः; 'h. many times' कतिकृत्वः; 'h. now' ननु, ननु भोः; 'h. far' कियद्दूरं, कियदवधि; 'h. much more-less' किमुत, किं पुनः, किमु; 'h. else' अथ किं; with *adj.* ex. by अहो; 'h. pleasing' अहो मधुरं; अहो पापं, &c.

Howdah, *s.* वरंडकः.

However, Howsoever, *adv.* यथातथा, येनकेन प्रकारेण; (with *adj.*) by अपि, or by नाम with imp. of verb; 'h. industrious a man may be' दीर्घव्यवसायोपि नरः, करोतु नाम व्यवसायं नरः (H. 2). *-conj.* (Howbeit) किंतु, अपि तु, तु, परंतु, तथापि, पुनः.

Howl, *v. i.* आक्रंद् 1 P, उत्क्रुश् 1 P, उच्चैः रस्-रट् 1 P, गर्ज् 1 P, दीर्घं वि-रु 2 P, रै 1 P. **-s., -ing,** *s.* उत्क्रोशः- शनं, आक्रंदनं, दीर्घरुतं, आरटनं, र(रा)वः, दीर्घरवः, गर्जनं, रसितं; 'h. of dogs' भषणं, बुक्कनं, रायणं.

Hub, *s.* नाभि *f.* 2 स्तरुः. 3 लक्ष्यं, शरव्यं.

Hubbub, *s.* कोलाहलः, कलकलः; तुमुलं, तुमुलरवः- नादः, संकीर्णनादः.

Hucklebone, *s.* श्रोण्यस्थि *n.*

Huckster, *s.* क्षुद्रपण्यविक्रायिन्-विक्रेतृ *m.* *-v. i.* क्षुद्रपण्यानि वि-क्री 9 A.

Huddle, *v. t.* पिंडीकृ 8 U, सं-कॄ 6 P, संमिश्र् 10, संकुलीकृ, संपिंडयति (D.). 2 संक्षुभ् c.; ससंभ्रमं वि-धा 3 U or कृ. *-v. i.* संकुलीभू 1 P, संमिश्री-संकरी-भू, संकॄ pass., पिंडीभू. *-s.* संकुलं, संकरः, संक्षोभः, संकीर्णता.

Hue, *s.* रागः, रंगः, वर्णः, छाया, छवि *f.* 2 आक्रोशः; 'h. and cry' कलकलः, कोलाहलः, जनरवः, संहूति *f.*

Huff, *v. t.* विस्तृ c., श्वि c., वृध् c., 2 सदर्पं निर्भर्त्स् or तर्ज् 10 A. *-v. i.* श्वि 1 P, स्फाय् 1 A, वृध् 1 A. 2 दृप् 4 P, विकत्थ् 1 A, प्रगल्भ् 1 A. *-s.* कोपः, रोषः, संरंभः; *See* **Anger.** 2 दर्पः, औद्धत्यं, निर्भर्त्सनं. 3 उद्धतः, दर्पाध्मातः, दांभिकः, विकत्थनः. **-er,** *s.* दांभिकः, शूरंमन्यः, विकत्थनः. **-ish.** *a.* **Angry, Arrogant,** *q. v.*

Hug, *v. t.* आलिंग् 1 P, आ-सं-श्लिष् 4 P, परिष्वंज् 1 A, बाहुभ्यां पीड् 10. *See* **Clasp.** *-s.* आश्लेषः, परिष्वंगः, आलिंगनं, उपगूहनं.

Huge, *a.* महत्, बृहत्, स्थूल, विशाल, विपुल, गुरु, बृहत्परिमाण, अतिमहत्-बृहत्. 2 (In body) स्थूल-काय-देह, बृहच्छरीर, महाकाय, विपुलांग (गी *f.*). **-ly,** *adv.* अतिमहत्, अत्यंतं, अतिमात्रं. **-ness,** *s.* अतिबृहत्त्वं, स्थूलता, विशालता.

Hulk, *s.* जीर्णनौका.

Hull, *s.* (पोतस्य) स्थूलभागः. 2 पुटः-टं, कोशः-षः, त्वच् *f.*, आवेष्टनं, तुषः (of grain).

Hum, *v. i.* गुंज् 1 P, वि-,रु 2 P, हुंकृ 8 U, अस्पष्टं निस्वन् 1 P or स्वन् 1 P. **-s., -ming,** *s.* गुंजनं, गुंजितं, कलरवः-स्वरः, वि-, -रुतं-रावः, झंकारः, हुंकारः, हुंकृतं, अस्पष्टध्वनिः-निस्वनः-नादः, कलकलः.

Human, *a.* मानुष (षी *f.*), पौरुषेय (यी *f.*), मनुष्यजातीय, मानवीय-न, gen. ex. by मनुष्य or नर in comp.: 'in h. accents' मनुष्यवाचा; 'uttered h. accents' मानुषीं गिरमुदीरयामास; 'h. nature' मानुष्यकं, पुरुषत्वं, नरस्वभावः; 'h. form' मानुषी तनुः, नररूपं; 'a h. brute' नरपशुः; 'h. kind' मनुष्य-नृ-जाति *f.*, मनुष्यवर्गः. **-ize,** *v. t.* वि-नी 1 P, शिष्टाचारं-सभ्यरीतिं शिक्ष् c. or शास् 2 P. **-ly,** *adv.* नरवत्, मानुषप्रकारेण. **-Humane,** *a.* दयालु, कृपालु, सदय, परहितकाम, परोपकारशील, अनुकंपिन्, करुणा-दया-शील, दयावत्, करुणार्द्र, दयार्द्र, परहितैषिन्, आपन्न-दीन-अनुकंपिन्; *See* **Kind.** **-ity,** *s.* दया, करुणा, कृपा, दयालुता, आपन्नानुकंपा, दीनवात्सल्यं, दयाशीलता, परहितेच्छा. 2 मानुष्यं-ष्यकं, मनुष्यता, मानुषता, मानवत्वं. 3 मनुष्याः, मनुष्यवर्गः-जातिः. **-ly,** *adv.* सदयं, सकरुणं, परहितेच्छया, सानुकंपं.

Humble, *a.* नीच, अपकृष्ट, अधम. 2 क्षुद्र, अल्पमति. 3 (In good sense) नम्र, विनीत, निरभिमान, विनत, सविनय, निरहंकार, अनुद्धत, दर्प-गर्व-अभिमान-हीन or रहित, नम्रचेतस्, विनयिन्, विनयशील-वृत्ति. 4 निःस्व, दरिद्र, दीन, दुर्गत, निर्धन, आपन्न; 'in h. days' आपत्समये, दरिद्रावस्थायां, आपदि; 'the friends of h. days' आपत्कालीनमित्राणि; 'to eat h. pie' मानं पृष्ठे कृ 8 U. *-v. t.* अव-नम् c. (नमयति), प्रह्वयति (D.), (सपदि विनयः प्रह्वयति मां U. 6); अभिपरा-भू 1 P, दर्प-गर्व-भंज् 7 P or हृ 1 P, नि-अव-पत् c., अप-कृष् 1 P, नम्रीकृ; 'thus completely h. ing the kings' इति राज्ञां

शिरसि वामपादमाधाय (R. vii. 70); 'h.-bee' भ्रमरः; *See* **Bee.** **-ed,** *a.* अभिभूत, भग्नदर्प, आत्त-गर्व-गंध, हृतगर्व; आनत, नम्रीकृत, पातित, अपकृष्ट. **-ing,** *s.* दर्प-मान-भंगः, अभिभवः. **-ness,** *s.* नीचता, अपकृष्टता, क्षुद्रता. 2 विनयः, नम्रता, अनहंकारः, अनभिमानः, अगर्वः, निरभिमानता, नम्रशीलता. **-Humbly,** *adv.* नीचैः, क्षुद्रतया, कृपणं. 2 सविनयं, नम्रतया, नम्रं, निरभिमानं, गर्वं विना, अनुद्धतं, नम्रचेतसा.

Humbug, *v. t.* प्रतॄ c., वंच् 10; *See* **Cheat.** **-s.** प्रतारणं-णा, वंचना, कपटः-टं, छलं.

Humdrum, *a.* विरस, जड, मंद, फल्गु. **-s.** मूढः, स्थूलधीः.

Humerus, *s.* प्रगंडः.

Humid, *a.* आर्द्र, क्लिन्न, उन्न, सरस, तिमित. **-ity.** *s.* आर्द्रता, क्लेदः, तेमः, सरसता.

Humiliate, *v. t.* गर्वं हृ 1 P or भंज् 7 P, अभिभू 1 P, अपकृष् 1 P; *See* **Humble.** **-ing,** *a.* दर्प-मान-हर. **-ion,** *s.* गर्व-दर्प-भंगः, अवमानना, मानभंगः-हानि *f.*, अभिभवः, अपकर्षः; दमनं; नियमनं.

Humility, *s.* विनयः, शालीनता, अगर्वः, अदर्पः, नम्रता, अनभिमानः, अनहंकारः, अनौद्धत्यं.

Humour, *s.* भावः, वृत्ति *f.*, मनोवृत्तिः, स्वभावः, शीलः-लं, प्रकृति *f.*; 'good h.' सद्भावः, सुशीलता, सौजन्यं; 'bad h.' वक्रभावः, दुःशीलं; 'joyous h.' आनंदवृत्तिः. 2 छंदः, छंदस् *n.*, मनोलौल्यं, बुद्धिचापल्यं, लहरी, चित्ततरंगः, चापलं. 3 क्लेदः, तेमः, आर्द्रता; स्नेहः, जलावसेकः. 4 रसः, जलं, धातुः (of the body); 'disorder of the three h. s' दोषत्रयं, त्रिदोषं. 5 वैदग्ध्यं, रसिकता, रसः, सारस्यं, वैचित्र्यं. **-***v. t.* (a person) चित्तवृत्तिं अनुवृत् 1 A, (अहं तावत्स्वामिनश्चित्तवृत्तिमनुवर्तिष्ये Ś. 2), छंदेन or छंदः (दं) अनुवृत्, भावं अनुरुध् 4 A or अनुप्र-विश् 6 P; (inclinations) अनुवृत्, अनुरुध्, अनुप्र-विश्. 2 अनुरंज् c., संतुष् c., आराध् c., प्र-सद् c., भज् 1 U, उपलल् 10, उपच्छंद् 10. **-ing,** *s.* अनुवर्तनं, अनुरोधः, छंदोनुवृत्तिः, भावानुप्रवेशः. **-ist,** *s.* वैहासिकः, हासकरः, विदूषकः, भंडः, परिहासशीलः, नर्मसचिवः. 2 रसज्ञः. **-ous,** *a.* हासकर (री *f.*), परिहासवत्, विनोदिन्, सरस, रसवत्, रसिक, हास्य, परिहासशील; विनोदनशील; oft. by परिहास or नर्म in comp.; 'a h. speech' परिहासः. परिहासजल्पितं, नर्मालापः, नर्मभाषितं. **-ously,** *adv.* सरसं, विनोदार्थं, परिहासपूर्वं. **-some,** *a.* वक्रभाव-शील, दुःशील, दुष्प्रकृति. 2 चलचित्त लोलमति, चलप्रकृतिभाव; *See* **Fickle.**

Hump, *s.* ककुद् *f.*, ककुदः-दं (fig. also), अंसकूटः (of bulls); गडुः, स्थगुः; 'having a h.' ककुद्मत्, ककुद्मिन्; 'h.-backed' कुब्ज, गडुल-र, कुब्जक, वक्रपृष्ठ, न्युब्ज.

Hunch, *s.* गडुः. 2 पिंडः. **-***v. t.* अरत्निना तड् 10 or प्रहृ; 'h.-backed' **Hump-backed,** q. v.

Hundred, *a.* शतं; शतसंख्यक; 'by h. s' शतशः; 'in h. ways' शतधा; 'h.-fold' शतगुण *a.*; 'the life of man extends to h. years' शतायुर्वै पुरुषः. **-***s.* शतं. **-th,** *s.* शततम (मी *f.*).

Hunger, *s.* क्षुधा, क्षुध् *f.*, बुभुक्षा, जिघत्सा, अशनाया, अशनायितं; 'h.-starved' क्षुत्क्षाम, क्षुधावसन्न. **-***v. i.* क्षुध् 4 P, (with dat.), भुज् desid. (बुभुक्षति-ते). 2 **Long,** q. v. **-Hungry,** *a.* क्षुधित, क्षुधार्त, क्षुधार्दित, क्षुत्पीडित, क्षुधातुर, जिघत्सु, बुभुक्षु, क्षुधाव्याकुल, बुभुक्षित, अन्नार्थिन्, अशनायित; 'h. and thirsty' क्षुत्पिपासित. 2 अवसन्न, क्षीण, क्षाम, कृश.

Hunks, *s. See* **Miser.**

Hunt, *v.* मृग् 10 A, मृगयां कृ 8 U, (मृगयायां) अनुधाव् 1 P, अनुसृ 1 P, अनुवृत् 1 A, अनुबंध् 9 P. 2 अन्विष् 4 P, निरूप् 10. **-***s.*, **-ing,** *s.* मृगया, आखेटः, मृगव्यं, आच्छोदनं, पापर्द्धि *f.* 2 अनुसरणं, अन्वेषणं, मार्गणं, अनुधावनं; लाभेच्छा, लिप्सा; 'h.-dress' मृगयावेषः; 'h.-dog' विश्वकद्रुः, मृगयाकुक्कुरः. **-er, Huntsman,** *s.* व्याधः, लुब्धकः, मृगयुः, आखेटकः, मृगवधाजीवः; जीवांतकः; शाकुनिकः (of birds); वागुरिकः, जालिकः (with nets).

Hurdle, *s.* काष्ठावरणं.

Just, *a.* (Of persons) न्यायवर्तिन्, न्यायिन्, न्यायशील-पर, साधुवृत्ति, ऋजु, विमलात्मन्, निष्कपट, निर्व्याज, शुचि, न्यायपरायण, धार्मिक-सात्त्विक (की *f.*). 2 न्याय्य, धर्म्य, यथान्याय, न्यायानुसारिन्, सत्य, तथ्य, योग्य, युक्त, यथार्थ, उचित, सम्यच्. 3 सम, समवृत्ति, निःपक्षपात, समदर्शिन्. 4 संपूर्ण, अविकल, अन्यून. *-adv.* अंतिकं-के, समीपं, निकटे. 2 प्रायः, प्रायशः; oft. by भूयिष्ठ, कल्प, प्राय in comp., or by desid.: *See* **About.** 3 सद्यः, अचिरादेव, नातिचिरात्, प्राक्; oft. by एव, मात्र in comp.; 'j. now' अधुनैव; 'it is j. proper' उचितमेव; 'j. dead' सद्योमृत; 'j. born' जातमात्र. 4 युक्तं, सम्यक्, यथार्थं, यथावत्. 5 तावत् 'j. come here' इतस्तावदागम्यतां; 'j. so' एवमेव, तथैव, एवमेतत्, अथ किं, युक्तं, युज्यते; 'j. as' 'j. like' इव, यद्वत्, or निर्विशेष in comp.: 'stay j. as in your own house' स्वगृहनिर्विशेषमत्र वस; 'bred j. like one's own children' स्वपुत्रनिर्विशेषं संवर्धित. कष्टेन, कृच्छ्रेण. **-ly,** *adv.* निर्व्याजं, निर्व्यलीकं, सारल्येन. 2 यथान्यायं, न्यायेन, धर्मेण, न्यायतः, धर्मतः, यथाधर्मं, न्यायानुसारेण, सम्यक्, यथावत्. 3 सत्यं, अवितथं, यथार्थं, अर्थतः, यथावत्, यथातथं, यथार्हं, उपपन्नं, यथोचितं, युक्तं, स्थाने, यथायोग्यं, अंजसा. **-ness,** *s.* न्याय्यता, यथार्थता, योग्यता, औचित्यं, युक्तता; साम्यं, पक्षपातः. **-Justice,** *s.* धर्मः, न्यायः, नयः, नीति *f.*, न्यायिता, ऋजुता, साधुता. 2 न्याय्यता, युक्तता, योग्यता, यथार्थता, सत्यता, युक्ति *f.*, याथार्थ्यं. 3 साम्यं, समदर्शित्वं, अपक्षपातः, सर्वसमता. 4 न्यायदंडः, योग्य-दंडः-शिक्षा, अपराधानुरूपो दंडः. 5 धर्माध्यक्षः; प्राड्विवाकः; *See* **Judge**; 'court of j.' न्याय-धर्म-सभा, व्यवहारमंडपः. **-ship,** *s.* धर्माधिकारः, न्यायाध्यक्षत्वं. **-Justiciary,** *s.* **Judge,** q. v. **-Justify,** *v. t.* न्याय्य -*a.* इति प्रति-पद् c. or प्रदृश् c.; शुध् c. दोषं निराकृ 8 U or निवृ 10 or शुध् c. or मृज् 2 P, दोषाद् मुच् 6 P or c. **-able,** *a.* निवार्यदोष, शोधनीय, शुद्धिक्षम. **-ication,** *s.* शुद्धि *f.*, शोधनं, दोषशुद्धिः, दोषमुक्ति *f.* -मार्जना, दोषप्रतीकारः, विमोचनहेतुः, अपव्यपदेशः. **-er,** *s.* शोधकः, दोषनिवारकः.

Justle, *v. See* **Jostle.**

Jut, *v. i.* प्रलंब् 1 A, बहिर्वृत् 1 A or स्था 1 P. *-s.* प्रलंबनं, आभोगः, प्रालंबः.

Jute, *s.* शणं.

Juvanescent, *a.* तरुणीभवत्.

Juvenile, *a.* तरुण, अल्पवयस्क, युवन्, कौमार (री *f.*), अभिनववयस्. **-ity,** *s.* यौवनं, तारुण्यं, कौमारं, यौवनावस्था, तारुण्यभावः.

Juxtapose, *v. t.* संनि-धा c. **-ition,** *s.* सान्निध्यं, संनिधिः, संस्थिति *f.*, सन्निकर्षः, संसर्गः, नैकट्यं, उपश्लेषः.

K.

Kaw, *v. i.* कै 1 P, ध्वांक्ष् 1 P. *-s.* काकरवः, रुतं.

Keel, *s.* नौतलं.

Keen, *a.* तीक्ष्ण, शित, निशित, शात, निशात, शितधार, तीक्ष्णाग्र; तीव्र, तिग्म, प्रखर. 2 व्यग्र, उच्चंड, उत्सुक, उत्कट, कुतूहलिन्; *See* **Eager.** 3 सूक्ष्म, कुशाग्र-ग्रीय, विदग्ध. 4 उग्र, कटु, अरुंतुद, मर्मस्पृश्, तिग्म (words): 'k. words' वागिषुः, वागग्निः; 'k.-eyed' 'k.-sighted' सूक्ष्ममति, तीक्ष्ण-सूक्ष्म-बुद्धि, कुशाग्रमति-बुद्धि, दूरदर्शिन्. **-ly,** *adv.* तीक्ष्णं, तीव्रं, उग्रं, प्रखरतया. **-ness,** *s.* तीक्ष्णता, तीव्रता. 2 व्यग्रता, उच्चंडता, कौतूहलं, अत्युत्साहः. 3 सूक्ष्मता, विदग्धता, कुशाग्रमतित्वं, बुद्धिसूक्ष्मता. 4 कटुता, तिग्मता, उग्रता.

Keep, *v. t.* रक्ष् 1 P, पा 2 P, पा c. (पालयति), गुप् 1 P, त्रै 1 A, अव् 1 P. 2 धृ 1 P, 10; धा 3 U. नि-आ-°, निविश् c., स्था c. (स्थापयति), न्यस् 4 U. 3 रुध् 7 U,

नि-अव-उप-°, धृ, बंध् 9 P, निवार् 10, प्रति-निषिध् 1 P, नि-सं-यम् 1 P. 4 (As cattle) निरुप् 10, पा c., रक्ष्. 5 (As a secret) न प्रकाश् c. or भंज् 7 P, or भिद् 7 P गुप्, रक्ष्. 6 (Observe) आचर् 1 P, अनु-ष्ठा 1 P, वि-धा, कृ, सेव् 1 A, भज् 1 U, आश्रि 1 U, आ-स्था 1 U, आ-अव-लंब् 1 A. 7 शुभ् c., निर्वह् c., अप-वृज् 10, पूर् 10, तृ 1 P, साध् 5 P or c., पा c. (पालयति) (as a promise). 8 भृ 1 P, 3 U, पुष् c., पा c.; (as servants) व्यापृ c., सेवायां नियुज् 7 A, 10, वेतनं-भृतिं दा 3 U; ' to k. bad hours ' वेलातिक्रमेण स्वप् 2 P; 'to k. in mind हृदये-मनसि कृ, अव-धृ; 'k. company with' संगम् 1 A, सं-इ 2 P, सह वस् or चर् 1 P, संवस्; *See* **Associate.** **–***v. i.* स्था, वृत् 1 A, आस् 2 A, न विरम् 1 P or निवृत or विश्रम् 4 P, with pres. part. (when followed by p. p. &c.); 'he kept weeping ' रुदन्नास्त, रुदन्नोपरराम; ' k going up and down ' आरोहावरोहं कुर्वन्नास्त. 2 संसंज्-संश्लिष्-अनुबंध्- pass., लग् 1 P. 3 वस् 1 P. **–***s.* रक्षा-क्षणं, पालनं, गुप्ति *f.* 2 अवस्था, दशा, स्थिति *f.*, वृत्ति *f.*, भावः. 3 भृति *f.*, पोषणं. 4 दुर्गं, कोटः. 5 कारावंधनं, निरोधः, गुप्तिः. **–back, –from,** निग्रह् 9 P, संयम्, संहृ 1 P, निवृ c.; (*v. i.*) निवृत्, विरम्. **–in,** गुह् 1 U, आच्छद् 10, अंतर्धा, संवृ 5 U. **–off,** निवार्, निवृत् c., निरुध्, प्रति-वि-हन् 2 P, प्रतिकृ, व्यप-ऊह् 1 U, परिहृ 1 P; (*v. i.*) निवृत्, विरम्; *See* **Cease. –on,** *See* **Keep** (*v. i.*) above: प्रवृत्, प्रारब्धं सं-पद् c. **–out,** व्यावृत् c., प्रतिषिध्; *See* **Exclude. –to,** अनुवृत्, अनुष्ठा 1 P, अनुरुध् 4 A, परिरक्ष्, परिपा c. (पालयति); *See* **Keep** (*v. t.*) above. **–under,** वशीकृ, वशं नी 1 P, स्वायत्तीकृ. **–up,** प्रवृत् c., पा c.; (*v. i.*) जागृ 2 P; न दम् or श्रम् 4 P. **–er,** *s.* रक्षकः, पालकः, रक्षितृ *m.*, रक्षिन् *m.*, गोप्तृ *m.*, पः-पालः in comp. **–ing,** *s.* रक्षा, अवेक्षा, पालनं, गुप्तिः. 2 सादृश्यं, अविरोधः, संगति *f.*, आनुरूप्यं; ' in k. with' अनुरूप-संवादिन्-सदृश-योग्य-*a.*

Keep-sake, *s.* स्मृतिदानं; स्नेहाभिज्ञानं.

Keg, *s.* काष्टभांडं.

Kelter, *s. See* **Order.**

Ken, *s.* गोचरः-रं, विषयः; नयनविषयः-पथः, बुद्धिविषयः. **–***v. t.* दूरादालोक् 1 A, 10 or ईक्ष् 1 A or दृश् 1 P. 2 परि-ज्ञा 9 U. अवगम् 1 P.

Kennel, *s.* श्वशाला, श्वगृहं, कुक्करालयः. 2 श्वगणः. 3 जलमार्गः, प्रणालः-ली. **–***v. i.* श्वगृहे वस् 1 P.

Kerchief, *s.* आवरणं, वेष्टनं, आभरणं, 'band-k.' हस्तप्रधारकः, नक्तकः; 'neck-k.' ग्रीवावेष्टनं, कंठवस्त्रं.

Kernel, *s.* बीजं, गर्भः, अस्थि *f.*, अष्ठीला, फलबीजं-गर्भः, सारभूतं द्रव्यं. 2 मध्यः-ध्यं, गर्भः, उदरं, हृदयं, अभ्यंतरं. **–ly,** *a.* बीजाकार, बीजपूर्ण.

Kestrel, *s. See* **Castrel.**

Kettle, *s.* कटाहः, पिठरः-रं, स्थाली, उखा, कुंडं; ' k.-drum ' भेरि-री *f*, दुंदुभिः, डिंडिमः.

Key, *s.* अंकुटः, कुंचिका, ताली, उद्घाटकः-कं. 2 व्याख्या, निर्वचनं, टीका; ' k.-hole ' कुंचिकाछिद्रं; ' k.-stone ' संधान-संयोग-प्रस्तरः.

Kibe, *s.* पादस्फोटः, विपादिका.

Kick, *v. t.* पादेन-लत्तया-प्रहृ 1 P or तड् 10 or आ-हन् 2 U, लत्ताप्रहारं कृ 8 U; पादं-पार्ष्णिं-खुरं-क्षिप् 6 P. **–***s.* पाद-लत्ता-प्रहारः, पादाघातः, पार्ष्णि-खुर-क्षेपः, खुराघातः.

Kid, *s.* छागशावः-शावकः, अजशिशुः, अजपोतः, छागशिशुः. 2 काष्टभारः.

Kidnap, *v. t.* (बालकं-दासं) चुर् 10, अपहृ 1 P, or बलाद् हृ. **–per,** *s.* बालस्तेयकृत् *m.* **–ping,** *s.* बालस्तेयं, बालापहारः.

Kidney, *s.* वृक्कः-क्का, गुर्दः; 'k.-bean ' मुद्गः, माषः, शिंबा, शिंबिकः-का.

Kill, *v. t.* हन् 2 P, व्यापद् c., मृ c., सूद् 10, निषूद्, नश् c., प्र-मी 9 U or c. (मापयति), हिंस् 7 P, तृह् 6, 7 P, वि-शस् 1 P, पंचत्वं-परलोकं गम् c. (गमयति) or नी 1 P; शद् c. (शातयति), निबर्ह् c., नि-कृत् 6 P, अप-नी, क्षि 5 P or c. **–er,** *s.* हंतृ *m.*, घातकः, नाशकः, निषूदनः, अंतकः; gen. हन् or घातिन् in comp.: 'k. of Vritra' वृत्रहन्; 'k. of Madhu ' मधुसूदनः. **–ing** *s.* हत्या, वधः, हननं, घातः, मारणं, नाशः, निषूदनं, हिंसा-सनं. आलंभः, विशसनं, व्यापादनं, प्रमापणं, निबर्हणं. निकारणं, विशारणं, प्रवासनं, परासनं. संज्ञपनं, निर्ग्रंथनं, निस्तर्हणं, क्षणनं, परिवर्जनं, निर्वापणं, प्रमथनं, क्रथनं, उज्जासनं, पिंजः, विशरः, उन्माथः.

Kiln, *s.* पाकपुटी, आपाकः.

Kimbo, *a.* वि-अव-भुग्न, वक्र, कुटिल.

Kin, *See* **Kindred;** ' of k. ' सजातीय, सगोत्र. 'Kith and k. आप्ताः (pl.)

Kind, *a.* दयालु, सदय, कृपाकुल, कृपालु. अनुकंपिन्, सानुकंप, सकरुण, करुणात्मन्. दया-करुणा-शील, करुणार्द्र, दयार्द्र, स्निग्ध. कृपा-दया-घृणा-वत्, कारुणिक (की *f.*); प्रियकर (री *f.*), हित, प्रियैषिन्, हितैषिन्, हितकाम, हितबुद्धि, उपकार-पर-शील, उपकारिन्, सुहृदय, अनुकूल, सुशील, प्रसन्न, प्रीत. 2 मधुर, प्रिय; ' k. to the poor ' दीनानुकंपिन्, दीनवत्सल; ' k. office ' उपकारः; ' k. act'

सुकृतं; 'k. words' प्रियवचनं; 'speaking k. words' प्रियंवद, प्रियवादिन्; 'k. present' प्रीतिदानं. -*s*. जाति *f*., गणः, वर्गः. 2 विशेषः, भेदः, प्रकारः, जातिः, रूपं, विधा, in comp.; 'of many k.s' बहुविध; 'of various k.s' विविध, नानारूपविध, नाना *ind*.; 'of this k.' एवंविध, एवंरूप; 'of all k.s' सर्वप्रकार; 'Jāti is a k. of flower' जातिः कुसुमविशेषः-भेदः. **-ly**, *a*. सौम्य, मृदु, कोमल, स्निग्ध, प्रिय. 2 अनुकूल; समानशील. -*adv*. सदयं, सकरुणं, दयया, कृपया, प्रीत्या, सस्नेहं, सानुकंपं, सानुग्रहं; प्रियं, हितेच्छया, सुशीलवत्, सुजनवत्; 'speaking k.' प्रियवादिन्; 'k. disposed' हितबुद्धि, अनुरक्त. **-ness**, *s*. प्रसादः, अनुग्रहः, कृपा, दया, अनुकंपा, करुणा, प्रीति *f*., स्नेहः, कृपालुता, दयालुता, हितेच्छा, कृपाशीलता, सुशीलं, सौजन्यं, प्रेमन् *m. n*., आनुकूल्यं. 2 उपकारः, उपकृतं-ति *f*., प्रियं, सुकृतं-तिः, हितं. **-Kindliness**, *s*. सौम्यता, स्निग्धता; सौजन्यं, सुशीलता.

Kindle, *v. t*. प्र-उत्-सं-दीप् c., इंध् 7 A, ज्वल् c., तप् 1 P or c. 2 उत्तिज् c., संधुक्ष् 10, प्रोत्सह् c.; प्रकुप् c., रुष् c.; 'with glances k.ed with anger' क्रोधेद्धैर्दृष्टिपातैः (Rat. 1). -*v. i*. ज्वल् 1 P, दीप् 4 A, तप् 4 A.

Kindred, *a*. सजातीय, सगोत्र, सनाभि, सवर्ण, सवंशीय, सकुल्य, संबंधीय. 2 समान, समतुल्य-गुण, सधर्मन्, अनुगुण. -*s*. बंधुता, ज्ञातित्वं, ज्ञातिभावः, सगोत्रता, सजातित्वं, संबंधः, सपिंडता. 2 (Relatives) बंधवः ज्ञातयः, बांधवाः, सगोत्राः, सकुल्याः, गोत्रजाः, संबंधिनः (pl.); बंधुजनः, बंधु-ज्ञाति-वर्गः, बंधुबांधव-गणः.

Kine, *s*. pl. of **Cow**, q. v.

Kinematics, *s*. गतिशास्त्रं.

King, *s*. राजन् *m*., नृपः, नरपतिः, नृपतिः, भूपतिः, भूपः, भूपालः, नरेंद्रः; and comp. of ईशः, अधीशः, पतिः, इंद्रः, पः, पालः, भृत् or भुज् with 'Man' and 'Earth,' q. v. अवनिपः, क्षोणीपालः, भूभृत्, महीभुक्, क्षितिपतिः; 'supreme or great k.' महाराजः, अधिराजः, सम्राज्, अधीश्वरः, मंडलेश्वरः; 'k. of k.s' राजराजः, राजाधिराजः, सार्वभौमः, चक्रवर्तिन् *m*. 'k. of beasts' मृगेंद्रः, मृगाधिपः, पशुपतिः; 'k.-craft' राजनीति *f*., -नयः, राज्यचातुर्यं; 'k.'s-evil' गंडमाला. **-dom**, *s*. राज्यं, राष्ट्रं, विषयः. 2 आधिपत्यं, ऐश्वर्यं, प्रभुत्वं, स्वामित्वं. 3 जाति *f*., वर्गः, गणः; 'animal k.' प्राणिवर्गः-जातिः. **-less**, *a*. अराजक, अनायक, राज-नृप-हीन. **-like**, **-ly**, *a*. राजकीय. 2 राजानुरूप, राजयोग्य, राजार्ह, राजसदृश (शी *f*.), नृपोचित, राज in comp. **-ship**, *s*. राजत्वं, प्रभुत्वं, ऐश्वर्यं, आधिपत्यं, नृपत्वं, राजपदं, राजाधिकारः.

Kinsfolk, *See* **Kindred** (*s*.).

Kinsman, *s*. बंधुः, बांधवः, ज्ञातिः, सकुल्यः, सजातिः-तीयः, सगोत्रः, सनाभिः, गोत्रजः, बंधुजनः.

Kirk, *s*. *See* **Church**.

Kismet, *s*. *See* **Fate**.

Kiss, *v. t*. चुंब् 1 P, निंस् 2 A; 'k. the lip' अधरं पा 1 P, अधररसं पा; 'k. on the head' शिरसि आ-समा-उपा-घ्रा 1 P. -*s*. चुंबनं, चुंबितं, अधरपानं. **-er**, *s*. चुंबकः.

Kit, *s*. उपकरणसमुदायः, उपस्करः, उपकरणसामग्री, संभारः. 2 महाकुपी. 3 लघुसारंगी.

Kitchen, *s*. महानसं, रसवती, सूदशाला, पाकशाला-स्थान-गृहं; 'k. garden' शाकशाकिनं, शाकशाकटं, शाकवाटिका; 'k.-maid' पाकचेटी; 'k.-work' पाककार्यं, पाकनिष्पत्ति *f*.; 'superintendent of the k.' पौरोगवः.

Kite, *s*. चिल्लः-ल्ला, आतापि(यि)न् *m*. 2 चिल्लाभासः, चिल्लासदृशं क्रीडनकं.

Kitten, *s*. मार्जारशावः-वत्सः-शिशुः.

Kittle, *a*. संशयस्थ, संदिग्ध. -*v. t*. कुतकूतयति (D.).

Kleptomania, *s*. चौर्यरुचि *f*.

Knab, *v. t*. दंश् 1 P, दंतैः ग्रह् 9 U or धृ 1 P.

Knack, *s*. कौशलं, चातुर्यं, वैदग्ध्यं, पाटवं; हस्त-कौशलं-लाघवं; *See* **Skill**. 2 क्रीडनकं, क्रीडावस्तु-द्रव्यं.

Knag, *s*. ग्रंथिः, पर्वन् *n*. 2 **Peg**, q. v. **-ged**, **-gy**, *a*. ग्रंथिल, पर्ववत्.

Knap, *s*. **Knob**, q. v. 2 उन्नतभूभागः, उत्सेधः. -*v. i*. **Snap**, q. v.

Knar, Knarl, *s*. काष्ठग्रंथि *f*.

Knave, *s*. धूर्तः, कितवः, जाल्मः, वंचकः, शठः, प्रतारकः, कूटकारः, दांभिकः. **-ish**, *a*. धूर्त, कितव, शठ, जाल्म, वंचक, प्रतारक, धूर्तशील, कपटिन्. **-ishly**, *adv*. सकपटं, सव्याजं, शठवत्, धूर्ततया. **-ishness**, **ry**, *s*. धूर्तता, शाठ्यं, कैतवं, माया, व्याजः, छलं, कपटं.

Knead, *v. t*. (कराभ्यां) मृद् 9 P or c., संपीड् 10, चूर्ण् 10, पिष् 7 P. **-ing**, *s*. मर्दनं, पीडनं; 'k.-trough' द्रोणि-णी *f*.

Knee, *s*. जानु *n*., ऊरुपर्वन् *n*., अष्ठीवत् *m. n*., ऊरुसंधिः; 'go or fall on the k.s' जानुभ्यां (अवनौ) गम् or पत् 1 P; 'k.-deep' जानुदघ्न (घ्नी *f*.), -द्वयस (सी *f*.), -मात्र (त्री *f*.); 'k.-pan' जानुफलकं.

Kneel, *v. i*. जानुभ्यां (अवनौ) गम् or पत् 1 P or नम् 1 P, (क्षितितले) जानुनी निधा 3 U or न्यस् 4 U or निविश् c. or नम् c.

Knell, *s*. प्रेतघंटा.

Knick-knack, *s*. क्रीडनकं, क्रीडाद्रव्यं-वस्तु.

Knife, *s.* कर्तरिका, छुरिका, छुरी, कृपाणी, कृपाणिका, असिपुत्री-पुत्रिका, शस्त्री, असिधेनुः-नुका.

Knight, *s.* सादिन् *m.*, योधः, भटः.

Knit, *v. t.* सं-,ग्रंथ् 9 P, सिव् 4 P, निषिव्. 2 संबंध् 9 P, सयुज् 7 U, 10, संश्लिष् c., व्यतिषंज् 1 P, संहन् 2 P; व्यतिषजति पदार्थान् (Mal. 1) 'k. s objects together'; 'k. the eyebrows' भ्रुकुटिं बंध्, भ्रुवौ संकुच् 1 P or भिद् 7 P; *See* **Frown.** **–***a.* ग्रथित, स्यूत, संश्लिष्ट, व्यतिषक्त; 'well-k.' संहत, सुसंहत, दृढसंधि. **-ting,** *s.* सूत्रश्लेषः-ग्रथनं; 'k.-needle' दीर्घसूचि-ची *f.*

Knob, *s.* पिंडः, गंडः; ग्रंथिः, पर्वन् *n.*, संधिः (in wood). **-bed, -by,** *a.* सपिंड, पिंडिन्, ग्रंथिल, सगंड.

Knock, *v. t.* समा-आ-हन् 2 U, तड् 10, प्रहृ 1 P; 'k. on the head' मस्तकं तड्, मस्तकाघातेन व्यापद् c.; (fig.) मोघीकृ 8 U, विफलीकृ, भंज् 7 P. **–***v. i.* द्वारं तड् or प्रहृ. **–***s.* आघातः, अभिघातः, प्रहारः, ताडनं, पातः, हति *f.*; 'k. with a stick' वेत्राघातः; 'k. with the fist' मुष्टिघातः- प्रहारः. **–against,** अभि-प्रति-आ-हन्, संघट्ट् 1 A, अभिसं-पत् 1 P; 'k. ed her head against a rock' दृषदं शीर्षेण आजघ्ने. **–down,** नि-अव-पत् c., आघातेन-प्रहारेण-निपत् c. or भ्रंश् c. **–off,** सत्वरं-लघु-संपद् c. or साध् 5 P. 2 विरम् 1 P, निवृत् 1 A. **–out,** प्रहारेण निर्गम् c. (गमयति) or निः-सृ c. or बहिष्कृ 8 U; 'k. out the brains' मस्तिष्कं निष्पिष् 7 P. **–up,** खिद् c., आयस् c., अवसद् c., श्रम् c. or क्लम् c. (श्र-क्ल-मयति); (*v. i.*) श्रम् 4 P, क्लम् 1, 4 P, खिद् pass., अवसद् 1 P, ग्लै-म्लै 1 P; 'k. ed up by the journey' अध्वसंजातखेदः, नितांतं परिश्रांतः. **–er,** *s.* प्रहर्तृ *m.*, ताडयितृ *m.* 2 द्वारमुद्गरः, द्वारताडनी.

Knoll, *v. i.* घंटां वद् c. or तड् 10. **–***s.* क्षुद्रपर्वतः, उन्नतभूभागः, वप्रः-प्रं.

Knot, *s.* ग्रंथिः, बंधनं, ग्रंथिका, बंधः, गंडः; (of garments) नीवि- वी *f.*; (in wood) पर्वन् *n.*, संधिः. 2 संधिः, संयोगः, संश्लेषः, संबंधः. 3 मंडलं, समूहः, गणः, वर्गः, संघः, चक्रं:, निवहः. 4 (Of trees) षंडः, गुच्छः, स्तबकः, गुल्मः-ल्मं, स्तंबः, कांडः. **–***v. t.* ग्रंथिं बंध् 9 P, ग्रंथ् 9 P, संश्लिष् c., 'k. ed hair' वेणी; 'k. ed wound' रूढग्रंथिः व्रणः (U. 2). **–ted, –ty,** *a.* ग्रंथिल, ग्रंथिमत्, पर्व-संधि-मय (यी *f.*), पर्ववत्. 2 विषम, गूढ, दुर्ज्ञेय, दुर्बोध, गहन, गूढार्थ; 'k. point' ग्रंथिः, विषमपदं.

Know, *v. t.* ज्ञा 9 U, विद् 2 P, बुध् 1 P, अवगम् 1 P, अव-इ 2 P, अभि-ज्ञा, परिचित-*a.* भू 1 P. 2 अनु-भू, वि-भू c., उपलभ् 1 A, ग्रह् 9 U; 'how should a dependent k. of sincere happiness (pleasure)' परायत्तः प्रीतेः कथमिव रसं वेत्तु पुरुषः (Mu. 3). **–er,** *s.* ज्ञातृ *m.*, ज्ञानिन् *m.*, वेत्तृ *m.* ज्ञः-अभिज्ञः in comp. **–ing,** *a.* विज्ञ, ज्ञानिन्; gen. ex. by विद्, ज्ञ or अभिज्ञ in comp.; 'k. Dharma' धर्मविद्, धर्मज्ञः. **–ingly,** *adv.* ज्ञानपूर्वं, कामतः, बोध-मति-बुद्धि-पूर्वं, जानत्-*a.* with अपि. **–ledge,** *s.* (Act) ज्ञानं, परि-वि-ज्ञानं, बोधः-धनं, वेदनं, अवगमः, उपलंभः, उपलब्धि *f.* 2 (Learning) ज्ञानं, विद्या, विद्वत्ता, पांडित्यं, व्युत्पन्नता, वैदुष्यं. 3 अभिज्ञानं, परिचयः; 'spiritual k.' आत्मज्ञानं-विद्या, परमार्थज्ञानं, अध्यात्मविद्या, परमार्थः, ब्रह्मविद्या, परमार्थबोधः; 'acquiring k.' विद्यार्जनं, विद्यागमः, ज्ञानप्राप्ति *f.*; 'eager after k.' ज्ञानेच्छु, जिज्ञासु; 'thirst after k.' जिज्ञासा, ज्ञानलिप्सा, ज्ञानेच्छा; 'according to one's k.' यथाज्ञानं; 'for the right k. of words and their meaning' वागर्थप्रतिपत्तये (R. I. 1); 'without the k. of' अविज्ञाप्य, अनिवेद्य, अगोचरं-रेण, परोक्षं क्षे; 'with the k. of' गोचरं-रेण, प्रत्यक्षं, साक्षात्, समक्षं; 'to come to the k. of' श्रुति-कर्ण-पथं या-इ-2 P or गम् 1 P; 'k. is power' बुद्धिर्यस्य बलं तस्य (P. I. 8). **–Known,** *a.* ज्ञात, विदित, अवगत, बोधित, उपलब्ध, अनुभूत, विभावित. 2 ख्यात, विश्रुत, प्रसिद्ध, वि-प्र-ख्यात, विज्ञात; 'to make k.' वि-ज्ञा c. (ज्ञापयति), नि-आ-विद् c., बुध् c., 'to become k.' ज्ञा-प्रति-इ pass.; 'be it k. to your honor' एवमत्रभवंतो विदांकुर्वंतु; 'be it k.' ज्ञातं-विदितं-अस्तु; 'became k. by that name' तदाख्यया (भुवि) पप्रथे (R. xv. 101), तदाख्यां जगाम.

Knuckle, *s.* अंगुलिपर्वन् *n.*-संधिः-ग्रंथिः- पर्व; संधिः, ग्रंथिः. **–***v. i.* वशीभू 1 P, वशं गम् 1 P or इ-या-2 P. **–ed,** *a.* संधि-पर्व-विशिष्ट, ग्रंथिल.

Knurl, *s.* ग्रंथिः, गंडः. **–ed,** *a.* ग्रंथिल.

Kosmos, *s.* विश्वं, जगत् *n.*

L.

Label, *s.* पत्रं, अंकपत्रं, पंजिकं, लेपपत्रं. -*v. t.* लेपपत्रं आसंज् c. or अनुबंध् 9 P.

Labial, *a.* ओष्ठ्य.

Labio-dental, *a.* दंतो(तौ)ष्ठ्य.

Labor (Labour), *s.* श्रमः, परिश्रमः, प्र-आ-यासः, क्लेशः, कष्टं, दुःखं 2 उद्यमः, उ-द्योगः, व्यापारः, व्यवसायः, चेष्टा, प्र-,यत्नः, उत्साहः. 3 प्रसूतिकालः-समयः, प्रसवकालः, प्रसवावस्था; 'pain of l.' प्रसूति-प्रसव-वेदना-यातना-व्यथा; 'bodily l.' व्रातं, देह-काय-क्लेश-आयासः-श्रमः; 'unpaid l.' विष्टि *f.*, आजूः; 'got by one's l.' स्वकष्टार्जित. -*v. i.* परिश्रमं-आयासं-कृ 8 U, श्रम् 4 P, प्र-,यत् 1 A, व्यव-सो 4 U. चेष्ट् 1 A. उद्यम् 1 P, प्रवृत् 1 A, आयस् 1, 4 P. व्रातं कृ, शरीरायासं कृ. 2 खिद्-क्लिश्-पीड् pass., व्यथ् 1 A. 3 प्रसवावस्थायां वृत्, (आसन्नप्रसवा or प्राप्तप्रसववेदना सा स्त्री); 'l. under' बाध्-अभिभू- आक्रम्-पीड्-उपहन्-pass., 'l. ing under hundreds of anxieties' चिंताशतैर्बाध्यमान-अभिभूत; अतिभाराक्रांत &c.; 'l. ing under a disease' रोगपीडित, रुजार्त. -*v. t.* महाश्रमेण-प्रयत्नेन-साध् 5 P or सं-पद् c. or क्लृप् c. or वि-धा 3 U or कृ or अनु-ष्ठा 1 P. 2 कृष् 6 U. **-ed,** *a.* श्रम-यत्न-कष्ट-सिद्ध, यत्न-श्रम-पूर्व. प्रयत्नकृत. **-er,** *s.* कृतश्रमः, कर्मिन् *m.*, व्यवसायिन् *m.*, कार्मः. 2 कर्मकरः, कर्मकारः, भृतकः, वैतनिकः, भृति-भरण्य- भुज् *m.* 3 कृषकः, कृषीवलः; *See* **Farmer.** **-Laborious,** *a.* श्रम-आयास-कष्ट-साध्य, कष्ट-आयास-प्रद, पीडाकर (री *f*), दुःखसाध्य, कष्ट. 2 आयासिन्, कृतश्रम, श्रम-उद्योग-कर्म-शील. उद्यमिन्, उद्योगिन्, सोद्यम, सोद्योग, सोत्साह; *See* **Industrious.** **-ly,** *adv.* श्रमेण, श्रम-आयास-पूर्वं, आ-प्र-यासेन, सयत्नं, सोद्योगं, सोद्यमं, सोत्साहं; कष्टेन. कृच्छ्रेण. **-ness,** *s.* श्रमसाध्यता. 2 उद्योगः, उद्यमः, व्यवसायः, उद्योगशीलता. **-Laboratory,** *s.* रसक्रियास्थानं, रससंस्कारशाला. 2 उद्योग-शिल्प-शाला-गृहं.

Labyrinth, *s.* अतिगहनः प्रदेशः, दुस्तरं or सुगहनं स्थानं, अशक्यनिर्गमः प्रदेशः, गहनं. **-ian,** *a.* गहन, सुदुस्तर.

Lac, *s.* ला(रा)क्षा, अलक्तः-क्तकः, जतु *n.*, यावः, द्रुमामयः. 2 लक्षं.

Lace, *s.* सूत्रं, तंतुः, गुणः. 2 सूत्रजालं, जालाभरणं, जालरूपं, पक्षाभरणं. -*v. t.* सूत्रेण बंध् 9 P, or संयुज् 7 U, 10 or संश्लिष् c. 2 जालाभरणैः भूष् 10 or अलं-कृ 8 U.

Lacerate, *v. t.* दॄ 9 P, 10, निर्भिद् 7 P, व्यवच्छिद् 7 P, वि-पट् 10, कृत् 6 P; *See* **Tear.** **-ion,** *s.* विदारः-रणं, निर्भेदः, विपाटनं. 2 भेदः, छिद्रं, संधिः.

Laches, *s.* कालातिपातः, कालव्ययः; उपेक्षा.

Lachrymal, *a.* अश्रुप्रवाहिन्, अश्रूत्पादिन्. 2 अश्रुसंबंधिन्. **-Lachrymatory,** *s.* अश्रुपात्रं भाजनं. **-Lachrymose,** *a.* साश्र, बाष्पाकुल.

Lack, *v.* न धा 3 U or धृ 1 P or भृ 3 U; gen. ex. by हीन, रहित, वर्जित, शून्य in comp., or अ or निर् pr.; 'l. s wisdom' निर्बुद्धिः, अज्ञानः, बुद्धिहीनः, &c. -*s.* अभावः, हीनता, न्यूनता, विरहः, शून्यता. 2 प्रयोजनं; 'l.-lustre' निष्प्रभ, अतेजस्, मंदच्छाय, मलिनकांति; 'l.-brain' निर्बुद्धिः, मतिहीनः, मूढः, मूर्खः.

Lack-a-day, *interj.* अहो, हंत, हा, अहह, बत.

Lack-a-daisical, *a.* ध्यानपर-मग्न, चिंताकुल, उत्कंठित, विषण्ण.

Lacker, Lacquer, *v. t.* लाक्षारसेन छद् 10, कुक्कुभेन लिप् 6 P.

Lackey, *s.* चेटः, दासः, भृत्यः, पार्ष्णिग्राहः, पार्श्वानुचरः.

Laconic,-al, *a.* संक्षिप्त, लघु, अल्प-मित-शब्दक, अविस्तीर्ण, सांक्षेपिक (की *f.*); 'l. message' लघुसंदेशपदा सरस्वती. 2 अल्प-मित-भाषिन्. **-ally,** *adv.* संक्षेपेण, संक्षेपतः, अविस्तरेण, मितोक्त्या. **-ism, -Laconism,** *s.* लाघवं; लघूक्ति *f.*, संक्षेपोक्तिः; मितवाक्यं-भाषणं.

Lactary, *s.* क्षीरस्थानं, गोदुग्धस्थानं.

Lactation, *s.* क्षीर-दुग्ध-दानं.

Lacteal, Lactean, Lactious, *a.* क्षीरिन्, क्षीर-दुग्ध-मय (यी *f.*), पायस (सी *f.*). 2 अन्नरसवाहिन्.

Lactiferous, *a.* दुग्ध-क्षीर-वाहिन्.

Lactometer, *s.* दुग्धमापनयंत्रं, दुग्धमापनी.

Lad, *s.* बालः-लकः, बटुः, दारकः, कुमारः-रकः, शिशुः, किशोरः, माणवकः.

Ladder, *s.* नि(निः)श्रेणि-णी *f*, निश्रयि(य)णी, अधिरोहिणी, सोपानपथः, सोपान-परंपरा-पद्धति *f.*

Lade, *v. t.* *See* **Load.**

Lading, *s.* नौभारः, पोतस्थद्रव्यं.

Ladle, *s.* दर्वि-र्वी *f.*, कंबि-बी *f.*, खजाका; 'wooden l.' तर्दूः, दारुहस्तकः; 'sacrificial l.' स्रुवः-वा, स्रुच् *f.*, चमसः-सी. **-ful,** *s.* कंबि-दर्वी-पूरकं-मात्रं.

Ladrone, *s.* दस्युः, जाल्मः, कितवः.

Lady, *s.* (As a title) देवी; 'your or her ladyship' अत्रभवती, तत्रभवती, भवती. 2 गृहिणी, स्वामिनी, भार्या. 3 आर्या, वनिता, कुलांगना, कुलस्त्री, कुलवधूः, भाविनी, कुलजा; 'l.-bird, -fly, -cow' इंद्रगोपः, शक्रगोपः, इंद्र-शक्र-कीटः; 'l.-love' प्रिया, कांता,

प्रणयिनी, कामिनी, दयिता; ‘ l. 's maid ’ प्रसाधिका, वस्त्रपरिकल्पिका. **-like,** *a.* शिष्ट, सभ्य, सुविनीत, आर्यवृत्ति. 2 पेलव, कोमल, मृदु, सुकुमार.

Lag, *v. i.* मंदायते (D.), चिर(रा)यति (D.), विलंब् 1 A, मंदं मंदं चल्-चर् 1 P. **-***s.* अंत्यजाः, हीनजनाः (pl.); हीनवर्णः. **-***a.*, **-Laggard,** *a.* मंद, मंदकर्मन्, विलंबिन्, चिरक्रिय, मंदायमान.

Lagoon, *s.* अनूपः, कच्छः, कच्छभूः, जलसनाथः प्रदेशः.

Laic,-al, *a. See* under **Lay.**

Laidly, *a.* अप्रिय, जुगुप्सित, बीभत्स.

Lair, *s.* (श्वापदानां) आ-नि-लयः, शयनस्थानं, वासस्थानं, गुहा, बिलं.

Laity, *s. See* under **Lay.**

Lake, *s.* सरस् *n.*, कासारः, ह्रदः, सरसी, तडागः-गं, तटाकः-कं; पद्माकरः, सरोवरः, जलाधारः, जलाशयः.

Lamb, *s.* मेषशावः-वकः, अजाशिशुः, मेषवत्सः-पोतः, अविपोतः. **-kin,** *s.* क्षुद्रमेषशिशुः, अविपोतकः.

Lambative, *a.* लेह्य. **-***s.* लेह्यं, अवलेहः-ह्यं.

Lambent, *a.* इतस्ततः वेपमान, लोल, कंपमान, तरल, चंचल.

Lame, *a.* खंज, पंगु (गू *f.*), खोड-ल-र, विकलगति, व्यंग; ‘l. of a leg’ पादेन खंज. 2 (Fig.) दुर्बल, विकल, सच्छिद्र, न्यून. **-ly,** *adv.* खंजवत्. 2 विकलं. **-ness,** *s.* खंजता, पंगुता, गतिवैकल्यं. 2 वैकल्यं, दुर्बलता, न्यूनता, सच्छिद्रता.

Lamel, Lamella, *s.* कवचः, आवेष्टनं, पटलं.

Lament, *v.* विलप् 1 P, रुद् 2 P, आ-,क्रंद् 1 P, अनु-,शुच् 1 P, परि-देव् 1 A, परिदिव् 10 A, क्रुश् 1 P, वि-आ-अभि-° ; ‘ they l. ed his departure ’ तद्गमनमन्वशोचन्. तद्गमनमुद्दिश्य अक्रोशन्, &c. **-able,** *a.* शोच्य, शोचनीय, शोकविषय, शोकास्पदं, शोकार्ह. **-ation,** *s.* विलापः, रोदनं, परिदेवनानं, परिदेवितं, शोकः, शुच् *f.*, विलपनं, रुदितं, आ-वि-क्रोशः, आ-,क्रंदनं, क्रंदितं,. **-ed,** *a.* शोचित; ‘ the l. Krishna ’ शोकास्पदीभूतः or स्वर्ग-परलोक-वासी कृष्णः. **-er,** *s.* शोचकः, परिदेवकः.

Lameter, Lamiter, *s.* खंजः, पंगुः.

Lamina, *s* कवचः-चं, शल्कं, पत्रं, फलकः-कं. **-Laminated,** *a.* सपत्र, फलकिन्.

Lamp, *s.* प्र-,दीपः, दीपकः, दीपिका, दशाकर्षः, दोषास्यः; ‘ l.-black ’ कज्जलं, दीपकिट्टं; ‘l. -light’ दीपप्रभा-प्रकाशः; ‘l.-stand’ दीपवृक्षः-पादपः-आधारः.

Lampoon, *s.* निंदालेखः, अवगीतं, निंदार्थो लेखः. **-***v. t.* लेखैः निंद् 1 P or आक्षिप् 6 P or अव-गै 1 P. **-er,** *s.* निंदकः, अवगायकः, आक्षेपकः.

Lanate,-ed, *a.* लोमश, लोमविशिष्ट.

Lance, *s.* प्रासः, कुंतः, शूलः-लं, शल्यं, शक्ति *f.*, तोमरः. **-***v. t.* प्रासेन व्यध् 4 P or निर्भिद् 7 P. **-er,** *s.* प्रासिकः, कौंतिकः, शाक्तीकः, शक्तिधरः-ग्रहः, शूलधरः. **-ing,** *s.* (gums) लेखनं.

Lancet, *s.* शलाका.

Lanch, *v. t. See* **Cast.**

Lancinate, *See* **Lacerate, Tear.**

Land, *s.* (Opposed to sea) स्थलं; ‘ proceeded by l. ’ प्रतस्थे स्थलवर्त्मना (R. iv. 60): ‘ the way by l. ’ स्थलमार्गः-वर्त्मन् *m.* 2 भूः, भूमि *f.*, प्रदेशः, विषयः, राष्ट्रं. 3 मृद् *f.*, मृत्तिका. 4 क्षेत्रं, क्षेत्रभूमिः; ‘ arable l. ’ कृष्ट-सीत्य-भूमिः; ‘ barren l. ’ मरुः, मरुस्थलं-ली, धन्वन् *m.*; ‘ marshy l. ’ कच्छभूः, अनूपभूमिः; ‘ waste or fallow l.’ खिला-अप्रहता-भूमिः; ‘ gift of l. ’ भूमिदानं; ‘l.-animal’ स्थलचरजंतुः, भूमिचरजंतुः; ‘ l.-fight ’ स्थलयुद्धं; ‘ l.-force ’ स्थलसैन्यं, स्थलयोधाः; ‘l.-holder’ भू-क्षेत्र स्वामिन् *m.*, क्षेत्रपतिः; ‘ l.-lord,-lady भूक्षेत्र-स्वामी-मिनी, गृहपतिः, गृहेश्वरः-री. ‘ l.-locked ’ भूवेष्टित, भूमिपरिगत; ‘l. lotus’ स्थलारविंदं, स्थलकमलिनी; ‘l.-mark’ सीमाचिह्नं, स्थल-भूमि-सीमा, सीमालिंगं; ‘ l. owner ’ भूस्वामी, क्षेत्रपतिः-स्वामी; ‘ l. scape ’ नयनगोचरीभूतः भूप्रदेशः or भूभागः दृष्टिगत-दृष्टिगोचर-प्रदेशः; भूभागः, प्र-,देशः ‘ l.-tax ’ भू-क्षेत्र-करः; ‘ l. waiter ’ शौल्किकः. **-***v. t.* (पोतात्-नावः) अवतृ c., अव-रुह् c. (रोपयति); उत्तृ c., स्थले निविश् c. **-***v. i.* अवतृ 1 P, अवरुह् 1 P, उत्तृ, निविश् 6 P. **-ed,** *a.* अवतीर्ण, नौकावरूढ, नौकोत्तीर्ण. 2 भूमिसंपन्न, क्षेत्रवत्, भूमिधन; भू in comp.; ‘ l. property ’ भूमिद्रव्यं, भूमिः, क्षेत्रं, स्थावरद्रव्यं; ‘ l. proprietors ’ भूस्वामिनः. **-ing,** *s.* उत्तरणं; l.-place ’ तरस्थानं, तरः, तरणस्थानं, घट्टः-ट्टी.

Lane, *s.* संकट-संबाध-पथः-मार्गः, कुपथः.

Language, *s.* भाषा, वाणी, वाच् *f.* 2 वचनं, वचस् *n.*, वाक्यं, उक्ति *f.*, व्याहारः, निगदः, भाषणं, भाषितं, आलापः, भारती. 3 भाषासरणि-पद्धति *f.*, वाग्व्यापारः; वचोविन्यासः; ‘ abusive l. ’ वाक्पारुष्यं, खलोक्तिः, आक्षेपवचः; आक्षरणं; ‘ dignity of l. ’ वचसां प्रौढता.

Languid, *a.* परि-,म्लान, क्लांत, ग्लान, लुलित, अलसक, शिथिल, विषण्ण, खिन्न, श्रांत, स्रस्त, विश्लथ, मुक्त; अलस, मंद, शिथिल-क्षीण-बल, श्लथांग-स्रस्तांग(गी *f.*); *See* **Droop.** **-ly,** *adv.* म्लान-ग्लान-वत्, सविषादं, अलसवत्, मंदं, क्लांतमनसा, मुक्तगात्रैः. **-ness, -Languor,** *s.* ग्लानि *f.*, म्लानि *f.*, अवसादः, शिथिलता,

क्लांति *f.*, ग्ला(म्ला)नता, मुक्तावयवता; मोहः, बलशैथिल्यं, गात्रस्रंसः, अंगश्लथः, तंद्रा-न्द्रि *f.*, आलस्यं, जडता, जाड्यं, कार्यविमुखता.

Languish, *v. i.* अवसद् 1 P, परि-,क्लम् 1, 4 P, परि-,म्लै-ग्लै 1 P, स्रंस् 1 A, गल् 1 P, शिथिलीभू 1 P, क्षि-विशॄ-खिद्- *pass.*; ध्वंस् 1 A. 2 (With love) उत्तम् 4 P, उत्कंठ् 1 A, उत्सुक-*a.* भू. **-ing**, *a.* म्लायत्, क्षीयमाण, स्रंसिन्, मुक्त. 2 उत्सुक, उत्कंठित, कामालस; 'with her l. looks' अलसेक्षणा, कामालसदृष्टिः, कामार्द्रदृष्टिः. **-ingly**, *adv.* अवसादेन, अलसवत्. 2 सोत्कंठं, सोत्सुकं; कामालसदृष्ट्या. **-ment**, *s.* अवसादः, ग्लानता; *See* **Languor.** 2 औत्सुक्यं, उत्कंठा, उत्सुकता.

Laniary, *s.* घात-वध-स्थानं. 2 चर्वणदंतः, अग्रदंतः

Lanier, *s.* चर्मबंधः, वरत्रा.

Laniferous, *a.* रोमोत्पादिन्, लोमोद्भवकारिन्.

Lank, *a.* कृश, क्षाम, क्षीण, क्षीणमांस-शरीर; *See* **Lean.** 2 दीर्घतनु, दीर्घदेह. 3 श्लथ, शिथिल. **-ness**, *s.* कृशता, कार्श्यं, क्षामता. &c. **-y**, *a.* कृशदीर्घ, दीर्घक्षाम.

Lantern, *s.* प्रच्छन्नदीपः, सावेष्टनो दीपः, आवृतदीपिका; दीपः, दीपिका; 'l.-jawed' क्षीणवदन.

Lanuginous, *a.* लोमश, लोममय (यी *f.*).

Lap, *s.* उत्संगः, अंकः, क्रोडं. 2 अंचलः-लं; वस्त्रांतः, दशाः-वस्तयः (pl.); 'to place on the l.' क्रोडीकृ 8 U. **-v. t.** पुटीकृ, व्यावृत् c. 2 आ-परि-वेष्ट् 1 A or c.; अवगुंठ् 10, आ-परि-वृ 5 U, क्रोडे नि-धा 3 U. 3 लिह् 2 U. आ-अव-सं°; आ-स्वाद् 1 A; 'l.-dog' अंके पालनीयः कुक्कुरः; 'l. ful' अंकपूरणं-कं.

Lapidarious, *a.* शिला-प्रस्तर-मय (यी *f.*).

Lapidary, *s.* मणिकारः, रत्नाजीवः. 2 रत्न-मणि-च्छिद् *m.*

Lapis Lazuli, *s.* वैदूर्यं, असितोपलः, नीलोपलः.

Lappet, *s.* *See* **Lap** (2).

Lapse, *s.* क्रमः, गति *f.*, प्रवाहः, प्रवृत्ति *f.*, अत्ययः, अतिक्रमः; 'after a l. of time' अथ दिनेषु गच्छत्सु, कालक्रमेण, गच्छता कालेन. 2 स्खलितं, प्रमादः, भ्रमः. 3 स्खलनं, पातः, भ्रंशः, च्युति *f.*, पतनं. **-v. i.** क्रमशः या 2 P or गम् 1 P or सृप् 1 P; शनैः शनैः अति-इ 2 P or अतिक्रम् 1 U, 4 P. 2 भ्रंश् 1 A, 4 P, च्यु 1 A, पत् 1 P, विचल् 1 P, व्युत्क्रम्. 3 स्खल् 1 P, प्रमद् 4 P, भ्रम् 1, 4 P. 4 संक्रम्, अपवृत् 1 A. **-ed**, *a.* पतित, भ्रष्ट, &c. 2 परहस्तगत, संक्रांत, अपवृत्त; 'a l. suit' नियतवेलातीतं कार्यं.

Lapwing, *s.* टिट्टिभः-भकः, कोयष्टिकः.

Lar, *s.* कुल-गृह-देवता.

Larboard, *s.* नौवामभागः.

Larceny, *s.* चौर्यं, स्तेयं; *See* **Theft.**

Lard, *s.* शूकरवसा-मेदस् *n.* 2 शूकरमांसं, वल्लूरं. **-v. t.** शूकरमेदसा पॄ 3 U or c. 2 वि-सं-मिश्र् 10. 3 आ-प्यै c.; पुष् 1, 9 P or c.

Larder, *s.* भक्ष्यमांसागारं, भोजनागारं.

Large, *a.* (In size) विशाल, पृथु, बृहत्, स्थूल, विपुल, महत्, गुरु, उरु, पृथुल, आयत, विस्तीर्ण. 2 (Of l. body) महाकाय, स्थूल-विकट-शरीर, पृथु-बृहत्-शरीर; पीन, पीवर. 3 (In number) महत्, गुरु, पुष्कल, विपुल, प्रभूत, प्रचुर, बहु, बहुल, भूरि; 'of l. soul' महात्मन्; 'of l. nature' उदारधी, महात्मन्, अकृपणचेतस्. 4 (In age) वृद्ध, वयोधिक; 'larger boy' वर्षीयान् बालः; 'at l.' अपराधीनं, स्वेच्छया, स्वेच्छाचारेण, निर्यंत्रणं, निरवग्रहं, निरवरोधं. 2 सविस्तरं, विस्तरेण, विस्तरशः. 3 पूर्णतया, साकल्येन. **-ly**, *adv.* बहु, भूरि, अतीव, विपुलं, प्राचुर्येण, सु-अति- pr. **-ness**, *s.* स्थूलता, बृहत्त्वं, वैपुल्यं, प्राचुर्यं, बहुत्वं, बाहुल्यं; महाकायता, शरीरबृहत्त्वं, पीनता, पीवरता. 2 आयामः, विस्तारः.

Largess, *s.* दानं, वितरणं, पारितोषिकं, उपायनं, उपहारः; *See* **Gift.**

Lark, *s.* भा(भ)रद्वाजः, व्याघ्राटः, भारचः.

Larum, *s.* आसन्नभयसूचना-घोषणा.

Larva, *s.* कीटः, कीटडिंभः.

Larynx, *s.* कंठनालः-लं, धूकः.

Lascar, *s.* नाविकः, पोतवाहः.

Lascivious, *a.* कामुक, कामिन्, रतार्थिन्, कामासक्त, रतिसुखासक्त, भोगासक्त, लंपट, स्त्रीलंपट, कामप्रवण; *See* **Lustful.** 2 कामहेतुक, काममूलक. **-ly**, *adv.* कामुकवत्, लंपटवत्, भोगासक्त्या. **-ness**, *s.* कामुकत्वं, भोगासक्ति *f.*, रतासक्तिः, व्यवायेच्छा, लांपट्यं.

Lash, *s.* कशा, प्रतिष्कशः-षः, चर्मरज्जु *f.*, चर्मबंधः. 2 कशाघातः-ताडनं-प्रहारः. 3 वागसिः, परुषवचनं. **-v. t.** कशया आहन् 2 P or तड् 10 or प्रहृ 1 P. 2 वि-धू 5, 9 U. 6 P. विचल् c., इतस्ततः क्षिप् 6 P or चल् c. 3 वाग्बाणैः भिद् 7 P or तड्, वागसिना प्रहृ; तीक्ष्णं निंद् 1 P; 'l. ed into fury' वाग्बाणैः उत्तेजितक्रोधः; शिलातलप्रतिघातोत्पतत्फेनिलानामपां (Ka. 133): 'l. ed into foam by striking' &c. जर्जरितजलतरंगविततनीहारं (Mal. 9) 'so as to l. the water into snowy foam.' 4 रज्ज्वा बंध् 9 P: 'worthy of being l. ed' कश्य, कशार्ह.

Lass, *s.* तरुणी, कन्या, बाला, कुमारिका, दारिका.

Lassitude, *s.* खेदः, क्लमः, ग्लानि *f.*; *See* **Languidness.**

Lasso, *s.* पाशः, पाशबंधः-रज्जु *f.*

Last, *a.* अंत्य, अंतिम, अवर, अवरतम, चरम, पश्चिम; शेष-अंत-in comp. 2 गत, अतीत, चरम, पूर्व, भूत. 3 जघन्य, अधम, अपकृष्ट. 4

परम, उत्तम, अत्यंत; ‘l. night’ गतायां रात्रौ; ‘the l. year’ गत-अतीत-संवत्सरः, परुत् *ind.*; ‘l. but one’ उपांत्य, उपांतिक; ‘l.-born’ अवरज; ‘at l.’ अंते, अंततः; ‘l. part’ शेषभागः; ‘l. part of the night’ उत्तररात्रः, चरमयामः; ‘l. half’ उत्तरार्धः, पश्चार्धः, परार्धः, ‘the year before l.’ परारि *ind.*; ‘to the l.’ शेषं यावत्. -*adv.* अंते, शेषे, अंततः, अवरं, चरमं, अवरतः. -*v. i.* अव-स्था 1 A, स्था 1 P; oft. by अवधिः in comp.; ‘l. ing for many days’ चिरस्थायिन्, एष ते जीवितावधिः प्रवादः (U. 1) ‘will l. through life’; ‘this will l. as food for four months’ एतेन (अस्माकं) मासचतुष्टयस्य भोजनं भविष्यति; ‘the bloom of youth l.s for a few days’ कतिपयदिवसस्थायिनी यौवनश्रीः (Bh. II. 2). **-ing,** *a.* स्थायिन्, चिर-दीर्घ-कालस्थायिन्; अनपायिन्, नित्य, स्थिर, ध्रुव, अक्षय, शाश्वत (ती *f.*), अजर, चिरंतन (नी *f.*). **-ly,** *adv.* अंते, अंततः, चरमतः, शेषे, अवरतः.

Latch, *s.* अर्गला-लं, विष्कंभः, अर्गलाबंधः, तालकं, द्वारबंधनी; ‘the postern door was on the l.’ अर्गलानिरुद्धं पक्षद्वारं.

Latchet, *s.* पादुकाबंधनी.

Late, *a.* विलंबेन आगत or प्राप्त; कालातीत, वेलातीत, समयातीत, अतिक्रांतकाल, अतिकाल, अतीतकाल-समय. 2 अवसित, परिणत, अवसन्न. 3 नूतन, अचिर, प्रत्यग्र, अभिनव, आधुनिक (की *f.*), नातिपुराण, सद्यस्कालीन. 4 अतीत, गत, व्यतीत, भूत; प्राक्तन-पूर्वतन (नी *f.*), पौर्विक (की *f.*), ‘at a l. hour of the day’ परिणते दिवसे, अवसन्नप्राये अहनि; ‘at a l. hour of the night’ क्षीणभूयिष्ठायां क्षपायां; ‘at a l. period of life’ परिणते वयसि. -*adv.* विलंबेन, विलंबात्, वेलातिक्रमेण, अतिकालं-समयं, चिरेण, चिरात्, चिरकालेन-लात्; ‘to be l.’ वेलातिक्रमं कृ 8 U, चिर(रा)यति (D.); ‘why are you l.’ किमिति चिरायित त्वया; ‘l. in life’ परिणतवयसि, *See* above; ‘too l. in the day’ अतिपराह्णे; ‘too l. in the evening’ अतिसाये. 2 अकाले, असमये. **-ly,** ‘of late,’ *adv.* इदानींतने काले, नातिचिरात्प्राक्, आधुनिकसमये; अचिरं. **-ness,** *s.* कालातीतता, कालातिक्रमः; परिणामः, परिणति *f.* **-Later,** *a.* उत्तर, अपर, पर, उत्तरकालीन, पाश्चात्य. -*adv.* (on) उत्तरं, उत्तरोत्तरं, पश्चात्, उत्तर-पर-काले.

Latent, *a.* नि-,लीन, गूढ, छन्न, गुप्त, अदृष्ट, अप्रत्यक्ष, अप्रकाश, अप्रकट, अदृश्य, अंतर्हित, निभृत; ‘a l. disease’ धातुस्थः-शरीरांतर्गतः-रोगः.

Lateral, *a.* पार्श्वीय, पार्श्वस्थ, पार्श्विक (की *f.*). **-ly,** *adv.* पार्श्वभागे, पार्श्वतः, पार्श्वे.

Lath, *s.* सूक्ष्मकाष्ठ-दारु, तनुफलकः-कं.

Lathe, *s.* कुंदः-दं, भ्रमः-मि *f.*, चक्रं.

Lather, *s.* अंजनफेनः, मार्जनतैलफेनः.

Latifolious, *a.* पृथु-विशाल-पर्ण.

Latitude, *s.* अक्षः. 2 (Celestial) निक्षेपः. 3 विस्तारः, विस्तृति *f.*, प्रथिमन् *m.*, आयति *f.* 4 अनियंत्रणं, स्वातंत्र्यं, नियमोपेक्षा, नियमातिक्रमः, शैथिल्यं; ‘degree of l.’ अक्षांशः; ‘l. of a planet’ पतनं; ‘parallel of l.’ अक्षांशवृत्तं. **-Latitudinarian,** *a.* शिथिल, अनियंत्रण, निर्यंत्रण. -*s.* मतस्वातंत्र्यावलंबिन् *m.*, निर्बंधहीनः. **-ism,** *s.* मतशैथिल्यं, विचारस्वातंत्र्यं, अनियंत्रणं.

Latten, *s.* रीति *f.*, पित्तलं.

Latter, *a.* उत्तर, अपर, पर, अवर, अन्य, (*pron. a.*); पश्चिम, चरम, अंतिम; उत्तरोक्त, अपरोक्त; ‘former and l.’ पूर्वापरं; ‘in the l. part of the day’ पराह्णे. **-ly,** *adv.* अर्वाक्काले, अधुनातनकाले; *See* **Lately.**

Lattice, *s.* जालमार्गः, गवाक्षः, जालं, गवाक्षजालं, वातायनं; ‘l.-work’ जालकर्मन् *n.*

Laud, *v. t.* प्रशंस् 1 P, श्लाघ् 1 A, स्तु 2 U, कृत् 10, गुणं वर्ण् 10. -*s.* प्रशंसा, श्लाघा, स्तुति *f.*, गुण-वर्णना-कीर्तनं. **-able,** *a.* श्लाघ्य, स्तुत्य, प्रशस्य, श्लाघार्ह, प्रशंसार्ह, स्तवनोचित; *See* **Praise,-worthy. -ation,** *s.* प्रशंसनं, श्लाघनं. **-atory,** *a.* प्रशंसागर्भ, प्रशंसक, स्तुतिरूप, प्रशंसा-श्लाघा-स्तुति-मय (यी *f.*), प्रशंसाकर (री *f.*). **-er,** *s.* प्रशंसकः, स्तावकः.

Laugh, *v. i.* हस् 1 P, प्र-वि°; स्मि 1 A (l. gently); ‘l. violently’ उच्चैः हस्, अट्टहासं कृ 8 U; ‘l. at’ अव-उप-हस्, उपहासास्पदं मन् 4 A, अव-मन्; ‘l. in the sleeves’ अंतर्-निभृतं-हस्. -*s.*, **-ing, -Laughter,** *s.* हासः, हसनं, हास्यं, हसितं, वि-प्र°; स्मितं; ‘a horse-l.’ अट्टहासः, उच्चैर्हासः, प्र-अति-हासः; ‘an inward l.’ अंतर्हासः **-able,** *a.* हासकर (री *f.*), हास्यास्पदं, हास्य. **-er,** *s.* हासकः, हासिन् *m.* **-ing,** *a.* हास्यमुख (खी *f.*), स्मेरमुख, हास्यवदन; ‘l.-stock’ उपहासास्पदं, हास्यपात्रं. **-ingly,** *adv.* सहासं, विहस्य, सस्मितं.

Launch, *v. t.* (नावं जले) क्षिप् 6 P, मुच् 6 P or c.; प्रविश् c.; वह् c.; ‘l. thy hundred-shafted bolt’ मुंच शतशोऽशनिं (M. 5). 2 सहसा विसृज् 6 P or प्रक्षिप्, प्रास् 4 U. -*v. i.* जलं प्रविश् 6 P. -*s.* नौमोचनं or जलप्रवेशनं.

Laundress, Launder, *s.* रजकभार्या, निर्णेजकी. **-Launderer,** *s.* रजकः, निर्णेजकः. **Laundry,** *s.* रजकगृहं, वस्त्रधावनशाला.

Laurel, *s.* नारलं (?); 'win l. s' ख्यातिं गम् 1 P, यशः अधिगम्; 'wear your l. s with modesty' लब्धेपि जये मा गर्वाध्मातो भूः; (भाग्येषु अनुत्सेकी भव S. 4).

Lava, *s.* आग्नेयोद्गारः.

Lave, *v. t.* क्षल् 10, धाव् 10; निज् 3 U; *See* **Wash.** **-atory,** *s.* धावनस्थानं. **-er,** *s.* धावन-प्रक्षालन-पात्रं, द्रोणी. **-ment,** *s.* वस्ति *m. f.*

Lavish, *a.* अतित्यागिन्, अतिव्ययिन्, व्ययशील-पर, अपरिमितव्यय, बहुप्रद, मुक्तहस्त. 2 अमित, अपरिमित, अतिरिक्त, अत्यधिक, अति pr. **-***v. t.* अपरिमितं व्यय् 10 (व्यययति), मुक्तहस्तेन दा 3 U or विसृज् 6 P or त्यज् 1 P or वितॄ 1 P or विश्रण् 10 or अप-चि 5 U or वृष् 1 P or अवा-कॄ 6 P; विक्षिप् 6 P. **-er,** *s.* अतिव्ययिन् *m.*, मुक्तहस्तः, व्ययपरः. **-ly,** *adv.* अतिव्ययेन, मुक्तहस्तेन, अपरिमितं, अत्यंतं. **-ment,-ness,** *s.* अति-अपरिमित-व्ययः, महाव्ययः, अतित्यागः, अत्युत्सर्गः, मुक्तहस्तत्वं, बहुप्रदत्वं.

Law, *s.* धर्मः, स्मृति *f.*, व्यवहारः, आचारः; धर्म-स्मृति-व्यवहार-शास्त्रं. 2 विधिः, शासनं, व्यवस्था, नियमः, नि-आ-देशः, नियोगः, सूत्रं, राजाज्ञा, चोदना, व्यवस्था-शासन-पत्रं, मर्यादा, स्थिति *f.*, कार्याकार्यनियमः, विधिनिषेधनियमः. 3 न्यायः, नीति *f.*, धर्मानुसारः, व्यवहारविधिः; 'a code of l. s' धर्मसंहिता, धर्म-स्मृति-शास्त्रं; 'criminal l.' दंडनीतिः-विधिः; 'matter recognizable by l.' व्यवहारविषयः-पदं; 'versed in l.' स्मृतिशास्त्रज्ञ, व्यवहारपंडित; 'common l.' स्मृतिः; 'breaking a l.' व्यवस्थातिक्रमः; 'going to l.' राजसभां-व्यवहारासनं-गत्वा विवादप्रशमनं-निर्णयः; 'to go to l.' विवद् 1 A, व्यव-हृ 1 P; 'against the l.' स्मृतिविरुद्धं; 'l.-breaker' व्यवस्थाभेदिन्-लंघिन, नियमातिक्रामिन्; 'l.-giver' स्मृति-शास्त्रकारः, व्यवस्थापकः, शासितृ *m.*, विधि-न्याय-प्रवर्तकः; 'l.-suit' अर्थः, कार्यं, व्यवहारपदं; 'lay down a l.' व्यव-स्था c. (-स्थापयति). **-ful,** *a* न्याय्य, शास्त्रविहित, शास्त्रोक्त, धर्म्य, यथान्याय, धर्मसंमत, धर्मशास्त्रानुरूप, शास्त्रसंमत, स्मृत्युक्त, व्यवहार-विधि-प्रोक्तः, विध्यनुसारिन्, अनिषिद्ध, धर्माविरोधिन्; 'l. wife' धर्मपत्नी; 'l. means' धर्मोपायः, न्यायोपायः. **-fully,** *adv.* विध्यनुसारेण, न्यायतः, धर्मेण, धर्मतः, धर्मानुसारेण, स्मृतिशास्त्रानुरूपं, यथान्यायं. **-fulness,** *s.* न्याय्यता, धर्म्यता; धर्मानुसारः, धर्माविरोधः. **-less,** *a.* विध्यपेत, स्मृति-विधि-विरुद्ध, धर्म-न्याय-विरुद्ध, अन्याय्य, अधर्म्य. 2 (Of persons) अनियंत्रण, अनियत उच्छृंखल, स्वेच्छाचारिन्, स्वैरगति, अवश, कामचार, उद्दामवृत्ति; दुराचार, निर्मर्याद, अशिष्ट, आचार-धर्म-भ्रष्ट. **-lessly,** *adv.* अवशं, उच्छृंखलं, दुराचारवत्, धर्मविरोधेन, शास्त्रविरुद्धं. **-lessness,** *s.* कामवृत्ति *f.*, मर्यादातिक्रमः, अनाचारः, आचारभ्रष्टता, नियमातिक्रमः; स्वेच्छाचारः. **-Lawyer,** *s.* विधिज्ञः, न्यायनिपुणः, व्यवहारपंडितः, धर्मशास्त्रज्ञः, धर्मज्ञः, स्मृतिपारगः; अर्थिप्रत्यर्थिपक्षसमर्थकः.

Lawn, *s.* तृणभूमि *f.*, तृणावृता भूः, शाद्वलं स्थानं, सतृण-हरित-स्थलं. 2 क्षौमं, अंशुकं, दुकूलं.

Lax, *a.* शिथिल, श्लथ, स्रस्त, विगलित. 2 मृदु, कोमल, अतीक्ष्णदंड. 3 दुराचार, भ्रष्टचरित्र, धर्म-कर्म-भ्रष्ट; 'l. in bowels' मृदु-अबद्ध-कोष्ठ. **-***s.* अतिसारः, प्रवाहिका. **-ative,** *a.* सारक, रेचक. **-***s.* सारकं. **-ity,-ness,** *s.* शैथिल्यं, अतीक्ष्णता; अनाचारः, मर्यादातिक्रमः; इंद्रियासंयमः, &c.

Lay, *v. t.* धा 3 U, नि-आ°, न्यस् 4 U, नि-विश् c., स्था c. (स्थापयति); सम्-ऋ c. (अर्पयति), निक्षिप् 6 P, आरुह् c (रोपयति); दा 3 U, धृ 1 P; क्रमेण स्था c. or नि-धा; प्रक्लृप् c., प्रयुज् 7 A, 10 (a plot, snare, &c.). 2 आ-स्तृ-स्तॄ 5, 9 U. 3 शम् c. (शमयति), प्र-उप-°; सांत्व् 10, स्थिरीकृ 8 U. 4 शी c.; निपत् c.; 'l. eggs' अंडमोक्षं कृ, अंडानि सू 2, 4 A; 'l. siege' रुध् 7 U, वि-ष्टंभ् 9 P; *See* **Besiege;** 'l. blame on' दोषं समारुह् c. or निक्षिप्; 'l. waste' उप-प्लु 1 A, उपद्रु 1 P, उद्-ध्वंस् c., निर्जनीकृ; *See* **Devastate;** 'a sinful action, though done by others, is laid at his doors' पापं कर्म च यत् परैरपि कृतं तत्तस्य संभाव्यते (Mr. 1); 'l. aside' अप-निर्-अस्, त्यज् 1 P, हा 3 P, उत्सृज् 6 P, उज्झ् 6 P; 'l. it aside for a while' मुहूर्तं तत् आस्तां-तिष्ठतु तावत्; (as dress &c.) उद्-वि-मुच् 6 P, अवतॄ c., अवरुह् c.; 'l. hands on' परामृश् 6 P, धृष् c.; 'laid upon him his hand' तं हस्तेन पस्पर्श or परामृशत्; 'l. hold of' धृ, ग्रह् 9 U; *See* **Catch;** 'l. the dust' धूलिं संसिच् 6 P or आ-हन् 2 U; 'l. open or bare' विवृ 5 U, आविष्कृ; स्फुटीकृ, वि-अंज् 7 P or c., स्पष्टी-प्रकटी-कृ, प्रकाश् c. **-before,** उपनि-अस्, उपक्षिप्, पुरो-नि-धा, प्रसृ c., नि-आ-विद् c. **-by,** सं-,रक्ष् 1 P, संचि 5 U. **-down,** न्यस्, निक्षिप्, नि-धा, न्यासीकृ. 2 शी c., निविश् c. 3 विमुच्, परि-,त्यज्, वि-हा. 4 (Oneself) संविश् 6 P, शी 2 A. 5 प्र-णी 1 P, वि-धा (rules &c.); 'l. down arms' युद्धाद्विरम् 1 P, शरणं व्रज् 1 P; 'l. down life' प्राणान् त्यज्. **-in,** संग्रह्, संचि, संरक्ष्. **-on,** पत् c., प्र-युज्, सम्-ऋ c. **-out,** विनि-युज् 7 A, 10, प्र-युज्,

व्यय् 10 (व्ययपति). 2 परि-प्र-क्लृप् c., वि-न्यस् 4 U, विरच् 10, प्र-युज्, चिंत् 10; *See* **Contrive. 3** प्रसृ c., विस्तृ c., दीर्घीकृ; प्रकाश् c., प्रकटीकृ 'l. oneself out'; चेष्ट् 1 A, प्रयत् 1 A, उद्यम् 1 A. **-to,** आरुह् c., निक्षिप्; *See* **Ascribe;** 'l. to a ship' नौगतिं रुध् or स्तंभ्. **-up,** नि-धा, रक्ष्, संचि; 'to be laid up,' शय्याग्रस्त-*a*. भू 1 P, उत्थातुं अक्षम-*a*. भू; 'laid up with fever' ज्वरेणोत्थातुमक्षमः. **-Lay,** *s*. गानं, गीतं, काव्यं. **2** आस्तरः-रणं, फलकः-कं. **-*a*.** सामान्य, साधारण (णी *f*.), पुरोहितभिन्न. **-man,** *s*. गृहस्थः, सामान्य-साधारण-जनः, अदीक्षितः, प्राकृतः. **-Laical,** *a*. गृहस्थिन्, गार्हस्थिक (की *f*.), पुरोहितभिन्न, अदीक्षित. **-Laity,** *s*. गृहस्थ-सामान्य-जनवर्गः, प्राकृत-साधारण-जनाः, पुरोहितभिन्नवर्गः.

Layer, *s*. स्तरः; आस्तरः-रणं, फलकः-कं. **2** Twig, *q. v.*

Lazar, *s*. कुष्ठिन् *m*., श्वित्रिन् *m*., कोठोपहतः, त्वग्रोगोपहतः; 'l.-house' कुष्ठिशाला, श्वित्र्यालयः.

Lazy, *a*. अलस, तांद्रिल, जड, मंद, मंथर, तंद्रालु, मंदगति, आलस्यशील, अनुद्योगिन्, उद्योगविमुख (खी *f*.), अव्यवसायशील; शीतक, अनुष्ण, तुंदपरिमृज. **-ly,** *adv*. अलसवत्, जडवत्, मंदं मंदं, जाड्येन. **-ness,** *s*. आलस्यं, मांद्यं, जाड्यं, जडता, तंद्रिका, तंद्रालुता, कार्यद्वेषः, अनुद्योगशीलता, उत्साहविमुखता, अलसशीलता.

Lea, *s*. *See* **Lawn** (1).

Lead, *s*. सीसं, सीसकं, नागं, योगेष्टं, वप्रं; 'red l.' सिंदूरं, नागसंभवं, रक्तचूर्णं, नागजं, नागगर्भं. **-*s*.** नायकत्वं, नेतृत्वं, अधिष्ठातृत्वं, मुख्यत्वं, अग्रगमनं-यानं, पुरःसरणं. **-*v. t*.** नी 1 P, वह् 1 P, प्राप् c., गम् c. (गमयति) (all with two accusatives); आ-दा 3 A. **2** (Way) दृश् c., आ-निर्-दिश् 6 P. **3** अधि-ष्ठा 1 P, अध्यास् 2 A, प्रणी, आ-निर्-दिश्; पुरस्कृ 8 U; अग्रणीः-नायकः-अग्रेसरः-भू 1 P (with gen.); वसिष्ठाधिष्ठिता देव्यः (U. 1) 'led by Vasishtha '&c., दशरथस्य दारानधिष्ठाय (U. 4;) 'led by the demon' दानवं पुरस्कृत्य. **4** आकृष् 1 P, प्र-वि-लुभ् c., प्रवृत् c, प्रेर् c., प्रोत्सह् c , नी; मूढः परप्रत्ययनेयबुद्धिः (M. 1) 'has his mind led by the convictions of others.' **5** (Time) नी, गम् c., अतिवह् c., क्षै c. (क्षपयति), या c. (यापयति); 'led a dissolute life' विषयसुखनिरतो जीवितमत्यवाहयत्; 'l. ing a life above their station' स्वस्थानानुचितां-स्वस्थानातिरिक्तां-जीवयात्रां कल्पयंतः. **-*v. i*.** (On) अग्रे-पुरः-पुरतः-अग्रतः-भू or गम् 1 P or वृत् 1 A or स्था or चर् or सृ 1 P. **2** (To) (lit.) गम्, या 2 P; 'on the way l. ing to Chitrakûta' चित्रकूटयायिनि वर्त्मनि (U. 1). **3** (Cause) ex. by dat. of noun with or without भू, आवह्, उत्पद् c., जन् c. (जनयति); 'advice to fools l. to their provocation' उपदेशो हि मूर्खाणां प्रकोपाय (भवति) (H. 3). **-ed,** सीसकयुक्त. **-en,** *a*. सीसकनिर्मित, **-er,** *s*. नायकः, नेतृ *m*., मार्गदर्शकः, मार्गोपदेशकः (lit.); मुख्यः, मुखरः, अग्रणीः, प्रमुखः, अधिपः, ईश्वरः, पतिः, अध्यक्षः, अधिपतिः, अधिष्ठातृ *m*. **2** पुरोगः-गमः, अग्रगः, अग्र-(ग्रे)सरः, पुरःसर, पुरोगामिन् *m*.; 'l. of an army' सेनानीः, चमूपतिः, योधाध्यक्षः, सेनानायकः; 'l. of a religious sect' गुरुः, आचार्यः. **-ership,** *s*. नायकत्वं, आधिपत्यं. **-ing,** *a*. अग्रग, पुरोगामिन्, पुरःसर, पुरोगम, प्राक्-अग्र-गामिन्. **2** अग्र, अग्र्य, मुख्य, उत्कृष्ट, प्रमुख, परम, उत्तम, प्रधान in comp. **3** (To) आवह, कर (री *f*.) in comp.; 'l. to happiness' कल्याणावह, कल्याणकर, कल्याणोदर्क. **-*s*.** नयः, नीति *f*., नेतृत्वं; 'l.-strings' आलंबनसूत्राणि; 'hold or keep in l.-string' आत्माधीन-*a*. कृ, स्ववशं नी, नियम् 1 P. **-Led.** *a*. नीत, प्रेरित, अधिष्ठित, &c.; 'l. by' ex. by पुरःसर, पुरोगम, प्रमुख, आदि in comp.

Lead-wort, *s*. पाठिन् *m*., चित्रकः, वह्निसंज्ञकः.

Leaf, *s*. पत्रं, पर्णं, छदः, दलः-लं, पलाशं, छदनं; (of a book) पत्रं; (of a door) कपा(वा)टः-टं-टी, अररं-री; 'fallen l.' प्रपर्णं; 'faded l.' शीर्णपर्णं; 'to strip off the leaves' निष्पत्रीकृ 8 U. **-less,** *a*. निष्पत्र, अपर्ण, निष्पर्ण, निर्दल, पत्र-पर्ण-दल-हीन. **-let,** *s*. पत्रकं, सूक्ष्म-लघु-पत्रं. **-y,** पर्णावृत, पर्णमय (यी *f*.), बहुपर्ण, बहुपत्र-दल, सपत्र, सपर्ण, पर्णिन्.

League, *s*. संधिः, साहित्यं, संघातः, ऐक्यं, संयोगः, संघट्टनं, अन्योन्योपकारप्रतिज्ञा. **2** गव्यूति *f*. **-*v. i*.** संधा 3 U, पक्षीय-*a*. भू 1 P, संहन्-संयुज्-pass., संमिल् 6 P, संधिं कृ 8 U, संघट्ट् 1 A; 'l. ed with the enemy' शत्रुपक्षे स्थित. **-ed,** *a*. कृतसंधि, संधित, संहत, संघातवत्, संयुक्त, कृतसंसर्ग, संसृष्ट, मिलित; 'having l.' संभूय, मिलित्वा. **-er,** *s*. संगिन् *m*., संसर्गिन् *m*., सह-संभूय-कारिन् *m*.

Leak, *s*. छिद्रं, रंध्रं, संधिः. **2** धारा, स्रवः, स्यंदः, द्रवः. **-*v. i*.** (अलक्षितं) स्रु 1 P; परिस्रु, स्रु 4 A, क्षर् 1 P गल् 1 P, स्यंद् 1 A; आयुः परिस्रवति भिन्नघटादिवांभः (Bh. ii. 109) 'like water l. ing from a broken jar' &c. **-ing,** *s*. स्रवः, क्षरणं,

निस्यंदः, स्यः. **-y,** *a.* छिद्रपूर्ण, स्रवणशील, सच्छिद्र, सरंध्र.

Lean, *a.* कृश, परि-, क्षाम-क्षीण, अवसन्न, तनु, क्षीणशरीर-मांस, कृशांग (गी *f.*); 'you are growing l.-er and l.-er day by day' अनुदिवसं परिहीयसेंऽगैः (S. 3); 'l. ness of body' शरीरसादः. -*s.* स्नायुः, वसा. -*v. i.* अव-लंब् 1 A, आ-सं-श्रि 1 U; 'l. ing on a mango stick' अवलंब्य चूतयष्टिं; मधुलेखया दत्तहस्तावलंबा (Ka 206) 'l. ing on M.'s arm.' **2** पक्षं आश्रि or अवलंब्, प्रवण-*a.* भू 1 P. **3** आ-अव-नम् 1 P, नम्रीभू, बहिर्लंब्, तिरः-तिर्यक् लंब्. -*v. t.* उप-धा 3 U, निविश् c., न्यस् 4 U; वामहस्तोपहितवदना (S. 4) 'l. ing her face on her left hand'; also ex. by (*v. i.*). **-ing,** *a.* आलंबिन्, संश्रित, आनत; प्रवण, बहिर्लंब, प्रलंब, वक्र. -*s.* प्रवणता, सं-आ-श्रयः, आलंबनं. **-ness,** *s.* कृशता, कार्श्यं, क्षीणता, क्षामता, अव-,सादः, शोषः, शरीरशोषणं.

Leap, *v. i.* प्लु 1 A, उत्-प्लु, वल्ग् 1 P; नृत् 4 P; 'l. down' अवतॄ 1 P, अवप्लु; 'l. up' उत्पत्, उत्प्लु; 'l. over' लंघ् 1 A, 10, अतिक्रम् 1 U, 4 P, अति-इ 2 P. -*s.* प्लुति *f.*, प्लुतं, प्लवः, वल्गितं, झंपः, प्लवनं; 'quick (deer's) l.' हरिणप्लुतं; 'going by l.s' प्लुतगति, प्लवग. **-ing,** *s.* प्लवनं, वल्गितं, प्लुतिः; 'l. over a period' मंडूकप्लुतिः.

Learn, *v. t.* शिक्ष् 1 A, अधि-इ 2 A, पठ् 1 P, अधिगम् 1 P, अभ्यस् 4 U; अभ्यासेन विद्यां लभ् 1 A or प्राप् 5 P. -*v. i.* ज्ञा 1 U, अवगम्, विद् 2 P, बुध् 1 P, उपलभ्, श्रु 5 P, गृहीतार्थ-*a.* भू 1 P; *See* **Know.** **-ed,** *a.* विद्वस् (दुषी *f.*), विपश्चित्, ज्ञानिन्, विद्या-विशिष्ट-संपन्न-वत्, कृत-उपात्त-विद्य पंडित, बुध, प्रा(प्र)ज्ञ; ज्ञानवत्, व्युत्पन्न, बहुश्रुत, सूरि, विद्यावृद्ध, साक्षर. **2** अधीतिन्, विचक्षण, विज्ञ, कुशल, निपुण, प्रवीण, चतुर; कोविद, ज्ञ, विद् in comp. **3** (Of books &c.) पांडित्यस्य सूचक, ज्ञानस्य गमक; 'a l. man' पंडितः, विपश्चित्, सूरिः, बुधः, &c.; 'l. in law' स्मृतिज्ञ, न्यायविद्. **-edly,** *adv.* पंडितवत्, प्राज्ञवत्, सज्ञानं, निपुणतया, सकौशलं. **-er,** *s.* शिष्यः, छात्रः, अध्येतृ *m.*, विद्यार्थिन् *m.* **-ing,** *s.* विद्या, विद्वत्ता, विद्वत्त्वं, ज्ञानं, पांडित्यं, व्युत्पत्ति *f.*, प्राज्ञता, विद्यासंपद् *f.* **2** (Act) अध्ययनं, शिक्षणं, अभ्यासः, विद्यार्जनं, विद्याप्राप्ति *f.*, ज्ञानागमः. **3** शास्त्रं, विद्या; 'sacred l.' श्रुति *f.*, निगमज्ञानं; 'he affects great l.' पंडितंमन्यः, पंडितायते (D.).

Lease, *s.* पट्टः, पट्टोलिका. -*v. t.* आविहित-कालात् निरूपितमूल्येन दा 3 U or विसृज् 6 P.

Leasing, *s.* *See* **Falsehood.**

Leash, *s.* चर्मबंधः, चर्मरज्जु *f.* **2** त्रयं, त्रितयं.

Least, *a.* अणु, अल्प, स्तोक, अत्यल्प, अल्पिष्ठ, कनिष्ठ, स्तोकतम, अल्पतम, क्षोदिष्ठ; 'the l. sorrow' अणुरपि शोकः; 'the l. particle' लवः, लेशः, अणुः कणः. -*adv.* स्तोकं, अल्पिष्ठं, किंचित्, कियत्; 'in the l.' मनागपि, अल्पमपि, स्तोकांशेनापि, स्तोकमपि, लेशमपि, किमपि, किंचिदपि; 'at l.' ex. by अवर-*a.* in comp.; 'witnesses should be at l. three' त्र्यवराः साक्षिणो ज्ञेयाः (Y. II. 69); 'at l. 100 Rs.' शतावरा रूपकाः; oft. by तावत्, 'at l. once' सकृदपि तावत्.

Leather, *s.* परिष्कृतं चर्म; 'l.-bag' चर्मभस्त्रिका, चर्मप्रसेविका; 'l.-bottle' कुतू *f.*, 'a small l.-bottle' कुतुपः, 'l.-dresser' चर्मकृत्, चर्मकारः; 'l.-seller' चर्मविक्रयिन्. **-Leathern,** *a.* चर्मकृत-निर्मित, चर्ममय (यी *f.*), चर्म in comp.

Leave, *s.* अनुज्ञा-ज्ञानं, अनुमति *f.*, अनुमोदनं. **2** आमंत्रणं, आपृच्छनं; 'to take or ask l. of' आमंत्र् 10 A, आप्रच्छ् 6 A; *See* **Adieu;** 'to give l.' अनु-ज्ञा 9 U, अनुमन् 4 A, अनुमुद् 1 A. -*v. t.* त्यज् 1 P, हा 3 P, उत्सृज् 6 P, उज्झ् 6 P, रह् 1 P 10, परिहृ 1 P, वर्ज् 10, निर्-,मुच् 6 P. **2** निर्गम् 1 P, अपगम्, अप-इ-या 2 P, अपसृ 1 P, अपक्रम् 1 U, 4 P, (all with abl.). **3** मृत्युपत्रेण दा 3 U; 'estate left (after death)' रिक्थं. **3** विरम् 1 P, निवृत् 1 A (with abl.); मुच्, त्यज्, अपास् 4 P; oft. ex. by स्था 1 P, आस् 2 A; 'l. it now' तिष्ठतु-आस्तां तदधुना. **4** निक्षिप् 6 P, न्यस्, सम्-ऋ c. (अर्पयति); 'l. everything to him' सर्वं तदधीनं कुरु. **5** शिष् 7 P, or c., अव-परि°; उद्-वृत् c., 'nothing was left' न किमप्यवशिष्टं; 'to be left' शिष् pass.; 'we being left behind' अस्मास्वपहीनेषु (S. 2). -*v. i.* निर्गम्, अप-या, विरम्, &c. **-for,** प्र-स्था 1 A (with acc.). **-off,** विरम्, निवृत्, त्यज्; *See* above. 'the peacock left off dancing' परित्यक्तनर्तनो मयूरः (S. 4). 'when it left off raining' शांते पानीयवर्षे ((H. 3). **-out,** वृज्, परित्यज्. **-Leavings,** *s.* शेषः-षं, परि-अव°; शिष्टं, अव-परि°, शेषभागः-खंडः, उद्वर्तः, उच्छिष्टं. **2** मलं; 'l. of food' शेषान्नं, भक्षित-भुक्त-शेषः-षं, भुक्तावशिष्टं, उच्छिष्टं, भुक्तोज्झितं; 'one who eats l.' शेषभोजिन्, उच्छिष्टाशनः.

Leaven, *s.* किण्वं, नग्नहुः, कारोत्तरः, मंडः-डं. -*v. t.* दुष् c. (दूषयति); रंज् c.

Leacher, *s.* लंपटः, कामासक्तः, कामुकः, स्त्रीपरः-लंपटः, सुरतार्थिन् *m.* **-ous,** *a.* कामुक, कामासक्त, सुरतार्थिन्, स्त्रीपर; *See* **Lustful. -ously,** *adv.* लंपटवत्, कामुकवत्. **-ousness,-y,** *s.* **Lust,** q. v.

Lection, *s.* पाठः. **2** पाठांतरं, पाठभेदः.

Lecture, *s.* प्रपाठः, व्याख्यानं, शासनं, आख्यापनं; 'it is easy to read l. s to others' सुखमुपदिश्यते परस्य (Ka. 156) (*cf.* परोपदेशे पांडित्यं). **2** वाग्दंडः, निर्भर्त्सनवाक्यं. -*v.* पठ् c., अधि-इ c. (अध्यापयति), शास् 2 P, उपदिश् 6 P. **2** निर्भर्त्स् 10 A, निंद् 1 P, गर्ह् 1, 10 A. **-er,** *s.* पाठकः, अध्यापकः, शिक्षकः, उपदेशकः, प्रवक्तृ *m.*, वादिन् *m.*, व्याख्यातृ *m.*

Ledge, *s.* कटकः-कं, कूटं. **2** शिला, शिलाफलकं. **3** फलकः-कं, आस्तरः. **4** आलि-ली *f.*, आवलि-ली *f.*

Ledger, *s.* (बृहत्) गणनापुस्तकं.

Lee, *s.* निर्वातस्थानं-देशः. **2** वाताभिमुखी दिक्. **-ward,** *adv.* अनुवातं, वातानुलोमं.

Leech, *s.* रक्तपा, जलौ(लू)का, जलौकसः (*f.* pl.); जलसर्पिणी, रक्तपायिनी, जलजंतुका. **2** भिषज् *m.*, वैद्यः, चिकित्सकः.

Leek, *s.* कंदः-दं.

Leer, *s.* कटाक्षः, दृष्टिविक्षेपः, दृक्पातः, अर्धवीक्षणं, साचिविलोकितं, अपांगदर्शनं. **2** कुस्मितं. -*v. t.* कटाक्षेण ईक्ष् 1 A or दृश् 1 P, साचि-तिर्यक्-विलोक् 1 A, 10. **2** कुस्मि 1 A. **-ing,** *a.* अपांगदर्शिन्, साचि-तिर्यक्-दृष्टि. **2** कुस्मेर.

Lees, *s.* मलं, किट्टं, उच्छिष्टं.

Left, *a.* वाम, सव्य, दक्षिणेतर; 'l.-handed' वामहस्त, सव्यसाचिन्; 'to the l.' वामेन, वामतः.

Leg, *s.* जंघा, प्रसृता, पादः; 'swelling of the l.' श्लीपदं; 'having a swelled l.' कुंभपादः-पदी; 'long-l. ed' दीर्घपाद-द्, दीर्घजंघ. **-Legging,** *s.* जंघारक्षणं.

Legacy, *s.* उत्तरदानं, मृत्युलेखार्पितदानं.

Legal, *a.* धर्म्य, न्याय्य, स्मार्त (र्ती *f.*), व्यवहारानुरूप, न्यायानुसारिन्, शास्त्रविहित, शास्त्रोक्त, स्मृत्युक्त, धर्म-न्याय-अनिषिद्ध; *See* **Lawful. 2** स्मृति, धर्म, व्यवहार, in comp.; 'l. proceeding' व्यवहारः; 'wrong l. opinion' अव्यवस्था; 'written l. opinion' पट्टोलिका. **-ity,** *s.* न्याय्यता, धर्म्यता, धर्म-शास्त्र-अनुसारः; **2** कर्ममार्गसेवा, कर्मनिष्ठा. **-ize,** *v. t.* व्यवस्था c. (स्थापयति), शास्त्रसंमत-*a.* कृ 8 U, कृ with (*a.*). **-ly,** *adv.* धर्मेण, न्यायेन धर्मतः, न्यायतः; यथाधर्मं, यथान्यायं, धर्मानुसारेण.

Legate, *s.* दूतः, प्रणिधिः. **-Legation,** *s.* दूत-धर्मः-क्रिया, दौत्यं.

Legatee, *s.* मृतारिक्थभागिन् *m.*, उत्तराधिकारिन् *m.*-**Legator,** *s.* उत्तरदानकारिन् *m.*

Legend, *s.* कथा, उपाख्यानं, आख्यायिका, पुरावृत्त-पुराण-कथा, पुरावृत्तं, लोक-जन-कथा, इतिहासः, पुराणं. **-ary,** *a.* पौराणिक (की *f.*), पुराणोक्त, पुराणकथित. -*s.* ऐतिहासिकः, पुराणकथकः.

Leger-de-main, *s.* हस्तलाघवं-चापल्यं माया, कुहका-कं, इंद्रजालं.

Legible, *a.* व्यक्ताक्षर, सुवाच्य, निर्वाच्य, सुव्यक्त सुस्पष्ट, स्पष्टाक्षर. **-Legibly,** *adv.* सुस्पष्टं, व्यक्ताक्षरैः, सुव्यक्तं.

Legion, *s.* चमूः, सेना, वाहिनी; *See* **Force. 2** सैन्य-दलं-गुल्मः-व्यूहः-समूहः. **3** चक्रं, निवहः; 'their name is a l.' अतिसंख्याः-संख्यातीताः-ते.

Legislate, *v. i.* व्यवस्थां वि-धा 3 U or कृ 8 U; विधीन् रच् 10 or प्रक्लृप् c. or स्था c. (स्थापयति), व्यवस्था c. **-ion,** *s.* विधिप्रकल्पनं, व्यवस्था-नियम-विधानं, विधि-नियम-व्यवस्था. **-ive,** *a.* व्यवस्थापक, विधिकारिन्. **-or,** *s.* व्यवस्थापकः, शासितृ *m.*, शास्तृ *m.*, न्यायप्रवर्तकः, व्यवस्थाकारः. **-ure,** *s.* व्यवस्था-विधि-विधायिनी सभा.

Legitimate, *a.* न्याय्य, धर्म्य, उचित, यथायोग्य, यथान्याय; *See* **Lawful, Legal. 2** सत्य, यथार्थ. **3** धर्मज, औरस (सी *f.*), औरस्य, उरस्य, धर्मपत्नीज, स्वजात, सुजन्मन्; 'a l. wife' धर्मपत्नी; 'a l. son' उरस्यः, औरसः-स्यः. -*v. t.* औरसीकृ 8 U. **-ly,** *adv.* यथान्यायं, धर्मेण, न्यायतः, धर्मानुसारेण, यथाधर्मं, युक्तं, यथोचितं, यथार्थं. **-Legitimacy,** *s.* न्याय्यता, धर्म्यता, यथार्थता, युक्तता, औचित्यं. **2** औरसत्वं, सुजन्मन् *n.*, धर्मजत्वं, औरसजन्मन् *n.*

Legume, Legumen, *s.* शमी, शिंबा, मुद्गः, शिंबिका. **2** शमीधान्यं.

Leisure, *s.* अवसरः, अवकाशः, विश्रामः, क्षणः, कार्य-निवृत्ति *f.* -विच्छेदः, विश्रांति *f.*, 'being at l.' लब्धावकाश, प्राप्तावकाश, प्राप्तावसर, निर्व्यापार, लब्धक्षण, कार्यरहित. **-ly,** *a.* मंथर, मंद, अशीघ्र, अक्षिप्र, अत्वरित, सावकाश. -*adv.* 'at leisure,' मंदं मंदं, शनैः, अशीघ्रं, अक्षिप्रं, यथावकाशं, प्राप्तावसरं.

Lemon, *s.* जंबी(बि)रः, जभः, जंभीरः, जंभरः-लः, दंतशठः, फलपूरः, बीजपूरः; रुचकः, मातुलुंगकः; (fruit) जंबीरं, जंभफलं &c.

Lemonade, *s.* जंबीररसः.

Lemures, *s.* *See* **Devil.**

Lend, *v. t.* (अभिहितकालात्) दा 3 U, 1 P, सम्-ऋ c. (अर्पयति) निक्षिप् 6 P, न्यस् 4 U; 'l. money' ऋण दा 'l. money at interest' कुसीदं कृ 8 U; 'l. one's hand to' उपकृ, अनुग्रह् 9 P; *See* **Help**; 'l. one's ear to' श्रु 5 P, सावधानो भूत्वा आकर्ण् 10. **-er**, *s.* उत्तमर्णः, ऋणदायिन् *m.*, ऋणदः. **-ing**, *s.* ऋणदानं, ऋणसमर्पणं.

Length,-en, *See* under **Long.**

Lenient, *a.* सौम्य, मृदु, अतीक्ष्ण, कोमल, अतीव्र, अपरुष; क्षमावत्, क्षमिन्, सदय, कृपालु, दयार्द्र. 2 सांत्वकारिन्, साम in comp.; 'a l. measure' सामोपायः, सामोपचारः, सामप्रयोगः. **-ly**, *adv.* अनुग्रं, अतीक्ष्णं, सौम्यं, सदयं, अपरुषं, क्षमापूर्वं. **-Lenity, -Leniency**, *s.* सौम्यता, मृदुता, अतीक्ष्णता, अतीव्रता, कोमलता, क्षमा, क्षमाशीलता, दया, दयार्द्रभावः, कृपा; सामन् *n.*, सामबुद्धि *f.* **-Lenitive**, *a.* शमक, शांतिद, शांतिकर (री *f.*). 2 स्निग्ध, चिक्कण. **-s.** प्र-उप-शमनं, क्लेशापहं, शूलघ्नं.

Lens, *s.* काचः; 'convex l.' मध्योन्नतकाचः; 'concave l.' मध्यनिम्नकाचः; 'a double convex l.' यवः; 'a crystal l.' सूर्यकांतः, अर्काश्मन् *m.*, दीप्तोपलः.

Lenticular, *a.* मसूरोपम.

Lentiform, *a.* यवाकृति, यवरूप.

Lentigo, *s.* जटु(डु)लः, कालकः, पिप्लुः. **-Lentiginous**, *a.* जटुलिन्, कालकयुक्त.

Lentil, *s.* मसु(सू)रः-रा.

Lentous, *a.* सांद्र, श्यान, घन. **-Lentor**, *s.* सांद्रता, श्यानता.

Leo, *s.* सिंहः, सिंहराशिः. **-Leonine**, *a.* सैंह (ही *f.*), सिंहशील-धर्मन्.

Leopard, *s.* चित्रकः, चित्रव्याघ्रः.

Leper, *s.* कुष्ठिन् *m.*, श्वित्रिन् *m.*, कुष्ठरोगिन् *m.*, कुष्ठपीडितः. **-Leprosy**, *s.* कुष्ठं, श्वित्रं, कोठः, मंडलकं, कुष्ठरोगः, त्वग्रोगः, दुश्चर्मन् *n*, 'black l.' महारोगः, महाव्याधिः, रक्तकुष्ठं; 'wasting l.' गलत्कुष्ठं. **-Leprous**, *a.* कुष्ठिन्, श्वित्रिन्, कुष्ठपीडित.

Lesion, *s.* अपकारः, पीडा, क्षति *f.*

Less, *c.* न्यून, ऊन, अल्पतर, अल्पीयस्, क्षुद्रतर, स्तोकतर, सूक्ष्मतर. **-*adv.*** न्यूनं, अल्पं, &c.; 'no l. than' ex. by अवर-*a.*; त्र्यवराः साक्षिणः; 'much l.' किमुत, किं पुनः, किमु; 'a little l. than 10,000 years' किंचिदूनं शरदामयुतं (R. x. 1);); (as a suffix) ex. by अ, निर्, विहीन, रहित, वर्जित, वीत, विगत, in comp. **-en**, *v. t.* न्यूनीकृ 8 U, ऊन 10, ह्रस् c., अप-चि 5 U, लघूकृ, लघयति (D.), क्षि 1, 5 P or c. **-*v. i.*** ह्रस् 1 P, न्यूनीभू 1 P, अल्पीभू, क्षि-अपचि-pass. **-er**, *a.* क्षुद्रतर, &c.

Lessee, *s.* पट्टोलिकाधारिन् *m.*

Lesson, *s.* पाठः, अध्यायः. 2 शासनं, उपदेशः, बोधः-धनं, शिक्षा. 3 वाग्दंडः, भर्त्सनं; take l. from' उपदेशं ग्रह् 9 U. **-*v. t.*** उपदिश् 6 P. शास् 2 P.

Lest, *conj.* नोचेत्, अन्यथा, 'love not sleep l. thou come to want' तंद्रासक्तो मा भव नोचेत् अकिंचनो भविष्यसि; sometimes ex. by न इति or कदाचित् with pot. or मा with simple future or imperative; मा कस्यापि तपस्विनो हस्ते पतिष्यति (S. 2) 'l. she fall into the hands &c.' मास्य विकारो वर्धतां (M. 4); 'l. he should kill us' मा नो हिंसीदिति; 'beware l. you be enticed by women' तथा प्रयतेथा यथा न प्रलोभ्यसे वनिताभिः (Ks. 109.)

Let, *v. t.* अनु-ज्ञा 9 U, अनुमन् 4 A, अनुमुद् 1 A, सह् 1 A; oft. ex. by the imperative of aorist forms without अ; 'l. it not so happen' एवं मा भूत्. 2 भाटकेन दा 3 U; मूल्येन दा or विसृज् 6 P, 3 रुध् 7 U, निवार् 10: स्तंभ् 9 P. 4 (Blood) स्रु c., मोक्ष् 10; *See* **Bleed**; 'l. alone' न उपद्रु 1 P, न बाध् 1 A, oft. by आस् 2 A, स्था 1 P; 'now l. it alone' आस्तां तावदेव; 'l. go,' 'l. loose' मुच् 6 P or c., मोक्ष्, शिथिलीकृ 8 U; शिथिलयति (D.), स्रंस् c., विसृज्, श्र(श्रं)थ्-श्लथ् 1 P, 10; 'l. ing his hand go' मुक्त-स्रस्त-शिथिलित-हस्तः; 'l. slip' मुच्, विक्षिप् 6 P, मुधा या c. (यापयति). **-down**, अवतॄ c., अवरुह् c. (रोपयति), अव-नि-पत् c., अवमुच्, अवसृज्, अधःनि-धा 3 U or स्था c (स्थापयति). **-in**, प्रविश् c.; अभ्यंतरीकृ. **-off**, निर्-विमुच्; प्रास्, क्षिप्, ईर् c., विसृज्, मोक्ष्; 'l. off with a fine' दंडदानेन विमुक्त. **-out**, मुच्, मोक्ष्. 2 भंज् 7 P, भिद् 7 P, प्रकाश् c. (as secrets). 3 पण्येन दा.

Lethal, *a.* *See* **Deadly** under **Die.**

Lethargy, *s.* जाड्यं, मंदता, निद्रालुता, आलस्य, तंद्रा, तंद्रि-द्री *f*, जडबुद्धित्वं, निद्रालसता, कार्यजडता, कार्यद्वेषः, अतिमांद्यं. 2 घोर-गाढ-निद्रा, निर्भरनिद्रा. **-ic**, *a.* निद्रालु, निद्रालस, निद्राशील, जड, मंद, जडबुद्धि, सुप्तमति; कार्यजड, कार्यविमुख (खी *f.*); आलस्यशील. **-ically**, *adv.* जडवत्, मंदवत्. **-icalness**, *See* (*s.*)

Lethe, *s.* विस्मृति *f.*, विस्मरणं, स्मृतिनाशः-लोपः. 2 वैतरणी.

Letter, *s.* अक्षरं, वर्णः; 'printing l.' मुद्राक्षरं. 2 लेखः, पत्रं, लेख्यं, संदेशपत्रं; 'by l.' पत्रद्वारेण; 'l. from an inferior to a superior' विज्ञप्ति-विज्ञापना-पत्रं; 'l.-carrier' पत्रवाहः, लेखहारः. 3 शब्दार्थः, अक्षरार्थः, वाक्यार्थः, वचनं; 'obey orders to the l.' यथावचनं आज्ञामनुरुध् 4 A. 4 (Letters) विद्या, ज्ञानं; 'a man of l. s' कृतविद्यः, विद्वान्, *See* **Learned**; 'l. by l.' अक्षरशः

'a dead l.' लुप्तार्थं वचनं. -*v. t.* अक्षरैः अंक् 10 or मुद्र् 10. **-ed,** *a.* अक्षरांकित, अक्षरमुद्रित-चिह्नित. 2 कृतविद्य, उपात्तविद्य; *See* **Learned.**

Lettuce, *s.* हरितकं, शिग्रुः.

Levant, *a.* पूर्वदेशज, प्राग्भव, पौरस्त्य, पूर्वदिक्स्थ. -*s.* पूर्वदेशः, प्राग्देशः.

Levee, *s.* राजदर्शनं, राजदर्शनमेला, दर्शकमेला.

Level, *a.* सम, समस्थ, सपाट, समरेख, समभूमिस्थित; 'lie l. with the ground' भूमिसात्कृ pass. 2 क्षितिजसमसूत्र; 'a l. ground' समभूमि *f.*, सानु *m. n.*, प्रस्थः, समस्थलं-ली. -*s.* समं, समभूमिः-स्थलं, समतलं-पृष्ठं-देशः, प्रस्थः, प्रदेशसमता, पाटः. 2 समता, तुल्यता, साम्यं, तुल्य or सम-भावः or वृत्ति *f.*; 'reduced to the l. of the poor, दरिद्रसमतां नीत-गमित; 'on a l. with' सम, तुल्य, समान; 'along the l.' अनुप्रस्थं. 3 लक्ष्यसूत्रं-देशः. 4 नियमः, सूत्रं. -*v. t.* समीकृ 8 U; समस्थलीकृ. 2 लक्ष्यीकृ, उद्दिश् 6 P. सं-धा 3 U, प्रेर् c, मुच् 6 P, क्षिप् 6 P. **-ler,** समकारिन् *m.*, विशेषनाशकः, भेद-भाव-लोपकः. **-ness,** *s.* समता, साम्यं, समभूमिभावः.

Lever, *s.* उत्तोलनदंडः; तुलायंत्रं.

Leveret, *s.* शशशिशुः-शावकः.

Leviathan, *s.* तिमिः, तिमिंगलः.

Levigate, *v. t.* चूर्ण् 10, क्षुद् 7 U, पिष् 7 P. 2 श्लक्ष्णीकृ 8 U, परिष्कृ.

Levitate, *v. t.* लघूकृ 8 U.

Levitical, *a.* याजकीय, पुरोहितसंबंधिन्.

Levity, *s.* लघुता, लाघवं, लघिमन् *m.*, गौरवहीनता. 2 चापल्यं, चांचल्यं, तरलता, लोलता, चापलं, लौल्यं.

Levy, *v. t.* (Forces) समा-हृ 1 P, शस्त्रास्त्रं ग्रह् c., युद्धे व्या-पृ c. or प्रवृत् c. 2 (A tax) ग्रह् 9 U, आदा 3 A, दा c. (दापयति); 'l. ed taxes from them' स ताभ्यो बलिमग्रहीत् (R. i. 18). -*s.* सैन्यसमाहारः. 2 दापनं, ग्रहणं 3 सैन्यसमूहः.

Lewd, *a.* कामुक, कामवश, सुरतार्थिन्, लंपट, भोगासक्त, कामासक्त; *See* **Lustful.** 2 दुष्ट, दुराचार, दुर्वृत्त, दुरात्मन्, पापात्मन्. **ly,** *adv.* कामुकवत्, लांपट्येन. **-ness,** *s.* लांपट्यं, भोगासक्ति *f.*, रतार्थिता, व्यवायेच्छा. 2 दुष्टता, दुराचारता, दौरात्म्यं.

Lexicon, *s.* कोशः-षः; अभिधानं, शब्दसंग्रहः-कोशः, निघंटुः. **-Lexicographer,** *s.* कोशकारः. **-Lexicography,** *s.* कोशरचना.

Liable, *a.* योग्य, अधीन, अर्ह, वश in comp.; gen. ex. by अर्ह् 1 P, पात्रं, आलु or शील in comp., or by pot. pass. pa t.; 'l. to punishment' दंडनीय, दंडयोग्य, दंडार्ह; 'l. to be blamed' निंदापात्रं; 'l. to fall' पतयालु, पतनशील; 'man is l. to err' मनुष्याः स्खलनशीलाः-प्रमादाधीनाः; *See* **Apt,** also. 2 अनुयोगाधीन, प्रष्टव्य, आह्वानाधीन, अभियोज्य. **-ness,-Liability,** *s.* अधीनता, शीलता, पात्रता, आलुता in comp.; आह्वानाधीनता, अनुयोगाधीनता. 2 (Liabilities) ऋणं, उद्धारः, पर्युदंचनं.

Liaison, *s.* संबंधः, प्रेमबंधः.

Liar, *s. See* under **Lie.**

Libation, *s.* उदक-दानं-तर्पणं-पातनं-निषेकः, (देवतार्थं) पेयनिषेकः 2 तर्पणोदक, निषिक्तद्रव्यं-रसः, अभिघारः; 'to make l. s to' उदकादिदानेन तृप् c., उदकं पत् c. or निषिच् 6 P.

Libel, *s.* परि(री)वादलेखः, अपवाद-निंदा-आक्षारण-लेखः-पत्रं, पिशुनलेख. -*v. t.* परि-वद् 1 U, अप-भाष् 1 A, अभि-शंस् 1 P, निंदापत्रेण कलंकयति (D.) or आक्षर् 10; 'not only he who actually l.s great persons, but he also who countenances such l. is guilty' न केवलं यो महतोपभाषते शृणोति तस्मादपि यः स पापभाक् (K. v. 83). **-ler,** *s.* अपवादकः, अभिशंसकः, परिवादरतः, अभ्यसूयकः, पिशुनः. **-lous,** *a.* परिवादगर्भ, कलंकावह, अपवादक, पिशुन, कलंक-दुष्कीर्तिकर (री *f*).

Liberal, *a.* उदार, वदान्य, दानशील, अकृपण, बहुप्रद, स्थूललक्ष्य, त्यागिन्, त्यागशील, मुक्तहस्त, उदारहस्त, व्यय-पर-शील. 2 (L.-minded) उदार-धी-चेतस्-चरित, महात्मन्, महानुभाव, महेच्छ, महाशय. 3 कुलीन, महाकुल, अभिजात. 4 विपुल, बहुल, प्रचुर, परिपूर्ण, अतिरिक्त; 'l. education' सार्वविषयिकं ज्ञानं. **-ity,** *s.* औदार्यं, वदान्यता, त्यागः, दानशीलता, अकार्पण्यं, बहुप्रदत्वं, दातृत्वं, अतिदानं. 2 माहात्म्यं, उदारचित्तत्वं, चित्तौदार्यं. **-ly,** *adv.* उदारतया, अकार्पण्येन, मुक्तहस्तेन, अति-व्ययेन-त्यागेन; बाहुल्येन, बहु :.

Liberate, *v. t.* मुच् 6 P or c., मोक्ष् 10, वि-निर्°; विसृज् 6 P, निस्तृ c., उद्-धृ-हृ 1 P, त्रै 1 A. **-ion,** *s.* वि-,मुक्ति *f.*, मोचनं, मोक्षः-क्षणं, उद्धारः, त्राणं, निस्तारः. **-or,** *s.* वि-,मोचकः, मोक्षकः, उद्धर्तृ *m.*, तारकः, निस्तारकः, रक्षितृ *m.*

Libertine, *a.* खंडितवृत्त, व्यसनिन्, कामविषयासक्त, विषयिन्, भोग-काम-आसक्त, दुर्वृत्त, निर्-अ-मर्याद, भ्रष्टचरित्र, मुक्तमर्याद, दुराचार, व्यभिचारिन्, कामवृत्त. -*s.* लंपटः, कामुकः, कामासक्तः, विटः, स्त्री-लंपटः-परः-सेविन् *m.* **-ism,** *s.* व्यसनं, व्यभिचारः, लांपट्यं, विषयासक्ति *f.*, भोग-काम-आसक्तिः, दुर्वृत्तता, अमर्यादा, स्त्रीव्यसनं-व्यासंगः.

Liberty, *s.* स्वाधीनता, स्ववशता, स्वतंत्रता, स्वातंत्र्यं, अनायत्तता, अपारतंत्र्यं, अयंत्रणं, दास्याभावः, अदास्यं, स्वाच्छंद्यं, स्वेच्छाचारता. 2 स्वेच्छा, स्वकामः, स्वरुचि *f.*, यदृच्छा. 3 अनुज्ञा, अनुमति *f.* 4 मुक्ति *f.*, मोक्षः-क्षणं, मोचनं. 5 विरहः, अभावः, शून्यता. 6 अधिकारः, क्षमता, शक्ति *f.* 7 कर्मवशता, दैवानधीनता, अदैवपरता. 8 अमर्यादा, मर्यादातिक्रमः, अविनयः, विनयातिक्रमः, विनयोल्लंघनं; 'don't take l. with your teachers' गुरुषु अविनयं मा कार्षीः; 'your ladyship is at l. to do what befits the occasion' यदत्रावसरप्राप्तं तत्र प्रभवति भवती (Ka.158), बंधे मोक्षे च अधुना सा ते प्रभवति (Ka. 354) 'she is at l., to detain or set you free'; 'to set at l.' मुच् 6 P or c. मोक्ष् 10; *See* **Liberate**; 'at l.' अयंत्रित, निरवग्रह; *See* **Free.**

Libidinous, *a.* *See* **Lustful.**

Libra, *s.* तुला, तुलाराशिः. **-Librate,** *v. t.* तुल् 10. **-ion,** *s.* तोलनं.

Library, *s.* पुस्तकसंग्रहः-समूहः, ग्रंथसमुदायः-संग्रहः. 2 पुस्तकालयः, ग्रंथालयः, ग्रंथशाला, पुस्तकशाला-अगारं. **-Librarian,** *s.* ग्रंथशालाध्यक्षः, पुस्तकालयाधिकृतः, ग्रंथाध्यक्षः.

License, *s.* अनुज्ञा, अनुमति *f.*, आज्ञा; 'written l.' अनुज्ञापत्रं-लेखः. 2 अनियंत्रणं, मर्यादातिक्रमः, व्यतिक्रमः, उत्क्रमः, निर्यंत्रणं; 'poets have l. (in every way)' निरंकुशाः कवयः. *-v. t.* अनु-ज्ञा 9 U. आज्ञापत्रं-अनुमतिलेखं-दा 3 U. अनुमन् 4 A. **-Licentiate,** *s.* लब्धानुज्ञः, अधिकारयुक्तः, दत्ताधिकारः.

Licentious, *a.* अनियंत्रण, निर्मर्याद, स्वेच्छाचारिन्, कामवृत्त, स्वैरिन्, उच्छृंखल, अबद्ध, अनर्गल. 2 कामासक्त, उद्दामचरित, अतिक्रांतमर्याद, दुराचार, अशिष्टाचार, धर्मभ्रष्ट, व्यसनिन्, व्यसनासक्त, विषयासक्त, कामुक, दुर्वृत्त, लंपट; स्त्रीव्यसनिन्; *See* **Libertine, Lustful.** **-ly,** *adv.* उच्छृंखलं, निर्यंत्रणं, निर्मर्यादं; कामुकवत्, लंपटवत्. **-ness,** *s.* व्यभिचारः, अत्याचारः, दुराचारः, दुर्वृत्तता, व्यसनिता, भ्रष्टचारित्रं-त्र्यं, लांपट्यं, स्त्रीसंगपरता, मर्यादातिक्रमः, व्यतिक्रमः, उत्क्रमः, निर्यंत्रणा.

Lichen, *s.* सूकरी, सूकराक्रांता, शिलावल्का.

Lick, *v. t.* लिह् 2 U, आ-अव-सं-परि°; 'l. up' ग्रस् 1 A, गॄ 6 P. 2 तड् 10, प्र-हृ 1 P; 'l. the dust (before one)' भूमौ निपत् 1 P or शी 2 A. **-ing,** *s.* लेहः-हनं. 2 आघातः, प्रहारः, ताडनं, दंडाघातः, वेत्रप्रहारः. **-Lickerish,** *a.* सुरस, स्वादु, मिष्ट. 2 लेहनोत्सुक, भोगोत्सुक.

Licorice, *s.* यष्टिमधु *n.*, यष्टि(ष्टी)मधुकं, मधुयष्टिका, मधुकं, क्लीतकं.

Lid, *s.* पिधानं, आच्छादनं, आवरणं, पटलं, पुटः-टं-टी, छदः-दनं, शरावः, मुद्रः, वर्धमानकः, उदंचनं; 'eye-l.' नेत्रच्छदः, अक्षिपुटः.

Lie, *s.* असत्यं, अनृतं, वितथं, अतथ्यं, अलीकं, मृषा or अनृत-वाक्यं or वचनं, मृषोक्ति *f.*, मृषोद्यं, मिथ्या-वादः-भाषणं-वचनं-उक्तिः, मृषा-असत्य-वादः, असत्यभाषणं. *-v. i.* शी 2 A, अधि-शी (with acc.), आस् 2 A, निपत् 1 P, संविश् 6 P, 2 वस् 1 P, स्था 1 P, अव-स्था 1 A; gen. by भू, वृत् 1 A, अस् 2 P, विद् 4 A; 'Lankā l. s to the south of India' लंका भारतवर्षस्य दक्षिणतोऽवस्थिता or वर्तते. 3 **Consist in,** q. v. 'l. hard upon' पीड् 10, बाध् 1 A, आ-यस् c. **-down,** शी, संविश्, स्वप् 2 P, निपत्. **-in,** प्रसवावस्थायां वृत्; 'lying-in-chamber' अरिष्टं, सूतिकागृहं; 'l. in the wait' निभृते स्था, नि-ली 4 A; 'l. in the way' रुध् 7 U, अंतर्-इ 2 P, अंतरायो भू. **-on,** आ-अव-समा-लंब् 1 A, आश्रि 1 U; *See* **Depend.** 2 'Be incumbent' q. v. **-with,** संगम् 1 A, अनुगम्, मैथुनं कृ 8 U. 2 अधीन-*a.* भू; गम्; 'the fault l. s with you entirely' सर्वथा तवैवायं दोषः, त्वमेवात्र सर्वात्मना दोषभाक्; 'the fault l. with my friend' सखीगामी (अयं) दोषः (S. 4).

Lie, *v. i.* अनृतं-मिथ्या-असत्यं-वद् 1 P or वच् 2 P or भाष् 1 A, &c. (Speak, q.v.); 'thou liest in the throat' नितांतमनृतं वदसि; **-Liar,** *s.* मिथ्या-मृषा-अनृत-असत्य-वादिन् or भाषिन्, असत्यवाच्, अलीक-वाच्, अनृतिन्, all *m.* असत्यशीलः, मिथ्यावादशीलः. **-Lying,** असत्य-अनृत-मिथ्या-भाषणं, मृषा-मिथ्या वादः, मिथ्यावादित्वं, असत्यता; *See* (*s.*). *-a.* मृषावादिन्, अनृतवाच्, असत्य; *See* above.

Lief, *adv.* कामं, प्र-नि-कामं, कामतः, इच्छापूर्वं, संतोषेण, प्रीत्या.

Liege, *s.* प्रभुः, स्वामिन् *m.*, ईश्वरः, पतिः; महाराजः, देवः (in addressing). *-a.* भक्त, सेवा-भक्ति-बद्ध, प्रभु-स्वामि-भक्त, स्वाम्यनुरक्त, प्रभुवश; 'l. man' भक्तः, प्रभुसेविन् *m.* 2 आज्ञापकः; better ex. by (*s.*).

Lien, *s.* आविहितकाल *-a.* स्वाम्यं or अधिकारः or स्वत्वं.

Lientery, *s.* अतिसारः, आमातिसारः.

Lieu, *s.* स्थानं, भूमि *f.*; 'in l. of' स्थाने, विनिमयेन; *See* **Instead** (of). **-Lieutenant,** *s.* प्रतिनिधिः, प्रतिपुरुषः; (lit.) सेनापतिप्रतिनिधिः; 'l. governor' प्रतिशासकः; 'lord l.' राजप्रतिनिधिः.

Life, *s.* जीवनं, जीवितं, प्राणधारणं, असुधारणं. 2 जीवः, सत्त्वं, जीवितं, चैतन्यं

चेतना, प्राणवायुः, प्राणात्मन् *m.*, जीवात्मा; 'endowed with l.' जीविन्, प्राणिन्, सजीव, सचेतन; 'love of l.' जीविततृष्णा, जिजीविषा; 'impatience of l.' जीवितद्वेषः-त्रासः; 'deprived of l.' हतप्राण-जीवित, नष्टप्राण; 'support of l.' प्राणयात्रा-धारणं-रक्षणं; 'reckless of l.' जीवितव्ययिन्, जीवितनिरपेक्ष; 'means of l.' जीवनोपायः. 3 (Life-time) आयुस् *n.*, जीवितं, जीवनं, जीवितकालः, आयुर्मर्यादा, आयुःपरिमाणं; 'possessed of long l. दीर्घायुस्, आयुष्मत्, चिरायुस्; 'for l.' 'during l.' 'all one's l.' यावज्जीवं, आमरणात्; 'in all one's l.' आजन्म, जन्मतः प्रभृति or आरभ्य; 'my lamp of l. is nearly out' निर्वाणभूयिष्ठो मे जीवितप्रदीपः or अवसितप्रायो मे जीवितावधिः. 4 (fig.) जीवितं, प्राणाः, (त्वं जीवितं मे U. 3). 5 संसारः, भवः, संसृति *f.*, लोकयात्रा, भूलोकवासः, इहवासः. 6 वृत्ति *f.*, आचारः, व्यवहारः, रीति *f.*, चेष्टितं, प्रवृत्तिः, वृत्तं, आचरणं; 'leading a virtuous l.' साधुवृत्त, सदाचार, पुण्यमार्ग. 7 चरितं, चरित्रं, जीवनवृत्तांतः, चरित्ररचना-कथनं. 8 अवस्था, दशा, स्थिति *f.*, वृत्तिः, भावः, गति *f.* 9 उत्साहः, वीर्यं, तेजस् *n.*, सत्वं, रसः; 'bring or restore to l.' उज्जीव् *c.*, सोच्छ्वास-*u.* कृ 8 U, असून् प्राप् *c.*, (परीक्षितं दुर्लभानसून्प्रापितवान् Ka. 175); 'come to l.' उज्जीव् 1 P; 'active l.' प्रवृत्तिः, प्रवृत्ति-संसार-मार्गः, लोकव्यवहारः; 'retired l.' निवृत्तिः, निवृत्तिमार्गः; 'he entered on a military l.' योधवृत्तिमाश्रयत; 'engaging in public l.' लोकव्यवहारप्रवृत्तिः; 'in this l.' इह, इहलोके; 'the vicissitudes of l.' संसारचक्रं-परिवर्तनं, दशांतराणि; 'l.-blood' प्राणः, तत्वं, सारभूतं द्रव्यं; 'l. -giving' प्राणद, जीव-द-दायिन्; वीर्यद, उत्साहकर (री *f.*); 'l. guard' राजपरिचरः, शरीररक्षकः; 'l. -time' जीवितावधिः, जीवितकालः; 'during one's l.-time' यावज्जीवं. **-less,** *a.* गतजीवित, गतासु, परासु, व्यसु, गत-नष्ट-प्राण, हतजीवित, प्राण or जीव-रहित or हीन, अचेष्ट. 2 अजीव, निर्जीव, वि-अ-चेतन, चैतन्य-हीन-रहित, निश्चेतन. 3 निःसत्व, निरुत्साह, निस्तेजस्, सत्व-रस-हीन.

Lift, *v. t.* उन्नम् *c.* (नमयति), उद्गम् *c.* (गमयति), उच्छ्रि 1 U, उद्यम् 1 A, उत्था *c.* (उत्थापयति), उत्क्षिप् 6 P, उद्वह् 1 P, उन्नी 1P, उत्कृष् 1 P, उत्तुल् 10; oft. by उत् in comp.; 'with the neck l.-ed up' उत्कंधरः; उद्बाहुः, ऊर्ध्वग्रीवः, उन्मुखः, &c. 2 (In rank) उत्कृष्टपदे नियुज् 7 A, 10, मानं संवृध् *c.*, प्रतिपत्ति-प्रतिष्ठा-उत्कर्ष-पद-वृद्धि-लभ् *c.* (लंभयति); 'l. with pride' दृप् *c.*, गर्वेण उद्धन् 2 P, दर्पेण आ-ध्मा 1 P; 'to l. up the voice' तारस्वरेण-उच्चैः-आक्रुश् 1 P. —*s.* उन्नमनं, उच्छ्रयः, उत्कर्षः, उत्थापनं. 2 प्रतिपत्ति *f.*, पदवृद्धि *f.*, उन्नति *f.* 3 उपकारः, साहाय्यं.

Ligament, *s.* बंधः, बंधनं, पाशः, निगडः, शृंखला-लं-लः. 2 संधिबंधः, ग्रंथि-अस्थि-बंधनं.

Ligature, Ligation, *s.* बंधनं, वेष्टनं, परि-आ-वेष्टनं, रज्जु *f.*

Light, *a.* लघु (in all senses); अगुरु, अल्पभार, अल्पप्रमाण, लघुभार, लघुप्रमाण; सुवाह्य, सुखवाह्य, सुसह्य, अदुर्वह, अदुःसह. 2 सुख, सुकर, अकष्ट, सुसाध्य, सुगम, निरायास, अविषम, अकठिन. 3 चपल, लघु, लघुशरीर-गति. 4 सोल्लास, प्रफुल्ल, निश्चिंत. 5 चपल, चंचल, लोल, तरल, अस्थिर, अनवस्थित, लघुचित्त-स्वभाव-चेतस्, गांभीर्यहीन, निर्गौरव. 6 तुच्छ, क्षुद्र, अत्यल्प, तृणप्राय, लघ्वर्थ, अल्पार्थ, अल्प-लघु-प्रभाव; 'l. armed' लघ्वायुध, लघुशस्त्रभृत्; 'l.-fingered' लघुहस्त, चपलपाणि; 'l.-footed' लघु-शीघ्र-गति, द्रुतगति; 'l.-headed' लघुचित्त-चेतस्, चपल-लोल-मति; भ्रांत or विक्षिप्त-बुद्धि or चित्त; बुद्धिभ्रमात् प्रलापिन्; 'l.-headedness' चित्त or बुद्धि-भ्रमः or विप्लवः; 'l-hearted' लघुचित्त-चेतस्, क्षुद्रमनस्; हृष्ट-प्रसन्न-हृदय, उल्लासिन्, प्रफुल्लचित्त, आनंदित, सोल्लास; 'l.-minded' लघु-चेतस्-चित्त, क्षुद्र or कृपण-बुद्धि or मति; 'l. spirited' हृष्टहृदय-चित्त, &c. 7 पांडु, श्वेत; oft. ex. by आ, ईषत्; 'l. red' श्वेतारुण, ईषद्रक्त; 'l. blue' श्वेतनील, आनील; 'l. food' सुपचं-सुपाकं-अन्नं; 'to make l. of' लघूकृ 8 U, लघु मन् 4 A, न गण् 10, तृणाय मन्. —*v. i.* आ-पत् 1 P; (अकस्मात्) आसद् *c.*, प्राप् 5 P, आ-उपा-गम् 1 P. 2 अवतॄ 1 P, अव-रुह् 1 P, अव-नि-पत्; अध्यास् 2 A, अधि-शी 2 A (with acc.), निषद् 1 P, नि-ली 4 A. **—en,** *v. t.* लघूकृ, लघयति (D.); शम् *c.* (शमयति), प्र-उप°. **—er,** *a.* लघुतर, लघीयस्. —*s.* तरांधुः, वहित्रं, उडुपं. **—ly,** *adv.* लघु, लाघवेन, अल्पप्रमाणेन. 2 सुखेन, अकष्टेन, अनायासेन. 3 निष्कारणं, हेतुं विना. 4 लघुगत्या, चपलं, सत्वरं. 5 लघुचेतसा, चंचलवत्, अस्थिरतया; 'to think l.' लघु मन् 4 A. **—ness,** *s.* (lit.) लघुता-त्वं, लाघवं, अल्पभारत्वं, भाराभावः. 2 सुखं, सौकर्यं, अनायासः, सुसाध्यता, अकष्टत्वं. 3 सुवाह्यता, सुसह्यता. 4 लाघवं, चापल्यं, द्रुतगतित्वं, शरीरलघुता. 5 चापल्यं, चांचल्यं, अस्थिरता, लोलता, चपलता, अगौरवं, लघिमन्, लाघवं, लघुता. 6 लघुता, तुच्छता, क्षुद्रता. **—some,** *a.* हृष्ट, सोल्लास, प्रफुल्ल, वीतचिंत, सानंद.

Light, *s.* प्रकाशः, आलोकः, भा, प्रभा, आभा, द्युति *f.*, कांति *f.*, दीप्ति *f.*, तेजस् *n.*, ज्योतिस् *n.*, रुचि *f.*, भास् *f.*, त्विष् *f.*; वर्चस् *n.* 2 प्र-,दीपः, दीपिका; ' l. house ' दीपगृहं. 3 ज्ञानं, बोधः, अवगमः, प्रकाशः. 4 प्रसिद्धि *f.*, प्रख्याति *f.*, प्राकाश्यं, प्रकाशता, प्राकट्यं. 5 दृष्टि *f.*; ' See or come to l. ' प्रसिद्धि-प्रकाशतां-गम् 1 P, प्रकाशी भू 1 P, आविर्भू, प्रादुर्भू; ' bring to l. ' प्रकाश् c., प्रकटीकृ 8 U, स्पष्टीकृ, आविष्कृ, वि-वृ 5 U, प्रख्या c. (ख्यापयति); 'to throw l. on', विशदीकृ, विवृ, प्रकाश् c.; *See* **Explain**; ' from the l. of utility ' उपयोगदृष्ट्या; ' considered in this l. ' अनया दृष्ट्या. -*v. t.* दीप् c., उत्-प्र-सं°; प्र-,द्युत् c., प्रकाश् c., अव-वि-भास् c., ज्वल् c., प्र-उत्-सं-°; सं-,इंध् 7 A; संधुक्ष् 10; तप् c., प्र-सं-उत्°; ' to be l. ed ' दीप् 4 A, ज्वल् 1 P. **-en,** -*v. t.* प्रकाश् c., दीप् c., ज्वल् c., द्युत् c.; *See* (*v.t.*) above. -*v. i.* स्फुर् 6 P, द्युत् 1 A, प्रकाश् 1 A, विलस् 1 P. **-er,** *s.* प्रकाशकः, द्योतकः, दीपकः, द्युतिदः. **-less,** *a.* निष्प्रभ, अप्रभ, निरालोक, निस्तेजस्. **-some,** *a.* दीप्तिमत्, प्रकाशवत्, सुप्रभ, तेजस्विन्, सुप्रकाश, तेजोमय (यी *f.*). **-ning,** *s.* तडित्, विद्युत्, सौदामि(म)नी, अचिरप्रभा, क्षणदा, चंचला, चपला, शतह्रदा, ह्रादिनी, शंपा, ऐरावती, क्षण-प्रभा-द्युति (all *f.*); ' fire of l. ' वैद्युतः अग्निः; ' forked l. ' तडिल्लता, विद्युल्लता; ' the falling of l. ' विद्युत्पातः; ' struck by l. ' विद्युता उपहत.

Ligneous, *a.* काष्ठ-दारु-मय (यी *f.*), काष्ठ-दारु-रूप.

Ligniferous, *a.* काष्ठद, दारुप्रद.

Ligniform, *a.* काष्ठरूप, काष्ठाकृति.

Like, *a.* सदृश (शी *f.*), तुल्य, सम; समान, सन्निभ, अनुकारिन् (with gen. or instr.); oft. by उपम, निभ, रूप, विध, प्रतिम, संकाश, नीकाश, प्रतिकाश, भूत, (all in comp.); also by स or अनु in comp.; ' of l. properties ' सगुण, अनुगुण-धर्मन्, सम-तुल्य-गुण, समभाव; 'of l. form' सरूप, अनुरूप, तुल्याकृति, तुल्यरूप; ' l. a father ' पितृभूतः, पितृस्थानीयः; ' of l. class ' सजाति, सजातीय, सवर्ण, सवर्ग, तुल्यवर्ण; ' almost l. Hara ' हरकल्प; ' l. this ' ईदृश-श्, एतादृश-श्; ' l. that ' तादृश्-श; l. what ' कीदृश्-श; l. which ' यादृश्-श; ' l. me, us ' मादृश, अस्मादृश, &c.; ' l. thee, you ' त्वादृश, युष्मादृश, &c.; 'l. your honour ' भवादृश; ' to be l. ' अनुकृ 8 U (with gen.), संवद् 1 P (with instr.), अनुहृ 1 P (with acc.); *See* **Resemble**; ' the son was l. his generating cause (father) ' न कारणात् स्वाद्बिभिदे कुमारः (R. v. 57); ' these and the l. ' एवमादि; ' in l. manner ' तथा, एवं, तद्वत्, तथैव, एवमेव, एवंविधं. -*s.* समः, तुल्यः, सदृशः, तुल्यगुणः, यमकः-लः; ' his l. was and will never be seen ' अनेन सदृशो न भूतो न भविष्यति. -*adv.* Ex by वत् in comp., इव, यथा, निर्विशेषं in comp.; ' l. an earthen pot' मृद्घटवत्; often by Karm. or Bah. comp.; ' black l. a cloud ' मेघश्याम; ' having a moon-l. face ' चंद्रमुख; 'brought up l. one's own children' अपत्यनिर्विशेषं संवर्धित; ' to act l. ' अनुष्ठा. 2 **Likely,** q. v. -*v. t.* रुच् 1 A (with dat. of person who likes); अभिनंद् 1 P, अनु-सं-अभि-मन् 4 A, अनुमुद् 1 A, प्रशंस् 1 P, प्री pass., तुष् 4 P; ' does not l. the present ' उपायनं नाभिनंदति, उपायनेन न तुष्यति &c., स्निह् 4 P, अनुरंज् pass. (with loc.). -*v. i.* इष् 6 P, अभिलष् 1, 4 P, रुच्; oft. by काम in comp.; ' just as you l. ' यस्ते छंदः (V. 3), यद्भवते रोचते; ' doing as one l. s ' : कामचारः, स्वैरवृत्तः, स्वच्छंदः, स्वैरिन्; ' taking what form he l. s ' कामरूपः; 'do what you l. ' यथाभिलषितं क्रियतां. **-ed,** *a.* मत, अभि-अनु-सं-° इष्ट, प्रिय, दयित. **-en,** *v. t.* उप-मा 3 A, 2 P, सदृशीकृ; *See* **Compare.** **-ing,** *s.* रुचि *f.*, अभिरुचिः, कामः, इच्छा, तोषः, प्रीति *f.*, तुष्टि *f.*, प्रणयः, अनुरागः, अभिलाषः, छंदः, छंदस् *n.*, सं-अनु-मति *f.*; ' he was not to her l. ' स न तस्या रुचये बभूव (R. vi. 44); ' of your l. ' त्वदभिमत. **-ness,** *s.* सादृश्यं, साम्यं, तुल्यत्वं, आनुरूप्यं, सारूप्यं, तुला, उपमा, अनुकारः, संवादः, आनुगुण्यं, औपम्यं, &c. 2 रूपं, आकृति *f.*, आकारः, मूर्ति *f.* 3 प्रतिमा-मानं, प्रतिरूप-कृतिः, प्रतिमूर्तिः, प्रतिच्छंदः, चित्रं, आलेख्यं, प्रतिबिंबं; ' a speaking l. ' संवादिनी आकृतिः. **-wise,** *adv.* तथैव, तथा, तद्वत्. 2 अपि, अपि च, किं च, तथा, अपरं च. **-Likely,** *a.* संभाव्य, संभवनीय, उपपन्न, सत्यसंकाश; श्रद्धेय; ' it is l. that ' इति संभवति or उपपद्यते. 2 (Probable) ex. by प्रायः, प्रायशः, प्रायेण, with pot. pass. part., or by अपि नाम; ' he is l. to come to-morrow' प्रायस्तेन श्व आगंतव्यं; अपि नाम तयोः अभिमतः पाणिग्रहः स्यात् (Mal. 1) 'is it l. that &c.' **-hood, -ness,** *s.* संभाव्यता संभवः; better by (*a.*); *See* above.

Lily, *s.* नलिनी, उत्पलं, कुमुदं, पद्मं; *See* **Lotus.**

Limation, *s.* मार्जनं, लोहमार्जनेन घर्षणं.

Limature, *s.* लोहचूर्णं, लोहजं.

Limb, *s.* अंगं, अवयवः, (lit. & fig.); गात्रं; 'over every l.' प्रत्यंगं, सर्वांगीण-*a.*; 'l. by l.' अवयवशः, गात्रे गात्रे. 2 प्रांतः, कोटि *f.*, सीमा. **-ed,** *a.* अंगिन्, सावयव; 'large-l.' बृहदवयव, महांग (गी *f.*); 'slender-l.' तन्वंग, कोमल-पेलव-अंग. **-less,** *a.* अनंग, निरवयव, अंगहीन

Limber, *a.* मृदु, कोमल, शिथिल, अदृढ, नम्य.

Limbo, *s.* नरकः, निरयः. 2 कारा, कारागारं, बंधनागारं.

Lime, *s.* (Tree) जंबीरः; *See* **Lemon.** 2 (Quick-l.) चूर्णः-र्णं, कर्करं; 'l.-water' सुधा, लेपः (for colouring); 'l.-stone' चूर्णखंडः, चूर्णोपल, कर्करं. **-y,** *a.* चूर्णमय (यी *f.*), सचूर्ण, कर्करमय. 2 श्यान, सांद्र, चूर्णोपम.

Limit, *s.* अवधिः, मर्यादा, सीमा, सीमन् *f.*, पर्यंतः, अंतः, प्रांतः, परिच्छेदः; परिमाणं, इयत्ता, अवसानं; वेला (of sea); ' of narrow l. (scope)' अल्पविषय-*a.*; ' set or fix a l. to ' परिच्छिद् 7 P; ' no (definite) l. can be set to his fame ' तस्य यश इयत्तया परिच्छेत्तुं नालं (R. VI. 77). **-***v. t.* परिच्छिद्, परि-मा 2 P, 3 A; इयत्तया परिच्छिद्, सीमां नि-रूप् 10 or निर्धृ 10; *See* **Define.** 2 सं-नि-यम् 1 P or c.; सं-हृ 1 P, संकुच् 1 P or c., नियंत्र् 10, निबंध् 9 P, निग्रह् 9 P. **-ation,** *s.* परिच्छेदः, सीमा-मर्यादा-निरूपणं. 2 परिमितता, सावधिकता, समर्यादत्वं, ससीमता. **-ed,** *a.* परिच्छिन्न, परिमित, मित, समर्याद, सावधिक; नियत, संहृत, अल्पविषय, संकुचित, अव्यापक, संबाध; ' not through the l. nature of (your) merits' न गुणानामियत्तया (R. x. 32); ' l. meaning ' नियतार्थः; ' l. knowledge' अल्पविषयं ज्ञानं; ' l. monarchy ' नियंत्रितं or संयतं प्रभुत्वं. **-er,** *s.* परिच्छेदकः, **-less,** *a.* अमित, अनंत, असीम, निरवधि.

Limmer, *s.* नीचजनः, अपसदः in comp.

Limn, *v. t.* लिख् 6 P or चित्र् 10. **-er,** *s.* चित्रकरः.

Limous, *a.* सकर्दम, पंकिल.

Limp, *v. i.* खंज् 1 P, लंग् 1 P, खोट्-खोड्-खोल्-1 P. **-***s.* लंगः, लंगगति *f.* **-***a.* मृदु, शिथिल, कोमल. **-er,** *s.* खंजः, लंग-खंज-गतिः. **-ing,** *a.* खंज, खोर, खोल, खोड, लंगगति, विकलगति. **-ingly,** *adv.* खंजवत्, लंगगत्या.

Limpid, *a.* स्वच्छ, प्रसन्न, विमल, स्वच्छतोय, प्रसन्नवारि, विमलजल. **-ness,** *s.* स्वच्छता, विमलता, प्रसादः.

Lin, *s.* पल्वलं, तडागः-गं, जलाशयः.

Linch-pin, *s.* अक्षाग्रकीलः, अ(आ)णिः, उद्धयः.

Lincture, *s.* अवलेहः, लेह्यं.

Line, *s.* रे(ले)खा, रेखा. 2 पंक्तिः, पद्धतिः, सरणिः-णी, राजिः-जी, आवलिः-ली, ततिः, श्रेणिः-णी (all *f.*), माला. 3 सूत्रं, रज्जु *f.*, गुणः, तंतुः. 4 आकारः, आकृति *f.*, रूपं. 5 प्राकारः, वप्रः, परिखा, प्राचीरं. 6 (Of troops) दंडः, व्यूहः, पंक्तिः, बलविन्यासः. 7 क्रमः, अनुक्रमः, पर्यायः. 8 परिपाटि-टी *f.*, श्रेणिः-णी, पंक्तिः, परंपरा, माला, पारंपर्यं, आवलिः-ली; आनुपूर्व्यं. 9 (Of conduct) मार्गः, पथिन् *m.*, रीति *f.*, सरणिः, व्यवहारः. 10 देशः, विषयः, अंगं. 11 दिश् *f.*, दिशा, मार्गः. 12 भूचक्रं; *See* **Equator;** ' ruled l. ' रेखा, अंकः; ' in a l. ' पंक्तिक्रमेण, पंक्तिशः; ' by l. and rule ' यथासूत्रं; ' l. of the face ' वदन-मुख-रेखा; 'printed l. ' पंक्तिः; 'l. of a stanza ' पादः, चरणः-णं; ' in a regular l.' अनुक्रमेण, क्रमशः, आनुपूर्व्येण, अनुपूर्वशः; ' l. of the family ' वंशक्रमः-परंपरा-आवलिः; ' a good l. of conduct' सुमार्गः, सुपथः; ' a bad l. of conduct ' वि-कु-पथः, विमार्गः, उन्मार्गः; ' l. of study ' अध्ययनक्रमः; ' l. of posterity ' वंशावली; ' fishing-l. ' बडिशसूत्रं; ' to draw l. s.' लिख् 6 P; ' draw l. s on the ground ' भूमिं रेखाभिः वि-उत्-लिख् or अंक् 10; 'to draw the l. ' वि-विच् 3, 7 U, भेदं दृश् c., or निरूप् 10. **-***v. t.* अंतः आ-,छद् 10, अभ्यंतरे छद्. 2 पंक्तिक्रमेण स्था c. (स्थापयति) or निविश् c. 3 रेखाभिः अंक्; ' the streets were l. ed with guards' अनुरथ्यं पंक्तिक्रमेण रक्षिणः स्थापिताः. **-age,** *s.* अन्वयः, वंशः, कुलं, संतति *f.*, संतानः, गोत्रं, वंशावली, वंशपरंपरा; ' of royal l. ' राजवंश्य, राजकुलप्रसूत; 'of high or noble l.' अभिजात, महाकुल. **-al,** *a.* रेखारूप-मय (यी *f.*). 2 परंपरागत, परंपरायात-प्राप्त, क्रमप्राप्त-आगत-आयात, अन्वयागत, परंपरीण, कुलक्रमागत; ' l. descent ' अन्वयागमः, क्रमागमः, कुलक्रमागमः; ' l. descendant ' संतानः, संततिः, अपत्यं. **-ally,** *adv.* परंपरया, पारंपर्येण, वंशक्रमेण, कुलक्रमागमेन, ' l. descended ' वंशक्रमायात; *See* above. **-ing,** *s.* अंतराच्छादनं, अंतःपटलं-पुटं-वेष्टनं, आस्तरः-रणं. **-Lineament,** *s.* रेखा, वदन-मुख-रेखा, वदनाकारः, वदनाकृति *f.*, लक्षणं, चिह्नं. **-Linear,** *s.* पंक्ति or रेखा-रूप or मय (यी *f.*).

Linen, *s.* क्षौमं, क्षौमपटः-वस्त्रं; शाणपटः-वस्त्रं; **-***a.* क्षौम-औम-(मी *f.*), शाण (णी *f.*), अतसीनिर्मित; 'l.-draper' क्षौमवस्त्रविक्रयिन् *m.*, वस्त्रविक्रयोपजीविन् *m.*

Linger, *v. i.* वि-लंब् 1 A, मंदायते (D.), चिर (रा)यति (D.), कालं क्षिप् 6 P *or*

ह्र 1 P, मंदं मंदं चल् (ह्र) 1 P. 2 विलंब् 1 A, विचार् c. 3 चिरं-दीर्घकालं-स्था 1 P, or वृत् 1 A; 'l. ing on a sick bed' चिररोगिन्. -er, s. विलंबकारिन्, विलंबिन्, मंदगामिन्, मंदगति, चिरक्रियः, दीर्घसूत्रिन्, all m. -ing, a. दीर्घ, चिरस्थायिन्, चिर-दीर्घ-कालीन, चिरकालस्थ. 2 विलंबिन्, विलंबित, मंदायमान. -s. विलंबः, कालक्षेपः-यापनं. -ingly, adv. मंदं मंदं, विलंबेन, सविलंबं, मंदगत्या, कालक्षेपेण.

Linget, s. धातु-लोह-पिंडः.

Lingual, a. मूर्धन्य, मूर्धस्थानीय.

Linguiform, a. जिह्वाकृति, जिह्वारूप.

Linguist, s. भाषाकोविदः, शाब्दिकः, शब्दव्युत्पन्नः, भाषाप्रवीणः, भाषाज्ञः, बहुभाषाज्ञः, अनेकभाषानिपुणः. **-ic,** a. (s.) in comp.

Liniment, s. प्र-आ-वि-लेपः-पनं, उपदेहः, अभ्यंजनं, मर्दनौषधं.

Link, s. संधिः, ग्रंथिः. 2 बंधनं, बंधपाशः, शृंखला-लः-लं. 3 संयोगः, संबंधः, अन्वयः, संदर्भः, प्रबंधः. 4 उल्का, उल्मुकं 'l. s of life' जीवितनिबंधनानि; 'l. boy' उल्काभृत्. -v. t. संयुज् 7 U, 10, सं-धा 3 U, संश्लिष् c., संबंध् 9 P, व्यति-षंज् 1 P, ग्रथ् 9 P; *See* **Knit.** **-ed,** a. संयुक्त, संश्लिष्ट, संबद्ध, अन्वित, सान्वय.

Linn, s. जलप्रपातः, निर्झरः.

Linseed, s. अतसी, उमा, क्षुमा, उमा-अतसी-बीजं, &c.

Linsey-woolsey, a. क्षौमौर्णं. 2 असार, निःसत्त्व; क्षुद्र.

Linstock, s. ज्वलनकाष्ठं, अग्निदशलाका.

Lint, s. क्षौमबंधः, विकेशिका.

Lintel, s. द्वाराग्रकाष्ठं, द्वारोर्ध्वदारु n.

Lion, s. सिंहः, हरिः, केसरिन् m., पंचास्यः पंचाननः, हर्यक्षः, कंठीरवः, मृगरिपुः, मृगाशनः पुंडरीकः, पंचनखः, चित्रकायः, मृगद्विद्; and comp. of इंद्रः, राजन्, पतिः, अधिपः, अधिपतिः with मृग or पशु; मृगपतिः, मृगराजः, मृगाधिपः, पशुपतिः, &c.; 'l.'s part' भूयिष्ठभागः. **-ess,** सिंही. **-like,-ly,** a. सिंहस्वभाव, सैंह (ही f.).

Lip, s. ओष्ठः (strictly upper), दशन-रदन-छदः, रद-दंत-छदः, दशन-दंत-वासस् n., अधरः (strictly lower); 'a red or cherry l.' बिंबो(बौ)ष्ठः, बिंबाधरः; 'a woman having cherry l. s' बिंबोष्ठी; 'drinking the l.' अधरपानं, अधरामृतसेवनं; 'l.-honeyed' मुखमधु; 'l.-loyalty' मुखभक्ति f., वाग्दर्शिता भक्तिः. 2 कर्णः, पार्श्वः, कंठः, मुखं, &c. **-ped,** a. ओष्ठ in comp.

Lipothymy, s. *See* **Fainting, Swoon.**

Lippitude, s. क्लिन्नाक्षता, चुल्लत्वं.

Liquate, *See* **Liquefy** below.

Liquefy, v. i. वि-,द्रु 1 P, वि-,ली 9 P, 4 A, जलसाद्भू 1 P, क्षर् 1 P, द्रवीभू. -v. t. वि-,द्रु c., वि-,ली c., द्रवीकृ 8 U, जलसात्कृ. **-action,** s. द्रवीकरणं, द्रावः, विलयः-यनं, क्षरणं, द्रवीभवनं. 2 द्रवत्वं, विलीनता.

Liquid, s. द्रवः, रसः, जलं, द्रव-वस्तु-द्रव्यं, पदार्थः. -a. द्रव, द्रुत द्रवरूप, विलीन, प्रवाहिन्, तरलं; 'reduced to a l. state' द्रवतामापन्न, विलीन, जलीभ्न [illegible]तामुपेत (Ka. 122). **-ity** [illegible], s. द्रवत्वं रसता, द्रवभावः, [illegible] धर्मः.

Liquidate, v. t. शुध् c., अपाकृ 8 U. निस्तॄ c., अपनी 1 P, अपवृज् 10; मुच् 6 P or c., मोक्ष् 10; 'debt contracted to l. another debt' ऋणार्णं. **-ion,** s. शोधनं, शुद्धि f., अपाकरणं, निस्तारः, मुक्ति f., मोक्षः-क्षणं, अपनयनं.

Liquor, s. सुरा, मद्यं, हाला, वारुणी, वरुणात्मजा, मदिरा, आसवः, शी(सी)धु m. n., हलिप्रिया, परिस्रुत् f., गंधोत्तमा, प्रसन्ना, इरा, कादंबरी, परिस्रुता; कश्यं; 'l.-shop' शुंडापानं; मदस्थानं, शुंडा, पानं; 'round of drinking l.' मधुवारः-क्रमः; 'distilling of l.' संधानं, अभिषवः; 'l.-ferment' किण्वं, नग्नहुः, कारोत्तरः, मंडः; 'company of l.-drinkers' आपानं, पानगोष्ठिका; 'drinking l.' सरकः, अनुतर्षणं, मद्यपानं. 2 **Liquid,** q. v. 3 पेयं.

Lisp, v. i. स्वरभंगेन-अस्पष्टं-वद् 1 P or वच् 2 P or उच्चर् c. or उदीर् c., अव्यक्तं वद्, अस्फुटवाचा जल्प् 1 P, स्खल् 1 P. -s., **-ing,** s. गद्गदवाच् f. -वाक्यं, अस्फुटोच्चारणं, अव्यक्तवर्णं जल्पितं, स्खलितवाच्. **-er,** s. अस्पष्टवाच्, गद्गदवाच्, अस्फुटवादिन्, all m. **-ingly,** adv. अस्फुटवाचा, गद्गदवाचा.

Lissom, a. *See* **Flexible.**

List, s. आवलि-ली f., पंक्ति f., परिसंख्या, परिगणना, अनुक्रमणिका, सूचि-ची f.. 'a l. of names' नामावली; 'a l. of errata शुद्धिपत्रं. 2 वस्त्रखंडः. 3 वस्त्रप्रांतः, दशाः, वस्तयः (pl.). 4 युद्ध-रण-भूमि f., रंगः, रणाजिरं, मल्लभूः-भूमिः; 'enter or take the l. s' रणार्थं सज्जीभू 1 P or सन्नद्ध-a. भू. -v. t. वस्त्रखंडैः आच्छद् 10. 2 वस्त्रखंडान् संसिव् 4 P. 3 गणनापत्रे नामानि अभिलिख् 6 P or आरुह् c. (रोपयति). 4 **Listen,** q. v. -v. i. इष् 6 P, रुच् 1 A, अभिलष् 1,4 P; *See* **Like,** 2 आ-अव-लंब् 1 A, प्रवणीभू 1 P; *See* **Lean.** **-Listless,** a. अनवहित, निरपेक्ष, उदासीन, प्रमादिन्, अनुत्सुक, निरुत्साह; अनिच्छु, निरीह, निरुद्योग, विरक्त, निःस्पृह. 2 जड, ग्लान; *See* **Languid.** **-ly,** adv. अनवधानेन, निरपेक्षं, उदासीन-

वत्, निरुत्सुक, अनपेक्षक, जडवत्, निःस्पृह. **-ness**, *s*. अनवधानं, अनपेक्षा, औदासीन्यं, अनौत्सुक्यं, विरक्ति *f*., अनिच्छा, अनीहा, अस्पृहा, अनुत्साहः, अनास्था, जडता, मांद्यं.

Listen, *v. i.* श्रु 5 P, आकर्ण् 10, नि-शम् c., कर्णं दा 3 U, अव-धा 3 U, अवहित-सावधान-*a*. भू 1 P; 'l. now' अवधीयतामधुना, कर्णं देहि. **2** अनुवृत् 1 A, अनुरुध् 4 A. **-er**, *s*. श्रोतृ *m*.

Literal, *a*. मूल, मुख्य, प्रकृत, अरूपक; मूलार्थक, मुख्यार्थक, शब्द in comp. **2** यथाशब्द, शब्दार्थानुसारिन्, मूलपदानुसारिन्. **3** अक्षरमय (यी *f*.); 'l. meaning' प्रकृतार्थः; शब्दार्थः, मूलार्थः. **-ity**, *s*. मुख्यार्थः, प्रकृतार्थः, शब्दार्थः, मूलार्थः, अरूपकं. **-ly**, *adv*. मूलार्थानुसारेण, शब्दतः, शब्दशः, यथाशब्दं, अक्षरशः.

Literary, *a*. विद्या-साहित्य-संबंधिन्, विद्याविषयक, शास्त्र-ज्ञान- in comp.; 'l. work' शास्त्रग्रंथः; 'l. dispute' ज्ञानसंघर्षः. **2** (Literate) विद्यावत्, विद्यासंपन्न, विद्याविशिष्ट, विद्यानुरागिन्; विद्या-शास्त्र- in comp.; *See* **Learned**. **-Literature**, *s*. साहित्यं, विद्या, शास्त्रं; शास्त्रसमूहः; पुस्तकसमुदायः; 'dramatic l.' नाट्यपुस्तकसमूहः. **-Literati**, *s*. विद्वत्समाजः, पंडितवर्गः-गणः, विद्वद्वृंदं.

Lithe, *a*. शिथिल, मृदु, भिदेलिम, सुखनाम्य.

Lithograph, *v. t*, शिलाया उपरि लिख् 6 P, शिलां रेखादिभिः मुद्र् 10 or अंक् 10. **-s**. शिला or पाषाण-लेखः or मुद्रा. **-er**, *s*. शिलालेखकः, शिलामुद्राकृत् *m*. **-y**, *s*. शिलालेखनविद्या, पाषाणलेखनं.

Lithontriptic, *a*. अश्मरीहर, अश्मरीघ्न (घ्नी *f*.).

Lithotomy, *s*. मूत्राश्मोच्छेदः.

Lithotripsy, *s*. अश्मरीसंघर्षः.

Litigant, *a*. विवदमान, विवादार्थिन्, कार्यार्थिन्, व्यावहारिक (की *f*.). **-s**. वादिन् *m*., कार्यार्थी, व्यवहर्तृ *m*., अर्थी, विवादार्थी. **-Litigate**, *v. i*. वि-वद् 1 A, व्यव-हृ 1 P. **-***v. t*. विवादास्पदीकृ 8 U. **-ed**, *a*. वाद, ग्रस्त, विवादास्पदीकृत-भूत, वादानुगत. **-ion**, *s*. वि-,वादः, व्यवहारः. **-Litigious**, *a*. विवादप्रिय-शील, विवादार्थिन्, विवादपर-रत-आसक्त.

Litter, *s*. शिबिका, याप्ययानं. **2** तृणशय्या, तृणसंस्तरः-शयनं. **3** शावकगणः-संघः. **4** द्रव्यसंकरः, व्यस्तता. **-***v. t*. शावकगणं सू 2, 4 A, or उत्पद् c. **2** तृणेन आवृ 5 U or आस्तृ 5 U. **3** इतस्ततःविकॄ 6 P or विक्षिप् 6 P.

Little, *a*. अल्प, अल्पक, क्षुद्र, लघु, अणु, सूक्ष्म, ह्रस्व; श्लक्ष्ण, दभ्र, अणुक, क्षुद्र-अल्प-लघु-परिमाण, अल्प-मात्र, अबहु; स्वल्प, स्तोक, अप्रचुर, ईषत्, in comp. **2** क्षुद्रतनु, अल्पकाय-शरीर-तनु. **3** क्षुद्र-लघु-मति, कृपण-मनस्-चेतस्-बुद्धि; (as a diminutive) ex. by the suffix क; 'a l. girl' बालिका; 'a l. boy' बालकः; 'a l. cottage' कुटिका; 'very l.' अल्पिष्ठ, अत्यल्प; 'a l. wealth' द्रव्य-लेशः-लवः, स्तोकं द्रव्यं; 'a l. finger' कनिष्ठांगुलि *f*.; 'for a l. while' कंचित्कालं. **-***adv*. 'a l.' ईषत्, किंचित्, स्तोकं, मनाक्, अभूरि, अबहु; oft. by आ, दर, ईषत् in comp.; 'a l. split' दरदलित; 'not a l.' भृशं, अत्यंतं; 'a l. distant' अनतिदूर, ईषद्दूर; 'l. less' ईषदून, किंचिन्न्यून, कल्प-प्राय- in comp.; 'a l. less than dead' मृतप्रायकल्प; 'l.-minded' कृपणबुद्धि, क्षुद्र-लघु-चेतस्. **-***s*. अल्पं, किंचित्, स्तोकं, अल्प-स्तोक-भागः, अल्पांशः, किंचन, मात्रा, लवः; कणः, लेशः; अल्पमात्रं; 'by l. and l.' अल्पाल्पं, अल्पशः, स्तोकशः. **-ness**, *s*. अल्पता, तनुता, लघुता, स्तोकता, &c. **2** (Of mind) दीनता, कार्पण्यं, क्षुद्रता, कदर्यता, न्यं.

Littoral, *a*. तटस्थ, तीरस्थ.

Liturgy, *s*. प्रार्थनामार्गः, भक्तिमार्गः

Live, *v. i*. वस् 1 P, नि-प्रति-°; अधिवस्, अध्यास् 2 A, अधि-ष्ठा 1 P (with acc.). **2** जीव् 1 P, प्र-अन् 2 P, श्वस् 2 P, धृ pass. or 6 A, विद् 4 A, वृत् 1 A; 'here I l.' एषा ध्रिये (U. 3); 'as long as you l.' यावज्जीवं, यावत्प्राणान् धारयसि or असुधारणं करोषि. **3** (On) उप-आ-जीव्, शरीरवृत्तिं-प्राणयात्रां-कॢप् c. or निर्वृत् c. or कृ 8 U. प्राणधारणं कृ, निर्वह् 1 P; 'l.-ing on fish' मत्स्याजीव, मत्स्योपजीविन्; sometimes by वृत्ति *f*.; 'l.ed on fruits, roots, &c.' फलमूलादिभिः वृत्तिमकरोत्; 'l.ing on the leaves of trees falling down of themselves' स्वयंविशीर्णद्रुमपर्णवृत्तिता (K. v. 28); 'l.s on wild fruits' वन्यफलैः शरीरवृत्तिं निर्वर्तयति. **4** जीवितं-कालं गम् c. (गमयति) or या c. (यापयति) or नी 1 P or अतिवह् c. or वृत् c.; 'l. through time' चिरस्थायिन्-अमर-*a*. भू 1 P. **-***a*. सजीव; *See* **Living** below; 'l.-long' दीर्घ-चिर-कालीन, चिरस्थायिन्; 'l.-stock' जीवधनं. **-ing**, *a*. सजीव, जीविन्, प्राणभृत्, सचेतन, प्राणधारिन्, चेतनावत्, सचेष्ट, श्वसमाण; 'a l. being' प्राणी, जीवी, जंतुः, प्राणभृत्, शरीरी, जीवः, देही, चेतनः, सत्त्वं; 'world of the l.' जीवलोकः. **2** वर्तमान, ध्रियमाण, विद्यमान; 'a l. poet' वर्तमानकविः. **3** अक्षय, अनश्वर, अनपायिन्, अविनाशिन्, अजर, अमर

(spring &c.). 4 आ-उप जीविन्, आजीव or वृत्ति in comp.; 'l. by arms' शस्त्रोपजीविन्; 'l. by agriculture' कृष्याजीव; 'l. wickedly' दुर्वृत्ति, दुर्वृत्त, पापाचरित, पापवृत्ति; 'l. by beggary' याचकवृत्ति, &c.; 'within l. memory' स्मार्ते काले; 'a l. sacrifice' जीवोपहार:; 'a l. death' जीवितमरणं. -*s*. जीवनं, प्राणधारणं, वास:. 2 जीविका, आ-उप°-; आजीव:, वृत्ति *f*., जीवनं, वर्तनं, आ-उप-जीवनं, जीवनोपाय:, जीवन-जीव-साधनं, प्राण-शरीर-यात्रा, निर्वाह:, प्राण-जीव-निर्वाह:, प्राण-शरीर-स्थिति *f*., जीवनार्थ:. 3 धर्माध्यापकवृत्ति:, धर्मदाय:; 'good l.' सुभोजनं, मिष्टाहार:, परमान्नभोजनं; 'bad l.' कदन्नभोजनं. **-Livelihood,** *s*. जीविका, वृत्ति:, जीवनं, प्राणयात्रा; *See* **Living** above; 'bare l.' ग्रासाच्छादनमात्र, अन्नोदकमात्रं, दिननिर्वाह:. **-Lively,** *a*. सोल्लास, उल्लासिन्, आनंदिन्, प्रहृष्ट, उल्लसित, प्रमुदित, आनंद-उल्लास-वृत्ति. 2 स-सत्त्व, सोत्साह, उत्साहशील, तेजस्विन्, तीव्र, तीक्ष्ण; 'of a l. countenance' प्रफुल्लवदन, हास्यमुख (खी *f*.), सुहास्यवदन, प्रसन्नमुख. -*adv*. सोत्साहं, प्रफुल्लतया, सोल्लासं. **-ness,** *s*. उल्लास:, प्र-,हर्ष:, आनंद:, प्रफुल्लता, उत्साह:, तेजस् *n*., सत्त्वं.

Liver, *s*. यकृत् *n*., कालखंडं; कालकं, कालेयं.

Livery, *s*. वेष:, कुल-आर्य-वेष:; 'l.-man' कुलवेशधारिन् *m*., पौरवेश:; 'l.-stable' अश्वपोषणशाला, अश्वशाला.

Livid, *a*. नील, नीलवर्ण, सीसकवर्ण, नीलकृष्ण. **-ity, -ness,** *s*. नीलवर्ण:, नीलिमन् *m*., सीसकवर्ण:.

Lixivium, *s*. क्षारजलं-अंबु *n*. **-Lixivious,** *a*. क्षाराक्त, क्षारविशिष्ट.

Lizard, *s*. सरट:-टु:, कृकं(कु)लास:-श:, प्रतिसूर्य:-र्यक:; 'house-l.' गृहगोधा-धिका, मुस(श)ली, ज्येष्ठा-ष्ठी, गृहालिका.

Lo, *interj*. पश्य, प्रेक्षस्व.

Load, *s*. भार:, भर:; धुर् *f*, पर्याहार:. 2 बाधा, पीडा, दुःखं; कष्टं; 'the body is a l. (to me)' भार: काय:, भारभूतं शरीरं, कष्टप्रायं शरीरं; 'l. s of gold' सुवर्णभारा:; 'bearing a l.' भारवाहन, भारसह, धूर्वह, धुरंधर. -*v. t*. भारं न्यस् 4 P or नि-धा 3 U or निविश् c. or आरुह् c. (रोपयति), भारेण पूर् 10, भारेण पीड् 10 or आक्रम् 1 U, 4 P, भाराक्रांत-*a*. कृ 8 U; 'trees l. ed with fruits' फलभाराक्रांता वृक्षा:; *See* **Bend** (*v. i.*). 2 (A gun) आग्नेयचूर्णेन पूर्, आग्नेयचूर्णं निविश् c. **-ed,** *a*. सभार, भाराक्रांत, भारग्रस्त, भारवत्, आरोपित-निवेशित-भार, धुरीण. 2 गर्भ in comp., पूर्ण, पूरित; 'l. with perfume' परिमलाक्रांत, वासगर्भ, वासपूर्ण. **-ing,** *s*. भारारोपणं. 2 भार:.

Loadstone, *s*. अयस्कांत:, अयोमणि:, लोहकांत:, चुंबक:, लोहचुंबक:, चुंबकप्रस्तर:-मणि:.

Loaf, *s*. अपूप:, पूप:, पिष्टक:, करंभ:. -*v. i*. कालापव्ययं कृ 8 U.

Loam, *s*. चिक्कण-स्निग्ध-मृत्तिका. **-y,** *a*. चिक्कण, मसृण.

Loan, *s*. ऋणं, ऋणदानं, धनप्रयोग:, आविहितकालात् द्रव्यप्रयोग:.

Loath, *a*. अनुत्सुक, अनिच्छु, वि-पराङ्-मुख (खी *f*.), विरक्त, अनिच्छत्, अकाम, निष्काम.

Loathe, *v. t*. गर्ह् 1, 10 A, गुप् desid. (जुगुप्सते), अत्यंतं द्विष् 2 U; *See* **Abhor**. **-ful, -some,** *a*. बीभत्स, अतिगर्हित, घृणाकारिन्, अतिगर्ह्य, कुत्सित, घृणार्ह, जुगुप्सावह. **-ing,** *s*. बीभत्स:, जुगुप्सा, घृणा, गर्हा, अतिनिर्वेद:-द्वेष:. **-ingly,** *adv*. सबीभत्सं, घृणापूर्वं.

Lob, *s*. स्थूलकाय:, स्थूलशरीर:.

Lobby, *s*. सभोपशाला, उपगृहं-शाला.

Lobe, *s*. (कर्णस्य) पालि *f*., पालिका, लतिका. 2 भाग:, अंश:. **-ed,** *a*. पालिविशिष्ट.

Local, *a*. स्थानिक (की *f*.), स्थानीय, दैशिक (की *f*.), देश्य, देशीय, देश-स्थान- in comp.; 'l. usage' देशाचार:; 'l. news' इहवृत्तं. 2 एक-देशीय-देशिन्-स्थानिक. **-ity,** *s*. स्थानं, प्र-,देश:, स्थलं. **-ly,** *adv*. स्थानविषये, स्थानमुद्दिश्य.

Locate, *v. t*. निविश् c., नि-धा 3 U, स्था c. (स्थापयति), विन्यस् 4 U; *See* **Place**. **-ion,** *s*. स्थापनं, निवेशनं, विन्यास:. 2 स्थानं, प्रतिष्ठानं, अधिकरणं. **-ive,** *s*. सप्तमी विभक्ति:, अधिकरणं.

Lock, *s*. ताल:-लकं, तालयंत्रं. 2 (Of hair) पाश:, कलाप:, केशकलाप:-पाश:, अलक:; शिखंडक:, काकपक्ष: (of young persons); चूडा, शिखा. 3 जलस्तंभनी-बंधनी 4 आलिंगनं, आश्लेष:, उपगूहनं. -*v. t*. तालेन बंध् 9 P or पि-धा 3 U or निरुध् 7 U. 2 रुध्, बंध्, संयम् 1 A. 3 गाढं आलिंग् 1 P, दृढं परिष्वंज् 1 A; *See* **Clasp, Embrace**; 'l. ed in sleep' निद्रालीढ, निद्रानिमीलितलोचन; 'l.-jaw,' 'l. ed jaw' हनुस्तंभ:-ग्रह:. **-er,** *s*. तालकसनाथ: कोष्ठ:, सपुटक:.

Locket, *s*. कुड्डुप:.

Locomotion, *s*. स्थानांतर-स्थलांतर-गमनं, चलनं, गमनागमनं. 2 चलन-गमनागमन-शक्ति *f*. **-Locomotive,** *a*. चल, चलन, जंगम, चलनशील, गतिविशिष्ट, चलनधर्मक, संचारिन्.

Locus, *s*. निधि:, निधानं.

Locust, *s.* शल(र)भः, झिरिः.

Locution, *s.* वाक्यं, उक्ति *f.*, वचनं.

Lode, *s.* धातुरेखा.

Lodh, *s.* लोध्रः, गालवः, शा(सा)बरः, तिरीटः, तिलकः, मार्जनः.

Lodge, *v. i.* निवस् 1 P, वि-श्रम् 4 P, आश्रि 1 U, अव-स्था 1 A, स्था 1 P, वृत् 1 A, लग् 1 P, अनुबंध्-संज्- pass. **-***v. t.* नि-धा 3 U, न्यस् 4 U, निविश् c., स्था c. (स्थापयति), *See* **Place.** 2 वस् c., आश्रयं दा 3 U, वासस्थानं दा; ' to l. a suit or complaint ' राज्ञे निविद् c. **-***s.* उपगृहं, उद्यानगृहं. 2 **Lodging,** q. v. **-ing,** *s.* वासगृहं-स्थानं, वासः, नि-आ-वासः, वसति *f.*, नि-आ-लयः, आ-सं-श्रयः, निकेतनं; *See* **House. -ment,** *s.* निवेशनं, स्थापनं. 2 अव-सं-स्थिति *f.* 3 निवेशः-शनं, समावासः.

Loft, *s.* अट्टः, चंद्रशाला, शिरोगृहं, उपरिकोष्ठः.

Lofty, *a.* उन्नत, तुंग, उच्च, उदग्र, उच्छ्रित, प्रांशु, सोच्छ्राय. 2 उद्धत, मदोदग्र, दृप्त, अवलिप्त, साटोप, मदोद्धत, गर्वोद्धत; *See* **High.** 3 प्रौढ, प्रगल्भ, धीर, गंभीर, गुरु, महत्. **-ly,** *adv.* उच्चैः, ऊर्ध्वं. 2 सगर्वं, साटोपं, सदर्पं, उद्धतं. **-ness,** *s.* (lit.) उन्नति *f.*, उत्सेधः, उच्छ्रयः, तुंगता, उच्चत्वं, प्रांशुता. 2 औद्धत्यं, आटोपः, अवलेपः, दर्पः, गर्वः, अभिमानः. 3 प्रौढता, प्रागल्भ्यं, धीरता, गुरुत्वं, महत्त्वं, माहात्म्यं, उत्कर्षः, उन्नतत्वं, उन्नतिः.

Log, *s.* काष्ठं, दारु-काष्ठ-खंडः-डं; स्थूल-बृहत्-काष्ठं. 2 गतिमापः.

Logarithm, *s.* संवर्गमानं, घातप्रमापकः.

Logger-head, *s.* स्थूल-जड-बुद्धिः, मूढः, मूर्खः, जडः; ' to be at l. s ' विवद् 1 A, कलिं-कलहं-प्रारभ् 1 A. **-ed,** *a.* स्थूल or जड-धी or बुद्धि.

Logic, *s.* तर्कः, न्यायः, आन्वीक्षिकी, न्याय or तर्क-शास्त्रं- or विद्या, युक्तिवादः. **-al,** *a.* तार्किक नैयायिक-यौक्तिक- (की *f.*), तर्कशास्त्रविषयक. 2 तर्क-न्याय-युक्ति-सिद्ध, तर्क-न्यायसंमत, न्यायानुसारिन्, तर्कानुरूप; ' a l. conclusion ' निगमनं. **-ally,** *adv.* न्यायतः, यथान्यायं, तर्कानुसारेण, न्यायशास्त्रानुरूपं. **-ian,** *s.* नैयायिकः, तार्किकः, तर्किन् *m.*, न्यायविद् *m.*, तर्क-न्याय-शास्त्रज्ञः.

Logomachy, *s.* वाग्युद्धं, वाक्कलहः, वितंडा. 2 शब्दविवादः.

Loin, *s.* श्रोणि-णी *f.*, कटि-टी *f.*, नितंबः, जघनं, स्फिच् *f.* (hip & l. s); श्रोणिफलकं, कटी-श्रोणि-तटं; 'gird the l. s ' परिकरं बंध् 9 P, कटिं बंध्; 'born from one's own l. s ' अंगज, अंगजात.

Loiter, *v. i.* विलंब् 1 A, मंदायते (D.), कालं क्षिप् 6 P or हृ 1 P; ' l. about ' मंदं मंदं चल्-र् 1 P, इतस्ततः मंदं भ्रम् 1, 4 P, चिरं अव-स्था 1 A. **-er,** *s.* कालक्षेपकः, अलसः, विलंबिन् *m.*, मंदगतिः, चिरक्रियः **-ing,** *s.* विलंबनं, मंदगमनं, कालक्षेपः; *See* **Linger,-er.**

Loll, *v. i.* आलस्येन अवलंब् 1 A or आश्रि 1 U or संविश् 6 P or शी 2 A. **-***v. t.* लल् 10 (ललयति); ' l. the tongue ' जिह्वां लल् or बहिष्कृ 8 U. **-ing,** *s.* ललनं.

Lone, Lonely, *a.* विविक्त, निर्जन, विजन, निर्मनुष्य, निभृत, न्यून-हीन-संचार, एकांत; निर्मानुष (षी *f.*). 2 अनाथ, असहाय, एकाकिन्, एक, केवल. 3 विविक्त-प्रिय, विविक्तसेविन्; 'a l. place' विविक्तं, निर्जनदेशः; ' in a l. place ' विविक्ते, विजने, छन्नं, निःशलाकं, रहः, उपांशु. **-liness,** *s.* विविक्तं, निर्जनता, विजनता. 2 एकाकिता, असहायता. 3 विविक्तसेवा-रुचि *f.*- प्रीति *f.* **-some,** *a.* निर्जन, दारुण, निरानंद, घोर.

Long, *v. i.* (for) (अत्यंतं) स्पृह् 10 (with dat.), इष् 6 P, अभिलष् 1, 4 P, वांछ् 1 P, ईह् 1 A, कांक्ष् 1 P, आशंस् 1 A; *See* **Wish;** लुभ् 4 P, गृध् 4 P; sometimes ex. by denom. in य or काम्य ; ' l. s for a son ' पुत्रीयति, पुत्रकाम्यति; पुत्रमीप्सति, &c. 2 दोहदवती भू 1 P, दोहदिनी भू. **-***a.* दीर्घ, आयत, आयामवत्, लंब, दीर्घपरिमाण, दीर्घाकार; विस्तृत, विस्तीर्ण. 2 चिर in comp., दीर्घ-चिर-कालीन, दीर्घ-चिर-कालिक (की *f.*), चिरंतन (नी *f.*), चिरस्थायिन्- स्थित, चिरकाल-दीर्घकाल-स्थायिन्. 3 दूर, वि-सु-दूर. 4 दीर्घसूत्र, चिरक्रिय, विलंबकारिन्. 5 परि-प्र-माण, मात्र, मित, परिमित in comp.; 'three fingers l.' त्र्यंगुलमात्र-परिमाण, त्र्यंगुलमित, त्र्यंगुल; ' being a l. way off ' दूरस्थ, दूरस्थायिन्; ' a l. period दीर्घ-चिर-कालः; 'for a l. time ' चिरं, दीर्घं, चिराय; *See* (*adv.*); ' the l. run ' आयति *f.*; ' a l. vowel ' दीर्घस्वरः. **-***adv.* चिरं, चिरेण, चिराय, दीर्घ-चिर-कालं, दीर्घं, बहुकालं, चिरदिवसं. 2 दूरं, दूरे, दूरपर्यंतं; 'l. absent' चिरप्रवासिन्, चिरगत; ' l. sick ' दीर्घ-चिर-रोगिन्, ' living l. ' चिरजीविन्, आयुष्मत्; ' l. since left ' चिरत्यक्त, &c.; ' how l. कियच्चिरं, कियंत कालं; कियत्कालं; 'how l. after ' कियच्चिरेण; ' not very l. नातिचिरं; ' very l. ' सुचिरं; 'l. ago' प्रागेव, पूर्वमेव, अतीतदीर्घकाले; 'not l. ago ' नातिचिरात् प्राक्, अनतिपूर्वं; ' ere l. ' अचिरेण, अचिरात्; ' as l. as ' ' so l. ' यावत्-तावत्; ' as l. as one lives ' यावज्जीवं; आमरणात्; ' the whole year l. ' आवर्षांतात्, वर्षपर्यंतं; 'l. after ' बहोः कालात्, दीर्घकालानंतरं. In comp. words ex. by दीर्घ, चिर, लंब, दूर, आयत; ' l.-armed ' दीर्घभुज, लंबहस्त; ' l.-bellied ' लंबोदर;

'l.-continuing' चिरस्थायिन्; 'l.-eyed' आयताक्ष, आयतनेत्र; 'l.-headed' सूक्ष्मनिपुण-मति, विदग्ध, पटु; l.-lasting' चिरस्थायिन्, चिरकालिक; *See* (*a.*); 'l.-legged' दीर्घपाद, ऊर्ध्वजानु, ऊर्ध्वज्ञु; 'l.-lived' चिर (र) जीविन्, दीर्घायुस्, चिरायुस्, चिरायुष्य, जैवातृक, आयुष्मत्; 'l.pepper' कृष्णा, उपकुल्या, वैदेही, मागधी, चपला, कणा, उ(ऊ)षणा, पिप्पलिः-ली. शौंडी, कोला; कारिपिप्पली, कपिवल्ली, कोलवल्ली, श्रेयसी, वशिरः; 'l. pepper root' ग्रंथिकं, पिप्पलीमूलं, चटकाशिरस् *n.*; 'l.-sighted' दूर-दीर्घ-दृष्टि; 'l.-suffering' सहिष्णु, सहनशील, क्षमिन्, बहुक्षम; (*s.*) क्षमा, सहिष्णुता, सहनशीलता. **-er,** *a.* दीर्घतर; 'any l.' अतःपरं-ऊर्ध्वं, इतः परं; 'why delay any l.' किमित्यधुना विलंब्यते. **-ing,** *a.* अत्यभिलाषिन्, अत्याकांक्षिन्; कुतूहलिन्, स्पृहयालु, उत्कंठित उत्कट, लालस, अत्युत्सुक; 'a l. desire' उत्कटेच्छा; 'a l. woman' श्रद्धालुः; दोहदवती. **-*s.*** अत्यभिलाषः, अतिस्पृहा-वांछा, अत्याकांक्षा, उत्कंठा, लालसा, औत्सुक्यं, अतिलिप्सा; इच्छा; कामः, मनोरथः, स्पृहा, तृष्णा, आकांक्षा; 'the l. of a pregnant woman' दोहदः, गर्भदोहदः. **-ingly,** *adv.* सस्पृहं, सतृष्णं, सोत्सुकं, सोत्कंठं. **-Longanimity,** *s.* क्षमा, क्षांति *f.* **-Longeval,-Longevous,** *a.* चिरंजीविन्; *See* **Long-lived.** **-Longevity,** *s.* दीर्घायुः; चिरायुः. **-Longmetry,** *s.* दैर्घ्यमानं. **-Length,** *s.* दैर्घ्यं, दीर्घता-त्वं, आयामः, द्राघिमन् *m.*, आरोहः, आयति *f.*, विस्तारः, आनाहः, विस्तृति *f.*, वितति *f.* 2 मात्रा, अवधिः, मर्यादा, पर्यंतः; 'my rudeness (impudence) was carried to the l. of taking up arms' आयुधपरिग्रहं यावदुत्याख्दो दुर्योगः (U. 6). 3 मानं, प्र-परि-माणं. 4 चिर-दीर्घ-कालः, कालदैर्घ्यं; 'to such a l.' एतावत्पर्यंतं, यावत् (with acc.); 'for a l. of time' चिरं, चिरकालं; 'to a great l.' अतिमात्रं, अतिमर्यादं; 'at l.' सविस्तरं, विस्तरेण, सुविस्तरं रेण, विस्तरशः, असंक्षेपतः. 2 अंते, अंततः, शेषे, चिरकालात्, चिरस्य, अतीतदीर्घकाले. 'spread at l.' विस्तीर्ण; 'to lie at full l.' दंडवत् पत् 1 P. **-en,** *v. t.* दीर्घीकृ 8 U, प्र-वि-तन् 8 U, विस्तृ c., प्र-वि-सृ c., आयम् 1 A, आयती-वितती-कृ. **-*v. i.*** विस्तृ-वितन् pass., दीर्घीभू. **-wise,** *adv.* अन्वायामं, अनुदैर्घ्यं, अनु in comp. **-y,** *a.* विस्तीर्ण, दीर्घ, आयत, सविस्तर, असंक्षिप्त.

Longitude, *s.* ध्रुवकः, द्राघिमन् *m.* 2 रेखांशः; (of heavenly objects) भोगः; 'circle of l.' रेखांशवृत्तं. **-Longitudinal,** *a.* अनुदैर्घ्य, अन्वायाम.

Looby, *s.* स्थूलजनः, ग्राम्यः, वृषलः, प्राकृतः.

Oblation, *s.* बलिः, उपहारः, उपायनं; हव्यं, हवनं, हुतं, आहुति *f.*, इष्टि *f.*, यागः, निर्वपणं; ' o. of eatables ' नैवेद्यं; ' o. to all deities ' वैश्वदेवः; ' to make o. s to fire ' हु 3 P.

Obligate, *v. t. See* Oblige, below.

Oblige, *v. t.* Ex. by causal of verbs, gen. with बलेन or बलात्; प्रयुज् 10, प्रवृत् c.; *See* **Compel**. **2** नियमपूर्वं-सप्रतिज्ञं बंध् 9 P. **3** अनुग्रह् 9 P, उपकृ 8 U, उपकारेण बंध्, हितं-प्रसादं-उपकारं कृ; ' I am much o ed to you for this reward' एतेन पारितोषिकदानेन भवता सुतरामुपकृतोस्मि-अनुगृहीतोस्मि; ' I am much o. ed ' अनुगृहीतोस्मि, महानयं प्रसादः. **-ation,** *s.* अवश्यकता, कर्तव्यता, भारः, ऋणं, बंधः, धर्मः; ' free from the o. s of debt ' ऋणमुक्त, मुक्तर्ण, अनृण; religious o. ' व्रतं, नियमः, चोदना, विधिः. **2** संविद् *f.*, समयः, प्रतिज्ञा, नियमः, अभ्युपगमः, संधा, सं-आ-श्रवः. **3** अनुग्रहः, उपकारः, उपकृति *f.*-तं, हितं, प्रियं; ' under o. ' उपकृत-अनुगृहीत-*a.*; ' my o. s to you are immense ' तव मयि उपकाराः संख्यातीताः; ' to lay under o. s ' उपकृ; *See* (*v.*). **-atory,** *a.* अवश्यक आवश्यक (की *f.*), अपरिहार्य, अवश्यकर्तव्य; oft ex. by अवश्यं; *See* under **Compel.**-**ing,** *a.* अनुग्रह-उपकार-शील, उपकारिन्, अनुग्राहिन्, हित-उपकार-बुद्धि, सुशील, दाक्षिण, अनुकूल, सुजन. **-ingly,** *adv.* दाक्षिण्येन, सुजनतया, सानुग्रहं, सुशीलवत्. **-ingness,** *s.* उपकार-अनुग्रह-शीलं, सौजन्यं.

Oblique, *a.* वक्र, कुटिल, जिह्म, असरल, तिर्यच्, अनृजु, विषम; ' o. speech ' वक्रोक्ति *f.*, भंगि-गी *f.*, उपरोधवचनं; ' o. case ' अप्रधानकारकं. **-ly,** *adv.* वक्रं, कुटिलं, तिर्यक्, तिरः, साचि. जिह्मं. **-ness,** *s.* वक्रता, कौटिल्यं, अनृजुता, वैषम्यं; ' o. of sight ' वक्रदृष्टि *f.*, दृष्टिवक्रता; ' o. of conduct ' विमार्ग-उत्पथ-गमनं, असदाचारः, सत्पथ-भ्रंशः-त्यागः.

Obliterate, *v. t.* वि-,लुप् 6 P or c., प्र-परि-अव-मृज् 2 P or c., व्यामृश् 6 P or c., वि-नश् c., उच्छिद् 7 P, उन्मूल् 10. **-ion,** *s.* लोपः, मार्जनं, व्यामर्शः, उच्छेदः.

Oblivion, *s.* अ-वि-स्मृति *f.*, अ-वि-स्मरणं; ' to bury into o. ' विस्मृ 1 P. **2** दोषविस्मरणं. **-Oblivious,** *a.* स्मृतिहर (री *f.*), विस्मारक, विस्मृतिकर (री *f.*). **2** विस्मरणशील.

Oblong, *a.* दीर्घाकार, आयत, दीर्घचतुरस्र. -*s.* आयतः.

Obloquy, *s.* निंदा, परि(री)वादः, अपवादः; वाच्यता, भर्त्सना, गर्हा; *See* **Censure, Calumny.**

Obnoxious, *a.* वश, अधीन, आपन्न, योग्य, अर्ह; पात्रं, आस्पदं, विषयः in comp.; ex. by pot. pass. part.; *See* **Liable, Apt.** **2** गर्हित, द्वेष्य, द्वेषणीय, गर्ह्य; अनिष्ट, अप्रिय, निंद्य, अप्रीतिकर (री *f.*). **-ly,** *adv.* अप्रियं, गर्ह्यतया. **-ness,** *s.* अधीनता, वशता, पात्रता. **2** द्वेष्यता, गर्ह्यता.

Obscene, *a.* अश्लील, ग्राम्य, अनक्षर, अवाच्य, गर्ह्य, कुत्सित, दुरुक्त, बीभत्स, अश्राव्य, वियात, व्रीडावह. **2** अशुभ, अभद्र, अमंगल, अलक्षण. **-ly,** *adv* अश्लीलं, अवाच्यं. **-ity, -ness,** *s.* अश्लीलता, अवाच्यता; ' o. of language ' दुरुक्ति *f.*, दुर्वाक्यं.

Obscure, *a.* तमोवृत, सांधकार, निष्प्रभ, मलिन, सतिमिर, निस्तेजस्, तमस्विन्. **2** अप्रसिद्ध, नातिविश्रुत, अविज्ञात, अख्यात, अल्पकीर्ति, लघुप्रतिष्ठ. **3** नि-,गूढ, दुर्बोध, क्लिष्ट, दुर्ज्ञेय, गहन, दुर्गम, विषम, अप्रकाश, अस्पष्ट, अस्फुट, गूढार्थ, अव्यक्त. -*v. t.* (तमसा) प्र-आ-च्छद् 10, आ-वृ 5 U, उप-रुध् 7 U, अंतरयति (D.), मलिनी-तिमिरी-कृ 8 U, मलिनयति तिमिरयति- (D.), प्रभां-तेजः-हृ 1 P or क्षि 1, 5 P.; 'o. with clouds' मेघैः आच्छद् or आवृ **2** गहनीकृ, गूढीकृ; ex. by (*a.*). **3** (Fig.) प्रत्या-दिश् 6 P, प्रत्या-ख्या 2 P, प्रच्छद्; *See* **Eclipse.** ' o. er of S'ri ' प्रत्यादेशः श्रियः (V. 1). **-ation,** *s* मलिनीकरणं, कांति-प्रभा-हरणं. **2** तेजः or प्रभा-क्षयः or हानि *f.*, निष्प्रभता, सांधकारता. **-ed,** *a.* तमोवृत, नष्ट-क्षीण-मलिन-क्षत-प्रभ-कांति-प्रकाश, मलिन, निस्तेजस्, हतज्योतिस्. **-ity, -ness,** *s.* निष्प्रभता, तेजः or कांति-क्षयः or हानिः, तमस् *n.*, तमिस्रं, अंधकारः. **2** गूढता, गहनता, अस्फुटता, दुर्बोधता. **3** अप्रसिद्धि-अविख्याति-*f.*, अल्पप्रतिष्ठा-कीर्ति *f.* **-ly,** *adv.* निष्प्रभं, सतिमिरं, सांधकारं. **2** गूढं, दुर्बोधं, असुगमं, अस्पष्टं, अव्यक्तं.

Obsecrate, *v. t. See* **Entreat.**

Obsequies, *s.* उत्तरकार्य-क्रिया, अंत्यकृत्यं, प्रेत-कार्य-क्रिया; अंत्येष्टिक्रिया, और्ध्वदेहिक-क्रिया, अंत्येष्टि *f.*, प्रेत-संस्कारः, पारलौकिकं. **-Obsequial,** *a.* और्ध्वदेहिक-और्ध्वदैहिक- (की *f.*), अंत्येष्टियोग्य; by (*s*) in comp.

Obsequious, *a.* छंदोनुवर्तिन्, अत्यनुवर्तिन्, अत्यनुरोधिन्, वशवर्तिन्, वशानुग, विनत, नम्र; *See* **Obedient**. **-ly,** *adv.* अत्यनुरोधात्, छंदोनुवर्तनेन. **-ness,** *s.* अत्यनुरोधः, अत्यनुवृत्ति *f.*, छंदोनुवर्तनं.

Observe, *v. t.* दृश् 1 P, ईक्ष् 1 A, वि-आ-अव-लोक् 1 A, 10, निरूप् 10, आ-,लक्ष् 10, निर्वर्ण् 10, आलोच् 10 (o. carefully); *See* **Look.** **2** उपलभ् 1 A, वि-भू c., वि-ज्ञा 9 U, अवधृ 10. **3** अनु-,पा c. (पालयति), रक्ष् 1 P, आ-अव-लंब् 1 A, आ-श्रि 1 U, आचर्

1 P, अनु-ष्ठा 1 P, सेव् 1 A, निषेव्, वि-धा 3 U, कृ 8 U; ' o. silence ' मौनमाचर्; ' o. a fast ' उपवस् 1 P; (rules) अनुवृत् 1 A, अनुसृ 1 P, अनुरुध् 4 A. 4 अभि-धा 3 U, वच् 2 P, ब्रू 2 U, वाक्यं वद् 1 P or उच्चर् c. **-able,** *a.* दृश्य, प्रेक्षणीय, दृष्टिगोचर. 2 अनुष्ठेय, निषेव्य. **-ance,** *s.* पालनं, रक्षणं, आचरणं, सेवनं, आलोचनं, अनुसरणं, अनुवर्तनं, विधानं, अनुष्ठानं. 2 आचारः, व्यवहारः, रीति *f.*, चरित, आचारकर्मन् *n.*; 'religious o. व्रतं, नियमः, विधिः. **-ant,** *a.* निरीक्षक, दर्शिन्, अवलोकिन्, सापेक्ष, अवहित, सावधान. 2 पालक, निषेवक, अनुसारिन्, आश्रित; आस्थित; ' o. of benefits ' कृतज्ञ, कृतवेदिन्. **-ation,** *s.* अवलोकनं, निरीक्षणं, अवेक्षणं, अवेक्षा, निरूपणं, आलोचनं. 2 वचनं, उक्ति *f.*, उदाहारः, वाक्यं; लेखः, लिखितं (in writing). **-atory,** *s.* वेधगृहं-शाला. **-er,** *s.* प्रेक्षकः, अवेक्षकः, निरूपकः.

Obsess, *v. t.* आ-विश् 6 P. 2 पीड् 10, दृ 5 P, अर्द् 1 P.

Obsolete, *a.* लुप्तप्रयोग, लुप्त, अप्रचालित, अप्रचल, गतव्यवहार, व्यवहारातीत, अव्यवहार्य. **-ness,** *s.* लोपः, अप्रचारः, अव्यवहारः.

Obstacle, *s.* अंतरायः, प्रत्यूहः, व्याघातः, प्रतिबंधः, वि-प्रति-ष्टंभः, वारणं, विघ्नः, रोधः, उप-प्रति-अव-नि°-, विघातः, बाधः-धा, व्यवधानं, प्रत्यर्थिन्, *m.*, ' though an o. to his meditation ' प्रत्यर्थिभूतामपि समाधेः (K. I. 59).

Obstetric, *a.* प्रसवसंबंधिन्. **-s.** (O. s) गर्भमोचनशास्त्रं, प्रसवकर्मन् *n.*

Obstinate, *a.* प्रतिनिविष्ट, अविनेय, अवश्य, अननुनेतव्य, निर्बंधवत्, निर्बंधशील, स्वैरिन्, दुर्दम, आग्रहिन्, दुराग्रह, प्रतीप, कठिन, दृढ. 2 दुःसाध्य, दुरुपचार. **-ly,** *adv.* निर्बंधेन, अतिदृढं, स्वैरं, साग्रहं, सनिर्बंधं, दुराग्रहेण. **-ness, -obstinacy,** *s.* निर्बंधः, आग्रहः स्वैरिता, दुराग्रहः, निर्बंधशीलं, दृढता, अवश्यता, प्रतिनिविष्टता, प्रतीपता.

Obstipation, *s.* स्तंभनं, अवरोधः.

Obstreperous, *a.* बहुघोषकारिन्, महास्वन, तारस्वर, तुमुल, अत्युच्च, अतिपरुष (of noise). **-ly,** *adv.* उच्चैःस्वरेण, सकोलाहलं, तुमुलरवेण.

Obstruct, *v. t.* रुध् 7 U, नि-वि-सं-प्रति-उप°, वि-प्रति-व्या-हन् 2 P, वृ c., or वार् 10, वि-, स्तंभ् 9 P, or c., प्र-सं-बाध् 1 A, विघ्नयति (D.), नि-प्रति-षिध् 1 P. **-er,** *s.* विघ्नकरः, प्रतिबंधकः-रोधकः. **-ion,** *s.* रोधनं, वारणं, प्रतिबंधनं. 2 विघ्नः, अंतरायः, प्रत्यूहः, प्रतिबंधः, व्याघातः; *See* **Obstacle.** 3 आ-, नाहः, अवरोधः, प्रतिबंधः **-ionist,** *s.* विघ्नकारिन् *m.*, प्रतिबंधशीलः. **-ive,-Obstruent,** *a.* संप्रतिरोधिन्, बाधक, प्रतिबंधक, विघ्नकारिन्, विघ्नकर (री *f.*), विघातिन्, निवारक.

Obtain, *v. t.* आप् 5 P, लभ् 1 A, विद् 6 U, अश् 5 A, अधिगम् 1 P, अर्ज् 1 P or c., आ-समा-सद् c., आ-प्रति-पद् 4 A, सं-पद् c.; oft. by इ-या-2 P; *See* Get. **-v.i.** प्रचल्-र् 1 P, प्रवृत् 1 A, सं-स्था 1 A; *See* **Hold.** **-able,** *a.* प्राप्य, लभ्य, अधिगम्य; ' easily o.' सुलभ, सुसाध्य; ' hardly o. ' दुष्प्राप, दुर्लभ, दुराप. **-er,** *s.* अर्जकः, प्रापकः. **-ing,** *a.* प्रचलित, प्रवृत्त, स्थापित, प्रसिद्ध. **-ment,** *s.* लाभः, प्राप्ति *f.*, अधिगमः, अर्जनं.

Obtest, *v. t.* *See* **Entreat.**

Obtrude, *v. i.* हठात्-आगंतुकतया-बलेन-प्रविश् 6 P or गम् 1 P or आक्रम् 1 U, 4 P. **-v. t.** बलेन प्रविश् c. or प्र-सृ c. 2 अतिनिर्बंधेन ग्रह् c. or प्र-दा 3 U or उपन्यस् 4 U. **-Obtrusion,** *s.* बलेन प्रवेशः, अनाहूतगमनं, सगर्व आक्रमः, आगंतुकभावः. **-Obtrusive,** *a.* धृष्ट, आगंतुक (की *f.*), सप्रगल्भ, बलात् प्रवेशक. **-ly,** *adv.* बलेन, हठात्, प्रसभं, प्रसह्य.

Obtund, *v. t.* घनीकृ 8 U, जडीकृ, तेजः हृ 1 P. **-Obtuse,** *a.* जड, मंद, स्थूल, मूढ, मंद-जड-मति-बुद्धि-धी. 2 अतीक्ष्ण, अतीव्र, अप्रखर, धाराहीन, निर्धार, घन, स्थूल, निस्तेजस्, अनिशित; 'o. angle' बहिर्लंबः-विषमः-कोणः. **-ly,** *adv.* जाड्येन; जडवत्, अतीव्रं, घनं, स्थूलं. **-ness,** *s.* जाड्यं, मूढता, मंदता; स्थूलता, घनता, अतीक्ष्णता,

Obvert, *v. t.* अधोमुखीकृ 8 U; अभिमुखीकृ. **-Obverse,** *s.* मुखं, अग्रभागः.

Obviate, *v. t.* परिहृ 1 P, नि-,वृ c., निरस् 4 U, प्रतिकृ 8 U, प्रतिवि-धा 3 U, विहन् 2 P, निवृत् c., वि-प्रति-रुध् 7 U; *See* **Obstruct.**

Obvious, *a.* स्पष्ट, व्यक्त, स्फुट, परिस्फुट, सुस्पष्ट-व्यक्त, सुगम, सुप्रकाश, भिन्नार्थ, स्पष्टार्थ; ' o. to the sight ' दृष्टिगोचर, प्रत्यक्ष, सुलक्ष्य. **-ly,** *adv.* स्पष्टं, व्यक्तं, स्फुटं, सुप्रकाशं, भिन्नार्थं. **-ness,** *s.* स्पष्टता, स्फुटता.

Occasion, *v. t.* उत्पद् c., जन् c. (जनयति), आवह् 1 P, उत्था c., भू 1 P (with dat.). **-s.** अवसरः, समयः, कालः. अवकाशः, प्रस्तावः, प्रसंगः, प्रसरः, वेला, स्थानं, ' according to the o. ' यथावसरं, यथाकालं, प्रसंगानुरूपं, प्रस्तावसदृशं. 2 प्रयोजनं, अपेक्षा, आकांक्षा, उपयोगः, कार्यं, कारणं. 3 वृत्तं, संगति *f.*, घटनं-ना. 4 निमित्तं, हेतुः, प्रयोजनं, कारणं, उपाधिः. **-al,** *a.* नैमित्तिक-प्रासंगिक- (की *f.*), प्रसंगागत, कार्योपात्त, निमित्तोपनत. 2 आगंतुक-आपतिक-(की *f.*), अनियत, अनित्य, अनियत-

कारण, अनुकाल, विरल, कादाचित्क (की *f.*); better by 'o.-ly'. **-ally,** *adv.* कदाचित्, कदापि, क्वचित्, काले काले, अंतरा अंतरा, प्रसंगवशात्, यथासंभवं, कार्यवशात्, निमित्तेन, प्रसंगानुरूपं. **-ed,** *a.* उत्पादित, उत्पन्न, जनित, जात, उदित, उद्भूत; gen. ex. by ज, उद्भव, प्रभव, मूल, कारण, निमित्त, कर्तृ, हेतु in comp.; 'fever o. by fatigues' श्रमनिमित्तः ज्वरः &c.

Occident, *s.* पश्चिमा, प्रतीची, पश्चिमा दिक्. **-al,** *a.* पाश्चिम, प्रतीच्य, पाश्चात्य, प्रतीचीन.

Occiput, *s.* मस्तक-शिरः-पृष्ठं.

Occult, *a.* नि-,गूढ, दुर्ज्ञेय, दुर्बोध, गहन, गुप्त, अज्ञात, गूढार्थ. **-ism, -ness,** *s.* गूढता, गहनता.

Occultation, *s.* आच्छादनं, ग्रासः.

Occupy, *v. t.* अधि-ष्ठा 1 P, अधि-वस् 1 P, अध्यास् 2 A, आश्रि 1 U, आविश् 6 P, आ-अध्या-क्रम् 1 U, 4 P (all with acc.); व्याप् 5 P, पूर् 10, व्यश् 5 A; वृत् 1 A (with loc.), पदं कृ 8 U or वि-धा 3 U, स्था; 'o. a throne' राज्यमारुह्-राजपदमधिरुह् 1 P; 'o. ing the honourable position of a housewife' श्लाघ्ये गृहिणीपदे स्थिता (S. 4). **2** (Possess) भुज् 7 A, धृ 1 P, 10, धा. **3** प्र-नि-युज् 7 A, 10, व्या-पृ c., प्रवृत् c., व्यापृत-*a.* कृ; 'o. oneself' व्यापृ 6 A, व्यापृत-निरत-आसक्त-*a.* भू 1 P, प्रवृत् (with loc.); आत्मानं व्यापृ c. **-ancy,** *s.* भोगः, भुक्ति *f.*, आवेशः, आक्रमः, अधिकारः. **-ant,** *s.* भोक्तृ भोगिन्, अधिकारिन् all *m.* **-ation,** *s.* वृत्ति *f.*, आ-उप-जीविका, आजीवः, जीवनसाधनं-उपायः. **2** क्रिया, कृत्यं, प्रवृत्तिः, चरितं, चेष्टा. **3** नियोगः, अधिकारः, स्वकर्मन् *n.* धर्मः. **4** अधिवासः, आवेशनं, अधिष्ठानं, व्याप्ति *f.*, आक्रमणं, भोगः, भुक्तिः; 'daily o.' नित्यकृत्यं; 'to do the usual morning o. s.' उचितेषु प्रभातकरणीयेषु (S. 4). **-ed,** *a.* आविष्ट, आक्रांत, अध्युषित, अध्यासित, अधिष्ठित, व्याप्त, भुक्त, आश्रित. **2** व्यापृत, व्यापारिन्, व्यवसायिन्, प्रवृत्त, कर्म-निष्ठ-रत-उद्युक्त, क्रियावत्; gen. ex. by रत, निष्ठ, मग्न, व्यापृत, पर in comp., or by व्यापृ, प्रवृत्. **-er,** *s.* अधिष्ठातृ *m.* भोक्तृ *m.*

Occur, *v. i.* वृत् 1 A, विद् 4 A; जन् 4 A, उत्पद् 4 A, सं-भू 1 P. **2** उप-स्था 1 U, आगम् 1 P, उप-नम् 1 P; *See* **Befall. 3** सं-,वृत्, समा-पद्, घट् 1 A, आ-नि-पत् 1 P, सं-भू; 'o. to the mind' मनसि उद्-इ 2 P, or भू or जन् or स्फुर् 6 P, or आविः-प्रादुः-भू; 'this did not o. to his mind' इति तस्य बुद्धौ न संजातं, इति तस्य हृदये नापतितं (Ka. 288); 'the following (thoughts) o. ed to my mind' आसीत्-समभूत्-मे मनसि; 'these two verses o. to our memory (mind)' स्मृत्युपस्थितौ इमौ द्वौ श्लोकौ (U. 6). **-rence,** *s.* घटना-नं, वृत्तं, वृत्तांतः, भूतं, व्यतिकरः; संभवः, संगति *f.*, उत्पत्ति *f.*, उपस्थिति *f.*, उपागमः; 'of usual o.' नित्यसंभुत; 'of rare o.' दुर्लभ, चिरोपनत. **-rent,** *s.* शत्रुः; *See* **Enemy. 2** वृत्तं, वृत्तांतः.

Ocean, *s.* समुद्रः, सागरः, सिंधुः, उदन्वान्, अर्णवः, रत्नाकरः, अकूपारः, पारावारः; and comp. of धिः, निधिः, पतिः, राशिः with 'Water' q. v.; वारिराशिः, जलनिधिः, अब्धिः, अंबुधिः, वार्धिः, अपांपतिः, सरित्पतिः, तोयराशिः अंबुराशिः, &c.: 'o.-bound' सागरांत, समुद्रवलय-रसन-मेखल; 'o. of misery' दुःख-सागरः, व्यसनार्णवः. **-a., -ic,** *a.* सामुद्र (द्री *f.*), समुद्रीय, (*s.*) in comp.

Ochre, *s.* सुवर्णगैरिकं.

Ochlocracy, *s.* प्राकृतजनप्रभुत्वं.

Octagon, *s.* अष्टास्रं, अष्टकोणाकृति *f.* **-al, -Octangular,** *a.* अष्टकोण, अष्टास्र.

Octave, *s.* अष्टकं. **-Octavo,** *a.* अष्टपत्रक.

Octennial, *a.* अष्टवार्षिक (की *f.*), अष्टवर्षीय. **2** अष्टवर्षस्थायिन्.

October, आश्विनकार्तिकं.

Octogenarian, *a.* अशीतिवयस्क.

Octohedron, *s.* अष्टपृष्ठः.

Octopetalous, *a.* अष्टदल.

Octosyllable, *s.* अष्टाक्षरं.

Octuple, *a.* अष्टगुण, अष्टविध.

Ocular, *a.* चाक्षुष (षी *f.*), प्रत्यक्ष; 'o. evidence' प्रत्यक्ष-चाक्षुष-प्रमाणं, चाक्षुषज्ञानं. **-ly,** *adv.* प्रत्यक्षप्रमाणेन. **-Oculist,** *s.* चक्षुः-नेत्र-वैद्यः.

Odd, *a.* विषम, असम, अयुग्म. **2** विलक्षण, असाधारण (णी *f.*), अपरूप, असंगत, अपूर्व, वि-, चित्र, अद्भुत, असामान्य, लोकोत्तर; 'game of o. and even' मुष्टिद्यूतं. **-ity, -ness,** *s.* वैषम्यं. **2** वैलक्षण्यं, वैचित्र्यं, असंगति *f.*, अपूर्वता, आचारवैलक्षण्यं. **3** कौतुकं. **-ly,** *adv.* विषमं, चित्रं, विलक्षणं. **-Odds,** *s.* वैषम्यं, न्यूनाधिकभावः, तारतम्यं. **2** आधिक्यं, उत्कर्षः, विशेषः, श्रेष्ठता, विशिष्टता; 'fight at o.' अधिकबलेन शत्रुणा युध् 4 A.

Ode, *s.* गीतं, गानं, गेयं.

Odious, *a.* गर्हित, कुत्सित, निंद्य गर्ह्य, द्वेष्य, अप्रिय, द्वेषपात्रं-भाजनं-आस्पदं; कश्मल (report). **2** द्वेषावह, द्वेषोत्पादिन्. **-ly,** *adv.* कुत्सितं, गर्हणीयतया. **-ness,** *s.* गर्ह्यता, द्वेष्यता. **-Odium,** *s.* वि-,द्वेषः, गर्हा, कुत्सनं, घृणा.

Odontagy(ia), *s.* दंत-शूलं-पीडा-व्यथा.

Odour, *s.* गंधः, वासः; 'strong or fragrant o.' सुगंधः, सुवासः, सौरभं-भ्यं, आ-,मोदः, परिमलः; 'bad o.' दुर्गंधः, पूतिगंधः. **-ous, -Odoriferous,** *a.* सगंध, सुगंधि, परिमलवत्, सामोद, गंधवत्, सुरभि, सवास.

Œsophagus, *s. See* 'Gullet.'

Of, *prep.* Gen. ex. by genitive or by comp.: 'o. great strength' महाबल. 2 (Showing reference) अधिकृत्य, उद्दिश्य (with acc.), or by गत in comp.; 'by thinking o. her husband' भर्तृगतया चिंतया. 3 (Made of) by Tat. comp.: or मय (यी *f.*), निर्मित in comp.; or by derivatives; 'pot o. gold' हेमपात्रं, हेममयं or हैमं पात्रं. 4 (Partitive sense) by gen. or loc., or मध्ये, मध्यात् with gen. 5 (Apposition) ex. by comp. or by नाम *ind.*; 'the island o. Ceylon' सिंहलद्वीपं, सिंहलं नाम द्वीपं. 6 (Showing cause) by instr. or abl.; 'died o. fever' ज्वरेण मृतः.

Off, *adv.* दूरे, दूरं, दूरतः; (with verbs) ex. by अप, वि, निः, अव, उत्; 'o. with his head' उच्छेद्यतामस्य शिरः; 'o. with him to the prison' अपनीयतामसौ कारागृहं. *-a.*, 'far o.' दूरवर्तिन्, दूरस्थित-स्थ. *-interj.*, 'get o.', 'be o.' दूरं अपेहि, अपसर; 'o.-hand' प्रत्युत्पन्न, अचिंतितपूर्व, आकस्मिक (की *f.*), असावधान, निरपेक्ष; 'badly o.' दुःस्थित, दुर्गत, आपन्न, कृच्छ्रगत; 'well o.' सुस्थ, सुस्थित, संपन्न.

Offal, *s.* उच्छिष्टं, भुक्तावशेषः-षं, शेषान्नं, मलं, उच्छिष्टान्नं; मांसोच्छिष्टं, अवशिष्टमांसं.

Offend, *v.* अपराध् 4, 5 P (with gen. or loc.), विप्रियं-अनार्यं कृ 8 U or आचर् 1 P, अप्रसादं उत्पद् c.; कस्मिन्नपि पूजार्हे अपराद्धा शकुंतला (S. 4) '*S*akuntalā has o. ed (committed an offence against) some respectable person'. 2 पीड् 10, व्यथ् c. (व्यथयति), क्लिश् 9 P, दु 5 P, सं-परि-तप् c. 3 (Against) अतिचर्, अति-व्यति-क्रम् 1 U, 4 P, लंघ् 1 A, 10, अतिवृत् 1 A, भिद् 7 P, भंज् 7 P, लुप् c. 4 रुष् c., क्रुध् c., प्र-,कुप् c., क्षुभ् c., कुपित-क्षुब्ध- *a.* कृ, कोपं जन् c. (जनयति); अव-अप-मन् c. 5 रुध् 7 U, बाध् 1 A, स्खल् c. (स्खलयति). **-ed,** *a.* कुपित, क्षुब्ध, प्रकोपित, क्रुद्ध, रुष्ट, जातामर्ष, संतप्त, असंतुष्ट. 2 बाधित, व्याहत, प्रतिरुद्ध; 'to be o.' कुप्-क्रुध्-रुष् 4 P. **-er,** *s.* अपराधिन्, अपराद्धः, दोषिन्, पापिन् पातकिन्, कृतागस्, कृतापराधः, सदोषः, अपराधकृत्, कुकर्मन् all *m.* **-Offence,** *s.* अपराधः, दोषः, पापं, पातकं, अघं, एनस् आगस् *n.*, दुरितं, कुकर्मन् *n.* दुष्कृति *f.* 2 कोपः, क्रोधः, रोषः, अमर्षः, मन्युः, असंतोषः; 'easily taking o.' शीघ्रकोपिन्, सुलभकोप. 3 विप्रियं, अवमानः, अवज्ञा. 4 रोधः, बाधा-धः, स्खलनं; *See* **Obstacle. -less,** *a.* निर्दोष, निरपराध. **-Offensive,** *a.* कोपजनन (नी *f.*), रोषावह, अप्रिय, अतुष्टि-अप्रीति-कर (री *f.*), असुखद, अरम्य, विरुद्ध, कटु, असभ्य; 'o. to the ear' श्रवणकटु, कुश्राव्य; 'o. to the taste' विरस. 2 बीभत्स, जुगुप्सावह, गर्ह्य, कुत्सित, गर्हित, दुर् pr.; 'o. smell' दुर्गंधः, पूतिगंधः. 3 पीडाकर (री *f.*), अनिष्टावह, अहित, अपकारक, उपघातिन्; 'act on the o.' अपराधे अग्रेसरः भू 1 P; 'o. weapon' घातोपयुक्तं शस्त्रं. 4 आक्रामक, आ-अभिघातिन्. **-ly,** *adv.* सापकारं, अप्रियं, सापराधं, सदोषं. **-ness,** *s.* अप्रियता, कटुता, गर्ह्यता, सापकारता, घातुकता.

Offer, *v. t.* उप-नी 1 P, उप-हृ 1 P, प्र-उप-कल्प् c., उप-स्था c. (स्थापयति); प्र-दा 3 U, 1 P, प्रति-पद् c., निविद् c., ऋ c. (अर्पयति), निक्षिप् 6 P, स्पृश् c., उपहारं दा, उपढौकृ c. 2 उपन्यस् 4 U, उप-क्षिप्, पुरो नि-धा 3 U, अभि-धा, निर्-उद्-दिश् 6 P. 3 प्र-,दृश् c., प्रकटीकृ; प्रसृ c., प्रक्षिप्. 4 दा desid. (दित्सति-ते). 5 (As an oblation) उपहृ, निवप् 1 U, निर्वप्, उत्सृज् 6 P, ऋ c., उपहारीकृ, उपायनीकृ; 'o. mango-sprouts in memory of Smara' स्मरमुद्दिश्य निवपेः सहकारमंजरीः (K. iv. 38); 'water o. ed to the Manes' निवापसलिलं; 'o. a burnt oblation' हु 3 P; 'o. a price' मूल्यं निर्दिश् or अभि-धा; 'o. violence' बलात्कारं कृ. *-v. i.* उपस्था 1 U, आविः-प्रादुः-भू 1 P, उपनम् 1 P, दृश्-लक्ष् pass., आ-नि-पत् 1 P. 2 (Show willingness) ex. by desid. form, or वद् 1 P with future; 'he o.-ed to aid me' तव साहाय्यं करिष्यामीति उवाद. 3 प्रयत् 1 A, उद्यम् 1 A, चेष्ट् 1 A, उत्-जृंभ् 1 A; *See* **Attempt.** *-s.* उपन्यासः, उपक्षेपः, प्रस्तावः, अभिधानं, निर्देशः, वचनं, निवेदनं; sometimes प्रार्थना; 'o. for marriage' विवाहप्रार्थना; 'makes an o. of' दित्सति. 2 प्रयत्नः, उद्यमः, प्रवृत्ति *f.* **-er,** *s.* उपहर्तृ उपनेतृ, अर्पकः, निवेदकः, होतृ all *m.* **-ing,** *s.* उपहरणं, उपनयनं, अर्पणं. 2 बलिदानं, बलिकर्मन् *n.* निर्वपणं, हवनं. 3 उपायनं, उपहारः, उत्सर्गः, बलिः, दानं; *See* **Oblation, Mane.** 4 (Sacrificial) हविस् *n.*, हव्यं, हुतं, आहुति *f.* 5 अर्घः, उपायनं, प्राभृतं.

Office, *s.* कर्मन् *n.*, कार्य, नियोगः, क्रिया, कृत्यं, व्यापारः, धर्मः, प्र-,वृत्ति *f.* 2 अधिकारः, पदं, पदवी, स्थानं, आस्पदं, नियोगः, अधिकारपदं. 3 विधिसंग्रहः. 4 उद्योगस्थानं, कार्यानुष्ठानगृहं, कार्यस्थानं; 'good o.' उपकारः, उपकृतं-ति *f.*, सुकृतं, अनुग्रहः, हितं; 'ill o.' अपकारः, अपक्रिया, अनिष्टं; 'holding o.', 'in o.' प्राप्ताधिकार, अधिकारापन्न, पदारूढ, अधिकृत; 'dismissed from o.' च्युत-भ्रष्ट-अधिकार, पदभ्रष्ट-च्युत; 'permanent o.' स्थिराधिकारः; 'temporary o.' चलपदं. **-Officer**, *s.* अधिकृतः, नियुक्तः, नियोगिन् *m.* अधिकारिन् *m.* आधिकारिकः. कार्यवीक्षकः; 'o. of the king' राजपुरुषः भृत्यः, प्रकृतिपुरुषः; 'o. of justice' धर्माधिकारिन् *m.* न्यायाध्यक्षः; 'military o.' सेनापदभाज् *m.* सैनिकाध्यक्षः; बलाधिपः. **-Official**, *a.* राजपुरुषः-भृत्यः, अधिकारी नियोगी, पुरुषः, भृत्यः. *-a.* आधिकारिक (की *f.*), अधिकारपद-विषयक-संबंधिन्; अधिकारयुक्त. **-dom**, *s.* अधिकृतवर्गः. **-ly**, *adv.* अधिकारपूर्वं, अधिकारवशात्. **-Officious**, *a.* अनधिकारचर्चाशील, परकार्यचर्चक; *See* **Meddlesome.** 2 उपकारशील, अनुकूल, हित. 3 अत्युपचार, अत्युपकारिन्. **-ly**, *adv.* अधिकारचर्चया, सप्रतिभं, प्रगल्भतया. **-ness**, *s.* अनधिकारचर्चा, परकार्यचर्चा-प्रवेशः.

Off-scouring, *s.* *See* **Dirt.**

Off-set, *s.* प्ररोहः, अंकुरः. *-v. t.* समीकृ 8 U.

Off-shoot, *s.* प्ररोहः, अंकुरः, शाखा (lit. and fig.)

Offspring, *s.* संतानः, संतति *f.*, प्रसूति *f.*, प्रजा, अपत्यं, प्रसवः, तोकं; 'male o.' पुत्रः, सूनुः, पुमपत्यं, पुंसंतानः; 'female o.' कन्या, सुता, स्त्र्यपत्यं; 'having no o.' निर्वंश, निरपत्य, निःसंतान.

Offuscate, *v. t.* *See* **Obscure.**

Oft, Often, (O.-times), *adv.* असकृत्, बहुशः-धा, बहु-अनेक-वारं, मुहुर्मुहुः, भूयो भूयः, अनेकशः, अनेकदा, वारंवारं, अभीक्ष्णं; 'how o.' कतिशः, कतिवारान्; 'as o. as-so o.' यतिवारं-ततिवारं.

Ogle, *s.* कटाक्षः, कटाक्ष-अपांग-दर्शनं, नयनोपान्तविलोकितं, अर्धवीक्षणं, भ्रूविलासः. *-v. t.* कटाक्षेण ईक्ष् 1 A or अवलोक् 1 A, 10, तिर्यक्-साचि-दृश् 1 P.

Ogre, *s.* क्रव्याद् *m.*, दैत्यः, दानवः, राक्षसः.

Oil, *s.* तैलं, स्नेहः, अभ्यंजनं; 'pour o. on burning fire' क्षते क्षारं प्रक्षिप् 6 P; 'o.-bottle' कुतू *f.*; 'o.-cake' तैलकिट्टं, पिण्याकः, तिलकल्कं; 'o.-man' तैलिकः, तैलिन् *m.* तैल-स्नेह-कारः, चाक्रिकः; 'o.-mill' तैलपेषणी. *-v. t.* तैलेन लिप् 6 P or अंज् 7 P or दिह् 2 U. **-ed**, *a.* तैलाक्त, स्नेहाक्त, अभ्यक्त. **-y**, *a.* तैलमय (यी *f.*), सस्नेह सतैल, तैलयुक्त-वत्, तैलाक्त; चिक्कण, मसृण, स्निग्ध, (fig. also).

Ointment, *s.* अंजनं, वि-,लेपः-पनं, प्र-अनु-लेपः, अभ्यंजनं, उपदेहः; 'perfumed o.' गात्रानुलेपनी, वर्ति *f.*, वर्णकं.

Old, *a.* (Person) वृद्ध, स्थविर, प्रवयस्, परिणत, परिणतवयस्, जीर्ण, वयोवृद्ध, जरठ, जरत्, जरातुर, गतवयस्क, जीन, जरण, जरंड; 'to grow o.' जॄ 4, 9 P, ज्या 9 P, परिणम् 1 P; 'o. age' जरा, परिणामः, परिणति *f.*, वार्धकं-क्यं; वृद्धावस्था, वृद्धभावः, ज्यानि *f.*, जीर्णि *f.*; 'o. lady' जरती, स्थविरा, वृद्धा, पलिता, पलिक्नी; 'o. man' स्थविरः, जरठः, वृद्धः, जरन्, पलितः. 2 (Showing age) ex. by वर्ष, वत्सर, वर्षीण-य in comp.: '8 years o.' अष्टवर्षीय, अष्टवर्ष-वर्षात्मक; 'a year o.' वर्षजात; '2 days o.' द्व्यहजात; 'how o. are you' किं ते वयःप्रमाणं, किंवर्षीयोसि. 3 (Not new) बहु-चिर-कालिक (की *f.*), चिर-दीर्घ-कालीन, चिरकाल-चिर-स्थायिन्, चिरंतन (नी *f.*); oft. by चिर in comp.; 'o. servant' चिरसेवकः, मूलभृत्यः, मौलः; 'o. friend' चिरमित्रं, चिरंतनसुहृद्. 4 जीर्ण, जर्जर, जर्जरित; 'o. cloth' चीरं, जीर्णवस्त्रं, पटच्चरं. 5 (Ancient) पुराण, प्राचीन, पूर्व, पूर्वतन (नी *f.*), प्राक्तन, पुरातन, प्रतन, प्रत्न, पौराण (णी *f.*), प्राक्-पूर्व-कालीन, पुरावृत्त; 'of o.' 'in olden times' पुरा, पुराकल्पे, पूर्वं. **-en**, *a.* पुरातन, पुराण, प्राचीन. **-ish**, *a.* ईषद्वृद्ध.

Oleaginous, *a.* स्निग्ध, चिक्कण, मेदुर, मसृण

Oleander, *s.* प्रति(ती)हासः, करवीरः, शतप्रासः, चंडातः, हयमारकः.

Oleraceous, *a.* शाकविषयक.

Olfactory, *s.* नस्य, नासा in comp.

Olibanum, *s.* तुरुष्कः, पिंडकः, सिह्लः, यावनः; *See* **Incense** also.

Oligarchy, *s.* अल्पजनाधिपत्यं-प्रभुत्वं. **-ic**, *a.* अल्प-कतिपय-स्वामिक.

Olio, *s.* *See* **Medley.**

Olive, *s.* जितवृक्षः.

Omen, *s.* निमित्तं, शकुनः-नं, लक्षणं, चिह्नं, अजन्यं, पूर्वलक्षणं-चिह्नं, शुभाशुभलक्षणं; 'of good o.' शुभ, मंगल, सुलक्षण; 'good o.' सुलक्षणं; 'ill o.' दुश्चिह्नं, दुर्लक्षणं, अपशकुनः, अजन्यं, अवलक्षणं, अशुभलक्षणं. **-Ominous**, *a.* अनिष्ट or अशुभ-शंसिन् or आवेदिन्, दुर्लक्षण, अलक्षण. 2 शुभ-मंगल-शंसिन्. 3 शाकुनिक (की *f.*), शकुननिमित्त in comp. **-ly**, *adv.* अशुभलक्षणेन, दुर्लक्षणपूर्वं.

Omit, *v. t.* वृज् 10, वि-परि-°, परि-त्यज् 1 P, उत्-,क्षिप् 6 P, मुच् 6 P, उत्सृज् 6 P.

अपास् 4 U, हा 3 P. 2 अतिक्रम् 1 U, 4 P, उपेक्ष् 1 A, लंघ् 1 A, 10, अतिचर् 1 P, अतिवृत् 1 A, लुप् c., न कृ 8 U or वि-धा 3 U or अनु-ष्ठा 1 P. **-Omission,** *s.* वर्जनं, त्यागः, उत्सर्गः, लंघनं, अतिक्रमः, अतिचारः, लोपः, उपात्ययः, 'o. to do something' अननुष्ठानं, अविधानं, उपेक्षा.

Omnifarious, *a.* सर्वविध-प्रकार.

Omnigenous, *a.* सर्वप्रकार-जातीय.

Omnipotent, *a.* सर्वशक्तिमत्, सर्वसमर्थ-शक्ति, अमित-अपार-शक्ति. **-Omnipotence, -cy,** *s.* सर्वशक्तित्वं, अपार-अमित-शक्ति *f.*, सर्वसामर्थ्यं, अनंतशक्तिः.

Omnipresent, *a.* सर्वगत, सर्वात्मक, सर्व-विश्व-व्यापिन्, विश्वात्मन्, विश्वरूप. **-Omnipresence,** *s.* सर्व-विश्व-व्याप्ति *f.*, विश्वात्मता, विश्वरूपता, सर्व-विश्वव्यापिता.

Omniscient, *a.* सर्वज्ञ, सर्वविद्-वेदिन्-बुध, सर्वदर्शिन्-साक्षिन्, विश्वनेत्र, त्रिकालज्ञ. **-Omniscience,** *s.* सर्वज्ञत्वं, सर्वज्ञानं.

Omnivagant, *a.* सर्वगत, सर्वगामिन्.

Omnivorous, *a.* सर्वभक्ष, सर्वभोजिन्.

Omphalic, *a.* नाभ्य, नाभि in comp.

Omphalocele, *s.* नाभिस्फोटः.

On, *prep.* Gen. ex. by loc., अधि pr., उपरि (with gen.). 2 (Time, place) by loc.; 'o. the shore' तीरे, तीरोपांते, उपतीरं. 3 (With verbs of motion) by loc. or instr., (स्कंधेन or स्कंधे छागं गृहीत्वा); 'go o. foot' पद्भ्यां गम् 1 P. 4 (Direction) by loc. or by तस्, त्र affixed; 'o. the left' वामतः; 'o. all sides' सर्वतः, सर्वत्र, समंततः. 5 (After) ex. by abl. or loc. abs.; 'o. his arrival' तस्मिन् आगते, तदागमनात्; or by gerund; 'o. hearing his speech' तस्य वचः श्रुत्वा. 6 (Concerning) विषय-संबंधिन् in comp. or by comp.; 'a work o. morals' नीतिग्रंथः; 'so o.' इत्यादि (*a.*); 'hence, o. thy life' स्वजीवितं यदि वांछसि तर्हि द्रागपसर, अपसरास्मात्स्थानान्नो चेत् त्वं जीवितेन वियोक्ष्यसे; 'o. o., to the combat' ननु युद्धाय प्रयात. **-***adv.* अग्रतः, अग्रे, प्र pr.; 'having clothes o.' परिहितवस्त्र. **-ward,** *a.* अग्रेसर (री *f.*), अग्रगामिन्, वर्धिष्णु. **-wards,** *adv.* अग्रे, अग्रतः, पुरतः.

On-dit, *s.* किल *ind.*; *See* **Rumour.**

One, *a.* एक; 'o. of two' एकतर; 'o. of many' एकतम; 'only o.' अनन्य; 'fixed on o. object' अनन्यविषय, अनन्यवृत्ति. 2 (Any) कश्चन, कोपि. 3 (Same) एक, तद् with एव; 'at o. time' युगपत्, समं, एककाले; 'having o. meaning' एकार्थ. **-***s.* जनः, नरः, मनुष्यः; 'gen. not ex.; 'o. should always protect oneself' आत्मानं सततं रक्षेत्; 'o. by o.' एकैकशः, एकैकं, प्रत्येकं, पृथक्पृथक्; 'o. day' कदाचित्, कदापि काले; 'young or little o s.' शिशुजनः, बालाः; 'in o. way' एकधा; 'o.-self' आत्मन् *m.*, स्वयं *ind.*; 'o.'s own' स्व, निज, आत्मीय, स्वीय, आत्म in comp.; 'to be at o.' समन् 4 A; 'o.-eyed' एकाक्ष, काण, एकाक्षिहीन; 'o.-sided' असम, एकपक्षीय, एकदेशीय; 'o. another' अन्योन्यं, परस्परं, इतरेतरं; 'to be o.-self again' प्रकृतिमापद् 4 A, संज्ञां लभ् 1 A: *See* 'come to senses' under **Sense;** 'to bring to o.-self' प्रकृतौ स्था c. (स्थापयति). **-ness,** *s.* एकत्वं, एकभावः, अद्वैतं, अभेदः, अविशेषः. **-Once,** *adv.* सकृत्, एकवारं. 2 (O. upon a time) एकदा, अथैकदा, अथ कदाचित्. 3 पुरा, पूर्वं, प्राक्काले; 'at o.' समं, युगपत्, एककाले, समकाले-लं; सद्यः, सपदि, तत्क्षणात्, तत्क्षणेन, तत्काले; 'all at o.' अकस्मात्, एकपदे; 'o. more' पुनरपि, भूयः, पुनः.

Oneirocritic,-al, *a.* स्वप्नविचारिन्.

Oneiromancy, *s.* स्वप्नार्थविचारः, स्वप्नफलज्ञापनं.

Onerous, *a.* दुर्भर, गुरु, गुरुभार, दुर्वह, दुःसह.

Onion, *s.* पलांडुः, सुकंदकः.

Only, *a.* एक, एव, एकाकिन्, केवल, मात्र-मात्रक in comp., अद्वितीय, अनन्य; 'having that as the o. recourse' तदेकशरण, अनन्यगतिक. **-***adv.* केवलं, एव, मात्र in comp.; 'not o. but' न केवलं followed by अपि or किंतु.

Onomatopœia, *s.* अनुकारः; अनुकरणं.

Onset, *s.* आ-अभि-क्रमः-मणं, आस्कंदः, अभिसंपातः, आपातः, अभिग्रहः, अभ्याघातः.

Onslaught, *s.* अभ्याघातः; *See* **Onset**

Ontology, *s.* सत्त्वविद्या, भूतविचारः. **-ist,** *s.* सत्त्वविद्याज्ञः.

Ooze, *v. i.* (शनैः) स्रु-श्रु-गल् 1 P, स्यंद् 1 A, प्र-स्नु 2 P, री 4 A. **-***v. t.* सृ c., स्यंद् c., &c. **-***s.* क्षरत्पंकः, मृदुमृत्तिका 2 स्रवः, द्रवः, धारा. **-ing,** *s.* स्यंदनं, क्षरणं, स्रवः. **-y,** *a.* सद्रव.

Opaque, *a.* प्रकाशाभेद्य, किरणाभेद्य; अस्वच्छ, कलुष, निष्प्रभ, सांधकार. **-ness,-Opacity,** *s.* अस्वच्छता, निष्प्रभता, कालुष्यं. 2 मुक्र्ं.

Opal, *s.* पुलकः, विमलकः.

Open, *v. t.* (Door &c.) अपा-वि-वृ 5 U, उद्-घट् c., निरर्गलीकृ 8 U ; (lotus) विकस् c., प्रबुध् c., भिद् 7 P or c., (सूर्यांशुभिर्भिन्नमिवारविंदं K. 1. 32), स्फुट् c.; (eyes) उन्मील् c., उत्फल् c., उन्मिष् c.; (mouth) व्या-दा 3 P, जृंभ् c., उत्-वि-°; (hand) प्रसृ c., वितन् 8 U, विस्तृ c. 2

वि-अंज् 7 P or c., विवृ, प्रकटीकृ, आविष्कृ, व्यक्तीकृ, प्रकाश् c., 'o. the heart', o. oneself' हृद्गतं निविद् c. 3 (As meaning) व्या-ख्या 2 P, व्याचक्ष् 2 A. व्याकृ, व्यक्तीकृ, विवृ. 4 छिद् 7 P, निर्भिद्. 5 शुध् c., वि-परि°. 6 प्रारभ् 1 A, प्रस्तु 2 U, प्र-उप-क्रम् 1 A. -v. i. उन्मील् 1 P, विकस् 1 P, स्फुट् 6 P, दल् 1 P, भिद् pass., फुल्ल् 1 P. 2 विस्तृ-विवृ- pass., वि-जृंभ् 1 A, प्रसृ c.-वितन्-pass.; (in other senses) pass. of roots in (*v. t.*). 4 (Ground) स्फुट्, विदल्, द्विधाभू, विदृ-भिद्-pass. 5 प्रवृत् 1 A, प्रारभ् pass. -*a*. वि-अपा-वृत, असंवृत, उद्घाटित; (eyes) उन्मीलित, उन्मिषित; (hand) प्रसारित, वितत, विस्तृत, विस्तीर्ण; (mouth) विजृंभित, सजृंभ, उज्जृंभ, व्यात्त; (letter) उन्मुद्र, निरावेष्टन, अकोशस्थ. 2 निर्व्रण, असंबाध, निरर्गल, अनर्गल, अरुद्ध, उत्-वि-शृंखल, निरवग्रह; वि-, शुद्ध, निर्विघ्न; *See* **Free.** 3 निर्व्याज, उत्तान, निष्कपट, सरल, ऋजु, निर्माय, उदार, शुद्धमति, विमलात्मन्; *See* **Frank;** 'o.-minded person' उत्तानहृदयः जनः. 4 सु-, प्रकाश, वि-,स्पष्ट, व्यक्त, प्रकट, अगूढ, अगुप्त. 5 निर्वृक्ष, अपादप; अनाश्रय. 6 गम्य, उपसर्पणीय; *See* **Accessible,** 'lays him o. to his enemy' शत्रुगोचरे (विषये) तं पातयति; 'o. to dispute' विवादास्पदं, विवादग्रस्त-*a*.; 'lay o' प्रकाश् c.; *See* (*v. t.*) 'o. air' अनावृतप्रदेशः-भूभागः; 'o. at one end' एकमुख; 'having gone out into the o. air' प्रकाशं निर्गतः (S. 4); 'o.-eyed' विवृताक्ष, उत्फुल्लनयन, सचेतन (fig.); 'o.-handed' उदार, मुक्तहस्त; 'o.-hearted' उदार, उत्तानहृदय, निर्व्याज; 'o.-mouthed' व्यात्तमुख. **-er,** *s*. उद्घाटकः, प्रकाशकः. **-ing,** *s*. विवरणं, विवृति *f*., उद्घाटनं; उन्मीलनं, विकासः, भेदः, स्फुटनं. 2 छिद्रं, रंध्रं, द्वारं, विवरः, स्फु(स्फो)टनं, भिदा. 3 प्रारंभः, उपक्रमः, प्रस्तावः, उपोद्घातः. -*a*. विकसत्, स्फुटत्. 2 प्रथम, आद्य, आरंभक. **-ly,** *adv*. प्रकाशं, सुस्पष्टं, व्यक्तं, परि-, स्फुटं. **-ness,** *s*. विवृतत्वं, विवृति *f*., निर्व्याजता, सारल्यं, निष्कापट्यं, दाक्षिण्यं, शुद्धमतिता, व्यक्तता, स्पष्टता, प्रकाशता, प्राकट्यं.

Opera, *s*. संगीतनाटकं.

Operate, *v. i.* गुणं आवह् 1 P, कार्यं उत्पद् c. or दृश् c., फलं सं-पद् c. or साध् c., प्रभू 1 P, प्रबलीभू; *See* **Effect.** 2 कृ 8 U, वि-धा 3 U, चेष्ट् 1 A, प्रवृत् 1 A प्र-यत् 1 A व्यापृ 6 A. 3 शस्त्रेण उपचर् 1 P or साध् c. **-ion,** *s*. क्रिया, कर्मन् *n*., कृति *f*., कार्यं, कृत्यं. 2 चेष्टितं, प्रवृत्ति *f*., उद्यमः, उद्योगः, प्रयत्नः, व्यापारः. 3 प्रवर्तकत्वं, हेतुता, कारणं, साधनं; 'mental o.' मनोव्यापारः. 'quick in o.' आशुकारिन्, सद्यःफल, आशुगुणावह. 4 (Surgical) शस्त्रक्रिया-कर्मन् *n*. शस्त्रोपायः, शस्त्रोपचारः. **-ive,** *a*. कर्मकारिन्, प्रवर्तक, प्रयोजक, कारणीभूत. 2 गुणावह, गुणकारिन्, सिद्धिकर(री *f*.), प्रबल, समभाव, प्रभविष्णु, कार्यक्षम. -*s*. कर्म-शिल्प-कारः, कारुः. **-or,** *s*. कारकः, कर्तृ *m*. प्रवर्तकः.

Operose, *a*. श्रम-कष्ट-साध्य.

Ophiology, *s*. सर्पविद्या.

Ophthalmia, *s*. नेत्राभिष्यंदः.

Opiate, *a*. निद्राप्रद, निद्रा-स्वाप-कारिन्, स्वापन. -*s*. निद्रावहं औषधं स्वापनं.

Opine, *v. i.* मन् 4 A तर्क् 10; *See* **Think.** **-Opinion,** *s*. मतं, मति *f*., तर्कः, बुद्धि *f*., बोधः, अभिप्रायः, आशयः; 'such is my o.' इति मे मतिः; 'difference of o.' मति-(त)भेदः, विप्रतिपत्ति *f*., वैमत्यं; 'regard for public o.' लोक or जन-लज्जा or भयं; 'secure the good o. of your husband' भर्तुर्बहुमता भव (S. 4). **-ated, -ative,** *a*. स्वमताभिमानिन्, मताग्रहिन्, दुराग्रहिन्.

Opium, *s*. अहिफेनं, अफेनं.

Opponent, *a*. विरुद्ध, प्रतिकूल, वि-प्रति-पक्ष, वैरिन्. -*s*. शत्रुः, अरिः, वैरिन्, वि-प्रति-पक्षः; प्रतियोद्धृ, प्रतियोगिन्, प्रतिरोधकः all *m*.

Opportune, *a*. समयोचित, प्राप्तकाल, कालयोग्य, प्रस्तावसदृश (शी *f*.), प्राप्तावसर, सामयिक-प्रास्ताविक- (की *f*.). **-ly,** *adv*. प्राप्तकालं, काले, स्थाने, यथासमयं, यथावसरं, प्रस्तावसदृशं, कालोचितं. **-ness,** *s*. कालौचित्यं, प्रस्तावयोग्यता. **-Opportunity,** *s*. प्रस्तावः, अवकाशः, अवसरः, कालः, समयः, प्रसंगः, वेला, कार्यकालः, योगः. 2 साधनं, उपायः, प्रयुक्ति *f*.; 'lose an o.' कालं क्षिप् 6 P or हृ 1 P; 'seizing an o.' अवसरं गृहीत्वा, गृहीतावसर, लब्धावकाश; 'to await an o.' अवसरं प्रति-पा c. (पालयति).

Oppose, *v. t.* वि-नि-प्रति-रुध् 7 U, प्रतिबंध् 9 P, प्रतिकृ 8 U, प्रतिकूलयति (*D.*), प्रत्यव-स्था 1 A, वि-प्रति-हन् 2 P, बाध् 1 A, निवृ c.; (in fighting) प्रतियुध् c.; संमुखी-अभिमुखी-कृ 8 U or भू. **-ed,** *a*. विरुद्ध, विपरीत, प्रतिकूल, विप्रतिपन्न, बाधित, वारित, असंमत, विद्विष्ट, 'o. to the practice of the world' लोकाचारविरुद्ध, लोकासंमत, लोकविद्विष्ट. 2 इतर in comp.; 'o. to false' मिथ्येतर. **-er,** *s*. विरोधकः, प्रतिहंतृ *m*. **-Opposite,** *a*. सं-प्रति-अभिमुख (खी *f*.), संमुखस्थ. 2 विरुद्ध, विरोधिन्, विपरीत, प्रतिकूल, वि-प्रति-पक्ष, प्रतिद्वंद्विन्, विपर्यस्त, व्यत्यस्त, इतर in comp.

of natural ' सहजेतर; सख्येतर, &c. 3 इतर, अपर, अंतर in comp.; ' the o. bank' पारं, तीरांतरं, अपरतीरं. -s. विपर्ययः, व्यत्यासः, विपरीतं; by (a.). **-ion,** s. वैपरीत्यं, प्रातिकूल्यं, विरोधः, विपक्षता, विपर्य(र्या)यः, व्यत्ययः, व्यत्यासः, विपर्यासः. 2 विरोधः, प्रतिक्रिया, प्रतिबंधः, प्रतियोगः-यत्नः, व्याघातः, बाधः-धा. 3 विरोधकजनाः, प्रतियोगिपक्षः, विरोधिजनवर्गः. 4 विरुद्ध-द्वेष-भावः, वैरं. **-ly,** *adv.* सं-अभि-मुखं, विपरीतं, प्रतिकूलं, विपर्ययेण.

Oppress, v. t. पीड् 10, अर्द् 1 P or c., उपद्रु 1 P, बाध् 1 A, नि-अप-कृ 8 U, विप्र-कृ, उपप्लु 1 A, उप मृद् 9 P or c., कृष् c., अभिद्रुह् 4 P, अभिभू 1 P. **-ion,** s. पीडा, पीडनं, बाधः-धा, अर्दनं, उपमर्दः, उपप्लवः, उपद्रवः, नि-विप्र-अप-कारः, नैष्ठुर्यं, क्रौर्यं. **-ive,** a. बाधक, पीडाकर (री *f.*), उपप्लाविन्, उपद्राविन्, पीडाप्रद, अपकारक; निष्ठुर, अतिक्रूर, क्लेशद. 2 अतिभारवत्. **-or,** s. प्रजापीडकः, उपप्लावकः, उपद्राविन् m., अत्याचारः, निष्ठुरः, क्रूरचरितः.

Opprobrium, s. निंदा, गर्हा, कुत्सा, तिरस्कारः, अपवादः, अवज्ञा, परिभवः, वाच्यता, धिक्कारः. **-Opprobrious,** *a.* गर्ह्य, निंदात्मक, गर्हारूप, निंदा-गर्हा-अर्थक; परुष, मुखर, द्वेष्य. **-ly,** *adv.* सापवादं, सतिरस्कारं. **-ness,** s. गर्ह्यता, निंदकत्वं.

Oppugn,-er, *See* **Oppose** &c.

Optative, *a.* इच्छार्थक.

Optic,-al, *a.* चाक्षुष (षी *f.*), चक्षुः-नेत्र in comp. 2 दृक्शास्त्रसंबंधिन्. -s. चक्षुरिंद्रियं, दृगिंद्रियं. **-Optics,** s. दृग्विद्या-शास्त्रं.

Optimacy, s. कुलीनवर्गः-जनाः.

Optimism, s. उत्तमता, उत्कृष्टता.

Option, s. अभि-,रुचि *f.*, इच्छा, कामः, अभिलाषः, ईप्सितं; विकल्पः, विभाषा (in grammar); ' it is left to your o ' अत्र स्वरुच्या वर्ततां भवान्, यथाभिलाषं क्रियतां. **-al,** *a.* वैकल्पिक- ऐच्छिक- (की *f.*), काम्य, सविकल्प, यथाकाम, रुच्यधीन, स्वेच्छातंत्र. **-ally,** *adv.* विकल्पेन, अन्यतरस्यां, (हृक्रोरन्यतरस्यां), वा, विभाषया.

Opulent, *a.* श्रीमत्, धनिन्, धनाढ्य, वित्तवत्, धन-वित्त-संपन्न, धानिक, समृद्ध, संपन्न, धनेश्वर, बहुधन. **-Opulence,** s. विभवः, ऐश्वर्यं, समृद्धि *f.*

Or, *conj.* अथवा, यद्वा, वा (never at beginning) repeated after each word, or after the last; (in questions) नु, (स्वप्नो नु माया नु मतिभ्रमो नु); उत, आहो, आहोस्वित् (correl. of किं ' whether '). 2 अन्यथा, इतरथा, अथवा, नोचेत्.

Oracle, s. दैवी वाक्, देव-आकाश-वाणी, आकाशभवा-अशरीरिणी-सरस्वती. 2 प्रश्न-देवता-देवः. 3 प्रश्न- शकुन-स्थानं. 4 प्रमाणं, आप्तः, प्रमाणपुरुषः; आप्तवचनं. **-Oracular,** *a.* देववाणीतुल्य, प्रमाणभूत, आप्त, प्रामाणिक (की *f.*).

Oral, *a.* वाचिक (की *f.*), उक्त, अलिखित; ' o. message ' वाचिकं. **-ly,** *adv.* वाचा मुखद्वारा, अलिखितं.

Orange, s. नारंगः, नागरंगः, ऐरावतः, नादेयी, भूमिजंबुका; (fruit) नारंगफलं; ' o.-coloured ' पिच्छिल, कौसुंभ (भी *f.*). **-Orangery,** s. नागरंग-वाटिका.

Oration, s. वाक्प्रबंधः, सालंकारं वचनं, प्रवचनं, सरस्वतीनिष्यंदः (fluent o.). **-Orator,** s. प्र-,वक्तृ m., वाक्शौंडः-चतुरः, प्रवचनपटुः, सद्वक्तृ m. वाक्पटुः, वाग्मिन् m., वागीशः, वाक्पंडितः-विशारदः, सभापंडितः. **-ical,** *a.* वाक्चातुर्यमय (यी *f.*), सालंकार, वागलंकारमय. **-y,** s. वाग्मिता, वाक्पाटवं-चातुर्यं, सुवक्तृत्वं, वाक्शक्ति *f.*, वक्तृत्वं, सभापांडित्यं. 2 प्रार्थनागारं, उपासनास्थानं, भजनालयः. **-Oratorio,** s. तालबद्धं धर्मकीर्तनं. 2 **Oratory** q. v.

Orb, s. मंडलः-लं, बिंबः-बं, वर्तुलं, चक्रं, वृत्तं, गोलः-लं; ' the moon with entire (undiminished) o. ' पूर्ण-अविकल-मंडलः चंद्रः, अखंडकलः शशी (Mal. 2). **-ed, -Orbicular,** *a.* मंडलाकार, वर्तुल, गोलाकृति. **-Orbiculate,** s. वर्तुलं. -*a.* वर्तुल; *See*(s.).

Orbit, s. कक्षा-क्षः, ग्रहपथः-मार्गः.

Orchard, s. वाटिका, वाटः-टी, उपवनं, वृक्षोद्यानं, वृक्षवाटिका; ' fruit o. ' पुष्पवाटिका.

Orchestra, s. वादित्रस्थानं-स्थलं. 2 वादकसमूहः, वादित्रगणः.

Ordain, *v. t.* वि-धा 3 U, आदिश् 6 P, निर्दिश्, सं-व्यव-स्था c. (स्थापयति), प्र-परि-क्लृप् c : प्रचुद् 10, वच् 2 P, स्मृ 1 P; 'o. ed by *Sastras*' शास्त्रोक्त, शास्त्रविहित-स्मृत, शास्त्रनिर्दिष्ट, &c. 2 (अधिकारे) नियुज् 7 A, 10, अधिकृ 8 U, or c., अभिषिच् 6 P, व्या-दिश्; (religiously) दीक्ष् 1 A, धर्मकर्मणि नियुज्. **-er,** s. प्रकल्पकः, संस्थापकः, प्रचोदकः.

Ordeal, s. दिव्यं, सत्यं, परीक्षा, प्रमाणं; ' o. by fire ' कोशः-षः, तप्तदिव्यं; 'subjecting oneself to o. ' दिव्यग्रहणं; 'trying o.' (fig.) तत्त्वनिकषा आपद्.

Order, *v. t.* आदिश् 6 P, निर्-नि-समा-व्या-दिश्, शास् 2 P, आ-ज्ञा c. (ज्ञापयति), प्रचुद् 10. 2 वि-धा 3 U, प्रणी 1 P, निर्वह् c.; *See* **Manage.** 3 परिक्लृप् c., क्रमेण विन्यस् 4 U or c. or स्था c. (स्थापयति) or नि-धा, संनि-धा, व्यव-स्था c., वि-,रच् 10;

व्यूह् 1 U. 4 Ordain, q. v. -s. आज्ञा, आ-नि-देशः, निर्देशः, शासनं, नियोगः; 'written o.' आज्ञापत्रं; 'what are your o.s' को नियोगोऽनुष्ठीयतां; 'your Majesty's o.s will be obeyed' यथाज्ञापयति देवः. 2 प्र-,चोदनं-ना, विधिः, नियमः, विधानं, प्रेरणा, वचनं. 3 क्रमः, अनुक्रमः, परिपाटि-टी *f.*, आनुपूर्व्य-र्वी, पर्यायः, परंपरा, पारंपर्यं, आवृत् *f.*; व्यवस्था, विन्यासः, विरचनं-ना, संविधानं; 'natural o.' आनुलोम्यं; 'inverted o.' 'reverse o.' प्रातिलोम्यं, व्युत्क्रमः, व्यतिक्रमः, विपर्ययः, विपर्यासः, व्यत्यासः, व्यत्ययः; 'o. of battle' व्यूहः, सैन्यरचना, बलविन्यासः; 'natural o. of words' अन्वयः; 'in natural or direct o.' अनुलोमं-मतः; 'in inverted o.' प्रतिलोमं-मतः; in good o.' सुस्थित, सुरक्षित, सुविहित; 'in o.' सुविन्यस्त, सुविरचित, व्यवस्थित, क्रमेण स्थापित; (*adv.*) क्रमेण, क्रमशः, यथाक्रमं, क्रमानुरूपं, अनुपूर्वशः, आनुपूर्व्येण, परिपाट्या; 'in o. to' ex. by अर्थे-र्थं in comp.; by dat. or by inf.; 'out of o.' अव्यवस्थित, भग्नक्रम, असुस्थ. 3 मार्गः, स्थिति *f.*, रीति *f.*, पद्धति *f.*, आचारः, नियमः; 'not breaking the (established) o.' स्थितेरभेत्ता (R. III. 27) स्थित्यै दंडयतो दंडयान् (R. I. 25) 'for maintaining o. &c.'; 'breaking the o.' स्थितिभेदः, अतिपातः, पर्ययः, उपात्ययः. 5 गणः, वर्गः, वर्णः, जाति *f.*; 'the lower o.s' अवर-अधम-वर्णाः, अंत्यवर्गः, अधमजातीयाः. 6 आश्रमः, वर्णाश्रमः; 'head of a religious o.' आश्रमगुरुः. **-er,** *s.* आज्ञापकः, आदेष्टृ *m.*; शास्तृ *m.* **-less,** *a.* क्रमहीन,शून्य, अक्रम, अनवस्थित. **-ly,** *a.* व्यवस्थित, यथाक्रम, क्रमानुगत, सक्रम, अनुपूर्व. -*adv.* यथाक्रमं, पर्यायेण, क्रमशः.

Ordinal, *a.* क्रमवाचक. -*s.* क्रमिकसंख्या. 2 विधिसंहिता.

Ordinance, *s.* विधिः, मर्यादा, कल्पः, प्र-,चोदनं-ना, स्थिति *f.*, धर्मशास्त्रविधिः-मर्यादा, नियमः, सूत्रं. 2 नि-आ-देशः, शासनं, नियोगः.

Ordinary, *a.* प्रचलित, प्रसिद्ध, प्रायिक (की *f.*), लोकप्रसिद्ध. 2 साधारण (णी *f.*), सामान्य, व्य(व्या)वहारिक-आचारिक-नैयमिक-(की *f.*), नित्य, यथाव्यवहार, यथापद्धति; 'something more than o.' विशेषः. 3 सामान्य, मध्यम, प्राकृत, अवर, नीतिविशिष्ट; 'an o. woman' नातिरूपवती स्त्री, सामान्यलावण्योपेता. -*s.* धर्माध्यक्षः. 3 साधारणभोजनस्थानं. **-ily,** *adv.* सामान्यतः, साधारणतः, प्रायः, प्रायेण, प्रायशः.

Ordinate, *a.* यथानुक्रम, अनुपूर्व. **-ion,** *s.* विधानं, कल्पनं, नियोगः. 2 दीक्षा; *See* **Ordain.**

Ordnance, *s.* युद्धास्त्रसामग्री, युद्धयंत्रसमूहः.

Ordure, *s.* पुरीषं, विष्ठा, उच्चारः; *See* **Dung;** 'to void o.' पुरीषं उत्सृज् 6 P or उच्चर् 1 P.

Ore, *s.* धातुः, खनिज-असंस्कृत-धातुः.

Organ, *s.* इंद्रियं, करणं, हृषीकं, विषयिन् *n.*; (of action) साधनं, करणं, उपकरणं, कर्मसाधनं, कर्मेंद्रियं; 'intellectual or internal o.' धींद्रियं, अंतरिंद्रियं. 2 द्वारं, मुखं, साधनं. 3 वंशी. **-ic,-ical,** *a.* इंद्रियसंबंधिन्, इंद्रियमय (यी *f.*)-विशिष्ट, इंद्रियोत्पन्न, सकरण; इंद्रिय in comp. **-ism,** *s.* रचना, घटना. **-ist,** *s.* वंशीवादकः **-Organize,** *v. t.* निर्मा 3 A, 2 P, सृज् 6 P, क्लृप् c., वि-रच् 10, घट् c. (घटयति). 2 वि-धा 3 U, संवि-धा, विन्यस् 4 U, क्रमेण स्था c. (स्थापयति), व्यव-स्था c., व्यूह् 1 U. 3 इंद्रियैः संयुज् 7 U, 10. **-ation,** *s.* निर्माणं, सृष्टि *f.*, घटनं-ना, विन्यासः, व्यूहः-हनं, संविधानं. 2 भागविरचनं-कल्पना-विन्यासः. 3 सेंद्रियता.

Orgasm, *s.* आ-सं-वेगः, क्षोभः, उत्तापः, अत्यंतावेगः.

Orgy, *s.* रात्र्युत्सवः, नैशोत्सवः, प्रहर्षः, प्रमोदः.

Orient, *a.* उज्ज्वल, भास्वत्; *See* **Bright.** 2 उद्यत्, उदयमान. -*s.* प्राची, पूर्वदेशः. **-al,** *a.* पौरस्त्य, प्राच्य, पूर्वदेशीय, पूर्व, प्राचीन. -*s.* पूर्वदेशवासिन् *m.* **-alist,** *s.* पूर्वदेशीयभाषाज्ञः.

Orifice, *s.* मुखं, छिद्रं, रंध्रं, द्वारं, सुषिरं, विवरं; 'o. of the ear' ऋषभः.

Origin, *s.* मूलं, प्रभवः, आ-प्रा-रंभः, उत्पत्ति *f.*, उद्भवः, उद्गमः, संभवः, जन्मन् *n.*, जाति *f.*, आदिः, योनि *f.*, बीजं, हेतुः, आदिकारणं, उत्पत्तिस्थानं. 2 प्रयोजकः, प्रवर्तकः; 'of low o.' हीनजाति-जन्मन्, कुयोनि; 'of good o.' मौल (ली *f.*), उत्कृष्टजाति. **-al,** *a.* मौल, प्रथम, आदिम, आद्य, पूर्व, आदि-मूल-in comp.; 'o. passage' मूलं, मूलवचनं. 2 अपूर्व, अपूर्वकल्पित, अचिंतितपूर्व, स्वतः-स्वयं-कल्पित. 3 अपूर्वरचक, स्वतः कल्पक. -*s.* मूलं, आदर्शः, मूलपत्रं-ग्रंथः-लेखः; *See* (*s.*). **-ality,** *s.* अपूर्वरचनाशक्ति *f.*, कल्पकत्वं-ता, अपूर्वकल्पनासामर्थ्यं, कल्पनाशक्तिः. 2 अपूर्वता. **-ally,** *adv.* आदौ, प्रथमं, प्रथमतः, प्रारंभे, मूलतः. **-ate,** *v. t.* (प्रथमं) उत्पद् c., जन् c. (जनयति), उद्भू c., सृज् 6 P, क्लृप् c., प्रवृत् c., निर्मा 3 A; प्रारभ् 1 A, उपक्रम् 1 A. -*v. i.* (प्रथमं) उत्पद् 4 A, जन् 4 A,

प्र-उद्-सं-भू 1 P, प्रसू 1 P; उद्-इ 2 P, उद्-गम् 1 P, प्रवृत् 1 A, उत्था 1 P; ex. by (*s.*) or by 'Arise', q. v. **-ation,** *s.* प्रारंभः, प्रथमोद्भवः. **-ator,** *s.* प्रवर्तकः. उत्पादकः, कल्पकः, योजकः, आरंभकः, निर्मातृ *m.* also ex. by (*s.*)

Orion, *s.* मृगशीर्षं.

Orison, *s.* प्रार्थना, स्तवः, स्तुति *f.*, उपासना, स्तोत्रं.

Ornament, *s.* अलंकारः, वि-,भूषणं, आभरणं, मंडनं; (decoration) अलंकरणं भूषा, अलंक्रिया, संस्कारः, परिष्कारः, परिकर्मन् *n.*, प्रतिकर्मन् *n.* प्रसाधनं कल्पना, लज्जा, नेपथ्यं, शोभा; (fig.) ललामं, अवतंसः, अलंकारः, तिलकः; 'o. to the Kshatriya family' क्षत्रियकुलावतंसः; आश्रमललामभूता; पंडितकुलतिलकः &c. —*v. t.* अलंकृ 8 U, परिष्कृ, मंड् 10; भूष् 10, प्रसाध् c., शुभ् c., रंज् c. **-al,** *a.* शोभावह, वि-,भूषक, शोभाप्रद, शोभा-भूषा-कर (री *f.*), अलंकरिष्णु; or by (*s.*). **-ally,** *adv.* विभूषणार्थं. **-ation,** *s.* अलंकरणं, मंडनं; रंजनं.

Ornate, *a.* कांतिमत्, विचित्र, शोभित, वि-,भूषित; सालंकार, अलंकारमय (यी *f.*), अलंकृत, कृतालंकार. **-ly,** *adv.* सालंकारं, शोभापूर्वं.

Ornithology, *s.* पक्षिविद्या. **-ist,** *s.* पक्षिविद्याज्ञः.

Orphan, *s.*, *a.* अनाथः, मातापितृरहितः-हीनः, गतमातृकः, गतपितृकः. **-age,** *s.* अनाथता. 2 अनाथाश्रयः, अनाथालयः.

Orpiment, *s.* (Yellow) पिंजरं, पीतनं, तालं, आ(अ)लं, हरितालकं.

Orrery, *s.* ग्रहमालानुकरणयंत्रं.

Orris, *s.* वचा, उग्रगंधा, षड्गंधा, गोलोमी, शतपर्णिका; (white) हैमवती, श्वेतवचा.

Orthodox, *a.* शास्त्रीय, शास्त्रसंमत, शास्त्रमतानुसारिन्, धर्मपरायण, सत्यधर्मानुरोधिन्. **-y,** *s.* शास्त्रानुसारः, शास्त्रमार्गावलंबनं, धर्मपरायणता.

Orthoepy, *s.* शुद्धोच्चारः-रणं. **-ist,** *s.* शुद्धोच्चारणविद् *m.*

Orthogon, *s.* समचतुरस्रं. **-al,** *a.* समकोणाकृति.

Orthography, *s.* अक्षर-वर्ण-विन्यासः, वर्णविन्यासशास्त्रं-विचारः.

Orts, *s.* *See* **Offal.**

Oscillate, *v. i.* दोलायते (D.), प्रेंख् 1 P, इतस्ततः चल् 1 P or कंप् 1 A or स्फुर् 6 P or स्पंद् 1 A; *See* **Waver.** **-ion,** *s.* आंदोलनं, प्रेंखणं, इतस्ततः चलनं, गतागतं. **-ing,-ory,** *a.* दोलायमान, स्पंदमान, स्फुरित.

Oscitant, *a.* वि-,जृंभमाण, जृंभित. 2 निद्रालु, तंद्रालु. **-Oscitate,** *v. i.* वि-,जृंभ् 1 A.

Osprey, *s.* कुररः-री, उत्क्रोशः.

Osseous, *a.* अस्थिमय (यी *f.*). **-Ossicle,** *s.* अस्थिकं. **-Ossify,** *v. t.* अस्थिसात्कृ 8 U. —*v. i.* अस्थिसाद् भू 1 P. **-Ossuary,** *s.* अस्थिस्थानं.

Ostensible, *a.* व्यक्त, सुप्रकाश, प्रकट, प्रसिद्ध, अगूढ. **-Ostensibly,** *adv.* प्रकाशं-शतः, प्रकटं, अगूढं.

Ostentation, *s.* आडंबरः, दंभः, दर्पः, विकत्थनं, आत्मश्लाघा. **-Ostentatious,** *a.* आडंबर-प्रिय-शील, दंभशील, दांभिक (की *f.*); आत्मश्लाघिन्. **-ly,** *adv.* साडंबरं, दंभपूर्वं, सदंभं.

Osteocope, *s.* अस्थिवेदना.

Osteology, *s.* अस्थिवर्णनं-विद्या.

Ostler, *s.* *See* **Groom.**

Ostracise, *v. t.* वि-निर्-वस् c. **-Ostracism,** *s.* विवासनं, निर्वासनं.

Other, *a.* अन्य, अपर, इतर, पर, अन्यतर (*pron. a.*) अंतरं in comp. 2 भिन्न, व्यतिरिक्त. 3 अव-,शिष्ट 'the o. s' अपरे, अन्ये, इतरे, शिष्टजनाः; 'at o. times' अन्यदा; 'the o. day' अन्येद्युः, नातिचिरं. **-wise,** *adv.* अन्यथा, इतरथा. 2 वा, न-नो-चेत्, अन्यथा, अथवा.

Otiose, *a.* अनवहित, निरुत्साह, प्रमत्त, अव्यापृत.

Otter, *s.* उद्रः, जलमार्जारः.

Ought, *v.* Ex. by अर्ह् 1 P; gen. by pot. pass. part. or by pot.: *See* **Must.**

Ounce, *s.* टंकद्वयं, पणार्धं. 2 द्वीपिन् *m.*

Oust, *v. t.* निःसृ c., निष्कस् c., अपास् 4 U, निराकृ 8 U, बहिष्कृ; *See* **Dispel, Drive out.**

Out, *adv.* बहिः (with abl.); 'gone o.' बहिर्गत; (with verbs) ex. by निर्, वि, अप, प्र, बहिः; 'to be o.' प्रकाशतां गम् 1 P, प्रकाशीभू 1 P; 'the secret is o.' रहस्यं भिन्नं. 2 निर्वापित-*a.*; 'to be o.' प्रशम् 4 P, निर्वा 2 P; 'the lamp was o.' दीपः प्रशशाम-निर्ववौ. 3 क्षीण-विगत-अवसित-*a.* 4 अंतं-शेषं-यावत्, आ-अवसानात्; 'hear me o.' शृणु मे सावशेषं वचः (M. 4); 'let me speak o.' वचः समापयानि तावत्. 5 उच्चैः, उच्च-तार-स्वरेण, मुक्तकंठं. 6 व्यक्तं, प्रकटं, स्पष्टं, स्फुटं; 'o. upon (with) the thief' दूरीक्रियतां-निःसार्यतां-असा चौरः; 'o. of' बहिः with abl., or by abl.; (among) मध्यात् with gen., or by gen. or loc.; (exclusion) ex. by अ, निर्, वि, अप, गत, नष्ट, त्यक्त in comp.; 'o. of the road' त्यक्त-भ्रष्ट-मार्ग; 'o. of one's mind' हत-नष्ट-बुद्धि, बुद्धिभ्रष्ट; 'o. of place' अस्थान, अनुचित;

'o. of order' उत्सूत्र, क्रमहीन, विधिविरुद्ध, अव्यवस्थित; 'o. of tune' अप-विस्वर; (showing motive) ex. by instr. or abl.; (beyond) अतीत, अगोचर in comp., अति pr.; 'o. of sight' नयनविषयातीत, दृगगोचर, अंतर्हित; 'o. of one's reach' अविषय, अप्राप्य; 'o. of one's power' अतिशक्ति; 'o. of use' गत-लुप्त-व्यवहार, अव्यवहारित; 'o. of fashion' लोकाचारविरुद्ध; 'o. of time' गतकाल, कालातीत; 'o. of hope' गताश, निराश; 'o. of man's strength' अतिमानुष; 'to pass o. of sight' नयनविषयं अति-इ 2 P or अतिक्रम् 1 U, 4 P; stand o. of hearing' श्रवणागोचरस्तिष्ठ; 'o. of employment' क्षीणवृत्ति, निर्व्यापार, नियोगहीन; 'o. of office' भ्रष्ट-च्युत-अधिकार, अधिकारभ्रष्ट-च्युत; 'o. of hand' सद्यः, सपदि; 'o.-door' द्वारबहिःस्थ, बहिःप्रदेशकृत; 'o.-house' उपगृहं, बहिर्गृहं. **-***interj.* अपेहि, अपसर, धिक् (with acc.). **-er, -ermost,** *a.* बाह्य, बहिःस्थ, बहिर्भव, बहिर्वर्तिन्, बहिः in comp. **-most,** *a.* अतिबाह्य. **-ward,** *a.* बाह्य, बहिः in comp. 2 दृश्य, आविर्भूत, प्रकट, प्रकाश. 3 अवास्तव (वी *f.*), मिथ्या-मृषा in comp. **-***adv.* (O. s) बहिः, बहिर्भागे-देशे. **-wardly,** *adv.* बाह्यतः, बहिः, बहिर्भागे. 2 अवस्तुतः, मृषा, मिथ्या, कृतकं, कृत्रिमं.

Out-act, *v. t.* अत्याचर् 1 P, अतिकृ 8 U.

Out-balance, *v. t. See* **Outweigh.**

Out-bid, *v. t.* अधिकमूल्यदानेन अभि-भू 1 P.

Outbreak, Outburst, *s.* उद्भेदः, निर्गमः, प्रादुर्भावः, उदयः, आस्फोटः.

Outcast, *s.* निष्कासितः, बहिष्कृतः, जातिबाह्यः-भ्रष्टः, जाति-वर्ण-पतितः, अपांक्तः, अपांक्तेयः, पतितः. 2 चं(चां)डालः, अपसदः, हीनजातिः-वर्णः, विहीनः, विवर्णः, नीच-अधम-वर्णः; *See* **Mean.**

Outcome, *s.* फलं, परिणामः, उदर्कः.

Outcry, *s.* उत्क्रोशः, आक्रोशः, कोलाहलः, कलकलः, तुमुलं, संहूति *f.*, उद्घोषः; 'popular o.' जनरवः-संहूतिः. 2 आर्तनादः-रवः.

Outdo, *v. t.* अति-शी 2 A, अतिक्रम् 1 U, 4 P; *See* **Excel.**

Outfit, *s.* सज्जा, सामग्री, उपकरणसंभारः, परिच्छेदः.

Outgo, *v. t.* अति-इ 2 P, अतिचर् 1 P, अतिगम् 1 P. **-ing,** *s.* व्ययः, अपचयः, क्षयः, विनियोगः.

Outgrow, *v. t.* अतीत्य वृध् 1 A, अति-वृध्.

Outing, *s.* भ्रमणं, पर्यटनं, विहारः.

Outlander, *s.* वैदेशिकः.

Outlandish, *a.* विजातीय, विदेशीय, विदेशज, पर-अन्य-देशीय. 2 असंगत, ग्राम्य, अशिष्ट, असभ्य.

Outlaw, *s.* निषिद्धाग्न्युदकः, न्यायरक्षणबाह्यः. **-***v. t.* न्यायाद् बहिष्कृ 8 U, अग्न्युदकदानं निषिध् 1 P.

Outlay, *s.* (द्रव्यादेः) व्ययः, अपचयः, विनियोगः; धनोत्सर्गः, द्रव्यव्ययः.

Outlet, *s.* द्वारं, मुखं, निर्गमः, परि(री)वाहः, जलोच्छ्वासः, निर्गमद्वारं; स्वजनस्य हि दुःखमग्रतो विवृतद्वारमिवोपजायते (K. iv. 26) 'finds an o.' &c.

Outline, *s.* बाह्यले(रे)खा, आकारमात्रं, वस्तुमात्रं. 2 पांडुलेख्यं, चित्रारंभः. 3 स्थूलवर्णनं, असूक्ष्मविचारः.

Outlive, *v. t.* अति-जीव् 1 P.

Outlook, *s.* अवेक्षणं, अवेक्षा.

Outlying, *a.* दूरस्थ. 2 असंसक्त.

Outmanœuvre, *v. t.* अभि-भू 1 P, अति-रिच् 7 U.

Outmarch, *v. i.* अग्रे या 2 P, अति-या.

Outnumber, *v. t.* संख्यया अति-शी 2 A, अधिकसंख्य-*a.* भू 1 P, अधिकीभू.

Outpour, *v. t.* वृष् 1 P, निषिच् 6 P, उत्सृज् 6 P. **-***s.*, **-ing,** *s.*, वर्षः-र्षण, उत्सर्गः.

Output, *s.* फलं, उत्पन्नं, लाभः.

Outrage, *s.* साहसं, आधर्षः-र्षणं, बलात्कारः, अन्यायः, अत्याचारः, उपमर्दः, उपद्रवः, अभि-,द्रोहः, उपघातः, प्रमाथः, मर्यादातिक्रमः. 2 न्यक्कारः, धिक्कारः, अवलेपः, उत्सेकः. **-***v. t.* कलंकयति (D.); (a woman) सतीत्वाद् भ्रंश् c. or च्यु c., दुष् c. (दूषयति), आधृष् c.; उपमृद् c., प्रमंथ् 9 P or c., उपद्रु 1 P, अभिद्रुह् 4 P, न्यक्कृ 8 U, धिक्कृ; *See* **Insult** also. **-ous,** *a.* दारुण, घोर, उग्र, अतिदुष्ट, उच्चंड, प्रमाथिन्, अतिसाहसिक (की *f.*), राक्षस (सी *f.*), निर्लज्ज, वीतत्रप, अतिदुराचार. **-ously,** *adv.* घोरं, दारुणं, अत्याचारपूर्वं, अतिसाहसेन. **-ousness,** *s.* दारुणता, &c.

Outreach, *v. t.* अतिगम् 1 P, अति-इ 2 P.

Outrider, *s.* अश्वारूढः परिचरः.

Outright, *adv.* सद्यः, सपदि, तत्क्षणं-णे, अविलंबितं. 2 सर्वथा, साद्यंतं, सम्यक्, सु-अति pr. 3 स्पष्टं, व्यक्तं, अवक्रं.

Outroot, *v. t. See* **Eradicate.**

Outrun, *v. t.* अतिधाव् 1 P, धावने अति-शी 2 A.

Outset, Outstart, *s.* प्रारंभः, उप-प्र-क्रमः, आदिः, उपोद्घातः; 'at the very o.' प्रथममेव, आदावेव, उपोद्घातरूपेण.

Outshine, *v. t.* अधिकं प्रकाश् 1 A or द्युत् 1 A, अति-शुभ् 1 A or रुच् 1 A.

Outside, *s.* बहिर्भागः, बहिःप्रदेशः, बाह्यभागः; oft. by बहिः, 'charming on the o. only' बहिरेव मनोरम. 2 परमावधिः. *–adv.* बहिः (with abl.), बहिर्भागे. *–a.* बाह्य, बहिस्थ, बहिः in comp. *–er, s.* बहिर्देशवासिन् *m.*, अन्यदेशीयः, पारदेशिकः; *See* **Foreigner.**

Outskirt, *s.* उपांतः, पर्यंतः, सीमा, परिसरः, प्रांतः, उत्संगः; 'o. of a village' ग्रामांतः, उपकंठं; 'o. of a forest' वनांतः.

Outspoken, *a.* स्पष्ट-स्फुट-वादिन्, स्फुटवक्तृ; *See* **Candid, Frank.**

Outspread, *v. t.* विस्तॄ c., प्र-वि-सृ c., वितन् 8 U.

Outstanding, *a.* अशोधित, अनिष्पन्न, अनिस्तीर्ण.

Outstretch, *v. t.* प्र-सृ c., उच्छ्रि 1 U or c.; oft. by उत् in comp.; 'with the neck o. ed' उत्कंधर; 'with hands o. ed as far as the wrist' आपूर्वभागोत्थितैः करतलैः (S. 4).

Outstrip, *v. t.* अति-इ 2 P, अतिक्रम् 1 U, 4 P. अतिवृत् 1 A, अतिचर् 1 P, लंघ् 1 A, 10; oft. by अति in comp. 'o. s the senses' इंद्रियगोचरो न वर्तते, अतींद्रियः.

Outvie, *v. t. See* **Excel.**

Outweigh, *v. t.* भारेण-भारतः-अतिरिच् pass. (with abl.), अधिकभारीभू 1 P; (Excel, q. v.).

Outwit, *v. t.* प्र-तॄ c., वंच् 10, वि-प्र-लभ् 1 A; *See* **Cheat.**

Oval, Ovate, *a.* अंडाकार, अंडाकृति. *–s.* अंडाकारः, अंडाकृति *f.*, कक्षा-क्षः.

Ovarious, *a.* अंडयुक्त, अंडरूप. **–Ovary,** *s.* अंडाशयः.

Ovation, *s.* लोक-संभावना-सत्कारः.

Oven, *s.* चुल्लि-ल्ली *f.*, कंदु *m. f.*, आपाकः, उखा.

Over, *prep.* उपरि (with gen.) or in comp., अधि-ऊर्ध्व in comp.; अधिक in comp.; 'o. 20' विंशत्यधिक; gen. ex. by अति, अधि, अभि, उत्, सं, with verbs; 'cross o. a river' नदीपारं गम् 1 P. 2 (Superiority), प्र, अधि, वि in comp.; 'wander o.' परिभ्रम् 1, 4 P. पर्यट् 1 P; 'o. against' अभि-सं-मुखं, अभि-प्रति pr. *–adv.* परपारे, अन्यतीरे, पारं-रे. 2 प्रति, सं, नि, with verbs; 'hand o. to another' अन्यस्मिन् निक्षिप् 6 P or संक्रम् c. 3 अधिकं, भूयः, अतिरिक्तं. 4 (Beyond) अति pr. 5 अव-,शिष्ट, उद्वृत्त, अंतरित (*a.*); अधिक in comp. 6 साद्यंतं, शेषं यावत्, ex. by पार; 'to read o.' अधि-इ 2 A, पारं गम्. 7 अत्यंतं, अति-सु-pr., अधिकं, अतिशय-एकांत in comp.; as a prefix of verbs, ex. by अति, अत्यंतं. 8 अतीत, गत, अतिक्रांत, वृत्त, भूत; 'o. again' पुनरपि, 'o. and o. again' पुनःपुनः, मुहुर्मुहुः, वारंवारं; 'o. and above' अपरं च, अवशिष्ट-*a.*; 'to be o.' ex. by अवसित-अतीत-समाप्त-*a.*; *See* **Finish;** 'my work is o.' समाप्तकार्योऽस्मि; 'in a moment all will be o. with him' क्षणेन स समाप्तजीवितः-परासुः-भवेत्.

Overact, *v. t.* अतिशयेन कृ 8 U, अत्याचर् 1 P.

Overawe, *v. t.* आकुलीकृ 8 U, भयेन उपहन् 2 P or अभिभू 1 P. **–ed,** *a.* संभ्रमाकुल, भयोपहत.

Overbalance, *v. t. See* **Outweigh.** *–s.* अति-अधिक-भारः.

Overbear, *v. t.* वशीकृ 8 U, दम् c. (दमयति); नि-पत् c., धृष् c. **–ing,** *a.* धृष्ट, उद्धत, दृप्त, अवलिप्त, गर्वित, उत्सिक्त; *See* **Haughty. –ingly,** *adv.* सावलेपं, सदर्पं, उद्धतं.

Overboard, *adv.* नौपृष्ठात्, नौकाया बहिः, मध्येसमुद्रं, अर्णवमध्ये.

Overburden, *v. t.* अतिभारं न्यस् 4 U, अतिभारेण पीड् 10 or अर्द् 1 P or c. **–ed,** *a.* अतिभाराक्रांत.

Overcast, *v. t.* (मेघैः) आ-वृ 5 U, प्र-आ-च्छद् 10; कलुषीकृ 8 U, तिमिरीकृ, साभ्र-*a.* कृ. *–a.* मेघावृत, मेघाच्छन्न, तमोवृत, साभ्र, सतिमिर, घनावरुद्ध.

Over-cautious, *a.* अत्यवहित.

Overcharge, *v. t.* अतिमूल्यं अर्थ् 10 A. 2 **Overload,** q. v. *–s.* अतिमूल्यप्रार्थनं.

Overcloud, *v. t. See* **Overcast.**

Overcome, *v. t.* अतिक्रम् 1 U, 4 P, तॄ 1 P, पारं गम् 1 P, आ-अधि-रुह् 1 P, अति-इ 2 P; अति-शी 2 A, अतिरिच् pass. 2 जि 1 P, पराजि (A), परा-अभि-भू 1 P, वशीकृ 8 U, दम् c. (दमयति). 3 प्रधृष् c., पर्यामृश् 6 P; (with fatigue &c.) आकुलीकृ, आक्रम्, खिद् c., अव-सद् c., better by (*a.*); 'o. by the force of truth' सत्यबलेनाभिभूत, भूतार्थवचनेन कुंठितमति or किंकर्तव्यतामूढ; 'I am o. by sleep caused by fatigue' अपाह्रिये परिश्रमजनितया निद्रया (U. 1). *–a.* परा-,जित, दांत, वशीकृत &c. 2 अभिभूत, व्याकुल, पर्याकुल, आकुल, आर्त, आतुर, ग्रस्त, आक्रांत, आविष्ट, परिगत, gen. in comp.

Overdo, *v. t.* अतिशयेन कृ 8 U. 2 अति-पच् 1 P. **–Overdone,** *a.* अतिपक्व. 2 अतिश्रांत, परिक्लांत.

Overdress, *v. t.* उज्ज्वलवेशीं भू c., उदारनेपथ्यं भृ 3 P.

Overdue, *a.* अतिक्रांतकाल.

Overeat, *v. t.* अति-खाद् 1 P or अद् 2 P.

Over-estimate, *v. t.* अति-गण् 10 or मन् 1 P. -*s.* अतिगणना.

Overfatigue, *v. t.* अति-खिद् c. or श्रम् c. -*s.* अतिखेदः, अतिश्रमः.

Overflood, Overflow, *v. t.* जलेन आ-सं-प्लु c., परिवह् c., उपरि स्रु c., उत्सिच् 6 P or c. -*v. i.* परिवह् 1 P; उत्सिच् pass., प्रवृध् 1 A, स्फाय् 1 A; gen. ex. by अति-, पूर्ण, उत्सिक्त, आ-सं-प्लुत, स्फीत-वृद्ध-जल, प्रचुर, उपचित, आढ्य, घन, अतिरिक्त, उद्रिक्त, वृद्ध, स्फीत; 'with an eye o. ing with joy' आनंदपरिवाहिणा चक्षुषा (S. 4); 'a heart o. ing with kindness' दयाघने हृदयं; 'my curiosity first o. ed' प्रथमं कुतूहलं सपरिवाहमासीत् (S. 2); 'her eyes o. ed with tears' अश्रुपरिप्लुतेक्षणा सा, अश्रुजलेनाप्लुते नेत्रे. -*s.* पूरोत्पीडः, आप्लावः, उत्सेकः, जलवृद्धि *f.*, तोयाप्लावः, जलोत्सेकः. **2** उद्रेकः, अतिरेकः, वृद्धि *f.*, स्फीति *f.*, उपचयः, आधिक्यं, प्राचुर्यं. -**ing,** *a.* उत्सिक्त, अति-परि-पूर्ण, अति-,बहुल, प्रचुर, आ-सं-प्लुत, उपचित, उद्रिक्त, अतिरिक्त; 'o. with water' जलव्याप्त, आप्लुतोदक; 'o. the boundary' अतिवेल. -*s.*, *See* (*s.*); 'to fill to o.' आ-परि-प्लु c.

Overgrow, *v.* अतिरुह् 1 P, अतिवृध् 1 A, अत्यंतं वृध्.

Overhang, *v. t.* उपरि लंब् 1 A, अव-प्र-लंब्, बहिः लंब् or स्था 1 P.

Overhasty, *a.* अतिसाहसिन्, साहसपरायण.

Overhaul, *v. t.* पुनः पुनः परीक्ष् 1 A or निरूप् 10.

Overhead, *adv.* ऊर्ध्वं, उपरि, उपरिस्थाने; मस्तकोपरि, अधिशीर्षं; 'the sun being o.' नभोमध्यारूढे सवितरि, मध्याह्नकाले

Overhear, *v. t.* अलक्षितं-निभृतं श्रु 5 P, प्रच्छन्नं आकर्ण् 10.

Overjoy, *v. t.* प्रहृष् c., अत्यंतं आनंद् c. -*s.* प्रहर्षः, अत्यंतप्रमोदः. -**ed,** *a.* प्रहृष्ट, परममुदित, हर्षाकुल, आनंदपुलकित, उल्लासित, हृष्टचित्त.

Overlap, *v. t.* अतिव्याप् 5 P.

Overlarge, *a.* अतिविपुल, अतिमहत्.

Overland, *a.* स्थल in comp.; 'o. route' स्थलवर्त्म, (प्रतस्थे स्थलवर्त्मना R. iv. 60.)

Overlay, *v. t.* आ-,छद् 10, आ-वृ 5 U, पि-धा 3 U, पि-नह् 4 P. **2** अतिभारेण पीड् 10.

Overleap, *v. t.* उत्-लंघ् 1 A, 10, उत्प्लु 1 A.

Over-lenient, *a.* एकांत-अति-मृदु.

Overlie, *v. t.* अतिभारेण पीड् 10, नि-पत् 1P.

Overload, *v. t.* अतिपूर् 10, अतिभारं न्यस् 4 U or आरुह् c. (रोपयति); अतिभारेण आक्रम् 1 U, 4 P or पीड् 10. -**ed,** *a.* अतिपूरित-पूर्ण, अतिभाराक्रांत. -**ing,** *s.* अतिभारारोपणं, अतिभारन्यासः.

Overlook, *v. t.* उपेक्ष् 1 A, न गण् 10 or दृश् 1 P, न आदृ 6 A, क्षम् 1 A, 4 P, अव-सृज् 6 P, मुच् 6 P. **2** अवेक्ष्, अधि-ष्ठा 1 P, अध्यक्षः भू 1 P. **3** आ-अव-लोक् 1 A, 10; *See* **Command.**

Overmuch, *a.* अतिमात्र, अत्यंत, अत्यधिक, एकांत, अतिरिक्त, अति pr. -*s.* आधिक्यं, अतिबाहुल्यं, अतिरेकः. -*adv.* अत्यंतं, अतिमात्रं, अति-सु pr.

Overnight, *adv.* अतीतरात्रौ, गतनिशायां.

Overpass, *v. t.* अतिचर् 1 P, अतिगम् 1 P.

Overpay, *v. t.* अधिकमूल्यं दा 3 U.

Overpeopled, *a.* अतिजनाकीर्ण.

Overplus, *s.* *See* **Surplus.**

Overpower, *v. t.* परा-अभि-भू 1 P, पराजि 1 A, आक्रम् 1 U, 4 P; *See* **Overcome.**

Overprize, Overrate, *v. t.* अधिकं मन् 4 A or c., अतिमूल्यं स्था c. (स्थापयति).

Overreach, *v. t.* प्र-तॄ c., वंच् 10, विप्र-लभ् 1 A. -**ing,** *s.* प्रतारणं-णा, वंचनं; *See* **Cheat.**

Override, *v. t.* अति-धाव् 1 P. **2 Overrule,** q. v.

Overrule, *v. t.* अधः क्षिप् 6 P, निराकृ 8 U, अधरीकृ, प्रत्यादिश् 6 P; *See* **Reject. 2** प्र-भू 1 P. ईश् 2 A (with gen.), अधि-ष्ठा 1 P, शास् 2 P, नियम् 1 P.

Overrun. *v. t.* उप-प्लु 1 A, आक्रम् 1 U, 4 P, उप-अभि-द्रु 1 P, व्याप् 5 P, आक्र 6 P; *See* **Harass, Oppress.**

Oversee, *v. t.* अवेक्ष् 1 A, अधि-ष्ठा 1 P. -**er,** *s.* अवेक्षकः, अधिष्ठातृ *m.*, अध्यक्षः, अधिकृतः, अधिकारिन् *m.*

Overset, *v. t.* वि-,पर्यस् 4 U, परिवृत् c.; अधरीकृ 8 U, निपत् c., अधः क्षिप् 6 P. -*v. i.* परिवृत् 1 A, नि-पत् 1 P.

Overshadow, *v. t.* आ-,छद् 10, छायया आवृ 5 U.

Overshoot, *v. t.* लक्ष्यं अतिक्रम् 1 U, 4 P, लक्ष्यात् भ्रंश् 1 A, 4 P or च्यु 1 A.

Oversight, *s.* अनवेक्षा, प्रमादः, भ्रमः; भ्रांति *f.*, स्खलितं, दृष्टिदोषः.

Oversleep, *v. i.* अति-दीर्घ-स्वप् 2 P.

Overspread, *v. t.* आच्छद् 10, आ-वृ 5 U, आस्तृ 5 U, आस्तॄ 9 U, पूर् 10, आक्रम् 1 U, 4 P, आ-सं-कॄ 6 P, वि-अव-तन् 8 U, व्याप् 5 P -*a.* आच्छन्न, आच्छादित, आवृत, आस्तीर्ण, आक्रांत, आकीर्ण, व्याप्त, पूरित, पूर्ण.

Overstate, *v. t.* अतिशयेन वद् 2 P; *See* **Exaggerate.**

Overstep, *v. t.* अतिक्रम् 1 U, 4 P, लंघ् 1 A, 10.

Overstock, *v. t.* अति-पूर् 10 or संग्रह् 9 P or उपक्लृप् c., प्र-सं-चि 5 U. **–***s.* अति-संचयः-संग्रहः-संभारः.

Overstrain, *v. i.* अत्यंत यत् 1 A or उद्यम् 1 A

Overstrung, *a.* अत्यंतं, आतत.

Overt, *a.* प्रकाश, स्फुट, व्यक्त, स्पष्ट, अगूढ, प्रकट, प्रत्यक्ष. **–ly.** *adv.* प्रकाशं, स्पष्टं, प्रत्यक्षं, प्रकटं. **–ness,** *s.* स्फुटता, व्यक्तता.

Overtake, *v. t.* आ-सद् c., (पूर्वप्रस्थितं वैनतेयमप्यासादयेयं V. 1), लंघ् 1 A, 10; आत्मोद्धतैरपि रजोभिरलंघनीयाः (S. 1): 'not to be o.-n' &c.; सं-,प्राप् 5 P, आक्रम् 1 U, 4 P, ग्रह् 9 U. **2** अभिभू 1 P, धृ 1 P, 10, ग्रस् 1 A; सहसा-अकस्मात्-आपत् 1 P or आक्रम्; *See* **Attack, Overcome**; 'o. business' कार्यं समाप् c.

Overtask, Overtax, *v. t.* अतिभारं-अतिकरं न्यस् 4 U or निक्षिप् 6 P.

Overthrow, *v. t.* नश् c, वि-प्र-,° क्षि 1, 5 P, ध्वंस् c., प्र-वि-उत्°, उच्छिद् 7 P, अव-उत्-सद् c. **2** परिवृत् c., परि-विपरि-अस् 4 U, पराक्षिप् 6 P or c., अधोमुखीकृ 8 U, निपत् c. **3** जि 1 P, पराजि (A.), अभि-परा-भू 1 P, दम् c. (दमयति), वशीकृ 8 U, परास् 4 U, भंज् 7 P, पराहन् 2 P. **–***s.* नाशः, ध्वंसः. प्र-वि°-,उच्छेदः, उत्सादः, क्षय. **2** घातः, भंगः, भेदः, परा-अभि-भवः, पराजयः, व्यसनं. **3** परिवर्तनं, पर्यासः, निपातनं.

Overtop, *v. t.* मूर्ध्नि-शिखरे-स्था 1 P, अति-शी 2 A, अभि-भू 1 P; *See* **Excel.**

Overture, *s.* प्रस्तावः, उपन्यासः, उपक्षेपः, निवेदनं, प्रार्थना, वचनं; 'secret o.' उपजापः. **2** प्रस्तावना, उपोद्घातः.

Overturn, *v. t.* परि-विपरि-अस् 4 U, परिवृत् c., निपत् c., अधोमुखीकृ 8 U, अधरोत्तरीकृ. **2 Overthrow,** q. v.

Overvalue, *v. t.* अधिकं मन् 4 A or c., बहु मन्, अधिकमूल्यं कृ 8 U or स्था c. (स्थापयति).

Overweening, *a.* अत्यभिमानिन्, अतिदृप्त, अत्यवलिप्त, अतिश्लाघिन्.

Overwhelm, *v. t.* अभि-भू 1 P, आकुलीकृ 8 U, ग्रस् 1 A, आक्रम् 1 U. 4 P: अव-सद् c. अव-सं-मृद् 9 P or c., अव-नि-पत् c. निष्पिष् 7 P. **2** आ-वृ 5 U, आस्तृ-स्तृ 5, 9 U. आच्छद् 10. आकॄ 6 P. **3** नि-,मस्ज् c. (मज्जयति), गाह् c., अव-वि°-, प्लु c., आ-सं-परि-°. **–ed,** *a.* अभिभूत, ग्रस्त, आक्रांत, मग्न, आकीर्ण, उपप्लुत, उपद्रुत, आकुल; *See* **Overcome**: 'o. with grief' शोकसमाकुल; 'o. with a flood of tears' बाष्पपूरपरिप्लुत.

Overwork, *v. t.* अधिकं कर्म कृ c., अत्यंतं आयस् c. or खिद् c.; (oneself) अत्यंतं परिश्रम् 4 P. –अत्यायासः, अतिक्लेशः-श्रमः.

Overwrought, *a.* अतिपरिष्कृत.

Overzeal, *s.* अत्यौत्सुक्यं, अत्युत्कंठा. **–ous,** *a.* अत्युत्सुक, अत्यासक्त, अतिव्यग्र.

Oviform, *a.* अंडाकृति, कोशाकार.

Oviparous, *a.* अंडज, द्विज, द्विजन्मन्, अंडोत्पन्न.

Ovum, *s. See* **Egg.**

Owe, *v. t.* धृ 10, (with dat. of creditor). **2** ऋणबद्ध-*a.* भू 1 P, अनुगृहीत-*a.* भू; oft. ex. by pot. pass. part.; 'you o. respect to your elders' गुरुजनस्त्वया पूज्यः. **–ing,** *a.* देय, दातव्य, शोधनीय, निस्तार्य. **2** जनित, जात, उद्भूत, प्रयुक्त, कारण-प्रभव-हेतु-in comp.; 'o. to' ex. by abl. or instr.; 'to whom is your deliverance o.' कस्त्वन्मुक्तिहेतुः-कारणं, केन त्वं मोचितः.

Owl, *s.* कौशिकः, उलूकः, पेचकः, दिवाभीतः, दिवांधः, घूकः, निशाटनः, वायसारातिः; 'o.-light' मंदप्रभा, ईषत्प्रकाशः.

Own, *a.* स्वीय, स्वकीय, आत्मीय, स्वक, निज, आत्मभूत; स्व, आत्मन् in gen. or in comp.; 'my o.' मदीय; so त्वदीय, तदीय, युष्मदीय, अस्मदीय; 'of one's o. accord' स्वयं, स्वेच्छया; 'to make one's o.' आत्मसात् कृ 8 U. **–***v. t.* स्वीकृ, अंगीकृ, प्रति-पद् 4 A, अभ्युप-गम् 1 P or इ 2 P, ग्रह् 9 U, *See* **Acknowledge. 2** (To be master of) ex. by स्वामी, ईश्वरः, पतिः, अधिकारी, with gen. or by (*a.*): or by gen. alone: 'I o. much land' विपुलभूमेः स्वाम्यहं; 'who o.s this treasure' कोऽस्य वित्तस्य स्वामी-पतिः, कस्येदं वित्तं **3** स्वत्वं प्रति-पद् c. or बुध् c., स्वीय-*a.* इति वद् 1 P: *See* **Claim. –ed,** *a.* स्वीकृत; स्वत्वविशिष्ट; 'o. by me' मत्स्वत्वविशिष्ट, मत्स्वामिक, मदधीन. **–er,** *s.* स्वामिन् *m.* ईश्वरः, पतिः, अधिकारिन् *m.* ईशः, प्रभुः; *See* **Lord. –ership,** *s.* स्वत्वं, स्वामित्वं, स्वाम्यं.प्रभुत्वं, अधिकारः. **–ing,** *s.* स्वीकारः, अभ्युपगमः.

Ox, *s.* वृषभः, वृषः, उक्षन् *m.*, बली(री) वर्दः, ऋषभः, अनडुह् *m.*, गौः, भद्रः, सौरभेयः; 'a herd of oxen' औक्षकं; 'a large o.' महोक्षः; 'an old o.' वृद्धोक्षः, जरद्गवः; 'head of a herd of oxen' आर्षभ्यः; 'an o. allowed to go at liberty' षंडः, गोपतिः, इट्चरः; 'his shoulder' वहः; 'the dewlap of an o.' सास्ना, गलकंबलः; 'who bears the yoke' धुर्यः; धुर्वोढा; 'who draws a cart' शाकटः; 'who draws a plough' हालिकः, सैरिकः; 'who bears a burden' धूर्वहः, धूर्यः, धुरीणः, धौरेयः, धुरंधरः.

Oxidize, *v. t.* ज c. **-Oxidation,** *s.* जारणं, आतंचनं.

Oyster, *s.* शुक्ति *f.*, शुक्तिका, मुक्तास्फोटः; 'o.-shell' शुक्तिपुटं.

P

Pabulum, *s.* भोजनं, आहारः, पौष्टिकं. **-Pabular,** *a.* पौष्टिक (की *f.*).

Pace, *s.* पदं, चरणन्यासः, पदविक्षेपः-पातः-क्रमः, पादविक्षेपः-न्यासः, विक्रमः. 2 गति *f.*, गमनं, अयनं, चलनं, चारः. 3 गतिवेगः-क्रमः; 'a quick p.' द्रुतपदं; 'at a rapid p.' द्रुतगत्या. 4 (Of horses) धारा, गतिः; *See* under **Horse**; 'a horse with a good p.' सुखायनः, सुखचारः; 'keep p. with' सह गम् or चल् 1 P. *-v. i.* परि-अति-क्रम् 1 U, 4 P; क्रमेण क्रमेण गम्-व्रज्-चल् 1 P; 'p. up and down' इतस्ततः चल् or भ्रम् 1, 4 P; 'p. ing to and fro' इतस्ततः परिक्रम्य. **-ed,** *a.* गति in comp.; 'slow-p.' मंदगति, मंदगामिन्.

Pachyderm, *s.* कठिनचर्मन्-*a.* पशुः. **-atous,** *a.* काठिनचर्मन्. 2 (*Fig.*) सहिष्णु, मंद.

Pacify, *v. t.* सां(शां)त्व् 10, शम् c. (शमयति), प्र-उप°-,प्र-सद् c., सं-परि-तुष् c., आराध् c. **-ied,** *a.* शांत,प्रसादित, शांतक्रोध; 'to be p.' शम् 4 P, प्रसद् 1 P, तुष् 4 P, शमं इ-या 2 P. **-ier,** *s.* शमकः, सांत्वकः. **-ic,** *a.* शांत, प्रशमित, निरुद्वेग. 2 सांत्व-प्रशम-शील; सांत्वनकारिन्, साम in comp.; 'p. words' सामवादः. **-ication,** *s.* शमः, शमनं, शांति *f.*, प्र-उप°-, सांत्वनं, सामन् *n.*, प्रसादनं. 2 संधानं, संधिकरणं. **-icatory,** *a.* शांतिद, शांतिकर (री *f.*), शमक, सामोपायक, साम in comp.

Pack, *s.* भारः, कूर्चः, भांडं, गुच्छः, पोटलिका, पटलं. 2 गणः, संघः,वर्गः, समूहः, वृंदं, संचयः; *See* **Multitude**; 'p. of hounds' श्वगणः, कुक्कुरसंघः; 'a p. of persons' मंडलं, जनसमूहः; 'p.-horse' पृष्ठ्यः, स्थौरिन्; 'p.-saddle' पर्याणं, पल्याणं; 'p.-thread' शणसूत्रं; 'p.-cloth' वेष्टनं, पटः. *-v. t.* पटलीकृ 8 U, पुटीकृ, पुटयति (D.). संपिंड् 10, कूर्चीकृ; 'p. in a box' समुद्गके नि-धा 3 U or निविश् c. 2 कुकर्मार्थं-उपवंशपूर्वं-संमिल् c. or समाहृ 1 P or एकीकृ or संयुज् 7 U, 10. 3 (Off) अप-निः-सृ c., सहसा अपगम् c. (गमयति) or प्र-स्था c. (स्थापयति). *-v. i.* पुटीभू 1 P, पिंडीभू, एकीभू. 2 सहसा अपगम् 1 P or प्र-स्था 1 A. **-age,** *s.* भांडं, कूर्चः, वस्त्रादिगुच्छः. **-Packet,** *s.* पोटलिका, लघुकूर्चं, लघुवेष्टनं; पत्रवेष्टनं. 2 पत्रवाहिनी नौः.

Pact, *s. See* **Contract.**

Pad, *s.* कूर्चः. 2 उपधानं, उपबर्हः. 3 सुखायनः, सुखचारः. 4 पादविक्रमः. 5 मृदुवस्तु *n.*, तूलादिद्रव्यं. *-v. t.* मृदुवस्तुना आ-स्तृ 5 U or युज् 7 U, 10. *-v. i.* मंदं or शनैः-गम् or व्रज् 1 P.

Paddle, *s.* क्षेपणि-णी *f.*, नौदंडः; 'p.-box' क्षेपण्याधारः; 'p.-wheel' नौचालनी. *-v. t.* नौदंडेन प्रेर् c. or चल् c. or प्रणुद् 6 P or c. *-v. i.* क्षेपण्या जले चल् c. or आहन् 2 P or तड् 10. 2 जले क्रीड् 1 P.

Paddock, *s.* वाटः, वाटिका.

Paddy, *s.* धान्यं.

Padlock, *s.* तालकं.

Padrone, *s. See* **Patron.**

Paean, *s.* जयशब्दः-ध्वनिः-घोषः.

Pagan, *s.* देवता-प्रतिमा-पूजकः. **-ism,** *s.* देवतार्चनं, प्रतिमापूजा-उपासना; *See* **Idolater,-try.**

Page, *s.* पृष्ठं, पत्रं. 2 चेटः, किंकरः, भृत्यः, पार्श्वानुचरः, परिचरः, बालानुचरः.

Pageant, *s.* आडंबरः, शोभा: चमत्कारः, कौतुकं. *-a.* Ex. by (*s.*). **-ry,** *s.* आडंबरः; *See* (*s.*).

Pagoda, *s. See* **Temple.**

Pail, *s.* भांडं, पात्रं, भाजनं.

Pain, *s.* दुःखं, वेदना, पीडा, व्यथा, आतंकः, रुज् *f.*, रुजा, अ(आ)र्ति *f.*, सं-परि-तापः, बाधा, यातना, क्लेशः, कष्टं, कृच्छ्रं, उद्वेगः, खेदः; 'bodily p.' व्याधिः; 'mental p.' आधिः, मनस्तापः, मनोव्यथा, चित्तोद्वेगः; 'causing p.' पीडा-दुःख-कर (री *f.*); 'suffering p.' दुःखभाक्, दुःखित; 'sharp p.' शूलः-लं, तीव्रवेदना. 2 (Pains) परि-,श्रमः, प्र-, यत्नः, उद्योगः, व्यवसायः, उद्यमः, उत्साहः, आ-प्र-यासः, कष्टं; 'to take p. s' प्रयत् 1 A, उद्यम् 1 A, चेष्ट् 1 A, घट् 1 A, व्यव सो 4 P. 3 दंडः, साहसं. *-v. t.* पीड् 10, दु 5 P, व्यथ् c. (व्यथयति), तप् c., सं-परि-उप°-, बाध् 1 A, क्लिश् 9 P, अर्द् 1 P or c., दुःखयति (D.). **-ed,** *a.* पीडित, रुग्ण, दुःखित, व्यथित, तापित, सं-परि-तप्त, आर्त, दुःखार्त, दुःखातुर, सवेदन, कृच्छ्रगत, सव्यथ; 'to be p.' व्यथ् 1 A, पीड्-क्लिश्-तप्-pass. **-ful,** *a.* सरुज, रुजावत्, दुःखिन्, सव्यथ, दुःखार्त, *See*

Pained. 2 दुःखद, कष्ट, पीडा-दुःख-कष्ट-व्यथा-कर (री *f*.), दुःखावह, कष्ट or क्लेश-द or प्रद, बाधक, संतापक. 3 श्रम-कष्ट-साध्य, दुष्कर, कठिन. **-fully,** *adv.* सव्यथं, कष्टं, सदुःखं, सोद्वेगं. 2 सश्रमं, सायासं, कृच्छ्रेण, कष्टेन. **-less,** *a.* दुःख or व्यथा-हीन or रहित. **-Painstaking.** *a.* व्यवसायिन्, उद्यमिन्, उद्योगिन्, उद्यम-उत्साह-शील; *See* **Industrious.**

Paint, *v. t.* आ-लिख् 6 P, चित्र् 10. 2 रंज् *c.*, वर्ण् 10, रंगेण लिप् 6 P, वर्णैः शुभ् *c.* 3 वर्ण्; *See* **Describe.** **-***s.* वर्णकः-कं; वर्णिका, रंगः, लेपः; 'p.-brush' वर्तिका, तूलिका, तूलि *f.*, वर्णतूली, ईषिका. **-ed,** *a.* चित्रित, वर्णित; (in a picture) चित्र-आलेख्य-गत, चित्रार्पित, आलिखित. **-er,** *s.* चित्रक(का)रः, रंगाजीवः, चित्रकृत्-लिख् *m.*, रंजकः, चित्रकः, आलेखकः, तौलिकः. **-ing,** *s.* (Art) चित्रकर्मन् *n.*, चित्र-क्रिया-विद्या. 2 आलेखनं, वर्णनं, रंजनं, चित्र-लेखनं. 3 आलेख्यं, चित्रं; 'drawn in a p.' आलेख्यगत; 'p. on the body' पत्ररेखा, पत्ररचना, पत्रावलि-ली *f.*

Pair, *s* युगं, युगलं, युग्मं, द्वितयं, द्वयं, यमलं-कं, युतकं; द्वंद्वं, मिथुनं, दंपती in comp. (of animate beings only); 'a p. of swans' हंसदंपती; 'a married p.' भार्यापती, जायापती, दंपती, जंपती, स्त्रीपुरुषौ. **-***v. t.* संयुज् 7 U, 10: oft. ex. by **Match,** q. v.; 'well-p. ed rivals' तुल्यप्रतिद्वंद्विनौ. **-***v. i.* मैथुनं आचर् 1 P or कृ 8 U, स्त्रीपुरुषवत् संगम् 1 A.

Palace, *s.* प्रासादः, हर्म्यं, सौधः-धं, राजकुलं, राज or नृप-गृहं-भवनं-मंदिरं (House, q. v.) **-Palatial,** *a.* महत्, विशाल, राजयोग्य; 'p. building' महाभवनं.

Palæontology, *s.* शिलाजातविद्या.

Palæstra, *s.* मल्लभूमि *f.*

Palanquin, *s.* नरयानं, शिबिका, चतुरस्र-यानं, याप्ययानं.

Palate, *s.* तालु *n.*, काकुदं; 'soft p.' शुंडिका, अलिजिह्वा. 2 रुचि *f.*, अभिरुचिः. **-able,** *a.* आस्वाद्य, सुरस, स्वादु, रुच्य, रुचिकर (री *f.*), सरस, रसिक. **-al,-ial,** *a.* तालव्य.

Palaver, *See* **Flatter,-y.**

Pale, *a.* पांडु, पांडुर, विवर्ण, गतवर्ण, नीरक्त, मंदच्छाय, गतश्रीक; 'he grew or turned p.' विवर्णभावं प्रपेदे, पांडुच्छायो बभूव. 2 मंदप्रभ, मंदद्युति-कांति, हततेजस्, निस्तेजस्, मलिन or म्लान-प्रभ or कांति. 3 (Of colours) श्वेत, ईषत्, आ, in comp.; 'p. blue' आनील, श्वेतनील. **-***s.* शलाका, शल्यं, शूलः-लं, शंकुः, स्थाणुः. 2 वृति *f.*, आवरणं, वेष्टनं, वरणः. **-***v. t.* (शंकुपंक्त्या) आ-परि-वृ 5 U or *c.*, परिवेष्ट् 1 A or c., अवरुध् 7 U. **-ing,** *s.* शंकुपंक्ति *f.*, आवरणं. **-ish,** *a.* आपांडु, आपांडुर. **-ness,** *s.* पांडुता, वैवर्ण्यं, पांडुवर्णः-रागः. 2 तेजः-प्रभा-हानि *f.*, कांतिक्षयः; न्यूनप्रभा.

Palette, *s.* *See* **'Pallet.'**

Palfrey, *s.* लघुवाजिन् *m.*, क्षुद्रघोटकः.

Palindrome, *s.* मुरजबंधः.

Palingenesis, *s.* रूपांतरं, रूपपरिवृत्ति *f.*

Palisade, *s.* स्तंभ or शंकु-पंक्ति *f.* or वलयः-यं, अवरोधकं.

Pall, *s.* वासस् *n.*, प्रावारः, प्रच्छदपटः. 2 प्रेतपटः, प्रेतवासस् *n.*, शवाच्छादनं. **-***v. t.* विरसीकृ 8 U, अरुचिं उत्पद् *c.* **-***v. i.* विरसीभू 1 P.

Palladium, *s.* पुर-नगर-देवता, रक्षादेवता. 2 रक्षा-क्षणं.

Pallet, *s.* खट्वा, लघुतल्पः. 2 वर्ण-रंग-पत्रं.

Palliate, *v. t.* (दोषं) लघूकृ 8 U, प्र-उप-शम् *c.* (शमयति), लंघयति (D.), प्रमृज् 2 P, क्षल् 10, आच्छद् 10. **-ion,** *s.* प्र-उप-शमः-शांति *f.*, लघूकरणं, दोष or पाप-मार्जनं-क्षालनं-शमः. **-ive,** *a.* उपशमन (नी *f.*), शांतिप्रद, शमक. **-***s.* पाप-दोष-शमनं. 2 उपशमनं, शूलघ्नं, क्लेशापहं.

Pallid, Pallor, *See* **Pale,-ness.**

Palm, *s.* तलः-लं, प्रहस्तः, प्रपाणिः, प्रतलः, चपेटः, चर्पटः, करतलः; 'the p. s joined' संहततलः, संतलः; 'the hollowed p.' प्रसृतः-तिः, चुलुकः; 'joining the p. s together' बद्धांजलि, कृतांजलि, अंजलिपुटं कृत्वा. 2 (Tree) तालः, तृणद्रुमः, द्रुमेश्वरः; (the fruit) तालं; 'p. of victory' जयध्वजः-लक्षणं; 'p. of superiority' गुणाधिक्यपताका. **-***v. t.* करतले गुप् 1 P or गुह् 1 U. 2 (Off) प्रतॄ *c.*, वंच् 10: *See* **Cheat;** 'the trick was p. ed off upon him' तेन छद्मना असौ सम्यग् विप्रलब्धः. **-ate, -ated,** *a.* करतलाकृति. **-y,** *a.* तालावृत, तालसंकीर्ण. 2 समृद्ध, श्रीमत्, विभव-भूति in comp.; 'p. days' विभवकालः, विभवः.

Palma-Christi, *s.* एरंडः, उरुबूकः, रुबू(बु)कः, रुचकः, चित्रकः, चंचुः, पंचांगुलः, मंडः, वर्धमानः, व्यडंबकः.

Palmister, *s.* सामुद्रज्ञः, सामुद्रिकः. **-Palmistry,** *s.* सामुद्रिकं, सामुद्रविद्या.

Palmiped, *a.* जालपाद (पदी *f.*).

Palmyra, *s.* *See* **Palm** (2).

Palpable, *a.* स्पर्शज्ञेय-गोचर, स्पृश्य. 2 स्थूल, घन, गाढ, निबिड. 3 स्पष्ट, सुविज्ञेय, प्रत्यक्ष, व्यक्त. **-Palpably,** *adv.* स्फुटं, व्यक्तं, प्रत्यक्षं.

Palpitate, *v. i.* वेप् 1 A, कंप् 1 A, स्पंद् 1 A, स्फुर् 6 P, उच्छ्वस् 2 P. **-ion,** *s.* स्पंदनं, कंपः, स्फुरणं, स्फुरितं, वेपनं, वेपथुः.

Palsy, *s*. स्तंभः, सं-वि-°, स्वापः, सुप्ति *f*. 2 पक्षाघातः, पक्षवायुः. –*v. t*. स्तंभ् 9 P or c., जडीकृ 8 U, स्वप् c., चैतन्यं नश् c. **-led, -ical**, *a*. पक्षवायुग्रस्त.

Palter, *v*. *See* **Prevaricate.**

Paltry, *a*. क्षुद्र, लघु, तुच्छ, असार, अपकृष्ट, अधम, कु pr., कुत्सित.

Paludal, *a*. अनूप, जलमय.

Pamper, *v. t*. (अत्यंतं) स्फाय् c. (स्फावयति), संवृध् c., आप्यै c., परि-,पुष् c., संतृप् c., पुष् 10. **–ed**, *a*. स्फीत, परिपुष्ट, हृष्टपुष्ट, आपीन, आप्यायित. **–er**, *s*. अतिपोषकः, आप्यायकः. **-ing**, *s*. स्फीति *f*., परिपोषणं, आप्यायनं.

Pamphlet, *s*. पत्रिका, लघुपुस्तकं. **–eer**, *s*. पत्रिकाकारः, लघुपुस्तककृत् *m*.

Pan, *s*. भाजनं, पात्रं, भांडं, आधारः; ' frying p. ' अंबरीषं, भ्राष्ट्रः; *See* under **Fry**; ' p.-cake ' भृष्टापूपः. 2 विश्वमूर्तिः.

Panacea, *s*. सर्वरोगघ्नं औषधं, त्रैलोक्यचिंतामणिः.

Pancratium, *s*. मल्लयुद्धं-क्रीडा. **-Pancratic**, *a*. मल्लक्रीडानिपुण.

Pandect, *s*. विद्यासंग्रहः. 2 स्मृतिसंहिता.

Pandemic, *a*. सर्वजनीन, सार्वलौकिक (की *f*.). सर्वसामान्य; ' p. disease ' जनपदोद्ध्वंसः.

Pandemonium, *s*. रक्षःसभा, पिशाचसभा.

Pander,-er, *s*. नर्मसचिवः, विटः, सुरतदूतः, कुंडाशिन् *m*., संचारकः. –*v. t*. सुरतकामान् सं-पद् c., लांपट्यं प्रयुज् 7 A, 10. **-ing, -ism**, *s*. कौट्टिन्यं, विटकार्यं.

Pandiculation, *s*. *See* **Stretching.**

Pane, *s*. काचफलकः-शिला.

Panegyric, *s*. स्तुति *f*., श्लाघा, प्रशंसा, स्तुतिवादः-पाठः, गुणवर्णनं-कीर्तनं. **-al**, *a*. स्तुतिमय (यी *f*.), प्रशंसात्मक. **-Panegyrize**, *v. t*. स्तु 2 U, श्लाघ् 1 A, प्रशंस् 1 P; *See* **Praise. -Panegyrist**, *s*. संस्तावकः, वैतालिकः, बंदिन् *m*., मागधः, स्तुतिपाठकः.

Panel, *s*. कपाटः-टं, अररः-री-रं; शाखा, भागः. 2 स्थेयगणः,-पत्रं.

Pang, *s*. वेदना, यातना, व्यथा, पीडा; (extreme) कारणा, अतिव्यथा; *See* **Pain.**

Panic, *s*. संत्रासः, समुद्वेगः, महासाध्वसं, विप्लवः, आकस्मिकभयं, त्रासः; ' p.-struck or -seized ' संत्रस्त, भयविप्लुत, विद्रावित; ' p. in an army ' पिंजलः, समुत्पिंजः. 2 अणुः, प्रियंगुः.

Pannel, *s*. पर्याणं.

Pannier, *s*. कंडोलः, पिटः, पे(पि)टकः, करंडः.

Panoply, *s*. सर्वांगत्रं, सर्वांगकवचः. **-ied**, *a*. संवर्मित, कृतसन्नाह.

Panorama, *s*. विश्वदृश्यं.

Pant, *v. i*. वेप् 1 A, स्पंद् 1 A, कंप् 1 A, उद्-ध्मा 1 P, स्फुर् 6 P, उच्छ्वस् 2 P. 2 कृच्छ्रेण निश्वस्, दीर्घ-स्थूलस्थूलं-निश्वस्. 3 सोत्कंठं स्पृह् 10 or अभिलष् 1, 4 P; *See* **Long. –***s*., **-ing**, *s*. कंपः, स्फुरणं; कृच्छ्रोच्छ्वासः, उच्छ्वासः, स्थूलस्थूलनिश्वासः

Pantaloon, *s*. जंघावस्त्रं-परिधानं. 2 भंडः, विदूषकः, वैहासिकः.

Pantechnecon, *s*. उपस्कर-संग्रहः-पण्यशाला.

Pantheist, *s*. विश्वदेवतावादिन् *m*. **-Pantheism**, *s*. विश्वदेवतावादः, वैश्वदेवमतं. **-Pantheon**, *s*. विश्वदेवतागणः, विश्वदेवकुलं.

Panther, *s*. द्वीपिन् *m*.

Pantomime, *s*. मुग्धनर्तकः, केवलं अभिनेतृ *m*., मूकाभिनेता. 2 मुग्धाभिनयः, लास्यं, निःशब्दलास्यं-हावः.

Pantry, *s*. अन्नकोष्ठः, भक्ष्यागारं.

Pap, *s*. चूचुकं, स्तनाग्रं. 2 स्तनः, कुचः. 3 मृदु खाद्यं.

Papa, *s*. तातः, पितृ *m*. *See* **Father.**

Paper *s*. पत्रं, पत्रकं; ' written p ' लेखः, लिखितं, पत्रिका, लेख्यं. –*v. t*. पत्रेण आच्छद् 10 or आस्तृ 5 U.

Pappy, *a*. मज्जायुक्त, मृदु, कोमल.

Papulæ, *s*. वि-,स्फोटः, पिटि(ट)का.

Par, *s*. समता, तुल्यता, साम्यं, सम-तुल्य-भावः; 'at p.' सम, तुल्य. **-ity**, *s*. साम्यं; तुल्यत्वं.

Parable, *s*. उपमा, दृष्टांतः, निदर्शनं. **-Parabolic**, *a*. दृष्टांतरूप.

Parabola, *s*. अनुवृत्तं.

Parachute, *s*. विमानात् अवतरणार्थं छत्रं.

Parade, *s*. आडंबरः, दंभः, बाह्यशोभा. 2 यात्रा, सैन्ययात्रा. 3 शस्त्राभ्यासः, अस्त्र-रण शिक्षा, युद्धाभ्यासः, व्यायामः, योग्या; ' p.-ground ' व्यायामभूमि *f*. –*v. t*. सदंभमाडंबरं-दृश् c. 2 सैनिकान् व्यायम् c. or शस्त्रव्यापारं शिक्ष् c. –*v. i*. सदंभं पर्यट् 1 P or भ्रम् 1, 4 P.

Paradigm, *s*. निदर्शनं, रूपनिदर्शनं; ' p. of verbs ' धातुरूपादर्शः.

Paradise, *s*. वैकुंठं, स्वर्गः, स्वर्लोकः, सुखभवः *See* **Heaven.** 2 नंदनवनं. **-Paradisiacal**, *a*. स्वर्गीय, स्वर्ग्य.

Paradox, *s*. असत्याभासः, विरुद्धमतं. **-ical**, *a*. अयुक्ताभास, लोकविरुद्ध.

Paragon, *s*. प्रतिमा, उपमा, आदर्शः, प्रतिरूपं; *See* **Model**. 2 अनुपमं वस्तु.

Paragraph, *s*. परिच्छेदः, खंडः, भागः, वाक्यखंडः-विच्छेदः.

Parallax, *s.* लंबनं.

Parallel, *a.* समांतर. 2 सदृश (शी *f.*), समान, सम, तुल्य, संवादिन्, समरूप, अनुरूप. —*s.* समांतररेखा; 'p. of latitude' अक्षवृत्तं. 2 सादृश्यं, साम्यं, समता, आनुरूप्यं, उपमा, प्रतिमा, प्रतिरूपं; 'having no p.', 'un-p.ed' अनुपम, अद्वितीय; *See* **Matchless.** —*v. t.* समांतरीकृ 8 U. 2 उप-प्रति-मा 3 A, 2 P, तुल् 10. 3 समीभू 1 P, संवद् 1 P. **-ism,** *s.* समांतरं, सादृश्यं.

Parallelogram, *s* समांतरचतुर्भुजः.

Parallelopiped, *s.* समांतरखातः.

Paralysis, *s.* स्तंभः, स्वापः, जाड्यं, सादः, पक्षाघातः; 'p. of limbs' अंगभंगः, गात्रोपघातः, गात्रसादः. **-Paralytic,** *a.* सुप्तत्वच्. स्तब्धगात्र, पक्षवायुग्रस्त. **-Paralyze,** *v. t.* संस्तंभ् 9 P, जडीकृ 8 U, अव-,सद् c., स्वप् c.; 'my limbs are p.-ed' सीदंति मम गात्राणि.

Paramount, *a.* प्रधानतम, सर्वाधीश, परम, विशिष्ट प्रमुख, प्रधान; 'p. lord' अधीश्वरः, सम्राट्, सर्वेशः, सार्वभौमः; 'p. sway' साम्राज्यं.

Paramour, *s.* भुजंगः, जारः, विटः, उपपतिः. 2 (Female) उपपत्नी, उपस्त्री.

Parapet, *s.* वक्षोदघ्नः प्राकारः.

Paraphernalia, *s.* सामग्री, परिच्छदः, उपकरणं; 'royal p.' छत्रचामरादि राजचिह्नं, राजलक्षणानि; 'woman's p.' स्त्रीधनं, यौतकं.

Paraphrase, *v. t.* विस्तरेण व्या-ख्या 2 P, अनुवद् 1 P, शब्दांतरेण विपरि-णम् c. (णमयति). —*s.* अनुवादः, मूलशब्दविस्तारः-विवरणं. **-Paraphrastic,** *a.* मूलाधिकशब्द, विस्ताररूप.

Parasite, *s.* परान्नभोजिन् *m.*, परान्नपुष्टः, परपिंडादः, पात्रेसमितः. 2 विटः, चाटुकारः; *See* **Flatterer.** 3 वंदा, वृक्षादनी, वृक्षरुहा, जीवंतिका. **-ic,-ical,** *a.* परान्नपुष्ट, पराश्रय, परोपजीविन्; वृक्ष or तरु-रोहिन् or रुह.

Parasol, *s.* छत्रं, आतपत्रं.

Parboil, *v. t.* ईषत् क्वथ् 1 P.

Parcel, *s.* पोट्टली, पोट्टलिका, कूर्चः, भांडं 2 भागः, अंशः, खंडः, उद्धारः. 3 राशिः, चयः, संचः, गणः, समूहः, वृंदं; 'part and p.' अंगभूत *a.*, शरीरावयवभूत *a.* 'be for me, as it were, part and p. of my body' अव्यतिरिक्तं धमस्मच्छरीरात् (ol); मेनकासंबंधेन शरीरभूता मे शकुंत S. 6). —*v. t.* (Out) विभज् 1 U, विभाग ः विन्यस् 4 U or क्लृप् c.

Parcener, *s.* समांशिन् *m.*, समाधिकारिन् *m.* **-Parcenary,** *s.* समाधिकारः.

Parch, *v. t.* तप् c., दह् 1 P, प्लुष् 1 P, भ्रस्ज् 6 P; उत्-,शुष् c. (throat &c.). **—ed,** *a.* तप्त, दग्ध; प्लुष्ट, शुष्क, उच्छोषित, निर्जल, शोषितजल, क्षाम; 'having his throat p. up with thirst' पिपासाक्षामकंठः.

Parchment, *s* चर्मपटः-पत्रं.

Pard, *s.* *See* '**Leopard.**'

Pardon, *v. t.* क्षम् 1 A, 4 P, सह् 1 A. मृष् 4 P, 10, मुच् 6 P, अव-सृज् 6 P, तिज् desid. (तितिक्षते). —*s.* क्षमा, क्षांति *f.*, तितिक्षा, मर्षणं, मोचनं, दोषमुक्ति *f.*, अपराधक्षमा; 'I beg your p.' क्षंतव्योऽहं भवता; 'to beg p. of' क्षमां प्रार्थ् 10 A. **-able,** *a.* क्षंतव्य, मर्षणीय, क्षमार्ह, सोढव्य, क्षमोचित. **—ed,** *a.* क्षांत, मर्षित, दोष-दंड-मुक्त, मुक्त-दंड-दोष.

Pare, *v. t.* तनूकृ 8 U, अपकृत् 6 P, तक्ष् 1, 5 P, त्वक्ष् 1 P, अवच्छिद् 7 P, खंड् 10, उल्लिख् 6 P, वि-लू 9 U. 2 (Skin) निस्त्वचीकृ, निस्तुषीकृ, त्वचयति (D.), त्वचं निष्कृष् 1 P, 'having p. ed nails' कृत्तनखः. **—er,** *s.* तष्टृ *m.*, खंडकः. **-ing,** *s.* तक्षणं, कर्तनं, तनूकरणं. 2 तष्टं, खंडः, भित्तं, विदलं, शकलः-लं.

Paregoric, *a.* शूलापह, शूलशामक.

Parent, *s.* मातृ *f.*, पितृ *m.*; *See* **Mother, Father;** 'p. s.' मातापितरौ, पितरौ, मातरपितरौ, प्रसूजनयितारौ; 'p. institution' उत्पादिका-पितृभूता-शाला; 'p. tree' उत्पादकः-जन्मदः-वृक्षः. 2 प्रभवः, कारणं, बीजं, हेतुः, उत्पादकः, जन्महेतुः. **-age,** *s.* अन्वयः, जाति *f.*, कुलं, वंशः, जन्मन् *n.*, उत्पत्ति *f.*; 'of royal p.' राजवंश्य, नृपबीज; 'of noble p.' महाकुल, कुलजन्मन्, अभिजनवत्. **—al,** *a.* पितृ, मातृ in comp., पैतृक (की *f.*), मातापितृयोग्य, पित्रुचित, पित्रनुरूप; 'p. affection' वात्सल्यं, अपत्यस्नेहः, पुत्रप्रीति *f.*

Parenthesis, *s.* निक्षेपचिह्नं; निक्षिप्तवाक्यं-वचनं, उप-अनन्वित-वाक्यं, प्रासंगिक-अप्रधान-वचनं. **-Parenthetical,** *a.* प्रासंगिक (की *f.*), निक्षिप्त, निवेशित, मूलानन्वित, अप्रधान. **-ly,** *adv.* निक्षिप्य, मूलानन्वयेन.

Parergon, *s.* शेषपूरणं.

Parget, *s.* लेपः, सुधा.

Parhelion, *s.* सूर्याभासः, मिथ्यासूर्यः.

Pariah, *s.* अंत्यजः, हीनजातिः.

Parish, *s.* पौरोहित्यभूमि *f.*-प्रदेशः; 'p. priest' ग्रामयाजकः-पुरोहितः. **-Parishioner,** *s.* ग्रामिकः, ग्रामस्थः, ग्रामवासिन् *m.*

Park, *s.* उपवनं, कृत्रिमवनं; क्रीडा-प्रमद-वनं, आक्रीडः, मृगयास्थानं-भूमि *f.* **—er,** (P. keeper) *s.* वनपालः, उद्यानरक्षकः.

Parley, *v. i.* संभाष् 1 A, संवद् 1 P, संलप् 1 P. —*s.*, **-Parlance,** *s.* संभाषणं, संवादः, संकथा, संलापः. 2 संधिप्रसंगः.

Parliament, *s.* विचार-मंत्रण-सभा, प्रतिनिधि-सभा.

Parlour, *s.* आलाप-संकथा-स्थानं, संलापकोष्ठः.

Parlous, *a.* भयावह, भयंकर, भीतिप्रद.

Parochial, *a.* ग्राम्य, ग्रामीय, ग्रामिक (की *f.*).

Parody, *s.* अनुकरणकाव्यं. -*v. t.* शब्दान् परिवृत् c.

Parole, *s.* उक्ति *f.*, वचनं, प्रतिज्ञा.

Paronomasia, *s.* श्लेषः.

Paronychia, *s.* चिप्यं.

Parotis, *s.* लालाधारः.

Paroxysm, *s.* वेगः, सं-आ-वेगः, आवेशः, आक्रमः; ‘p. of rage’ क्रोधावेशः; ‘in a p. of rage’ क्रोधावेशवशात्.

Parricide, *s.* पितृ-हत्या-वधः-घातः. 2 पितृहन् *m.*, पितृघातिन् *m.*, पितृघ्नः. **-al**, *a.* पितृहन्. 2 पितृवधात्मक.

Parrot, *s.* शुकः, कीरः, किंकिरातः, वक्रतुंडः-चंचुः.

Parry, *v. t.* नि-वृ c., परिहृ 1 P, प्रति-हन् 2 P.

Parse, *v. t.* (पदानि) भंज् 7 P, छिद् 7 P. **-ing**, *s.* पदभंजनं-छेदः.

Parsimony, *s.* अल्प-मित-व्ययः. **-ious**, *a.* अल्प-मित-व्ययिन्, कृपण, व्ययपराङ्मुख (खी *f.*), दृढबद्ध-मुष्टि. **-iously**, *adv.* कार्पण्येन, मितव्ययेन. **-iousness**, *s.* *See* (*s.*).

Parsley, *s.* अजमोदा.

Parson, *s.* ग्रामपुरोहितः, ग्रामोपाध्यायः, ग्रामगुरुः. **-age**, *s.* ग्रामगुरुगृहं.

Part, *s.* वि-,भागः, अंशः, खंडः-डं, शकलः-लं, लवः, वि-,दलं, भिन्नं, कला. 2 प्र-,देशः, एकदेशः, अवयवः, अंगं. 3 (Allotted) वि-,भागः, अंशः, उद्धारः, वंटः. 4 कर्मन् *n.*, कार्यं, नियोगः, धर्मः, स्वकर्तव्यं-धर्मः; ‘perform one's p.’ कर्म निर्वह् c., नियोगमनुष्ठा 1 P. 5 भूमिका; पात्रं; ‘assignment of p.s’ भूमिकाकल्पनं. 6 अंगं, अवयवः, घटकः, घटकावयवः; ‘consisting of 4 p.s’ चतुरंग (चलं). 7 वारः, पर्यायः; *See* **Turn.** 8 पक्षः. 9 संबंधः, अनुषंगः; ‘to have a p. in’ संबंध-अनुषंज्-pass. 10 (P.-s) मति *f.*, मतिगुणः, बुद्धि *f.*, धीशक्ति *f.*, *See* **Intellect**; (region) प्र-,देशः; ‘for (on) one's p.’ तावत्, अपि; ‘for the most p.’ प्रायः, बहुशः, प्रायशः, प्रायेण, भूयिष्ठं; *See* **Mostly**, ‘by p.s,’ ‘in p.s’ भागशः, अंशशः; ‘in p.’ अंशतः, ईषत्, किंचित्; ‘in good p.’ संप्रीतमनसा, प्रियं, अनुकूलं, प्रसन्नं; प्रसन्नमनसा; ‘in ill p.’ रुष्ट-खिन्न-मनसा; ‘in four p.s’ चतुर्धा; ‘in many p.s’ बहुधा. -*v. t.* विभज् 1 U, परि-कल्प् c., विभागशः विन्यस् 4 U, वंट् 10; *See* **Divide.** 2 वि-युज् 7 A, 10, विश्लिष् c., पृथक् कृ 8 U, वि-भिद् 7 P or c., विच्छिद् 7 P; (the hair) सीमंतयति (D.). -*v. i.* वियुज्-विभिद्-विच्छिद्-pass., विगम् 1 P. विश्लिष् 4 P, अप-या 2 P, अपगम्. 3 वि-,दल् 1 P, स्फुट् 6 P, वि-दॄ pass., शकलीभू. 4 (With) आ-मंत्र् 10 A, आप्रच्छ् 6 A; त्यज् 1 P, क्षिप् 6 P (place); ‘let me now p. with you’ अनुजानीहि मामधुना गमनाय. **-ing**, *a.* प्रास्थानिक (की *f.*), प्रस्थान-प्रयाण in comp.; ‘p. ceremony’ प्रस्थानकौतुकं. -*s.* वियोगः, विश्लेषः, विरहः, विभेदः. 2 वि-अप-गमः, प्रस्थानं, प्रयाणं, अपयानं; ‘p. of the hair’ सीमंतः, सीमंतरचनं. **-ly**, *adv.* अंशतः, भागतः, किंचित्, ईषत्, स्तोकं, कियत्, अल्पं, स्तोकांशेन, खंडतः. **-Partake**, *v.* अंशभाज्-*a.* भू 1 P, अंशं-भागं-ग्रह् 9 U or हृ 1 P, भज् 1 A, अंशं भज्, भागिन्-*a.* भू; *See* **Share.** 2 भुज् 7 A, सेव् 1 A. **-er**, *s.* अंशिन् *m.*, भागी, अंश-भाग-ग्राही-हारी-हरः, सह-भाक्-भोगिन्, भुज्-भाज्-in comp. **-Partial**, *a.* अव्यापक, असार्वत्रिक-आंशिक (की *f.*). असमग्र, असंपूर्ण, असकल, एकदेश-खंड- in comp.; ‘p. eclipse’ खंडग्रासः; ‘p. rent’ एकदेशच्छिन्नं. 2 पक्षपातिन्, पक्षस्नेहिन्, पक्षानुकूल, पक्षानुरागिन्, एकदेशीय, सपक्षपात, संगिन्, असमदृष्टि, असमदर्शिन्. **-ity**, *s.* पक्षपातः, पक्षपातिता, पक्षस्नेहः-आनुकूल्यं-अनुरागः, असमता, असमदृष्टि *f.*-बुद्धि *f.*, संगः. 2 स्नेहः, अनुरागः, प्रणयः, प्रेमन् *m.* *n.*; ‘speak without any p.’ मध्यस्थतां गृहीत्वा भण (M. 3). **-ly**, *adv.* अंशतः, असमग्रं, असकलं, असंपूर्णं, क्वचित् क्वचित्; असर्वत्र, खंडतः, एकदेशे, ईषत्, स्तोकं, खंड-एकदेश-in comp.; ‘p. broken’ खंडभग्न; *See* **Partly.** **-Participate**, *v. t.* भागं-अंशं-ग्रह् 9 U, संविभज् 1 U. **-ion**, *s.* अंश-भाग-ग्रहणं, संविभागः, सहभोगः-भुक्ति *f.* **-Participant**, *a.*, *s.* भागिन्, अंशिन्; *See* **Partaker.** **-Particle**, *s.* कणः, अणुः, लवः, क्षुद्रांशः, कणिका, लेशः, कला, परमाणुः. 2 निपातः, अव्ययः-यं. **-Partition**, *s.* परिच्छेदः, वियोजनं. 2 वि-,भागः, विभागकल्पनं-ना, विभजनं, वंटनं, व्यंशनं. 3 व्यवच्छेदनं, भित्ति *f.*, व्यवधा-धानं, कोष्टः, संधिः. -*v. t.* विच्छिद् 7 P, विभज् 1 U, अंशांशि कृ 8 U; *See* (*v. t.*). **-Partner**, *s.* अंशिन् *m.*, भागी, समांशी, सहभोगी-भागी; संगी, सहायः, सहकारी, संभूयकारी, संसर्गी, अनुषंगी; ‘p. of joys and sorrows’ समदुःखसुखः (S. 3). 2 **Husband, Wife,** q.v. **-ship**, *s.* सहकारिता, संभूयकारित्वं, समांशिता, संभूयसमुत्थानं.

Parterre, *s.* पुष्पवाटी-टिका, कुसुमाकरः.

Participle, *s.* कृदंतः; ‘present p.’ शतृ, शानच्; ‘past p.’ निष्ठा; ‘potential passive p.' कृत्य: (all being names of terminations).

Parti(y)coloured, *a. See* under **Party.**

Particular, *a.* विशिष्ट, सविशेष, विशेषक, अव-परि-च्छेदक, विशेष in comp. 2 व्यक्त, विभिन्न, विविक्त, उद्दिष्ट, पृथगात्मक, अमुक in comp. 3 अव्यापक, अनौत्सर्गिक (की *f.*); विशिष्ट, not General q. v. 4 असाधारण (णी *f.*), असामान्य, लोकोत्तर, असाकृत (ती *f.*). 5 विलक्षण, अपूर्व. 6 सूक्ष्म, सूक्ष्मदृष्टि, सूक्ष्मदर्शिन्; 'at a p. time' विशिष्टसमये, समयविशेषे; 'a p. rule' विशेषविधि:; 'he is very p. about his dress' वेषक्रियायां सोऽतीव सूक्ष्मदृष्टि:. **–***s.* विशेष:, अव-परि-च्छेद:; 'give p.s of the man' तस्य नरस्य विशेषं ब्रूहि; 'he told all the p.s of the battle' युद्धं स विस्तरेण अवर्णयत्, अखिलं युद्धवृत्तांतं अकथयत्; 'in p.' विशेषत:, विशेषेण. **–ity.** *s.* विशेषनिर्देश: कथनं, एकैकश:निर्देश:. 2 असामान्यता, अव्यापकत्वं. 3 पार्थक्यं, भिन्नता, व्यक्ति *f.*, विशिष्टता. 4 विवरणं, विस्तर:. **–ly,** *adv.* विशेषत:, सविशेषं, प्रधानत:. 2 विस्तरेण, सविस्तरं; सूक्ष्मतया, अतिसूक्ष्मं. 3 पृथक्, अवयवश:, एकैकश:. **–Particularize,** *v. t.* विशिष् 7 P, एकैकश: निर्दिश् 6 P or अभि-धा 3 U, सविशेषं वर्ण् 10 or कथ् 10, व्यवच्छिद् 7 P. **–ation,** *s.* विशेषवर्णनं-ना, विशेष-निर्देश:-कथनं, व्यवच्छेद:. **–ed,** *a.* विशेषित, एकैकश: निर्दिष्ट, व्यवच्छिन्न.

Partridge, *s.* तित्तिर:-रि:, चकोर:-रक:.

Parturient, *a.* आसन्नप्रसवा, प्राप्तप्रसववेदना. **–Parturition,** *s.* प्रसव:, जननं, जन्मन् *n.*, उत्पत्ति *f.*

Party, *s.* पक्ष: ; 'one's own p.' स्व-आत्म-पक्ष:; 'of one's p.' स्वपक्षावलंबिन्, स्वपक्षपातिन् ; 'of the opposite p.' वि-प्रति-पक्ष:. 2 संसर्ग:, सपक्षाणां गण:-संघ:, कृतसंसर्गा जना:, शाखा, पक्ष:. 3 गण:, समूह:, दलं. संघ:, वृंदं, मंडलं, गुल्म:-ल्मं, पंक्ति *f.* 4 अर्थिन् *m.*, प्रत्यर्थी, वादी, प्रतिवादी. 5 सभा, समाज:, पंक्ति:, गण: ; 'dinner (convivial) p.' सग्धि *f.*, सह-सं-भोजनं; सपीति *f.*, तुल्यपानं (drinking p.). 6 विशिष्टजन:, व्यक्ति *f.*, विवक्षितपुरुष:. 7 संबंधिन् *m.*, अनुषंगी, भागी, अंशी, सहकारी, सहाय:; 'a p. to a plot' कूटसहाय:. **–***a.* पाक्षिक(की *f.*), पक्ष in comp. by (*s.*); 'p.-coloured' चित्रविचित्र, नानावर्ण-रंग, विचित्र; 'p.-man' पक्षपातिन् *m.* पाक्षिक:; 'p.-spirit' पक्षपात:; *See* **Partiality;** 'p.-wall' भित्ति *f.*, संधि:; कुड्यं. **–Partisan,** *s.* पक्षपाती, पक्षावलंबी, पक्ष्य:, एकपक्ष:, सपक्ष:, सहोत्थायी, अनु-,संगी, पार्श्व(र्श्वि)क:, पक्षधर:. **–ship,** *s.* पक्षपात:-ग्रहणं-अवलंबनं.

Parvenu, *s. See* **Upstart.**

Pasquinade, *s.* निंदात्मको लेख:, उपहासलेख:.

Pass, *v. t.* अति-व्यति-इ 2 P, अतिक्रम् 1 U, 4 P; 'they two p. ed each other' परस्परमतीत्य-उल्लंघ्य-तौ निर्गतौ; तॄ 1 P, सं-उत्-नि:-°,उत्-,लंघ् 1 A, 10, पारं गम् 1 P, अतिगम्; 'p.ed his examination' परीक्षापारं गत:, परीक्षामुत्ततार. 2 (Time) गम् c. (गमयति), नी 1 P, अति-वह् c., क्षै c. (क्षपयति), या c. (यापयति); 'he with difficulty p. ed eight years' तेनाष्टौ परिगमिता: समा: कथंचित् (R. VIII. 92); 'p.ing (staying for) three nights' तिस्रो वसतीरुषित्वा (R. VII. 33). 3 सं-,चर्-तॄ c., संक्रम् c. 4 निष्पद् c., व्यव-स्था c. (स्थापयति), सिध् c. (साधयति); सं-अनु-मन् 4 A, परिग्रह् 9 P (bill &c.); 'p. sentence' निर्णयं दा 3 U, दंडं आदिश् 6 P ; 'this p. es conception' विचारविषयातिक्रांतमेतत्, धिय: पथि न वर्तते. **–***v. i.* गम्, इ-या- 2 P, चल्-चर् 1 P, प्र-,सृ 1 P, अति-व्यति-इ, अतिक्रम्; 'let it p. now' तिष्ठतु तदधुना, यातु, किमनेन. 2 प्र-चल्-र्, प्रचलित-*a.* भू 1 P, प्र-सृ, प्रचलीभू. 3 सिध् 4 P, निष्पन्नी-सिद्धीभू, अनु-सं-मन् pass.; परिग्रह् pass. 4 उप-,संक्रम्,संचर्. 5 संवृत् 1 A, समा-पद् 4 A, सं-,भू, आ-पत् 1 P, घट् 1 A; *See* **Happen, Occur. –away,** अति-व्यति-इ, गम्, या, अतिक्रम्, अतिवृत्. 2 प्र-,नश् 4 P, प्र-वि-ली 4 A, तिरोभू, दि pass., क्षर् 1 P. **–by,** अतिक्रम्, अति-इ अतिचर्, उल्लंघ्. 2 उपेक्ष् 1 A, न गण् 10, त्यज् 1 P, अपास् 4 U; *See* **Neglect. –for,** Ex. by denominatives: एरंडोपि द्रुमायते 'p. es for a tree'; मन्-गण्-pass.; 'he p.s for a learned man' पंडित इति मन्यते (जनै:). **–into,** निविश्-प्रविश्- 6 P. **–off,** अप-इ, अप-या-गम्, विगम्. **–**(*v. t.*) वि-भू c., संदृश् c., आकल् 10; 'tried to p. the matter off with a joke' तं वृत्तांतं परिहासमिव गणयितुं-आकलयितुं-येते; हृदयवल्लभोऽभिलिख्य कामदेवव्यपदेशेन सखीपुरतोऽपह्नुत: (Rat. 2) 'p. ed off the picture of her beloved upon her friend as that of Cupid.' **–on,** प्र-वृत्, प्र-या-गम्-सृ. **–over,** उपेक्ष्, उत्सृज् 6 P, त्यज्, न गण् लंघ्, अति-इ-अतिक्रम्, अतिक्रम्य गम्, तॄ; *See* (*v.t.*); अंतरयति (D.), मध्यमांबावृत्तांतोऽतारित आर्येण (U. 1) 'is p.ed over' &c.; oft. by स्था, आस् 2 A with तावत्; 'let us p. over this sad tale' तिष्ठतु-आस्तां-तावदयं

दुःखवृत्तांतः. **-through,** निर्भिद् 7 P, प्रविश्य निर्गम्; (throughts &c.) *See* **Occur.** -*s.* संकटं, संक्रमः, संचरः, संकट or संबाध-पथः or मार्गः, दुर्गसंचरः, 2 दरी, विवरः, रंध्रं. 3 (Passport) अनुज्ञा, अनुमति *f.*, अनुज्ञापत्रं, मुद्रा; 'why do you leave the camp without (taking) a p.' किमर्थमगृहीतमुद्रः कटकान्निष्क्रामसि; 'without a p.' अमुद्रालांछितः (Mu. 2). 4 प्रहारः, आघातः, ताडनं. 5 दशा, अवस्था, स्थिति *f.*, दुर्दशा, दुर्गति *f.*, कष्टं, कृच्छ्रं, कष्टावस्था. **-able,** *a.* गम्य, तार्य, सुगम, उल्लंघ्य; 'not p.' दुर्गम, अगम्य. 2 सह्य, सोढव्य, उपेक्षणीय, विगुण. **-age,** *s.* गमनं, तरणं, यानं; 'p. through the world' लोकयात्रा, संसारपथः, 'p. to and fro' गमनागमनं, यातायातं. 2 मार्गः; *See* **Way.** 3 संक्रमः, संचारः, अतिक्रमः, पारगमनं, उल्लंघनं; *See* (*s.*). 4 गमन-संक्रमण-कालः. 5 संचरः, संक्रमः, दुर्गसंचरः. 6 गमनाधिकारः, अनुज्ञा-पत्रं-मुद्रा; *See* **Pass.** 7 वचनं, स्थानं, स्थलं, देशः. 8 वृत्तं, भूतं, वृत्तांतः; 'p.-money' आता(त)रः, तरमूल्यं-पण्यं, तारिकं, तार्यं. **-ed,** *a.* अतीत, गत, संक्रांत, वीत, तीर्ण, सिद्ध. 2 (As excrement) उच्चारित, हन्न, गून. **-er,** *s.* (p.-by), पथिकः, अध्वगः, पांथः; *See* **Traveller.** **-ing,** *s.* तरणं, गमनं, चलनं. -*a.* गामिन्, यायिन् in comp. 2 अतिक्रामक. 3 उत्तम, परम, श्रेष्ठ, विशिष्ट. -*adv.* अतीव, अतिमात्रं, नितांतं, अति pr., अतिशय in comp. **-Passenger,** *s.* तरः, तरितृ *m.*, उत्तरणकृत्. 2 नौ or पोत-गामी or यायी. 3 पथिकः, यात्रिकः, पांथः; *See* **Traveller.** **-Past,** *a.* गत, अतीत, भूत, व्यतीत, अतिक्रांत, वृत्त, परोक्ष; 'p. time' भूतकालः. 2 पूर्व, पूर्वतन (नी *f.*); 'in p. times' पुरा, पूर्वं, पुराकल्पे. 3 सिद्ध, निष्पन्न, समाप्त, कृत. -*s.* भूतं, अतीतं, समतीतं, अतिक्रांतं, गत-अतीत-भूत-कालः. -*prep.*, अति pr., अतीत, अतिक्रांत, नष्ट, हीन in comp., अ-निर्-pr.; 'p. cure' असाध्य, निरुपचार; 'p. the range of sight' चक्षुर्विषयातिक्रांत, नयनपथातीत; 'p. all shame' निर्लज्ज, नष्ट-त्यक्त-लज्ज; 'p. human strength' अतिमानुषशक्ति; *See* **Beyond** also.

Passible, *a.* वेदनक्षम.

Passion, *s.* भावः, विकारः, विकृति *f.*, वृत्ति *f.*, रागः, रसः, मनो-विकारः-धर्मः-भावः-वृत्तिः-रागः, इंद्रियवृत्तिः. 2 इंद्रियं; 'the p.s' इंद्रियाणि, इंद्रियवर्गः, 'subduing the p.s' इंद्रियनिग्रहः; 'p. of love' कामविकारः, शृंगारभावः; 'void of p.s' वीतराग, विरक्त; 'absence of p.s' विरागः, विरक्ति *f.* 3 प्रकोपः, संरंभः, क्रोधः, रोषः, अमर्षः, उत्-सं-तापः; चंडता, उग्रता, क्षोभः, व्या-सं-क्षोभः, चित्त-क्षोभः-तापः-वेगः. 4 लालसा, लोभः, लोलुपता, औत्सुक्यं, उत्कंठा, उत्कटेच्छा, गाढाभिलाषः, व्यसनं, आसक्ति *f.*; 'quality of (tendency to) p.' रजोगुणः, रजस् *n.* 5 कामः, मदनः, स्मरः, कामविकारः, स्मरमोहः, रजः, रजोवृत्तिः, मदः, कामुकत्वं, अभिलाषः, अनुरागः; *See* **Love, Lust.** 6 दुःखानुभवः, दुःखभोगः. 7 सहनं, कर्माश्रयता, ग्रहणं. **-ate,** *a.* क्रोधन, कोपन, क्रोधिल, शीघ्रकोपिन्, सुलभकोप, संरंभिन् ससंरंभ, रोष-कोप-क्रोध-शील, अमर्षण, रोषण, क्रोधिष्ठ, चंड-पित्त-स्वभाव, आवेशवत्, चंड उत्ताप-संताप-शील, तिग्म, उष्ण. 2 तीव्र, तीक्ष्ण, उग्र, अत्युत्कट, उच्चंड, प्रखर, अतिरिक्त, परम, नितांत, गाढ, उत्कट; 'p. love for gambling' द्यूते गाढाभिनिवेशः, 'p. lover of music' नितांतं संगीतप्रियः. 3 रागयुक्त, विकाराधीन, सराग, रागान्वित, उत्कंठित, सानुराग, रजोगुणिन्, कामार्त; 'a p. woman' भामिनी, कोपना. **-ately,** *adv.* सकोपं, सक्रोधं, ससंरंभं, सामर्षं. 2 चंडं, अत्युत्कटं, तीक्ष्णं, बलवत्. 3 सरागं, सानुरागं, रागपूर्वं. **-ateness,** *s.* चंडस्वभावः, सुलभकोपित्वं, रोषणता, &c. **-less,** *a.* विरक्त, रागहीन, शांत-वीत-राग, निःसंग.

Passive, *a.* कर्मवाच्यं (p. voice); 'impersonal p.' भाववाच्यं. 2 सहन, सहिष्णु, सहनशील-वृत्ति-धर्मक, तितिक्षु, अनिवारक; oft. ex. by सह् 1 A. 3 निश्चेष्ट, निष्क्रिय, अप्रवर्तक, कर्माश्रय, कर्मपात्र. **-ly,** *adv.* सहिष्णुतया, निश्चेष्टं, अप्रतिकारेण. **-ness,** *s.* सहनशीलं-धर्मः-वृत्तिः, सहिष्णुता. 2 निश्चेष्टता, कर्माश्रयता, कर्मपात्रता.

Passport, *s.* *See* **Pass,** *s.* 3.

Paste, *v. t.* (उदपेषं) वि-, लिप् 6 P, बंध् 9 P, आसंज् c. -*s.* उदपेषः, जलपेषः; 'p.-board' संसृष्टपत्रं.

Pastern, *s.* अश्वखुरसंधिः.

Pastime, *s.* क्रीडा, विनोदः, लीला, केलि *f.*, विहारः, खेला, खेलनं, विलासः, कौतुकं.

Pastor, *s.* अवि-अजा-पालः, मेषपालः. 2 आचार्यः, गुरुः, उपाध्यायः. **-al,** *a.* Ex. by (*s.*) in comp.; 'p. life' अविपालवृत्ति *f.*; 'p. duties' धर्मकार्याणि; 'p. office' आचार्यकर्म. -*s.* 'p. poem' गोपकाव्यं.

Pastry, *s.* मिष्टान्नं, आपूपिकं, पिष्टकाः (pl.); 'p. cook' आपूपिकः, भक्ष्यकारः.

Pesture, *s.* शाद्वलं, शाद्वल-तृणावृत-भूमि *f.*, यवसक्षेत्रं, गोप्रचारः. 2 तृणं, यवसं, घासः, पशव्यं, गवादनं, पशुभोजनं. -*v. i.* चर् 1 P, तृणं खाद् 1 P or भक्ष् 10. -*v. t.* चर् c., तृणं भुज् c. or खाद् c. **-age,** *s.* प्रचारभूमिः, गोप्रचारः. 2 शस्यं, घासः, यवसं. *See* (*s.*).

Pasty, *s.* मांसपूप:.

Pat, *a.* युक्त, उचित. -*adv.* युक्तं, उचितं, सम्यक्. -*v. t.* हस्तेन स्पृश् 6 P or परामृश् 6 P; लघु प्र-हृ 1 P or तड् 10. -*s.* लघ्वाघात:, लघुप्रहार:.

Patch, *v.* सं-ग्रंथ् 9 P, वस्त्रखंडान् निषिव् 4 P or सं-धा 3 U; 'p.ed up garment' नानाखंडैर्ग्रथितं वस्त्रं, कर्पट:, कंथा; 'wearing p.ed garment' कंथाधारिन्, कर्पटिक. -*s.* खंड:-डं, शकल:-लं, वस्त्र-पट-खंड:, ग्रथितखंड:, 'p.-work' संग्रंथनं, खंड-कर्मन् *n.* कंथाकरणं. 2 भूभाग:, प्रदेश:, भूमि *f.*, क्षेत्रं. **-ed,** *a.* संग्रथित, खंडमय (यी *f.*), खंडरूप.

Pate, *s.* मुंडं, मस्तकाग्रं; *See* **Head.**

Patent, *a.* स्पष्ट, व्यक्त, स्फुट, सुप्रकाश, सुव्यक्त, सुस्पष्ट, प्रत्यक्ष. -*s.* असामान्याधिकार:, विशिष्टाधिकारपत्रं. **-ee,** *s.* असामान्याधिकारिन् *m.*

Pater-familias, *s.* कुलपति:, कौटुंबिक:.

Paternal, *a.* पैतृक (की *f.*), पैत्र (त्री *f.*), पित्र्य, पितृ in comp., पित्रागत, पितृप्राप्त; 'p. estate' पैतृकी भूमि:; 'p. aunt' पितृष्वसा. 2 पित्रनुरूप, पितृतुल्य-संनिभ. **-ly,** *adv.* पितृवत्, पितेव, पितृसंनिभं.

Paternity, *s.* पितृत्वं, पितृधर्म:. 2 प्रभव:, प्रसूति *f.*

Path, *s.* (P.-way) पथिन् *m.*, मार्ग:, पद्धति *f.*, सरणि-णी *f.*, वर्त्मन् *n.*, पदवि-वी *f.*; *See* **Way;** 'the p. of a planet' कक्षा-क्ष:; 'the wrong p.' उत्पथ:, कापथ:, विमार्ग:; 'good p.' सुपथ:; 'to seduce from the right p.' उत्पथं नी 1 P. **-less,** *a.* निष्पथ, अगम्य, दुर्गम.

Pathogenesis, *s.* रोगनिदानशास्त्रं.

Pathetic,-al, *a.* करुण, हृदयद्राविन्-ग्राहिन्, हृदिस्पृश्, हृदयंगम, करुणात्मक. **-ally,** *adv.* करुणं, हृदयग्राहितया; 'a speech p. worded' करुणार्थग्रथितं वच:" **-Pathos,** *s.* करुणो रस:, कारुण्यरस:, करुणारस:; राग:, रस:, कारुण्यं.

Pathology, *s.* रोगनिदानशास्त्रं.

Patient, *a.* क्षमिन्, सहिष्णु, तितिक्षु, सहनक्षमा-शील, सहन, क्षमावत्, मर्षिन्, क्षमायुक्त, क्षम-सह in comp. 2 धीर, शांत, धृतिमत्; 'very p.' बहुसह; 'p. of labour' क्लेशसह-क्षम; 'to be p.' सह् 1 A, क्षम् 1 A; *See* **Endure.** -*s.* आतुर:, रुग्ण:, रोगिन् *m.* **-ly,** *adv.* क्षांत्या, क्षमापूर्वं, धीरतया. **-Patience,** *s.* क्षमा, तितिक्षा, क्षांति *f.*, सहिष्णुता. 2 धीरता, प्रशांति *f.*, धृति *f.*, धैर्यं, उत्साह:

Patio, *s.* अंगण-नं.

Patriarch, *s.* कुलपति:, आदि-मूल-पुरुष:. 2 वृद्ध-गुरु-जन:. **-al,** *a.* (*s.*) in comp.

Patrician, *s.* कुलीन:, अभिजात:, कुलीनजन:, शिष्ट:. -*a.* कुलीन, शिष्ट. सद्वंशज, अभिजात.

Patricide, *s.* *See* **Parricide.**

Patrimony, *s.* पैतृकरिक्थं-धनं, गोत्रधनं, पैतृकं, दाय:, पित्रागतधनं. **-ial,** *a.* पितृप्राप्त-आगत, दायलब्ध, पैतृक (की *f.*).

Patriot, *s.* स्वदेशानुरागिन् *m.*, स्वदेशहितपरायण:, स्वदेशाभिमानिन् *m.* स्वदेशभक्त:. **-ic,** *a.* स्वदेशानुरागिन्, स्वभूम्यनुरक्त, स्वदेशाभिमानिन्, स्वदेशभक्त-आसक्त. **-ically,** *adv.* स्वदेशहितेच्छया. **-ism,** *s.* स्वदेशप्रीति *f.*-अनुराग:, जन्मभूमिवात्सल्यं, स्वदेशाभिमान:.

Patrol, *v. i.* (रक्षणार्थं) रात्रौ परिक्रम् 1 U, 4 P or परिभ्रम् 1, 4 P. -*s.* रक्षिगण:, नागरिका: (pl.), रक्षक:, रक्षिन् *m.*, रात्रिपरिचर:.

Patron, *s.* संभावयितृ *m.*, पालक:, उपकारक:. संवर्धक:, आश्रय:, पुरस्कर्तृ *m.*, रक्षक:. शरणं; नाथ:, पोषक:, पिंडद:. **-age,** *s.* संभावना, आश्रय:, साहाय्यं, अनुग्रह:, उपकार:, पालनं. पोषणं, रक्षणं, संवर्धनं, अवलंब:, पुरस्कार:. **-al,** *a.* रक्षक, वर्धक. **-ize,** *v. t.* सं-भू c., आश्रयं दा 3 U, प्रति-अनु-पा c. (पालयति), अनुग्रह् 9 P, अवलंब् 1 A, संवृध् c.; oft. by (*s.*) with भू 1 P. **-less,** *a.* निराश्रय, अनाथ, अशरण, निरवलंब, निराधार.

Patronymic, *s.* पैतृकनामन् *n.*, गोत्रनाम, अपत्यवाचक:; 'chapter treating of Taddhita p. terminations' तद्धितापत्याधिकारप्रकरणं.

Patten, *s.* काष्ठपादुका.

Patter, *v. i.* पटपटायते (D.). -*s.* पटपटाशब्द:.

Pattern, *s.* आदर्श:, निदर्शनं, उपमा, प्रतिमा, प्रतिरूपं-कृति *f.* 2 आकार:, रूपं, संस्कार:; *See* **Model.**

Paucity, *s.* अल्पता, स्तोकता, ex. by 'few' q. v.

Paunch, *s.* पिचिंड:, उदरं, जठर:-रं, तुंदं, लंबोदरं; 'having a p.' लंबोदर, तुंदिन, पिचिंडिल; *See* **Corpulent.** -*v. t.* निरंत्रीकृ 8 U.

Pauper, *s.* अनाथ:, आकिंचन:, दरिद्र:, भिक्षु:. भिक्षाजीविन्; *See* **Beggar, Poor.** **-ism,** *s.* भिक्षावृत्ति *f.*, भैक्ष्याजीव:, भैक्ष्यं.

Pause, *v. i.* वि-उप-रम् 1 P, निवृत् 1 A; विश्रम् 4 P, शम् 4 P, विच्छिद् pass.; 'p. upon' सं-,चिंत् 10: *See* **Consider.** -*s.* विराम:, विरति *f.*, निवृत्ति *f.*, विच्छेद:. विश्राम:, प्र-उप-शम:. 2 अंतरं, व्यवधानं. अवकाश:, अंतरालं. 3 अवसानं, यति: (in poetry).

Pave, *v. t.* प्रस्तरै:-इष्टकाभि:-खच् 10 (खचयति) or आस्तृ 9 U,-स्तृ 5 U. (भूमिं)

निबंध् 9 P. **-er,** *s.* शिलास्तरणकृत् *m.* **-ment,** *s.* कुट्टिमः-मं, निबद्धा भूः, शिलास्तरः-फलकं.

Pavilion, *s.* मंडपः-पं, पटमंडपः-वासः; *See* **Tent.**

Paw, *s.* पादः, सनखः पादः. 2 हस्तः, करः, चपेटः. *-v.* पादेन-खुरेण (भूमिं) अभिहन् 2 P or विलिख् 6 P. 2 करेण स्पृश् or परामृश् 6 P.

Pawn, *v. t.* निक्षिप् 6 P, न्यस् 4 U, आ-धा 3 U, न्यासीकृ 8 U, आधीकृ. *-s.* न्यासः, निक्षेपः, आधिः, बंधकः. पणः; *See* **Pledge.** 2 (At chess) शा(सा)रः-रिः; 'p.-broker' निक्षेपव्यवसायिन् *m.*

Pay, *v. t.* दा 3 U, 1 P. 2 सं-पद् c., संप c., साध् c.; (a person) वेतनं-मूल्यं-दा; (debt) परि-,शुध् c., अपाकृ 8 U, अपवृज् 10, प्रतिकृ; 'p. for' निस्तॄ 1 P, निष्कृ; 'he paid for the book' तस्य पुस्तकस्य मूल्यं स ददौ; 'they paid for their offence with their lives' जीवितव्ययेन स्वापराधस्य निष्क्रयः कृतः; *See* **Cost.** *-s.* वेतनं, भृति *f.*, मूल्यं, निर्वेशः; *See* **Hire;** 'p.-day' वेतनदानदिवसः; 'p.-master' वेतनाध्यक्षः. **-ee,** *s.* परि-,ग्रहीतृ *m.* **-er,** *s.* दातृ *m.* शोधकः. **-ment,** *s.* दानं, शोधनं, निराकरणं, निस्तारः. साधनं; 'p. of a debt' ऋणमुक्ति *f.*-शोधनं, आनृण्यं.

Pea, *s.* कलायः, स(सा)तनिकः, सतीलकः, हरेणुः, रेणुकः.

Peace, *s.* संधिः, संधानं; 'to make p.' सं-धा 3 U. 2 शमः, प्र-उप-शमः-शांति *f.*, निर्वृति *f.*, स्वास्थ्यं, स्वस्थता, शांतता, सुखं; निरुद्वेगः, उपप्लवाभावः. 3 ऐक्यं, सख्यं, मैत्री, अविरोधः, संवादः. 4 मौनं, तूष्णींभावः; 'p. of mind' स्वास्थ्यं, चित्तप्रसादः, मनःशांतिः; 'hold p.' तूष्णीं भू, वाचं यम् 1 P, मौनीभू; 'p.-maker' संधातृ *m.* 'p.-offering' शांतिहोमः. *-interj.* शांतं, तूष्णीं भव. **-able,** *a.* प्र-,शांत, शांतप्रकृति-स्वभाव, अक्षुब्ध, प्रसन्न, निराकुल, अव्यग्र, अनुद्विग्न, स्वस्थ. 2 शांतिप्रिय, युद्ध-कलह-विमुख (खी *f.*). **-ableness,** *s.* शांतता, स्वास्थ्यं. 2 युद्धद्वेषः, कलहविमुखता. **-ful,** *a.* प्र-,शांत, निरुपद्रव, निरुपप्लव, निष्कंटक, विग्रह-संग्राम-हीन. 2 (Life &c.) निर्वृत, स्वस्थ, निरुद्वेग, सुख, in comp.; *See* **Peaceable.** **-fully,** *adv.* शांतं, निरुद्वेगं, स्वस्थं, शांतप्रसन्न-चेतसा. 2 युद्धं विना, साम्ना, सामोपायेन.

Peacock, *s.* मयूरः, नीलकंठः, शिखंडिन् *m.*, शिखी, बर्ही, बर्हिणः, शिखावलः, केकी, भुजंगभुज्, कलापी, मेघनादानुलासी, प्रचलाकी; 'p.'s tail' शिखंडः, बर्हः, पिच्छं, कलापः; 'p.'s crest' शिखा, चूडा; 'eye in the tail' चंद्रकः; मेचकः; 'p.'s cry' केका. **-Peafowl,** *s.* मयूरः-री, मयूरजाति *f.* **-Peahen,** *s.* मयूरी, शिखंडिनी, बर्हिणी.

Peak, *s.* शिखरः-रं, शृंगं, कूटः-टं, सानु *m. n.*, चूडा, ककुदः-दं, पर्वताग्रं. 2 (Generally) अग्रं, शिखरं, शिखा, चूडा. **-ed,** *a.* शिखरिन्, शृंगिन्, सकूट, ककुद्मत्. 2 तीक्ष्णाग्र, सूच्यग्र.

Peal, *s.* ध्वनिः, रवः, नि-,नादः, महाध्वनिः, निर्घोषः; *See* **Noise;** 'p. of thunder' घनगर्जितं, मेघनिर्घोषः, स्तनितं; 'p. of bells' घंटानादः, क्वणितं. *-v. i.* नद्, स्वन्, क्वण्, ध्वन् 1 P; स्तन्, गर्ज् 1 P (of thunder).

Pearl, *s.* मुक्ता, मुक्ताफलं, मौक्तिकं, शुक्तिजं; 'p.-shell' शुक्ति *f.*, मुक्तास्फोटः, शुक्तिका, मुक्तागारं. **-y,** *a.* मुक्तामय (यी *f.*), मुक्तापूर्ण. 2 मुक्तोपम, मुक्ताभ.

Peasant, *s.* कृषकः, कृषीवलः, क्षेत्रिकः, ग्राम्यः, ग्रामीणः, जानपदः; *See* **Farmer.** **-ry,** *s.* कृषीवलाः, कृषकवर्गः.

Pease, *s.* pl. *See* **Pea.**

Pebble, *s.* उपलः, दृषत्कणः, चूर्णखंडः, शर्कराखंडः. **-y,** *a.* प्रचुरोपल, उपलसंकीर्ण, शर्करिल, सशर्कर, शार्करीय.

Peccable, *a.* पापवश-अधीन.

Peccadillo, *s.* स्खलितं, अल्प or क्षुद्र-दोषः or अपराध

Peccant, *a.* पापिन्, अपराधिन्, दोषिन्, सदोष, पापशील. 2 दुष्ट, दूषित, विकृत. **-Peccancy,** *s.* विकारः, दोषः.

Peccavi, *s.* दोषस्वीकारः.

Peck, *v.* (चंचुपुटेन) अभिहन् 2 P, तुद् 6 P, प्र-हृ 1 P, वि-,लिख् 6 P, दंश् 1 U, तुंडेन खंड् 10, चंचुप्रहारं कृ 8 U, चंचुप्रहारेण जर्जरीकृ. 2 (Grain) चंच्वा ग्रह् 9 U or आ-दा 3 A or लिह् 2 U; 'p. at' सततं प्रहृ 1 P, निंद् 1 P; *See* **Censure.** *-s.* द्रोणपादः. **-er,** *s.* प्रतुदः.

Pectoral, *a.* उरस्य. 2 कासघ्न (घ्नी *f.*). *-s.* कासघ्नं, कफ-श्लेष्म-घ्नं.

Peculate, *v. i.* छलेन आत्मसात्कृ 8 U or ग्रस् 1 A, or मुष् 9 P or अपहृ 1 P. **-ion,** *s.* छलेन अपहारः, ग्रसनं, मोषणं. **-or,** *s.* मोषकः,

Peculiar, *a.* विशेष in comp.; विशिष्ट, असाधारण (णी *f.*), असामान्य, अव्यापक, आत्मीय, स्वीय; *See* **Particular.** *-s.* असाधारणधनं, स्वीयं धनं. **-ity,** *s.* विशेषधर्मः-लक्षणं-चिह्नं-गुणः, विशेषः, धर्मः, गुणः. **-ly,** *adv.* विशेषतः, विशेषेण, सविशेषं.

Pecuniary, *a.* अर्थ-धन-द्रव्य-in comp. 'p. loss' अर्थहानिः; 'p. difficulty' अर्थकृच्छ्रं. 2 धन-द्रव्य-रूप, अर्थात्मक.

Pedagogue, *s.* बालशिक्षकः-पाठकः. 2 **Pedant,** q. v.

Pedal, *a.* पादविषयक, पादसंबंधिन्.

Receive, *v. t.* आ-दा 3 A, प्रति-इष् 6 P, ग्रह् 9 U, प्रति-परि-°, प्रति-आ-पद् 4 A, स्वीकृ 8 U, अंगीकृ. 2 आप् 5 P, अधिगम् 1 P, लभ् 1 A; *See* **Get.** 3 प्रविश् c.; *See* **Admit** 4 (A guest) प्रत्युद्-गम्-व्रज् 1 P, प्रत्युद्-इ-या 2 P, सं-मन् c., सं-भू c., सत्कृ, आ 6 A, स्वागतं वद् 1 P or व्याहृ 1 P. 5 आ-धा 3 U, ग्रह्, आ-दा, धृ 1 P, 10. **-ed,** *a.* आदत्त, आत्त, गृहीत, लब्ध, सत्कृत, संभावित, &c. 2 लोकप्रसिद्ध, अभिमत, प्रचलित, अभ्युपेत; 'r. practice' लोकाचारः, प्रचलितो व्यवहारः; 'r. doctrine' आम्नायः, संप्रदायः. **-er,-Recipient,** *s.* प्रतिग्राहकः, परि-प्रति-ग्राहिन्, ग्रहीतृ, आदातृ all *m.* प्रतीच्छकः. 2 आशयः, आधारः, भाजनं, नि-आधानं. **-Receipt,** *s.* आदानं, ग्रहणं, प्राप्ति *f.* 2 आयः, लाभः, उदयः, फलं, आगमः, आदायः. 3 स्वीकारपत्रं, अभ्युपगमलेख्यः, प्रतिग्रहपत्र-लेखः; 'or the creditor shall give a r. in his own hand' धनी चोपगतं दद्यात् (धनं) स्वहस्तपरिचिह्नितं (Y. ii. 93). 4 (Recipe) योगः, कल्पः, संस्कारलेखः. **-Receptacle,** *s.* आधारः, आ-नि-धानं, भाजनं, आशयः, पात्रं, निधिः, आश्रयः, आस्पदं, पदं; 'r. of bile' पित्ताशयः; आमाशयः, &c. **-Reception,** *s.* परि-प्रति-ग्रहः, आदानं, ग्रहणं, स्वी-अंगी-कारः, प्रवेशः-शनं. 2 संभावना, उपचारः, प्रत्युद्गमः, सत्कारः, संमानः, आदरः.

Recent, *a.* नव, अभिनव, नूतन, प्रत्यग्र, अचिर, अप्राचीन, अदीर्घकालीन. **-ly,** *adv.* *See* **Lately.**

Receptacle, } *See* under **Receive.**
Reception, }

Recess, *s.* विविक्तं स्थानं, निगूढस्थानं; कोणः, निभृत-गुप्त-स्थानं. 2 निवृत्ति-विश्राम-स्थानं, आरामः. 3 विरामः, विश्रांति *f.*, क्षणः, कार्यत्यागः-निवृत्ति *f.*, विश्रामः, विश्रामकालः.

Recipe, *s.* *See* **Receipt,** 4 under **Receive.**

Reciprocal, *a.* अन्योन्य, परस्पर, इतरेतर, व्यतिकर, मिथः, in comp.; oft. ex by व्यति pr.; *See* **Mutual.** 2 अन्योन्यानुगामिन्, परस्परानुवर्तिन्, अनुपूर्व. **-ly,** *adv.* परस्परं, इतरेतरं, मिथः. **-ness, -Reciprocity,** *s.* परस्परता, व्यतिकरः, व्यतिषंगः, व्यति(ती)हारः, विनिमयः, परि(री)वर्तः. **-Reciprocate,** *v. t.* परस्परं परिवृत् c., विनि-मे 1 A, व्यतिहृ 1 P: 'to r. assistance' प्रत्युपकृ 8 U; *See* **Exchange.** **-ion,** *s.* विनिमयः, व्यतिहारः, परिवर्तः.

Recite, *v. t.* पठ् 1 P, उदीर् c., उच्चर् c., अनुवद् 1 P, उदाहृ 1 P, उद्-गॄ 6 P. 2 वर्ण् 10, कथ् 10, आ-ख्या 2 P, व्याहृ; *See* **Tell.** **-al, -ation,** *s.* पठनं, उदाहारः, उद्गारः, उच्चारणं, अनुवादः. 2 कथनं, आख्यानं, वर्णनं. **-er,** *s.* पठकः, अनुवादकः, उच्चारकः, आख्यायकः.

Reck, *v. i.* गण् 10, अवेक्ष् 1 A; *See* **Care.** **-less,** *a.* प्रमत्त, अनवहित, असावधान, निरपे(वे)क्ष, साहसिन्. **-lessly,** *adv.* असावधानं, प्रमादेन, निःशंकं, अविचार्य. **-lessness,** *s.* प्रमादः, अनवधानं, साहसं, साहसशीलता.

Reckon, *v. t.* गण् 10, परि-सं-ख्या 2 P, कल् 10 (कलयति). 2 मन् 4 A, गण्, भू c. **-v. i.** वि-,तर्क् 10, अनु-मा 3 A, 2 P, ऊह् 1 A. 2 मन्, बुध् 1 P, *See* **Consider;** 'r. upon' आ-अव-लंब् 1 A, आश्रि 1 U, विश्वस् 2 P; 'r. with' देयं परिशुध् c. **-er,** *s.* गणकः, गणयितृ *m.* **-ing,** *s.* गणनं-ना, परि-, संख्यानं. 2 गणनापत्रं. 3 व्ययपत्रं. 4 मानं, गणना, मात्रा.

Reclaim, *v. t.* सत्पथे-सन्मार्गे-प्रवृत् c. or नी 1 P, or नियुज् 7 A, 10, दुर्मार्गात्-दुष्कर्मणः-नि-परा-वृत् c. or विरम् c., दुर्मार्गं त्यज् c. 2 कृषियोग्य-*a*, कृ 8 U. 3 पुनः लभ् 1 A or ग्रह् 9 U. **-Reclamation,** *s.* पापनिवृत्ति *f.*, दुर्मार्गपरावर्तनं; कुपथत्यागः. 2 पुनर्ग्रहणं; पुनर्लाभः-अवाप्ति *f.*

Recline, *v.* . अव-आ-लंब् 1 A, समा-आ-श्रि 1 U. 2 शी 2 A, सं-उप-विश् 6 P, आस् 2 A; अध्यास्, अधि-शी (with acc.), निषद् 1 P, विश्रम् 4 P; *See* **Lie.** **-v. t.** नि-धा 3 U, उप-धा; *See* **Lean.** **-ing,** *a.* आलंबिन्, आश्रित, अवलंबित. 2 आ-अव-नम्र; शयान; संविष्ट, निषण्ण.

Recluse, *s.* परिव्राज् *m.*, संन्यासिन् *m.*, विविक्त-एकांत-वासिन्-सेविन् *m.*, वानप्रस्थः; female r.' परिव्राजिका. **-a.** विविक्त, निर्जन *See* **Lonely.** **-ness,** *s.* आरण्यकव्रतं, विविक्तसेवा, परिव्रजनं.

Recognize, *v. t.* प्रति-,अभि-ज्ञा 9 U, संविद् 2 A, परिच्छिद् 7 P, अनु-स्मृ 1 P, निश्चि 5 U, निर्णी 1 P; 'not properly r. ed' न तत्त्वतः परिच्छिन्नः. 2 स्वी-अंगी-कृ 8 U, प्रति-पद् 4 A, अभ्युपगम् 1 P, अभ्युप-इ 2 P, ग्रह् 9 U, प्रमाणीकृ. **-ance,** *s.* अंगीकारपत्रं, प्रातिभाव्यं, दर्शनप्रातिभाव्यं (r. bond); 'entered into a r. bond' दर्शनप्रतिभुवं ददौ. **-Recognition,** *s.* प्रति-,अभिज्ञा-ज्ञानं, परिच्छेदः. 2 अंगी-स्वी-कारः, प्रतिपत्ति *f.*, अभ्युपगमः.

Recoil, *v. i.* वि-परा-वृत् 1 A, व्यपवृत्; परा-पत् 1 P. **-s.** (अकस्मात्) परा-वि-वर्तः-र्तनं, परापतनं.

Recollect, *v. t.* स्मृ 1 P, अनु-सं-°, अनु-ध्यै 1 P, अनुचिंत् 10, अनुबुध् 4 A, 1 P. 2 (Oneself) धैर्यं अवष्टंभ् 9 P or अवलंब् 1 A; *See* **Courage;** 'he tries to r.' सुस्मूर्षते. **-ion,** *s.* स्मृति *f.*, स्मरणं, अनुचिंतनं, अनुबोधः; 'I am a sage having r. of my former birth' अहं जातिस्मरः मुनिः (Ka. 355).

Recommend, *v. t.* श्लाघ् 1 A, प्रशंस् 1 P; *See* **Praise.** 2 निक्षिप् 6 P, सं-,क्रम् c. (अर्पयति); *See* **Entrust;** स्तुतिपूर्वकं निक्षिप् or उपन्यस् 4 U; or gen. ex. by स्तु 2 U, प्रशंस्; गुणान् प्रशंस्; 'I r. this boy to your care' अयं बालको भवतावेक्षणीय इति मे विनतिः; 'I shall, therefore, r. you to Damayanti' तदहं विदधे तव स्तवं दमयंन्त्याः सविधे (N. II. 47); 'I beg to r. him to your kind notice' तस्मिन् कृपादृष्टिं पातयतु or तं स्निग्धदृष्ट्या पश्यतु भवान् इति मे प्रार्थना. **-ation,** *s.* गुणवर्णनं-प्रशंसा-कीर्तनं. 2 गुणवर्णनपत्रं, प्रशंसालेखः. 3 उपदेशः, अनुशासनं, प्रबोधनं. 4 अनुग्रह-प्रसाद-कारणं, आदरहेतुः 'a fair face is a good r.' आकृतिविशेषेष्वादरः पदं करोति (M. 1.). **-atory,** *a.* गुणश्लाघिन्, प्रशंसाकारिन्.

Recompense, *v. t.* शुध् c., निष्कृ 8 U, प्रतिकृ, प्रतिफलं-निष्कृतिं दा 3 U, निस्तॄ c.; (क्षतिं) पूर् 10 &c.; *See* **Compensate.** 2 मूल्यं दा; परितुष् c., सं-भू c.; *See* **Reward.** **-s.** पारितोषिकं, मूल्यं, प्रतिफलं; निष्कृति *f.*,

निस्तारः, शुद्धि *f.*, निर्यातनं, प्रतिक्रिया; पूरणं; क्षतिनिष्कृतिः- पूरणं.

Reconcile, *v. t.* सं-धा 3 U, सं-घट्ट् c. (घटयति), संमिल् c., द्वेषं-वैरं शम् c. (शमयति), सख्यं कृ 8 U; प्रसद् c. अनुनी 1 P, सांत्व् 10, सं-परि-तुष् c.; 'you are not yet r. ed' नाद्यापि प्रसादं गृह्णासि (M. 4.), न अनुनीयसे, प्रसन्ना न भवसि; 'easy to be r. ed' आशुसंधेय. 2 (Statement &c.) विसंवादं-विरोधं-अपनी 1 P or अपा-निरा-कृ, ऐकमतां-एकवाक्यतां-संगतिं-कृ, समा-धा. 3 (Quarrels &c.) प्रशम् c., सं-धा, निराकृ. **-ed,** *a.* कृतसंधि, शांतवैर, प्रसादित, एकीकृत; 'to be r.' प्रसद् 1 P, मैत्र्यं गम् 1 P, प्रसादं ग्रह् 9 U, तोषं गम्, संमिल् 6 P. **-or,** *s.* संधातृ *m.*, समाधाता, संधिकृत् *m.* **-ment, -Reconciliation,** *s.* संधानं, संघटनं, प्रसादनं, संमेलनं, वैरशमनं, सख्यकरणं. 2 संधिः, सामन् *n.*, वैरशांति *f.*, पुनः सख्यं-मैत्री, सांत्वनं, अनुनयः, ऐक्यं. 3 समाधानं, संगति *f.*, एकवाक्यता, विरोधशमनं.

Recondite, *a.* गहन, नि-,गूढ, गूढार्थ, दुर्बोध, रहस्य, दुर्ज्ञेय, गहनार्थ.

Reconnoitre, *v. t.* निपुणं-सूक्ष्मं-परीक्ष् 1 A or निरूप् 10 or अनुसं-धा 3 U, गवेष् 10.

Record, *s.* लेख्यं, लेखः, पत्रं, पत्रकं, पट्टः, लेख्यप्रमाणं (evidence on r.). **-v. t.** अभि-, लिख् 6 P, लेख्ये-पत्रे-आरुह् c. or निविश् c. or ऋ c. (अर्पयति); *See* **Commit.** **-er,** *s.* लेखकः, लिपिकारः, कायस्थः (court-officer).

Recount, *v. t.* कथ् 10, आ-ख्या 2 P, वर्ण् 10, निविद् c., परि-,कृत् 10; *See* **Tell.**

Recoup, *v. t.* पूर् 10, प्रतिवि-धा 3 U पुनर् लभ् 1 A.

Recourse, *s.* आ-सं-उपा-श्रयः, आ-अव-लंबः, 2 शरणं, गति *f.*, (श्रीहरिर्मे गतिः); 'have r. to' श्रि 1 U, आ-उपा-समा-सं°, आ-स्था 1 P, आ-अव-लंब् 1 A; उपगम् 1 P.

Recover, *v. i.* आरोग्यं लभ् 1 A, रोगाद् विमुच् pass.: oft. by निर्, वि, गत in comp.; निर्विषः गौतमः (M. 4.) 'has r. ed from (the effects of) poison'; प्रकृतिं आपद् 4 A, सुस्थ-प्रकृतिस्थ-*a.* भू 1 P, रोगमुक्त-निरामय-*a.* भू; पूर्वस्थितिं प्राप् 5 P. 2 (From fainting) संज्ञां-चेतनां-लभ्; *See* below. **-v. t.** (पुनः) लभ्, प्राप्, विद् 6 U, प्रति-आ-पद्; प्रत्यवाप्, प्रत्या-दा 3 A, प्रतिग्रह् 9 P, प्रत्याहृ 1 P, प्रत्युद्धृ 1 P; 'r. consciousness' संज्ञां-चेतनां-लभ् or प्राप्, प्रकृतिं-संज्ञां प्रति-आ-पद्, प्रकृतिस्थ-*a.* भू. 2 रोगं हृ or नश् c. or साध् c. or शम् c., नीरुज-स्वस्थ-*a.* कृ 8 U; *See* **Cure;** 'she r. ed him from poison' सा तं निर्विषं चकार. **-ed,** *a.* प्रतिलब्ध, प्रत्याहृत, पुनर्गृहीत, &c. 2 (From sickness) गत-नष्ट-शांत-रोग, नीरोग, निरामय, रोगमुक्त, स्वस्थ, प्रकृतिस्थ, उत्थित; oft. by मुक्त, गत, in comp.; 'r. from fever' ज्वरमुक्त; 'r. from swooning' नष्ट-गत-मोह; 'r. from poison' निर्विष, &c. 3 (From fainting) लब्ध-संज्ञ-चेतन, प्रकृतिमापन्न, प्रकृतिस्थ, चेतनापन्न. **-y,** *s.* पुनर्लाभः, पुनःप्राप्ति *f.*, पुनरादानं, प्रतिपत्ति *f.*, अधिगमनं, प्रत्युद्धारः. 2 स्वास्थ्यलाभः, आरोग्यप्राप्तिः, प्रकृतिलाभः, स्वास्थ्यं, निरामयत्वं, आरोग्यं, रोगमुक्ति *f.*

Recreant, *a.* धर्मभ्रष्ट, त्यक्त-लंघित-स्वधर्म, पतित. 2 कातर, भीरु, क्लीब; *See* **Coward.**

Recreate, *v. t.* (Oneself) विश्रम् 4 P, विहृ 1 P, रम् 1 A, क्रीड् 1 P. 2 आ-समा-प्रत्या-श्वस् c., आनंद् c., विनुद् c., रम् c. (रमयति), सं-परि-तुष् c.; *See* **Please, Refresh.** **-ion,** *s.* विश्रामः, विनोदः-दनं, विहारः, विहरणं, क्रीडा, कौतुकं, मनोरंजनं. **-ive,** *a.* सुखकर (री *f.*), मनोरंजन (नी *f.*), विनोदशील.

Recrement, *s.* *See* **Dross.**

Recriminate, *v.* प्रत्यभियुज् 7 A, 10, प्रत्यभिशंस् 1 P. **-ion,** *s.* प्रत्यभियोगः, प्रत्यारोपः; 'crimination and r.' परस्परदोषारोपः. **-ive, -ory,** *a.* प्रत्यभियोगिन्.

Recrudescence, *s.* पुनः प्रसर्पणं or उद्भवः. **-Recrudescent,** *a.* पुनः प्रसर्पिन्.

Recruit, *v. t.* शक्तिं वृध् c., प्रबलीकृ 8 U, आश्वस् c., आप्यै c., समा-प्रतिसमा-धा 3 U, सुस्थ-*a.* कृ; 'to r. the strength of' वाजीकृ. 2 नवसैनिकैः पूर् 10. **-v. i.** 'r. one's strength' बलं-सत्त्वं लभ् 1 A, स्व-तेजः-वीर्यं प्राप् 5 P, सुस्थ-*a.* भू. **-s.** नूतन-नव-सैनिकः. **-ed,** *a.* लब्ध-प्राप्त-बल, वर्धितसत्त्व, आप्यायित, प्रत्याश्वस्त. 2 नवसैनिकयुक्त-पूर्ण.

Rectangle, *s.* समकोणः, समचतुरस्रं. **-Rectangular,** *a.* समकोण, समचतुरस्र.

Rectify, *v. t.* समा-प्रतिसमा-धा 3 U, शुध् c. **-ication,** *s.* समाधानं, शोधनं.

Rectilineal, *a.* सरलरेखाविशिष्ट.

Rectitude, *s.* सारल्यं, आर्जवं, दाक्षिण्यं, न्यायिता, शौचं, सत्यशीलता, सद्वर्तनं, सदाचारः; 'path of r.' सन्मार्गः, सुपथः, नीतिमार्गः-पथः; 'deviation from the path of r.' सत्पथत्यागः-भ्रंशः, उत्पथगमनं.

Rector, *s.* नायकः, अध्यक्षः. 2 ग्रामाचार्यः.

Recumbent, *a.* पार्श्वशय, अर्धकायेन शयान, कुक्षिशय, संविष्ट.

Recuperate, *v. t.* पुनर् लभ् 1 A.

Recur, *v. i.* प्रति-,आ-वृत् 1 A, पुनर् आगम् 1 P, or आपत् 1 P or सं-पद् 4 A or सं-भू 1 P or घट् 1 A or उप-स्था 1 P: (to the mind) आविः-प्रादुः-भू, उद्-इ 2 P, स्फुर् 6 P, स्मृ pass. 2 शरणं गम् or प्रपद्. **-rence, -rency,** *s.* प्रत्यावृत्ति *f.*, पुनर्वर्तनं, पुनर्घटनं-आपातः-उपस्थानं-संभवः. 2 स्मरणं, स्फुरणं, प्रादुर्भावः, उदयः. **-rent, -ring,** *a.* आवर्तक, प्रत्यावर्तिन्.

Recusant, *a.* प्रतीप; *See* **Obstinate.**

Red, *a.* रक्त, लोहित, शोण (blood-r.), रक्त-लोहित-वर्ण,अरुण (dark r.), कषाय, शोणित; ' r.-hot ' उत्तप्त, ज्वलत्, अभि-सं-तप्त, आग्निवर्ण; ' r.-lead ' सिंदूरं; *See* under **Lead. -s.** (R. colour) रक्तवर्णः, अरुणिमन् *m.*, लोहितः, रक्तः. **-den,** *v. t.* लोहितीकृ 8 U. रक्तीकृ &c. **-v.** *i.* रक्तीभू 1 P, लोहितायते (D.). **-dish,** *a.* आरक्त-लोहित, ईषद्रक्त, &c. **-ness,** *s.* रक्तत्वं, लौहित्यं, रक्तिमा, अरुणिमा.

Redact, *v. t. See* **Edit. -ion,** *s. See* **Edition (1)**

Redeem, *v. t.* अव-हृ 1 P, निष्क्री 9 U, परिक्री 9 A, धनं दत्त्वा मोक्ष् 10; मुच् c., मोक्ष्, वि-निर्-°, प्रत्या-दा 3 A, उप-नी 1 U: ' a pledge to be r. ed at a fixed time ' कृतकालोपनेयः आधिः (V. M. 66). 2 परि-, त्रै 1 A, उद्-धृ 1 P, 10, निस्तृ c. 3 पूर् 10, प्रतिकृ 8 U; *See* **Atone** for; ' he has this r.-ing virtue in him ' अयं तस्य गुणोऽन्यान्दोषान् प्रमार्ष्टि-लोपयति **-er,** *s.* परिक्रेतृ *m.*,निष्क्रयिन् *m.* 2 त्रातृ *m.*,मोक्षकः, उद्धर्तृ *m.*, तारकः. **-Redemption,** *s.* निष्क्रयः, परिक्रयः-यणं. 2 परि-,त्राणं, उद्धारः, मोक्षः-क्षणं, मुक्ति *f.*, तारणं.

Redolent, *a.* सुगंधि, सपरिमल, सुरभि; *See* **Fragrant;** ' to make r. ' वास् 10, सुरभीकृ 8 U.

Redouble, *v. t.* द्विगुणीकृ 8 U, पुनः पुनः °; अविरतोद्यमेन वृध् c. **-ed,** *a.* विवृद्ध; द्विगुणित, पुनः पुनः कृत.

:doubt, *s*, दुर्गरचना. **-able,** *a.* भीम, विक्रांत, महापराक्रम, महाप्रताप, उरुविक्रम.

Redound, *v. i.* साध् c., आवह् 1 P, सं-पद् c.: क्लृप् 1 A, सं-पद् 4 A (with dat.,) भू with dat.; ' will r.' to thy glory ' तव यशसे भवेत्-कल्पेत &c. 2 अव-सो 4 P; परिणम् 1 P; oft. ex. by अंतः, परिणामः. 3 **Overflow,** q. v.

Redress, *v. t.* प्रतिकृ 8 U, निराकृ, समा-धा 3 U; उद्धृ 1 P, मुच् c. (persons); ' r. one's grievances ' दुःखाद्-मुच् c. or उद्धृ. **-s.** प्रति(ती)कारः, प्रतिक्रिया, समाधानं, उद्धारः.

Reduce, *v. t.* पूर्वस्थितिं नी 1 P, प्रत्यादिश् 6 P. 2 (Bring to a state) ex. by नी, गम् c., कृ 8 U or सात्कृ; ' r. to subjection ' आत्मवशं नी, वशीकृ; ' r. to ashes ' भस्मसात्कृ, भस्मीकृ, भस्मावशेषं नी or कृ; ' r. to a wretched state' दीनावस्थां नी; ' r. ed to a skeleton of bones ' अस्थिमात्रावशिष्ट, कंकालशेष; ' who has r. ed kings to the state of tributaries ' करदीकृतभूपालः. 3 न्यूनीकृ, अल्पीकृ, ह्रस् c., लघयति (D.). लघूकृ; वि-प्र-कृष् 1 P, (विप्रकर्षत्यलक्ष्मीं U. 5); अपकृष्; ' r. in price ' अर्घतः पत् c.; ' r. the strength ' बलं शिथिलीकृ or अपचि 5 U or क्षि 1, 5 P. 4 (Person) कृशीकृ, क्षीणीकृ, क्षै-क्षि c. (क्षपयति), शक्तिं अप-चि or अवसद् c. 5 वशीकृ, जि 1 P, पराजि 1 A, स्ववशं नी. 6 (In Math.) रूपं दा 3 U, रूपेण कथ् 10; ' r. to a system ' व्यव-स्था c., क्रमेण विन्यस् 4 U or विरच् 10. **-ed,** *a.* पूर्ववद्भूत; कृत, भूत, गमित, आपन्न, गत; ' r. to misery ' कृच्छ्रगत, कृच्छ्रापन्न, कष्टापन्न; ' r. to ashes ' भस्मीकृत, भस्मीभूत. 2 वशीकृत, न्यूनीकृत;क्षीणबल &c.; 'you appear to be much r.' अतीव क्षामः-कृशगात्रः-दृश्यसे; अपचितं गात्रं (S. 2) ' a body r. in bulk,' ' r. in strength ' क्षीणबल, शिथिलबल, क्षीण, कृश. **-Reduction,** *s.* करणं, नयनं, गमनं, &c. 2 ह्रासः, अप-विप्रकर्षः, अपचयः, न्यूनीकरणं, न्यूनता, शैथिल्यं. 3 पराजयः, वशीकरणं, पराभवः.

Redundant, *a.* अतिरिक्त, समधिक उद्रिक्त, उत्सिक्त, अत्यंत; व्यर्थ, पुनरुक्तभूत, अतिशय in comp. **-ly,** *adv.* सातिशयं, उद्रिक्तं. **-Redundancy,** *s.* आधिक्यं, अतिरेकः, उत्सेकः, उद्वर्तः; पौनरुक्त्यं, व्यर्थता; *See* **Excess, -ive.**

Reduplicate, *v. t.* द्विगुणीकृ 8 U. 2 (In grammar) अभ्यस् 4 P (syllable); आम्रेडयति (D.) (word). **-ion,** *s.* अभ्यासः, आम्रेडितं, आम्रेडनं, द्विरुक्ति *f.*,

Reed, *s.* नडः-ला, धमनः, पोटगलः; वेतसः, वेत्रं, वेणुः, वंशः; ' r. for writing ', ' r.-pen ' कलमः. **-y,** *a.* नड्वल, नल-वेत्र-मय (यी *f.*), वेतसपूर्ण.

Reef, *s.* शिलासंघातः, शिलोच्चयः-श्रेणी, शैलसेतुः. **-v.** *t.* संहृ 1 P; *See* **Contract.**

Reek, *v. i.* बाष्पं उद्-गॄ 6 P or उद्वम् c. or उद्वम् 1 P or उत्क्षिप् 6 P, बाष्पायते (D.). **-s.** बाष्पः, धूमिका. **-ing,-y,** *a.* बाष्पोद्गारिन्, बाष्पमय (यी *f.*).

Reel, *v. i.* प्र-,स्खल्, 1 P, पार्श्वे पत् 1 P, सं-वि-चल् 1 P. -*s.* स्खलनं, विचलनं. 2 आवापनं.

Refection, *s.* अल्प or लघु-आहारः or भोजनं, उपाहारः. -**Refectory,** *s.* उपाहारशाला.

Refer, *v. i.* उद्दिश् 6 P, अधिकृ 8 U, लक्षीकृ; *See* **Allude, Advert;** आश्रि 1 U, अपेक्ष् 1 A, संबंध्-अनुषंज्-pass.; 'it does not r. to me' न मत्संबद्धं तत्; oft. by विषय, पर, in comp.: ब्रह्मविषयाणि वाक्यांतराणि (S. B. 114). 'r. ing to Brahman'; संदिह्यमानानि वाक्यानि ब्रह्मपरतया निर्णीतानि (S. B. 166) 'have been proved to r. to Brahman.' -*v. t.* Ex. by दृश् 1 P, निरूप् 10, प्रच्छ् 6 P, ऋ c. (अर्पयति), प्रति-पद् c.; निर्दिश् 6 P; 'I r. you to the sage about it' तद्विषये मुनिमेव पृच्छ; 'r. the word to the dictionary' कोशे तं शब्दं निरूपय; 'the matter must be r.-ed to the judge for opinion' अयमर्थः अभिप्रायार्थं प्राड्-विवाकाय निवेदनीयः-प्रतिपादनीयः-निर्देष्टव्यः. 2 आरुह् c.; आसंज् c.; संबंध् 9 P. -**ee,** *s.* प्रमाणपुरुषः, मध्यस्थः, निर्णेतृ *m.* -**ence,** *s.* अर्पणं. निवेदनं, निर्देशः &c. 2 उद्देशः, संबंधः, अनुषंगः, अपेक्षा, आश्रयः, विषयः, संपर्कः, अन्वयः, अनुसंधानं; 'a r. is here made to a mythological story' अत्र पुरावृत्तकथा अनुसंधेया (Mallinatha on K. I. 21); oft. ex. by आलोकनं, आलोचनं; 'on a r. to the book again' पुनः पुस्तकं आलोक्य &c.; भवन्निर्दिष्टस्थलं पुनरालोच्य &c.; 'in or with r. to' अधिकृत्य, उद्दिश्य, आश्रित्य, अपेक्ष्य, अपेक्षया-संबंधेन-विषये in comp.

Refine, *v. t.* वि-,शुध् c., विमलीकृ 8 U, प्र-,मृज् 2 P. 2 संस्कृ, परिष्कृ, उपस्कृ, विनी 1 U. -*v. i.* शुध् 4 P, विमली भू 1 P. -**ed,** *a.* वि-,शुद्ध, शोधित, हृतमल; 'r. gold' प्रमृष्ट-संस्कार-शुद्ध-हेम. 2 संस्कृत, संस्कारवत्, परिष्कृत, प्रबुद्ध; विनीत, शिष्ट, सभ्य. 3 अति-,सूक्ष्म. -**ment,** *s.* शोधनं, वि-,शुद्धि *f.*, शुद्धता, प्रमार्जनं. 2 संस्कारः, परिष्कारः, शिष्टता, सौजन्यं, चित्तप्रबोधः, शुद्धिः; 'r. of manners' विनयः, आचारसौजन्यं, सभ्याचारत्वं; 'a man of r.' शिष्टाचारः, विनीतः. 3 अति-,सूक्ष्मता. -**er,** *s.* सं-,शोधकः, शोधयितृ *m.*, मलहारिन् *m.*

Refit, *v. t.* *See* **Repair.**

Reflect, *v. i.* चिंत् 10, ध्यै 1 P, विचार् c., विगण् 10, भू c., तर्क् 10, विमृश् 6 P, आलोच्-पर्यालोच् 10. 2 (On) आ-अधि-क्षिप् 6 P, निंद् 1 P, अव-ज्ञा 9 U; *See* **Censure.** -*v. t.* प्रतिक्षिप्, परा-प्रत्यावृत् c., प्रतिबिंबयति (D.); 'a lake r. ing stars' ताराप्रतिबिंबं सरः; 'this action r. s great credit on you' इदं ते चरितं अतीव प्रशस्यं. -**ed,** *a.* प्रतिबिंबित, परावर्तित, संक्रांत, प्रतिफलित; 'to be r.' मुर्च्छ् 1 P, संक्रम् 1 U, 4 P, परावृत् 1 A, प्रतिफल् 1 P; हर्म्येषु मुर्च्छंति न चंद्रपादाः (R. xvi. 18); मणिकुट्टिमसंक्रांतप्रतिबिंबतया. (Ka. 9.) -**ing,** *a.* परावर्तनकारिन्, परावर्तिन्. 2 चिंता-ध्यान-शील, विचारशील. -**ion,** *s.* चिंता; विचारः, विमर्शः, भावना, ध्यानं. 2 आ-अधि-क्षेपः, आक्षारणं. 3 परावर्तनं, प्रतिक्षेपः, संक्रांति *f.* 4 प्रतिबिंबः-बं, प्रतिच्छाया, प्रतिफलं; छाया, प्रतिमा प्रतिमूर्ति *f.* -रूपं. -**or,** *s.* आदर्शः, दर्पणः-णं, प्रतिक्षेपकः, परावर्तकः. 2 विचारकः. -**Reflexible,** *a.* परावर्तनीय. -**Reflexive,** *a.* पूर्वसंबंधिन्; 'a r. verb' कर्मकर्तृवाच्यं. -**ly,** *adv.* कर्मकर्तरि.

Refluent, *a.* परावर्तिन्. -**Reflux, Refluence,** *s.* परावर्तः, प्रतिस्यंदः.

Reform, *v. t.* दोषं अपनी 1 P or खंड् 10 or अपाकृ 8 U or निवृत् c.; पापात् निवृत् c. or विरम् c.; दुर्नीतिं नश् c., (of persons). 2 शुध् c., परि-वि-सं-°, समा-प्रतिसमा-धा 3 U, प्रतिकृ. 3 पुनः कृ or क्लृप् c. or वि-धा. -*v. i.* पापात् नि-परा-वृत् 1 A or विरम् 1 P, पापमार्गं त्यज् 1 P. -*s.*, -**ation,** *s.* पाप-दोष-निवृत्ति *f.*-त्यागः, दोषच्छेदः-खंडनं-शोधनं-समाधानं; पापप्रतिकारः, संशोधनं, परिवर्तनं; (religious) धर्मपरिवर्तनं क्रांति *f.* -**atory,** *s.* शोधनालयः, -**ed,** *a.* निवृत्त or त्यक्त-पाप or दोष, विरत-हृत-दोष, संशोधित. -**er,** *s.* निवर्तकः, संशोधकः, दोष-पाप-छिद् *m.* 2 धर्मप्रवर्तकः.

Refract, *v. t.* परावृत् c., वक्रीकृ 8 U; 'to be r.-ed' वक्रीभू 1 P, परावृत् 1 A. -**ion,** *s.* वक्रीभवनं-करणं, परावर्तनं, वक्रीभावः. -**Refractory,** *a.* विप्रतीप, अविधेय, अविनेय, अवश्य, अनिवार्य, शासनलंघिन्; *See* **Perverse;** 'do not show a r. spirit towards thy husband' भर्तुः प्रतीपं मा स्म गमः (S. 4); 'to be r.' प्रतीपायते (D.). -**iness,** *s.* प्रतीपता, वक्रता, दुःशीलं, वक्रभावः, अविधेयता.

Refragable, *a.* छेद्य, खंडनीय, भेद्य.

Refrain, *v. t.* नि-सं-यम् 1 P, निग्रह् 9 P. निवृ 5 U or c, संहृ 1 P; *See* **Control.** -*v. i.* निवृत् 1 A, विरम् 1 P, (with abl.); परिहृ 1 P, वि-,वृज् 10, त्यज् 1 P; *See* **Abstain, Cease, Forbear.** -*s.* ध्रुवकः [अनुपदं.

Refrangible, *a.* परावर्तनीय.

Refresh, *v. t.* समा-प्रत्या-आ-श्वस् c., आनंद् c., जीव् c., आ-प्र-ह्लाद् c., सुखयति (D.).

2 नवीकृ 8 U, (एते वयं पुनर्नवीकृताः स्मः S. 5.); श्रमं अपहृ 1 P or छिद् 7 P or अपनी 1 P, विश्रम् c.; बलं-सत्त्वं वृध् c., आप्यै c. 3 निर्वा c. (वापयति), शीतलयति (D.), शीतलीकृ; *See* **Cool.** **-ed,** *a.* हृत or गत-क्लम or श्रम, विश्रांत, आप्यायित, आश्वासित, नवीकृत, छिन्नश्रम. **-ing,** *a.* आह्लादन (नी *f.*), क्लम श्रम-विनोदिन्, आनंद-सुख-प्रद, श्रम-क्लम-च्छिद्, श्रमापह, क्लांतिहर. **-ment,** *s.* आह्लादनं, श्रम or क्लम-अपहारः or विनोदनं, आश्वासनं, श्रम-क्लांति-च्छेदः, विश्रांति *f.*, विश्रामः. 2 अभ्यवहारः, लघ्वाहारः, उपाहारः; 'morning r.' प्रातराशः, कल्यवर्तः.

Refrigerate, *v. t.* तापं-दाहं-हृ 1 P or नश् c. or छिद् 7 P, निर्वा c. (वापयति), शीतलीकृ 8 U; *See* **Cool.** **-ion,** *s.* ताप-दाह-च्छेदः, निर्वापणं. **-Refrigerant,** *a.* निर्वापक, ताप-दाह-हर. **-***s.* उष्णनिर्वापणं, तापशमनं.

Refuge, *s.* आश्रयः, संश्रयः, शरणं, गति *f.*; (person) शरण्यः, आश्रयभूतः, पालकः, रक्षकः, त्रातृ *m.* 2 उपायः, प्र-,युक्ति *f.*, गतिः, साधनं; 'giving r.' शरण्यः &c; 'take r with' शरणं या 2 P or गम् 1 P or प्रपद् 4 A, उपा-आ-सं-श्रि 1 U, अवलंब् 1 A, शरणार्थं गम् &c; 'seeking r.' शरणार्थिन्; 'come for r.' शरणं प्रपन्नः, शरणागत; 'having only one r.' अनन्यगतिक. **-Refugee,** *s.* शरणं प्रपन्न, शरणागतः, शरणार्थिन् *m.* आश्रितः, अवलंबितः.

Refulgent, *a.* देदीप्यमान, विभ्राजमान, भास्वत्, उज्ज्वल, अतितेजस्विन्, प्रद्योतमान; *See* **Bright.** **-Refulgence,** *s.* अतिप्रभा-तेजस् *n.*, औज्ज्वल्यं.

Refund, *v. t.* प्रतिदा 3 U, प्रति-ऋ c. (अर्पयति.)

Refuse, *v. t.* प्रत्या-ख्या 2 P, नि-प्रति-षिध् 1 P, प्रत्याचक्ष् 2 A, निराकृ 8 U, प्रत्यादिश् 6 P, निर्-अप-अस् 4 U, वि-प्रति-हन् 2 P, न संमन् 4 A or ग्रह् 9 U or अंगीकृ or प्रतीष् 6 P, अवधीर् 10; 'pray, do not r. my request' नार्हसि मे प्रणयं विहंतुं (R. ii. 58). **2** (Followed by inf.) Ex. by a sentence with वच्, वद् &c. (Say, q. v.). **-***s.* उच्छिष्टं, अवशिष्टं, अवशेषः, शेषः-षं; असारः, मलं. **-***a.* उच्छिष्ट, असार, अवशिष्ट.

Refute, *v. t.* निराकृ 8 U, निरस् 4 U, प्रतिक्षिप् 6 P, खंड् 10, बाध् 1 A, अधरीकृ, प्रत्या-ख्या 2 P, प्रत्यादिश् 6 P, अपवद् 1 U, निर्धू 5, 9 U, 6 P. **-ation,** *s.* निरासः, निरसनं, खंडनं, निराकरणं, प्रतिक्षेपः, प्रत्याख्यानं.

Regain, *v. t.* पुनः लभ् 1 A or प्राप् 5 P, प्रतिपद् 4 P; *See* **Recover.**

Regal, *a.* राजकीय, राजार्ह, राजोचित.

Regale, *v. t.* संतृप् c., संतुष् c., आह्लाद् c., आनंद् c. **2** आश्वस् c., आप्यै c, संवृध् c.; *See* **Refresh,** 'r. oneself' उत्तमान्नेन संतुष् 4 P or संतृप् 4 P or आत्मानं संतुष् c., उत्सवं कृ 8 U.

Regalia, *s.* राजचिह्नानि-लक्षणानि-लिंगानि, राजोपचारः

Regard, *v. t.* आदृ 6 A, प्रति-अव-ईक्ष् 1 A, संमन् c. पूज् 10, नि-,सेव्, 1 A. **2** ईक्ष्, दृश् 1 P, आ-अव-लोक् 1 A, 10, आ-,लक्ष् 10; *See* **Look.** **3** मन् 4 A, वि-,गण् 10. **4** अव-धा 3 U, अवेक्ष्, सावधान-*a.* भू, विगण्, आदृ. **5** सेव्, पा c. (पालयति), अनु-ष्ठा 1 P: *See* **Observe.** **6** उद्दिश् 6 P, अपेक्ष्; संबंध् 9 P. **-***s.* आदरः, संमानः, पूजा, अवेक्षा. **2** अवधानं, मनोयोगः, अवेक्षा. **3** दृष्टि *f.*, ईक्षणं; *See* **Look.** **4** स्नेहः, प्रणयः, अनुरागः, प्रीति *f.* **5** विचारः, अवेक्षा, अपेक्षा, अनुसंधानं, गणना, उद्देशः, संबंधः, अन्वयः; विषयः; 'having r. to the result' फलापेक्षया, 'with r. to' उद्दिश्य, अधिकृत्य, अंतरेण, अपेक्ष्य, (with acc.); अपेक्षया, विषये, गत-*a.* in comp.; 'a scandal with r. to Mālavikā' मालविकागतं कौलीनं (M. 3); भर्तृगता-विषया-चिंता &c. **-ful,** *a.* अवे (पे)क्षक, अवहित, सावधान, सापेक्ष. **-fully,** *adv.* सापेक्षं, सावधानं. **-ing,** *a.* सापेक्ष, संबंधिन्, गत-विषय- in comp.; *See* (*s.*). **-less,** *a.* निरपेक्ष, अनपेक्ष, उदासीन, विरक्त, अनुत्सुक, in comp. gen.; oft. by अनादृत्य, अनवेक्ष्य, अगणयित्वा. **-lessly,** *adv.* निरपेक्षं, उपेक्षया. **-lessness,** *s.* अनपेक्षा, उपेक्षा.

Regatta, *s.* नौकाक्रीडा.

Regenerate, *v. t.* पुनर् जन् c. (जनयति) or जीव् c. or उद्-भू 1 P, 10, or उत्था c (उत्थापयति). **-***a.*, **-ed,** *a.* पुनर्जात, पुनर्भव, पुनर्जन्मन्, पुनरुज्जीवित. **-ion,** *s.* पुनरुज्जीवनं, पुनरुत्पत्ति *f.*, पुनर्जन्मन् *n.*; उत्थापनं, उद्धारः.

Regent, *s.* पालः in comp.; शासकः, अधिपतिः, शास्तृ *m.* 'r.s of the eight quarters' अष्ट दिक्पालाः. **2** शून्यपालः; राजप्रतिनिधिः. **-Regency,** *s.* शासनं. **2** राजप्रतिनिधि-मंडलं.

Regicide, *s.* राजवधः-हत्या-हिंसा-घातः. **2** (Person) राजहन् *m.*, राजघातकः; राजघः.

Regime, *s.* *See* **Government.**

Regimen, *s.* अन्नपानविधिः, पथ्यापथ्यनियमः. 'one observing r.' पथ्याशिन्.

Regiment, *s.* सैन्यदलं-गुल्मं-गणः-व्यूहः;

Regimentals, *s.* सैनिकवेषः.

Region, *s.* प्र-,देशः, लोकः, भुवनं; विषयः, राष्ट्रं, चक्रं, मंडलं; (of the sky) दिश् *f.*, काष्ठा, आशा; *See* **Direction;** 'r. of the heart ' हृदयप्रदेशः; नाडीचक्रं &c.

Register, *s.* लेख्यं, लेखः, पत्रिका, पंजिका; गणनापत्रं. *-v. t.* पत्रिकायां लिख् 6 P or निविश् *c.* **-Registrar,** *s.* लेखकः, पंजिकाधिकृतः. **-Registry, Registration,** *s.* नामलिखनं, पत्रिकायां निवेशनं or आरोपणं. 2 लिखनस्थानं.

Regnant, *a.* शासक, अधिकारिन्, राज्याधिकारिन्.

Regorge, *v. t.* उद्वम् 1 P, उद्-गॄ 6 P, निःसृ *c.*

Regress, *s.* प्रतीपगति *f.*, परावर्तनं. *-v. i.* परावृत् 1 A, प्रत्यावृत. **-ion,** *s.* प्रतीपगमनं, प्रत्यावर्तनं.

Regret, *v. t.* अनुशुच् 1 P, अनुतप् 4 A: *See* **Lament;** 'he died r. ed by all ' मृतः सर्वैरनुशोचितश्च; न वाप्यनुशोचिता (U. 3) ' nor was she (her absence) r. ed.' oft. ex. by दुःखित *a.* or दुःखं 'I r. I cannot go with you ' त्वया सह गंतुमसमर्थोस्मीति दुःखितोहं. 2 **Repent,** q. v. *-s.* दुःखं, अनुशोकः, अनुतापः, खेदः, मनस्तापः, उद्वेगः; *See* **Grief. -ful,** *a.* दुःखित, दुःखाकुल, अनुतप्त, अनुशोकार्त, उद्विग्न, खिन्न, सोत्कंठ.

Regular, *a.* नियत, नियमानुसारिन्, नैयमिक-वैधिक-(की *f.*), विध्यनुरूप, सूत्र-विधि-अनुसारिन्; ' not at r. hours ' अनियतवेलं (S. 2). 2 अनुपूर्व, अनुक्रमागत, यथाक्रम, क्रमानुगत, अनुलोम, क्रमानुसारिन्. 3 नियतकालिक (की *f.*) नियतवेल. 4 व्य-(व्या)वहारिक-आचारिक-(की *f.*), नित्य, यथामार्ग, यथारीति. 4 (Of persons) नियमानुसारिन्, नियमनिष्ठ-पर-शील, विधि-नियम-अनुवर्तिन्; व्यवस्थित, अत्यक्तक्रम, अव्यभिचारिन्, नियतवृत्ति. **-ity,** *s.* नियतत्वं, विध्यनुसारः, नियमः, सूत्रानुसारः, नैयमिकत्वं. 2 पर्यायः, अनुक्रमः, परिपाटि-टी *f.*, व्यवस्था, परंपरा, आनुपूर्व्यं, आनुलोम्यं; *See* **Order.** 3 विधि-नियम-निष्ठा, नियमानुसारित्वं, विध्यनुवर्तनं, क्रमात्यागः, व्यवस्थिति *f.*, विधि-नियम-परता. 4 (Of arrangement) विरचनं-ना, व्यूहः-हनं, विन्यासः. **-ly,** *adv.* यथा-अनु-क्रमं, अनुपूर्वशः, आनुपूर्व्येण, अनुलोमं, आनुलोम्येन, क्रमशः, क्रमेण, पर्यायेण. 2 यथाविधि, विधिवत्, विधितः, यथानियम, यथासूत्रं, विधिपूर्वकं, विधि-नियम-अनुसारेण. 3 नित्यं, अनुज्झितक्रमं, नियतक्रमेण, नियतवेलायां.

Regulate, *v. t.* सं-,वि-धा 3 U, परिक्लृप् *c.*, क्रमेण विन्यस् 4 U, विरच् 10, व्यव-स्था *c.* (स्थापयति). 2 वि-,नियम् 1 P, वि-धा; अनुशास् 2 P, नि-,यंत्र् 10: *See* **Rule, Control;** ये द्वे कालं विधत्तः (*S.* I) ' who r. time. ' 3 यथाविधि व्यव-स्था c. or वि-धा, प्रमाणं निरूप् 10. **-ion,** *s.* विधानं, व्यवस्थापनं, यंत्रणं, शासनं, &c. 2 व्यवस्था वि-,नियमः, शासनं, विधिः, स्थिति *f.*, मर्यादा, क्रमः. **-or,** *s.* शासकः, संविधातृ *m.*, वि-,नियंता, शास्ता.

Rehearse, *v. t.* पठ् 1 P, अनुवद् 1 P. 2 कथ् 10, वर्ण् 10: *See* **Narrate.** 3 प्रयोगात् पूर्वं अभिनी 1 P or नट् 10. **-al,** *s.* पठनं, अनुवादः; कथनं, आख्यानं, पूर्वप्रयोगः, पूर्वाभिनयः.

Reign, *v. i.* प्र-,शास् 2 P, राज्यं-महीं &c. शास् or अव् 1 P or भुज् 7 U. 2 **Prevail,** q. v. *-s.* शासनं, राज्यपालनं, आधिपत्यं, अधिकारः; better by (*v.*) with loc. abs.: ' during Rama's r. ' रामे महीं शासति; ' after a r. of 12 years' द्वादशाब्दान् भुक्तक्षितौ तस्मिन्. 2 राज्यशासनकालः, राज्यकालः. **-ing,** *a.* राजन्, दारूढ, शासत्, राज्याधिकारिन्.

Reimburse, *v. t.* प्रतिदा 3 U, निष्कृ U, अपाकृ, पूर् 10, शुध् *c.*

Rein, *s.* अभीशुः-षुः, प्रग्रहः, रश्मिः; ' by drawing in the r. s' रश्मिसंयमनात् (S. 1): ' give the r. s to ' वशं या 2 P; आयत्तीभू 1 P, अधीन-*a.* भू; ' r. s of government ' राज्यसूत्राणि. *-v. t.* नि-,सं-यम् 1 P, नि-प्र-ग्रह् 9 P; *See* **Control;** 'r. in the horses' प्रगृह्यंतां वाजिनः (S. 1).

Reins, *s.* कटि-टी *f.*, कटि-श्रोणी-देशः. 2 वृक्कौ.

Reinforce, *v. t.* **Recruit.** q. v. **-ment,** *s.* सैन्यं, सेनासामग्री.

Reinstate, *v. t.* प्रति-ष्ठा *c.* (-ष्ठापयति), पुनः स्था *c.* or नियुज् 7 A, 10. **-ment,** *s.* प्रतिष्ठापनं, पुनर्नियोगः, पुनःस्थापनं.

Reiterate, *v. t.* **Repeat,** q. v. 2 पुनः पुन कृ 8 U. **-ed,** *a.* पुनः पुनरुक्त; पौनःपुनिक (की *f.*). **-ion,** *s.* पुनर्वचनं, आम्रेडनं, पुनरुक्ति *f.*, पौनःपुन्यं.

Reject, *v. t.* अवधीर् 10, निराकृ 8 U, प्रत्या-ख्या 2 P, वि-हन् 2 P, प्रत्याचक्ष् 2 A प्रत्यादिश् 6 P, निर्-अप-अस् 4 U, निधू 5, 9 U, प्रति-अप-क्षिप् 6 P, त्यज् 1 P; *See* **Refuse. -ion,** *s.* अवधीरणं-णा, निराकरणं. प्रत्यादेशः, प्रत्याख्यान, निरसनं.

Rejoice, *v. i.* प्री pass, मुद् 1 A, आनंद् 1 P, सं-परि-तुष् 4 P, हृष् 4 P, रम् 1 A, उल्लस् 1 P; *See* **Delight,** ' I r. to see you ' प्रीतोस्मि ते दर्शनात्, त्वद्दर्शनेन मुदितोस्मि; ' this is to be r. ed at ' एतदभिनंदनीयं (S. 5). *-v. t.* Causal of roots above. **-ing,** *a.* आनंदद, हर्षावह, हर्षकर

(ति *f.*). 2 प्रीयमाण, मुदित, हृष्ट. —*s.* आनंदः, हर्षः, प्रमोदः, उत्सवः.

Rejoin, *v.* *See* Answer. —**Rejoinder,** *s.* प्रतिवचनं, उत्तरं, प्रत्युक्ति *f.*

Rejuvenate, *v. t.* बलं-सत्त्वं-वृध् c., आ-प्यै c.

Relapse, *v. i.* पुनः पत् 1 P or आगम् 1 P or प्राप् 5 P; oft ex. by पुनः with other words; 'r.-ed into a feverish state' ज्वरेण पुनरभ्यभूयत, पुनः ज्वरातुरो बभूव; 'r. ed into vice' पुनर्दुर्मार्गं गंतुं प्रचक्रमे, सत्पथात् भ्रष्टः, सन्मार्गं अत्यजत्; 'r. ed into his natural joviality सहजामानंदवृत्तिं प्रत्यपद्यत. —*s.* पुनःपतनं, आवृत्ति *f.*, प्रत्यागमनं, पूर्वावस्थाप्राप्ति *f.*

Relate, *v. i.* (To) उद्दिश् 6 P, अपेक्ष् 1 A, अनुषंज्-संबंध् pass.; by deriv. in ईय, or विषय in comp.; 'r. ing to Sastras' शास्त्रीय, शास्त्रविषय; 'news r. ing to the king's murder' राजघातविषयकः-संबद्धः-वृत्तांतः; *See* **Refer.** —*v. t.* कथ् 10, आ-ख्या 2 P, वर्ण् 10, शंस् 1 P, चक्ष् 2 A, आ-नि-विद् c; *See* **Tell.** —**ed,** *a.* कथित, ख्यात, वर्णित, &c. **2** सं-अनु-बद्ध, अनुषक्त, अन्वित, संसक्त, संपृक्त, संबंधिन्, संपर्किन्, in comp. **3** संबंधिन्, सजाति, सजातीय, एक-स-गोत्र, सकुल्य, गोत्रज, एकशरीरान्वय. —**er,** *s.* आख्यायकः, कथयितृ *m.* —**ing,** *a.* (To) संबंधिन्, विषय in comp.: *See* **Refer.** —**ion,** *s.* संबंधः, अन्वयः, संदर्भः, संसर्गः, संपर्कः, अनुषंगः, भावः; 'mutual r.' व्यतिषंगः, अन्योन्यसंबंधः, आकांक्षा (between a word and its meaning); 'intimate r.' समवाय-नित्य-संबंधः; 'the r. of the container and the thing contained' आधाराधेयभावः. **2** बंधुता, ज्ञातिभावः, शरीरसंबंधः, शरीरान्वयः, सजातित्वं, सगोत्रता, सपिंडता. **3** बंधुः, बांधवः, ज्ञातिः, गोत्रजः, सगोत्रजः, सकुल्यः, संबंधी, सपिंडः (to the 7th degree), समानोदकः (8th to 14th degree); सनाभिः, सोदर्यः, समानोदरः (by blood); 'r. s collectively' बांधवगणः-जनः. बंधुज्ञाति-वर्गः. **4** आ-उपा-ख्यानं, वर्णनं, कथनं, निरूपणं, कीर्तनं. —**ionship,** *s.* बंधुता, सनाभिता, ज्ञातिभावः, संबंधः; 'near r.' प्रत्यासन्नता; 'distant r.' व्यवहितता. —**ive,** *s.* सगोत्रः, सकुल्यः, बांधवः, बंधुः, ज्ञातिः; *See* **Relation.** —*a.* सापेक्ष, अविविक्त, अन्यसापेक्ष, अकेवल; 'r. importance' तारतम्यं. **2** अन्योन्यान्वित. **3** संबंधिन्, विषयक, in comp.; अनुविद्ध, अनुषक्त, संबद्ध, सान्वय, उद्दिष्ट. **4** संबंधवाचिन्. —**ively,** *adv.* अन्यापेक्षया, अन्यसापेक्षं, अपेक्ष्य; *See* **Comparative.**

Relax, *v. t.* शिथिलीकृ 8 U, शिथिलयति (D.), श्रथ्-श्रंथ् 1, 9 P., 10, वि-, स्रंस् c., विगल् c. **2** मुच् 6 P, or c., विसृज् 6 P. **3** शिथिलीकृ, प्र-शम् c. (शमयति), न्यूनीकृ, लघूकृ, मंदीकृ, (मंदीचकार मरणव्यवसायबुद्धिं K. iv. 45); 'r. ing their efforts' शिथिलितप्रयत्नाः. **4** उद्-ग्रंथ् 9 P, विसं-धा 3 U; 'r. the bowels' विरिच् 7 P or c.; *See* **Purge**; 'r. the mind' मनः विमुच् c., or विश्रम् c. —*v. i.* शिथिलीभू 1 P, श्लथ् 1 P, श्रथ् 1 A, स्रंस् 1 A, शिथिलायते-मंदायते (D.). **2** प्र-उप-शम् 4 P, न्यूनी-भू. —**ation,** *s.* शैथिल्यं, विस्रंसः, प्रश्रथः, मुक्ति *f.* **2** प्र-उप-शमः-शांति *f.*, न्यूनीभावः. **3** विनोदः, विश्रामः, उद्योगविरति *f.*-निवृत्ति *f.*-शैथिल्यं. —**ed,** *a.* शिथिलित, शिथिल, प्र-श्लथ, मुक्त, स्रस्त, विगलित; 'having r. his hold' मुक्त or शिथिलित-ग्रहः or हस्तः.

Relay, *s.* विश्रामदायी जवाश्वगणः or सेवकगणः.

Release, *v. t.* मोक्ष् 10, मुच् 6 P or c., वि-निर्-°, उद्धृ 1 P, निस्तृ c., विसृज् 6 P; *See* **Free.** —*s.* वि-मुक्ति *f.*, मोक्षः, मोचनं, उद्धारः, निस्तारः. —**er,** *s.* मोचकः, मोक्षकः, उद्धर्तृ *m.*

Relegate, *v. t.* वि-वस् c. **2** ऋ c. (अर्पयति).

Relent, *v. i.* करुणामृदु-करुणार्द्र-मृदुचित्त-*a.* भू 1 P; अनुकंप् 1 A, दयार्द्रीभू, करुणया द्रु 1 P; 'his heart r. ed' तस्य मनो मार्दवमभजत, कठिनतामजहात्; 'being appeased, he r. ed' सचानुनीतो मृदुतामगच्छत् (R. v. 54); किमपि सानुक्रोशः कृतः (S. 4) 'somewhat r. ed'. —**less,** *a.* निर्दय, निष्करुण, निरनुक्रोश, क्रूर, कठोर, कठिन-पाषाण-हृदय, निर्घृण; *See* **Cruel.** —**lessly,** *adv.* निर्दयं, निष्करुणं, कठोरं.

Relevant, *a.* प्रास्ताविक (की *f.*), प्रस्तुत, प्रस्तुतानुषंगिन्, प्रासंगिक (की *f.*), प्रस्तावसदृश (शी *f.*)-उचित-अनुरूप, प्रसंगोचित. —**ly,** *adv.* प्रस्तावसदृशं, प्रासंगिकं. —**Relevance,-cy,** *s.* प्रस्तावौचित्यं, प्रस्तावसंगति *f.*, प्रस्तुतानुसारः-अन्वयः, प्रकरणानुसारः, प्रास्ताविकत्वं.

Relic, *s.* अव-शिष्टं-शेषः-षं, शेषभागः; शवः-वं, मृतशरीरं.

Relict, *s.* *See* **Widow.**

Relieve, *v. t.* (persons) (दुःखात् &c.) मुच् 6 P or c., मोक्ष् 10, उद्धृ 1 P; दुःखं &c. अपनी 1 P or शम् c. (शमयति) or परिहृ **2** (Pain &c.) प्र-शम् c., परिहृ, दूरीकृ; लघयति (D.), विश्रम् c., लघूकृ; *See* **Alleviate.** 'I feel myself to be r. ed' ममात्मा विशदः जातः (S. 4), निश्चितोऽहं.

3 उपकृ, साहाय्यं दा 3 U, अनुग्रह् 9 P. 4 (Guard &c.) विश्रम् c., नियोगात् विश्रामं दा. **-ed,** *a.* उद्धृत, मुक्त, शांत, शमित &c.; 'r. of anxiety' वीतचिंत, निश्चिंत, निःशल्य (मनः); 'r. of pain' शांतदुःख. **-Relief,** *s.* (दुःखात्) मोचनं, मोक्षः, उद्धारः, शमनं, मुक्ति *f.*, अपहरणं, अपनयनं, परिहारः. 2 सुखं, उप-प्र-शमः, निर्वापणं, चिंता-प्रशमः-शांति *f.* स्वास्थ्यं, निर्वृत्तिः, विश्रामः, निश्चिंतता; एकपदे एव दुःखविश्रामं ददाति (U. 6) 'gives r. to my sorrow'; कर्तव्यानि दुःखितैर्दुःखनिर्वापणानि (U. 3). 3 उपकारः, साहाय्यं; 'she brought her lovely limbs into r.' पुपोष लावण्यमयान् विशेषान् (K. i. 25).

Religion, *s.* धर्मः. 2 **Piety,** q. v. **-Religious,** *a.* धर्म्य, धर्म-देव- in comp.; 'r. rites' धर्मक्रियाः. 2 धर्मात्मन्, पुण्यशील, धर्माचारिन्, व्रतिन्, धर्मनिष्ठ, धार्मिक (की *f.*); *See* **Pious, -ly,** *adv.* धार्मिकवत्, ईश्वरभक्त्या. **-ness,** *s.* धार्मिकत्वं, धर्मनिष्ठा, धर्मपरता.

Relinquish, *v. t.* त्यज् 1 P, उत्-वि-सृज् 6 P, हा 3 P, मुच् 6 P. **-ment,** *s.* त्यागः, उत्सर्गः, मोचनं; *See* **Abandon,-ment**.

Reliquary, *s.* अवशिष्टाधारः-भाजनं.

Relish, *v. t.* स्वाद् c., रस् 10, सुरसीकृ 8 U, स्वादूकृ. 2 आस्वाद् 1 A. 3 अभि-,रुच् 1 A, अभिनंद् 1 P; *See* **Like,** *s.* रसः, आ-, स्वादः-स्वादनं, रुचि *f.*; 'has lost r. for dates' पिंडखर्जूरैरुद्वेजित (S. 2). 2 अभि-, रुचिः, अभिलाषः, इच्छा. 3 अव-उप-दंशः.

Reluctant, *a* अनिच्छत्, विमनस्, अनिच्छु, असंतुष्ट, अकाम, निष्काम, वि-पराङ्-मुख, विमत. **-ly,** *adv.* बलात्, अनिच्छया, अकामं-मतः-मेन, by (*a.*), 'he went out r.' अनिच्छन्नपि निर्जगाम. **-Reluctance,** *s.* अनिच्छा, अकामः, असंतोषः, वैमनस्यं, विमुखता, अरुचि *f.*

Rely, *v. i.* (On) विश्वस् 2 P, प्रति-इ 2 P. विश्रंभ् 1 A; श्रद्धा 3 U. 2 आ-अव-लंब् 1 A, आ-सं-श्रि 1 U; oft. ex. by आयत्त, अधीन, तंत्र in comp.; 'I r. on you alone' भवानेव ममाश्रयः-शरणं. **-iance,** *s.* विश्वासः, प्रत्ययः, विश्रंभः, श्रद्धा. 2 अवलंबः-बनं, आ-सं-श्रयः, शरणं. **-ing,** *a.* अवलंबिन्, आश्रित, विश्वासिन्, जातप्रत्यय.

Remain, *v. i.* अव-स्था 1 A, स्था 1 P, आस् 2 A, वृत् 1 A: *See* **Continue.** 2 नि-,वस् 1 P, स्था, अधि-ष्ठा. 3 शिष् pass., अव-परि-उत्°-, उद्-वृत्; 'he r. ed only' in memory (his name only r. ed) स्मर्तव्यशेषं नीतः; 'r. ing after what is eaten' भुक्तावशिष्ट, भुक्तशेष (अन्न); 'those who r. ed alive' हतशेषाः. **-ing,** *a.* अव-,शिष्ट-शेष, उद्वृत्त; 'pass the r. months' शेषान्मासान्गमय; 'during the r. part of his life' आयुःशेषे. **-Remains,** *s.* अस्थ्यादिशेषः, अस्थीनि. **-Remainder,** *s.* अव-, शेषः-षं-शिष्टं,उद्वर्तः, शेषभागः; (in arithmetic) शेषं, अंतरं; (of men) ex. by अन्य, इतर; *See* **Other;** 'subtracting 4 from 10 the r. is 6' दशसु चतुर्भिर्विवर्जितेषु षट् शेषं or षड् अवशिष्यंते.

Remand, *v. t.* पुनः प्र-हि 5 P or आह्वे 1 P.

Remark, *v. t.* लक्ष् 10, अवेक्ष् 1 A, निरूप् 10. 2 अभि-धा 3 U, वच् 2 P, वद् 1 P; *See* **Observe.** **-s.** उक्ति *f.*, वचनं, अभिधानं, वचस् *n.*, भाषणं; (written) लिखितं, लेखः. 2 अवेक्षणं, निरूपणं. 3 चर्चा, अनुशासनं. **-able,** *a.* अपूर्व, अद्भुत, आश्चर्यभूत. 2 विख्यात, विश्रुत, अलौकिक (की *f.*), लोकोत्तर, प्रसिद्ध, विशिष्ट, उत्कृष्ट, स्मरणार्ह, विशेष in comp. **-ably,** *adv.* सातिशयं, विशेषेण, विशेषतः, अद्भुतं, विशिष्टप्रकारेण.

Remarried, *a.* पुनरूढ, पुनर्भू.

Remedy, *v. t.* प्रतिकृ 8 U, प्रतिवि-धा 3 U, प्रतिसमा-समा-धा; परिहृ 1 P; प्र-उप-शम् c. (शमयति), साध् c., कित् desid. (चिकित्सति-ते); उप-चर् 1 P. **-s.** औषधं; भेषजं, अगदः; *See* **Medicine.** 2 प्रतिक्रिया, प्रति-(ती)कारः, उपशमः, उपायः, उपचारः, प्रतिविधानं, उपक्रमः, चिकित्सा, प्रतिसमाधानं. **-iable,** *a.* प्रतिकार्य, प्रतिविधेय, चिकित्स्य, शक्यप्रतिकार, शक्योपचार. **-ial,** *a.* प्रतिकारक, प्रतिकारिन्, (*s.*) in comp.; 'a r. measure proves effective' प्रतिकारविधानं फलाय कल्पते (R. viii. 40.). **-less,** *a.* अप्रतिकार्य, अप्रतिविधेय, निरुपाय अप्रतिकार, दुरुपचार.

Remember, *v. t.* स्मृ 1 P, सं-अनु-,° (with gen. when regret is shown), अनुचिंत् 10, अनु-बुध् 1 P, 4 A. 2 (Keep in mind) स्मृ, हृदये-चित्ते नि उप-धा 3 U, मनसि कृ 8 U, अव-धृ 10; 'please, r. these words well' हृदि एनां (भारतीं) उपधातुमर्हसि (R. viii. 77); 'r. me to your brother' स्मर्तव्योऽहं तव भ्रातुः. **-Remembrance,** *s.* स्मरणं, स्मृति *f.*, अनुचिंतनं, अवधारणं-णा. 2 स्मारकं, स्मारणं, स्मरणवस्तु, अभिज्ञानं, 'r. of love' प्रीत्यभिज्ञानं. **-er,** *s.* स्मारकः, उद्बोधकः.

Remind, *v. t.* स्मृ c., अनु-सं-°, उद्-प्र-अनु-बुध् c.; 'this group of gallants, as if, r. s me to-day of Pātāla' पातालं मामद्य संस्मरयतीव भुजंगलोकः (Rat. 1) Ob

I am well r. ed ' अये सम्यगनुबोधितोस्मि (S. 1). **-er,** *s.* उद्बोधकः, अनुबोधकः.

Reminiscence, *s.* स्मृति *f.*, स्मरणं; *See* **Memory.**

Remiss, *a.* अनवधान, असावधान, प्रमत्त, निरपेक्ष, उपेक्षक, मंदादर, शिथिलोद्यम; ' to be r. ' प्रमद् 4 P (with abl.). **-ly,** *adv.* अनवधानेन, उपेक्षया, निरपेक्षं, प्रमादेन. **-ness,** *s.* अनवधानं, उपेक्षा, निरपे(वे)-क्षा, प्रमादः, शैथिल्यं.

Remit, *v. t.* प्र-हि 5 P, प्रेष् c., प्रति-ऋ c. (अर्पयति); संचर् c., संक्रम् c. **2** शिथिलीकृ 8 U, मुच् 6 P, वि-उत्-सृज् 6 P, त्यज् 1 P, विरम् 1 P, निवृत् 1 A, (with abl.). **3** क्षम् 1 A, निवृत् c., मुच्, अवसृज्, त्यज्. **4** प्र-उप-शम् c., (शमयति), लघूकृ, न्यूनीकृ. **-***v. i.* प्र-उप-शम् 4 P, शिथिलीभू 1 P, विरम्. **-tance,** *s.* प्रेषणं, संक्रामणं; प्रेषितधनसंख्या. **-tent,** *a.* संतत, अविसर्गिन्. **-ting,** *a.* विरत, विसर्गिन्, शिथिलित. **-Remission,** *s.* शैथिल्यं, प्र-उप-शमः-शांति *f.*. विरामः. **2** मोचनं, मुक्ति *f.*, निस्तारः, उद्धारः. **3** मार्जनं, क्षमा, विच्छेदः, निवृत्ति *f.*, उत्सर्गः.

Remnant, *s.* अव-,शेषः-षं; *See* **Remainder.**

Remonstrate, *v. i.* (With) निवारणार्थं उपदिश् 6 P, निवारयितुं यत् 1 A, प्रत्यादिश् प्रत्या-ख्या 2 P; *See* **Dissuade.** **-Remonstrance,** *s.* प्रत्यादेशः, प्रबोधवचनं, निवारणोपदेशः, निवर्तनं.

Remorse, *s.* अनुतापः, अनुशयः, अनुशोकः, पश्चात्तापः. **-ful,** *a.* अनुतप्त, अनुशयार्त; *See* **Repentance,** &c. **-less.** *s.* कठिन, निर्दय; *See* **Cruel.**

Remote, *a.* दूर, दूरस्थ, दूरवर्तिन्, असन्निहित, विप्रकृष्ट; *See* **Distant.** **-ly,** *adv.* दूरं, विप्रकृष्टं; ' he is r. connected with me ' स मम विप्रकृष्टः बंधुः. **-ness,** *s.* विप्रकर्षः, असान्निकर्षः, दूरता.

Remount, *s.* अश्रांतः अश्वः. **-***v. i.* अश्वं पुनर् आरुह् 1 P.

Remove, *v. t.* स्थानांतरं नी 1 P or गम् c., अप-सृ c., वि-, चल् c. **2** दूरीकृ 8 U, निर्वस् c., निष्कस् c., अप-निः-उत्-सृ c., बहिष्कृ; (from office) प्र-, भ्रंश् c., च्यु c.; *See* **Dismiss, Discharge.** (of things) अपनी, विनुद् c., अपहृ 1 P, अप-अव-कृष् 1 P. अप-अपा-नुद् 6 P or c.. अप-व्यप-ऊह् 1 U. निर्-अप-अस् 4 U, निराकृ, अपाकृ, उच्छिद् 7 P, वि-नश् c., प्रतिकृ, खंड् 10, वि-प्रति हन् 2 P, भंज् 7 P, निर्-अव-धू 5, 9 U, 6 P. **-***v. i.* स्थानांतरं गम् 1 P or या-इ-2 P; अपसृ 1 P, अपगम्-या. **-***s.* पुरुषः (in geneology) ' separated by one r. from the creator ' चतुरेकांतरं (द्वंद्वं) (S. 7). **2** पदं, पदवी, क्रमः. **3** अपगमः, अपसरणं, &c.; *See* below. **-al,** *s.* अपनयनं, उत्सारणं, दूरीकरणं, विचालनं, स्थानांतरीकरणं. **2** अपसरः-रणं, अपयानं, अपगमः-गमनं, स्थानांतरं, स्थलभेदः. **3** निरासः, निराकरणं, प्रभ्रंशनं, अप-परि-हारः-हरणं, उच्छेदः, विनाशः-शनं, अपनोदः, अपोहः, प्रतिघातः, प्रति(ती)कारः, खंडनं, भंगः &c. **-er,** *s.* अपनेतृ *m.*, अपहर्ता, नाशकः, उच्छेत्ता; gen. ex. by हारः, हारी, अपहः, हा, घ्नः, अंतकः in comp., also हृत्, नुद् in comp.; ' r. of darkness ' तमोनुत्, तमोहृत्, तमश्छिद् &c.

Remunerate, *v. t.* मूल्यं-वेतनं-प्रतिफल दा 3 U; *See* **Recompense, Reward.** **-ion,** *s.* मूल्यं, वेतनं, प्रतिफलं, पारितोषिकं.

Renaissance, *s.* (विद्यायाः) पुनरुज्जीवनं.

Rencounter, *s.* संमर्दः, द्वंद्वं, संघट्टः, अभिघातः; *See* **Battle, Collision.**

Rend, *v. t.* दॄ 9 P or c., भिद् 7 P, छिद् 7 P, व्यध् 4 P, विशॄ 9 P; वि-उद्-दल् c. (दलयति), खंड् 10; *See* **Tear,** ' heart-r. ing ' हृदयस्पृश्, हृदिस्पृश्, हृदयमर्मच्छिद्. **-er,** *s.* विदारकः, भेदकः. **-ing,** *s.* विदारणं, भिदा, स्फुटनं, भेदः, भंगः. **-Rent,** *a.* विदीर्ण, स्फुटित, भिन्न &c. **-***s.* छिद्रं, रंध्रं, भेदः, विदरः, स्फुटनं, भिदा, भंगः.

Render, *v. t.* प्रति-दा 3 U, प्रति-ऋ c. (अर्पयति), प्रति-पद् c., निर्यत् c. **2** दा, कृ 8 U, उपक्लृप् c. **3** जन् c., उत्पद् c., कृ; by the causal of roots; ' r. help ' साहाय्यं कृ or दा; 'to r. proud' दृप् c.; ' r. unfriendly' विकृ c., &c. विरंज् c. **4** **Translate,** q. v.

Rendezvous, *s.* समागम-संकेत-स्थानं, संकेत गृहं-स्थलं.

Renegade, *s.* धर्मभ्रष्टः, पतितः, पाखंडः, स्वधर्म-स्वपक्ष-त्यागिन् *m.*

Renew *v. t.* नवीकृ 8 U, प्रतिसमा-धा 3 U, उद्धृ 1 P, पूर्वावस्थां नी 1 P or प्राप् c. or गम् c. **2** पुनः कृ; gen. ex. by पुनः आरभ् 1 A with other words; ' r. s studies' पुनः अभ्यासं प्रारभते; 'they r. ed hostilities पुनः वैरं प्रारेभिरे. **-al** *s.* नवीकरणं, पूर्ववत्करणं, प्रतिसमाधानं, उद्धारः, पुनःकरणं, पुनः प्रारंभः.

Renounce, *v. t.* न स्वीकृ or अंगीकृ 8 U, प्रत्या-ख्या 2 P, प्रत्यादिश् 6 P, प्रत्याचक्ष् 2 A; *See* **Refuse.** **2** त्यज् 1 P, अपास् 4 U, वि-उत्-सृज् 6 P, हा 3 P; *See* **Abandon,** ' to r. the world ' संन्यस्, सर्वसंगं परित्यज्. **-Renunciation,** *s.* प्रत्यादेशः, प्रत्याख्यानं, परित्यागः, उत्सर्गः, परिहारः; ' r. of the world ' संन्यासः, सर्वसंगपरित्यागः.

Renovate, *v. t.* नवीकृ 8 U, पुनः कृ. **-ion,** *s.* नवीनता, नूतनावस्था, उद्धारः, *See* **Refresh, Renew.**

Renown, *s.* कीर्ति *f.*, यशस् *n.*, प्र वि-ख्याति *f.*, विश्रुति *f.* **-ed,** *a.* प्र-वि-ख्यात, विश्रुत, प्रथित, लब्धकीर्ति, प्रसिद्ध, लब्धप्रतिष्ठ; *See* **Fame,-ous.**

Rent, *s.* करः, बलिः, राजस्वं. -*v. t.* भाटकेन दा 3 U; भट् *c.*, भाटकेन-मूल्यदानेन-ग्रह् 9 U or सेव् 1 A or भुज् 7 A. **-al,** *s.* 'r.-bill' करपत्रिका.

Reorganize, *v. t.* पुनर् वि-रच् 10 or घट् *c.*

Repair, *v. t.* नवीकृ 8 U, सं-धा 3 U प्रतिसमा-समा-धा, उद्धृ 1 P, पूर्ववत्कृ, पुनः स्वस्थीकृ, सुस्थित *a.* कृ. **2** (Loss &c.) पूर् 10, प्रमृज् 2 P, निष्कृ, शुध् *c.*, प्रतिकृ, सं-धा. -*v. i.* आश्रि 1 U, प्रपद् 4 A, गम्-व्रज् 1 P, शरणं प्रपद् or गम् or या 2 P or अभ्युप-इ 2 P. -*s.* प्रति-,समाधानं, संस्कारः, संधानं, उद्धारः, नवीकरणं, पूर्वावस्थाप्रापणं. **-Reparable,** *a.* पूरणीय; उद्धार्य, प्रतिसमाधेय; 'loss not r.' अपूरणीया हानिः. **-Reparation,** *s.* **Repair,** q. v. **2** क्षति or हानि-पूरणं or निष्कृति *f.*, शोधनं, प्रतिफलं.

Repartee, *s.* क्षिप्रोत्तरं, व्यंगोक्ति *f.*, भंगिभाषणं, सरसोक्तिः.

Repast, *s.* भोजनं, अन्नं, आहारः, अशनं, अभ्यवहारः.

Repatriate, *v. t.* (निर्वासितं) स्वदेशं प्राप् *c.*

Repay, *v. t.* प्रतिदा 3 U, प्रति-ऋ *c.* (अर्पयति), निर्यत् 10, प्रति-पद् *c.*, निवृत् *c.*, प्रतिकृ 8 U. **2** प्रतिफलं-निष्कृतिं-दा, निष्कृ, अपाकृ, शुध् *c.*, अपवृज् 10, oft. by प्रति; 'r. kindness' प्रत्युपकृ; 'r. an injury' प्रत्यपकृ, वैरं साध् *c.* **-ment,** *s.* प्रतिदानं, प्रत्यर्पणं, निर्यातनं, शोधनं, शुद्धि *f.*, प्रतिफलं.

Repeal, *v. t.* खंड् 10, निरस् 4 U, वि-,लुप् *c.*, नि-परा-वृत् *c.*, उच्छिद् 7 P. -*s.* वि-,लोपः, निवर्तनं, खंडनं, निरसनं, प्रचारलोपः-भंगः. **-er,** *s.* निवर्तकः, विलोपकः.

Repeat, *v. t.* पुनः वद्-गद् 1 P, or उदीर् *c.* or व्याहृ 1 P, (Say, q. v.); अभ्यस् 4 U, (a letter) आम्रेडयति (D.). **2** आवृत् *c.*, पुनः-मुहुः-कृ 8 U or आचर् 1 P or अनु-ष्ठा 1 P; 'ten r. ed two times' द्विरावृत्ता दश, द्विदशाः. **3** पठ् 1 P, व्याहृ, अनुवद्, उद्गॄ 6 P, आ-ख्या 2 P, कथ् 10, उदीर्. **-ed,** *a.* पुनरुक्त, पुनर्भणित, पुनः पुनः कृत, आवृत्त, आवर्तित; 'with r. exertions' पुनः पुनः कृतैः प्रयत्नैः; 'in r. birth, परिवर्तिनि जन्मनि, जन्मनि जन्मनि. **-edly,** *adv.* वारं वारं, भूयो भूयः, पुनः पुनः, मुहुर्मुहुः, अभीक्ष्णं, असकृत्, बहुशः, अनेकशः. **-Repetition,** *s.* पुनरुक्ति *f.*, पुनर्वादः, पुनर्वचनं-कथनं, पौनरुक्त्यं; 'made as a r.' पुनरुक्त, पुनरुक्ततां नीत; *See* **Superfluous. 2** पठनं, समभिव्याहारः, अनुवादः, अनुलापः. **3** आवृत्ति *f.*, आवर्तनं, पुनः विधानं-अनुष्ठानं-आवृत्तिः, पौनःपुन्यं, अभ्यासः; आम्रेडितं, द्विरुक्तिः (of a word &c.).

Repel, *v. t.* अपास् 4 U, प्रति-व्या-हन् 2 P, प्रतिसृ *c.*, निरस्, प्रतिक्षिप् 6 P, प्रतिवृ *c.*, अपानुद् 6 P, नि-परा-वृत् *c.*, प्रत्यादिश् 6 P; *See* **Dispel, Drive. -lent,-ling,** *a.* प्रतिघातिन् प्रतिकारक, अपानोदिन्. -*s.* प्रति-(ती)कारः, प्रतिघातः, प्रतिवारणं.

Repent, *v. i.* अनु-पश्चात्-तप् 4 A, अनुशी 2 A, अनुशुच् 1 P, अनुतापं वह्-व्रज्-गम् 1 P, पश्चात् पीड्-खिद् pass. **-ance,** *s.* अनु-पश्चात्-तापः, अनुशयः, अनुशोकः, पश्चात्खेदः, मनस्तापः, विप्रतीसारः, पाप-दुष्कृत-खेदः. **-ant,** *a.* सानुशय, सानुताप, संजातानुताप, अनुशयविधुर-पीडित, अनुतप्त, जातानुशय, जातखेद, अनुतापार्त.

Repercussion, *s.* प्रतिघातः, प्रतिपतनं.

Repertory, *s.* *See* **Treasury.**

Repine, *v. i.* व्यथ् 1 A, शुच् 1 P, अवसद् 1 P, खिद्-पीड्-दु-संतप्-pass.; *See* **Fret. -ing,** *s.* मनस्तापः, मनोव्यथा, शोकः.

Replace, *v. t.* (स्थाने) पुनः आ-नि-धा 3 U or निविश् *c.* or न्यस् 4 U or स्था *c.* (स्थापयति); पूर् 10, स्थाने निविश् *c.*, प्रतिनिधिं दा 3 U; 'one servant was r. ed by two' किंकरस्थाने किंकरद्वयं निवेशितं; *See* **Substitute.**

Replenish, *v. t.* (पुनः) संपूर् 10 or उपक्लृप् *c.*

Replete, *s.* सं-परि-पूर्ण, सं-आ-कीर्ण, परिपूरित, आ-नि-चित, आढ्य, मय (यी *f.*) in comp. **-ion,** *s.* पूर्णता, पर्याप्ति *f.*; परि-,पूर्ति *f.*

Replica, *s.* प्रतिकृति *f.*

Reply, *s.* उत्तरं, प्रति-वचनं-वाक्यं-वाच् *f.*-उक्ति *f.* **2** उत्तरपक्षः, प्रतिवादः; 'leave no room for r.' निरुत्तरीकृ 8 U. -*v. i.* दा 3 U with (*s.*), उत्तरं प्रति-पद् 4 A, प्रतिवच् 2 P, प्रतिवद् 1 P- भाष् 1 A. **2 Echo,** q. v. **-Replicant,** *s.* उत्तरवादिन् *m.*, प्रतिवादी

Report, *v. t.* आ-नि-विद् *c.*, आ-ख्या 2 P or *c.* (ख्यापयति), विज्ञा *c.* (ज्ञापयति), बुध् *c.*, वृत्तांतं लिख् 6 P, श्रु *c.*; 'he is r. ed to be dead' स मृत इति श्रूयते, इति जनश्रुतिः-प्रवादः. -*s.* नि-आ-वेदनं, विज्ञापना, विज्ञप्ति *f.*, कथनं; 'written r.' आवेदनपत्रं, विज्ञप्तिलेखः. **2** ख्याति *f.*, विश्रुति *f.*, कीर्ति *f.*; 'evil or bad r.' कौलीनं, अकीर्तिः. **3** वार्ता, वृत्तांतः, प्रवादः, जन-लोक-वादः-प्रवादः-श्रुतिः-वार्ता, उपश्रुति,

जनरव:, किंवदंती; 'there goes a r.' इति जनप्रवाद: &c. श्रूयते, इति प्रवाद:. 4 ध्वनि:, नाद:, शब्द:; *See* **Noise.** **-er,** *s.* वृत्तांतनिवेदिन् *m.*

Repose, *v. i.* विश्रम् 4 P, संविश् 6 P, शी 2 A. 2 विश्वस् 2 P, प्रति-इ 2 P. 3 आ-अव-लंब् 1 A, आ-सं-श्रि 1 U; 'r. ing confidence' विश्वासप्रतिपन्न, सविश्वासं स्थित. **-***v. t.* विश्रम् c., संविश् c. 2 निक्षिप् 6 P, स्था c. (स्थापयति), नि-आ-धा 3 U. **-***s.* विश्रा(श्र)म:, विश्रांति *f.*, विराम:, उप-प्र-शम:, प्र-शांति *f.*, श्रमच्छेद:-निवृत्ति *f.*, निर्वृति *f.*

Reposit, *v. t.* नि-आ-धा 3 U, न्यस् 4 P, रक्ष् 1 P. **-ory,** *s.* निधि:, आगारं, निधानं, पात्रं, भाजनं, आश्रय:, आशय:, आधार:, कोष्ठ:, रक्षणस्थानं.

prehend, *v. t.* भर्त्स् 10 A, परुषं निंद् 1 P, or उपालभ् 1 A; *See* **Censure.** **Reprehensible,** *a.* निंद्य, उपालभ्य, गर्हित, गर्हणीय, दूषणीय. **-Reprehension,** *s.* निंदा, गर्हा, भर्त्सनं-ना, दूषणं, उपालंभ:.

Represent, *v. t.* वर्ण् 10, वि-वृ 5 U, निरूप् 10; oft. ex. by स्था c.; 'r. even vices as virtues' दोषानपि गुणपक्षमध्यारोपयंति, गुणपक्षे स्थापयंति (Ka. 108); 'r. in writing' अभि-,लिख् 6 P, लेख्ये निविश् c. or आरुह् c. 2 प्र-,दृश् c., सूच् 10, आविष्कृ 8 U, निरूप्. 3 नि-आ-विद् c., विज्ञा c. (ज्ञापयति); *See* **Inform.** 4 भूमौ-स्थाने-स्था 1 P, or वृत् 1 A; प्रतिनिधि: भू; 'you r. the queen' भवान् राज्ञीस्थाने वर्तते, राज्ञीप्रतिनिधि:. 5 रूपं-वेषं-ग्रह् 9 U or धृ 1 P, 10; *See* **Personate;** (a play &c.) प्रयुज् 10; 'have not seen it r. ed' न प्रयोगतो दृष्टं (Rat. 1); नाटकं प्रयोगेणाधिक्रियतां (S. 1) 'let it be r. ed on the stage'; 'r. a character' भूमिकायां वृत्; 'Urvasī r. ing Lakshmi' उर्वशी लक्ष्मीभूमिकायां वर्तमाना (V. 3). **-ation,** *s.* वर्णनं, निवेदनं, विज्ञापना, प्रदर्शनं, निरूपणं, विज्ञप्ति *f.* 2 प्रयोग:, अभिनय:. 3 प्रतिकृति *f.*, प्रतिरूपं, आलेख्यं, प्रतिच्छंद:, प्रतिमा, प्रतिमूर्ति *f.*; *See* **Picture.** **-ative,** *s.* प्रतिनिधि:, प्रतिभू:, प्रतिपुरुष:. **-***a.* प्रतिनिधीभूत; आदर्शभूत.

Repress, *v. t.* प्रति-नि-रुध् 7 U, सं-नि-यम् 1 P, नियंत्र् 10, नि-ग्रह् 9 P, प्रशम् c.; *See* **Check.** **-ion,** *s.* निरोध:, नियम:, निग्रह:, नियंत्रणं. **-ive,** *a.* निरोधिन्, निग्रहकारिन्.

Reprieve, *s.* विश्राम:, विरति *f.* 2 दंडव्याक्षेप:-विलंब:. **-***v. t.* दंडं व्याक्षिप् 6 P or विलंब् c., व्यवहारदर्शनं व्याक्षिप्.

Reprimand, *v. t.* निंद् 1 P, भर्त्स् 10 A, उपालभ् 1 A, वाचा दंड् 10, अव-अधि-क्षिप् 6 P. **-***s.* निंदा, भर्त्सना-नं, उपालंभ:, वाग्दंड:, वाक्ताडनं; *See* **Censure.**

Reprisal, *s.* प्रत्यपहरणं, प्रतिपीडनं.

Reproach, *v. t.* (परुषं) निंद् 1 P, गर्ह् 1, 10 A, उपालभ् 1 A, आक्रुश् 1 P, अप-परि-वद् 1 A, निर्-भर्त्स् 10 A, आ-अधि-क्षिप् 6 P, दुष् c. (दूषयति), कुत्स् 10; सावज्ञं निंद्, तिरस्कृ 8 U, धिक्कृ, अवमन् 4 A. **-***s.* धिक्कार:, निंदा, गर्हा, तिरस्कार:, आ-अधिक्षेप:, परि(री)वाद:, उपालंभ:, आक्रोश:, भर्त्सनं-ना, परुषोक्ति *f.*, वाक्पारुष्य, दुरुक्तं, वाग्दंड:, निंदा-भर्त्सना-वाक्यं. 2 दूषणं, कलंक:, अ-अप-कीर्ति *f.*; लज्जास्पदं. **-ful,** *a.* निंदागर्भ, निंदात्मक, परिवादक; better by (*s.*) in comp.: 'r. words' निंदावचनानि. 2 गर्हित, निंद्य, गर्हणीय, लज्जाप्रद. **-fully,** *adv.* साधिक्षेपं, सोपालंभं.

Reprobate, *v. t.* धिक्कृ 8 U, न्यक्कृ, दुष् c., (दूषयति), गर्ह् 1, 10 A; *See* **Reproach.** **-***a.*, *s.* दुर्वृत्त, दुराचार, पाप-खंडित-वृत्त, दुष्ट, पापात्मन्, दु:शील, दुरात्मन्; (of acts) दुष्ट, निंद्य, गर्ह्य. **-ion,** *s.* गर्हा, गर्हणं, अतिदुष्टता.

Reproduce, *v. t* पुन: कृ 8 U or उत्पद् c. or जन् c.; 'he r. ed the whole speech' समग्रमेव भाषणं स यथातथमुदीरयामास. **-Reproduction,** *s.* प्रत्युत्पत्ति *f.*; पुनर्जननं.

Reprove, Reproof, *See* **Reproach.**

Reptile, *s.* सरीसृप:, सर्पणशील:, उरग:, उरोग:-गामिन् *m.* उरंगम:, सर्प:. **-***a.* सर्पिन्, सर्पण-शील.

Republic, *s.* प्रजासत्ताकं-प्रजातंत्रं-राज्यं, लोक-प्रजा-प्रभुत्वं. **-an,** *a.* प्रजाप्रभुत्वविशिष्ट, लोकप्रभुत्वसंबंधिन्, (*s.*) in comp. **-***s.* प्रजाप्रभुत्ववादिन् *m.*, प्रजापक्षवादी. **-anism,** *s.* प्रजाप्रभुत्ववाद:, प्रजातंत्रपक्ष:.

Repudiate, *v. t.* प्रत्यादिश् 6 P, निराकृ 8 U, निर्-अप-अस् 4 U, नि:-सृ c., परित्यज् 1 P, प्रत्या-ख्या 2 P, अपध्वंस् c., अव-निर्-धू 5, 9 U, 6 P; *See* **Reject** also. **-ion,** *s.* प्रत्यादेश:, निराकरणं, प्रत्याख्यानं, परित्याग:, अपासनं. 2 विवाहसंबंधत्याग:, दांपत्यविश्लेष:.

Repugnant, *a.* प्रतीप, विरुद्ध, प्रातिकूल, विपरीत, अत्यंतविमुख-विरक्त. **-Repugnance,** *s.* विरोध:, प्रातिकूल्यं, वैपरीत्यं, विराग:, विद्वेष:, अनिच्छा, वैमुख्यं, विमति *f.*, विरक्ति *f.*

Sick, *a.* आतुर, पीडित, व्याधित, रुजार्त, रोगार्त, रुग्ण, रोगिन्, विकृत, अस्वस्थ, सामय, अभ्यांत, आमयाविन्, अपटु, अभ्यमित. 2 (Mentally) संतप्त, पीडित, व्यथित, उपतप्त. 3 विवमिषु, वमनोन्मुख, वमनेच्छु. 4 निर्विण्ण, विरक्त, वितृष्ण, वीतस्पृह, द्वेषिन्; 's. of eating flesh' मांसाशनेन निर्विण्ण; 's. of the world' संसारविरक्त, उदीर्णवैराग्य; 'a man on a s.-bed' शय्यागतो रोगी; 'to be s.' वम् 1 P, छर्द् 10. **-en,** *v. t.* निर्वेदं-वितृष्णां-विरक्ततां-उत्पद् c. 2 वम् c. रोगार्तीकृ 8 U. **-*v. i.*** व्याधिना अभिभू pass., भू with (*a.*). 2 बध् desid. (बीभत्सते); *See* **Abhor.** **-ening,** *a.* बीभत्स, बीभत्सावह. **-ly,** *a.* रुग्ण, असुस्थ, अशक्त; गदोपसृष्ट; *See* (*a.*). 2 नित्य-सदा-रोगिन्, रोगशील; 's. by' nature जन्म-प्रकृति-रोगिन्. **-ness,** *s.* व्याधिः, रोगः, गदः, रुज् *f.*, अस्वास्थ्यं, आमयः, विकारः, उपतापः. 2 विवमिषा, वमनेच्छा, प्रच्छर्दिका, छर्दि-र्दी *f.*, वमः-मि *f.*

Sickle, *s.* दात्रं, लवित्रं, शस्यकर्तनी.

Side, *s.* पार्श्वः-र्श्वं, पक्षः, in all senses; कुक्षिः, पार्श्व-पक्ष-भागः; 'left s.' वामांगं, वामपार्श्वः; 'opposite s.' वि-प्रति-पक्षः; 'first s.' (of arguments) पूर्वपक्षः; उत्तरपक्षः, &c.; 'at one's s.' पार्श्वतः, पार्श्वे; 'staying at the s.' पार्श्वगत-स्थित. 2 प्रांतः, सीमा, उपांतं, अंतः. 3 (Of a mountain) उत्संगः, कटकः-कं, नितंबः. 4 भागः; 'outer s.' बाह्यभागः; पूर्वभागः, &c. 5 (Direction) दिश्-शा; gen. ex. by त्र, तः affixed; 'on both s. s' उभयतः, उभयत्र; 'on the other s.' परतः, पारे; 'on the left s.' वामतः; 'on all s. s' सर्वत्र, सर्वतः, विश्वतः, समंतात्, समंततः, चतुर्दिक्षु; 's. by s.' पार्श्वापार्श्वि. 6 (Party, faction) पक्षः; 'one of the opposite s.' वि-प्रति-पक्षः; 'of the same s.' सपक्षः, स्वपक्षीयः, स्वपक्षावलंबिन् *m.*; 'relations on the fathers' s.' पितृपक्षाः बांधवाः. 7 (In geometry) भुजः, पार्श्वः, दोस् *m. n.*, बाहुः; (of a river) पारः-अवारः; 's.-long' वक्र, तिरश्चीन, अपांग-साचि-तिर्यक् in comp.; (*adv.*) पार्श्वतः, तिर्यक्, साचि, तिरः; 's.-long look' नयनोपांतविलोकितं, साचिवीक्षणं, अपांगदृष्टि *f.*, तिर्यग्दृष्टिः, कटाक्षः; 's.-look': अपांगदर्शनं, कटाक्षः; &c.; 's.-ways', 's.-wise' तिरश्चीनं, तिर्यक्, तिरः. **-*a.*** पार्श्व, पक्ष in comp.; पार्श्वस्थ, पार्श्विक-पाक्षिक-(की *f.*); 's. breeze' पक्षवातः; पक्षद्वारं, &c., **-*v. i.*** 'to be on the s. of' पक्षे भू, पक्षं ग्रह् 9 U or आश्रि 1 U or आ-अव-लंब् 1 A: 'one who s. s' पक्ष्यः. **-er,** **Sidesman,** *s.* पक्षपातिन् *m.*, पक्षीयः, पक्षोद्ग्राहिन् *m.* *See* **Partizan.**

Sidereal, *a.* तारा, नक्षत्र in comp.

Sidle, *v. i.* तिर्यक् गम् 1 P or या 2 P. **-ing,** *a.* तिर्यग्गति *f.*

Siege, *s.* उप-,अव-,रोधः, परिवेष्टनं; 'lay s. to' उप-अव-रुध् 7 U.

Siesta, *s.* दिवानिद्रा.

Sieve, *s.* चालनी, तितउः.

Sift, *v. t.* पृथक् कृ 8 U. वि-,शुध् c.; तितउना शुध् c., निर्गल् c. 2 सूक्ष्मं-निपुणं-निरूप् 10 or परीक्ष् 1 A or आलोच् 10 or अनुसंधा 3 U. **-ing,** *s.* शोधनं, निर्गालनं.

Sigh, *s.* नि(निः)श्वासः, उच्छ्वासः, उच्छ्वसितं, दीर्घश्वासः-निश्वासः &c. **-*v. i.*** दीर्घं नि-उत्-श्वस् 2 P. निश्वासं मुच् or सृज् 6 P: 's.ing deep and hot' दीर्घमुष्णं च निश्वस्य. 2 शुच् 1 P, रुद् 2 P: *See* **Lament.** **-ing,** *a.* निश्वासिन्, उच्छ्वासिन्, दीर्घनिश्वासिन्, सनिश्वास.

Sight, *s.* *See* under **See.**

Sign, *s.* चिह्नं, लक्षणं, लिंगं, अभिज्ञानं, लांछनं, व्यंजनं-कं; 'a bad s.:' अप-दुर्-लक्षणं. 2 संज्ञा, संकेतः, इंगितं. 3 **Portent**, q. v. 4 राशिः. 5 चिह्नं (in Math. &c.); 's. manual' स्वहस्तः, स्वाक्षरं, स्वहस्ताक्षरं; 'under one's own s. manual' स्वहस्तपरिचिह्नित (Y. II. 93). 6 ध्वजः; 's.-post' ध्वजस्तंभः. **-v.**; 'make a sign' संज्ञां दा 3 U; 'understand the s.' संज्ञां ग्रह् 9 U; 'makes a s. to Vidushaka' विदूषकं संज्ञां लंभयति; 's. ed to him by her eyes to come' नेत्रसंज्ञया तं आह्वयत्; गुरुं नेत्रसहस्रेण नोदयामास वासवः (K. II. 29) 's. ed to speak &c.'. 2 नाम लिख् 6 P or निविश् c. (with loc.); स्वाक्षरेण अंक् 10 or चिह्नयति (D.). **-atory**, *s.* स्वनाम-लेखकः-निवेशकः. **-ature**, *s.* नामलेखनं-निवेशनं. 2 नामाक्षरं, हस्ताक्षरं. **-Signal**, *s.* संज्ञा, संकेतः. **-a.** अपूर्व, अनन्यसाधारण (णी *f.*), विशिष्ट, स्मरणार्ह, अत्युत्कृष्ट, विशेष in comp. **-ize**, *v. t.* प्रसिद्धी-विश्रुती-कृ 8 U; (oneself) कीर्तिं-प्रतिष्ठां-यशः-प्राप् 5 P or लभ् 1 A. **-ly**, *adv.* अति, नितरां, अत्यंतं, अपूर्वतया. **-Signet**, *s.* मुद्रा; 's.-ring' मुद्रासनाथमंगुलीयं, अंगुलिमुद्रा. **-Signify**, *v. t.* बुध् c., गम् c., द्युत् c., अभि-धा 3 U; *See* **Indicate, Mean**; oft. ex. by अर्थः; 'what does it s.' अस्य कोर्थः, किमनेन गम्यते, &c.; 'it s. es much' गुर्वर्थमेतत्. 2 by गौरवं, महत्त्वं, भारः. 3 by शक्ति *f.*, बलं. **-icance**, *s.* गौरवं, महत्त्वं. **-icant,-icative**, *a.* सार्थ, चरितार्थ, अर्थयुक्त, समर्थ, अर्थान्वित, अर्थवत्, पूर्णार्थ. 2 हेतुगर्भ, साकूत, अभिप्रायगर्भ; 'casting at me a s. look': साकूतं मां निर्वर्ण्य. 3 वाचक, अभिधायक, दर्शक, सूचक. 4 गुरु, महत्. **-icantly**, *adv.* अर्थवत्, साकूतं, सार्थं, पूर्णार्थतः. **-ication**, *s.* अर्थः. 2 शक्तिः.

Signior, *s.* आर्यः.

Silent, *a.* तूष्णीक, अनालापिन्, मूक, मौनिन्, निःशब्द, नीरव. 2 रुद्ध-बद्ध-मुख, निरुत्तर, अनुत्तर; 'habitually s.' तूष्णींशील, अल्पभाषिन्, वाग्यत, वाचंयम; 'when the lute was s.' वीणायां मूकीभूतायां; 'become or remain s.' (after speaking) उपशम् 4 P, विरम् 1 P; एवमुक्त्वा उपशशाम, उपशांतवचसि तस्मिन् &c. **-ly**, *adv.* तूष्णीं, जोषं, निःशब्दं, निभृतं, मौनीभूय. **-Silence**, *s.* मौनं, मूकभावः, निःशब्दता; अनालापः, तूष्णींभावः, अभाषणं; 'keeping s.' वाक्स्तंभः-रोधः-यमनं, मुखबंधनं; 'one who holds s.' वाचंयमः, मौनव्रतिन् *m*; 'keep s.' तूष्णीं-जोषं-आस् 2 A or स्था 1 P; मौनं आस्था-भज् 1 A, वाचं यम् 1 P or निरुध् 7 U, मुखं बंध् 9 P. 2 प्र-,शांति *f.*, स्तिमितता; 'in the s. of night' प्रशांतायां रात्रौ. **-*interj.*** तूष्णीं भव, मौनं कुरु. **-*v. t.*** मौनं लभ् c. (लंभयति) or अवलंब् c., विरम् c., प्र-उप-शम् c. 2 निरुत्तरीकृ 8 U, अधरीकृ, मुखं बंध्. **-ed**, *a.* निरुत्तर, अनुत्तर, निरुत्तरीकृत, रुद्ध-बद्ध-मुख.

Silk, *s.* कौशेयं, कौशं, कीटसूत्रं; पट्टः, क्षौमं, दुकूलं, कौशांबरं, कौशिकं (s.-cloth); China s.' चीनांशुकं; 'bleached s.' पत्रोर्णं, धौतकौशेयं; 's.-cotton tree' शाल्मलिः-लः, शाल्मलिवृक्षः, पिच्छिला; 's.-worm' कोश(ष)कारः, पट्टकीटः, तंतुकीटः-कृमिः, कोशस्थः. **-en**, *a.* कौशेय (यी *f.*), क्षौम (मी *f.*), कौशिक (की *f.*), कौश (शी *f.*); 's.-cloth' दुकूलं, कौशांबरं, क्षौमं, &c. 2 मृदु, कोमल.

Sill, *s.* देहली, शिला, गृहावग्रहणी.

Silly, *a.* मूर्ख, बालिश, मूढ, अल्पधी-मति, दुर्मति, निर्बुद्धि; *See* **Foolish**; 'what a s. boy' अहो मूढो बालकः.

Silt, *v. t.* (up) अवरुध् 7 U, अवष्टंभ् 9 P.

Silvan, *a.* वन in comp., वन्य, वनस्थ, अरण्यज; 's. goddess' वनदेवता; 's. scenery' वनशोभा-श्रीः.

Silver, *s.* रूप्यं, रजतं, श्वेतं, दुर्वर्णं, खर्जूरं, कलधौतं; s. leaf रूप्यपत्रं 's.-smith' रूप्यकारः, स्वर्णकारः. **Silver wedding**, *s.* पंचविंशा विवाहतिथिः. **-*a.*** राजत (ती *f.*) (s.) in comp., रजतनिर्मित-कृत, रौप्य (प्यी *f.*). **-*v. t.*** आच्छद् 10, रजतयति (D.), श्वेतवर्णीकृ 8 U. **-y**, *a.* रजतोपम, रूप्यवर्ण, श्वेत-शुक्ल-वर्ण, अतिधवल.

Similar, *a.* सम, समान, तुल्य, अनुगुण, अनुरूप, सधर्मन्; *See* **Like**. **-ity**, *s.* साम्यं, सादृश्यं, तुल्यत्वं. **-ly**, *adv.* तद्वत्, तथैव, एवं.

Simile, *s.* उपमा, निदर्शनं. **-Similitude**, *s.* औपम्यं, सादृश्यं. 2 आकारः, रूपं, मूर्ति *f.*

Simmer, *v. i.* शनैः पच्-क्वथ् pass.

Simper, *v. i.* विकृतं स्मि 1 A, कुस्मितं कृ 8 U, अनर्थकं हस् 1 P.

Simple, *a.* निरवयव, असंकीर्ण, असमस्त, शुद्ध, केवल, अमिश्र. 2 सरल, ऋजु, अमाय, शुद्धात्मन्, अवक्र, निर्व्याज, निष्कपट, मायाहीन. 3 (Dress) विनीत, (विनीतवेषेण प्रवेष्टव्यानि तपोवनानि S. 1). 4 स्पष्ट, व्यक्त, सुगम, सुबोध, भिन्नार्थ, अगूढार्थ; *See* **Plain**. 5 मुग्ध, बालिश, मूढ, दुर्मति. **-s.** ओषधि-धी *f.* **-Simpleton**, *s.* मूढः, मूढधीः, सुविश्वास्यः, क्षुद्रः, क्षुद्रमतिः. **-Simplicity**, *s.* शुद्धता, अमिश्रता, सरलता,

आर्जवं, सारल्यं, निर्व्याजता, अनुपधित्वं, अमाया, अव्याजः, निष्कापट्यं. 2 विनीतत्वं, शुद्धता. 3 स्पष्टता, सुबोधता, सुगमत्वं. 4 बालिश्यं, मूढता. **-Simplify**, *v. t.* ऋजूकृ 8 U, विशदीकृ, सुगमीकृ, व्यक्तीकृ; *See* **Explain.** **-Simply**, *adv.* एव, केवलं, मात्रं in comp.

Simulate, *v. t. See* **Pretend.**

Simultaneous, *a.* एक-सम-कालिक (की *f.*), यौगपदिक. **-ly**, *adv.* समं, युगपत्, एक-सम-कालं-ले, यौगपद्येन, एकदैव, सममेव. **-ness**, *s.* यौगपद्यं, एक-सम-कालता, युगपद्भावः.

Sin, *s.* पापं, पातकं, एनस् *n.*, कल्मषं, दुरितं, अघं, दुष्कृतं, वृजिनं, अंहस् *n.*, किल्बिषं, पंकः-कं, पाप्मन् *m.*, कलुषं; दोषः, अपराधः, पाप-अप-कर्म *n.*, कुकर्मन्, दुष्कृति *f.*-त्यं; 'heinous s.' महा-घोर-पातकं; 'destroying s.' पापनाशन-नाशिन्, अघमर्षण, पापापह. **-***v. i.* पापं &c. आचर् 1 P or कृ, अपराध् 4, 5 P, दुष् 4 P. **-ner**, *s. See* **Sinful** below; 'an atrocious s.' महा-घोर-पातकिन्-पापिन्, पापराशिः-निधिः. **-ful**, *a.* पापिन्, पातकिन्, पापकर (री *f.*), पाप्मन्, पापकृत्, पापात्मन्, कुकर्मन्, दुष्कर्मन्, एनस्विन्, पाप-दुष्ट-कर्मन्, अपराधिन्, किल्बिषिन्, पापनिरत-बुद्धि-मति, पापात्मक. 2 (Of acts) पाप in comp., दुष्ट, कलुष; 's. act' पापं, दुष्कर्म; *See* (*s.*). **-fully**, *adv.* पापवत्, सपापं, दुष्टवत्. **-fulness**, *s.* सपापता, पापमति-निरति *f.*, दुष्टता, &c. **-less**, *a.* अनघ, निष्पाप, अपाप, अकल्मष, पापरहित, निर्दोष, निरपराध, and sim. comp.

Since, *prep.* प्रभृति, आरभ्य, (with abl.), आ with abl. or in comp.; sometimes also ex. by gen. abs.; अस्य कतिपये संवत्सरास्तपस्तप्यमानस्य (U. 4) 'it is several years s. he began to practise penance'; 's. then' तदाप्रभृति; '4 years s.' इतः पूर्वं चतुर्वर्षे; 'long s.' चिरं; 'ever s.' यतः प्रभृति. 2 पूर्वं, प्राक्, गत-पूर्व-काले. **-***conj.* यतः, यस्मात्, यत्, हि (not at beginning); by abl. of abstract noun; *See* **Because.**

Sincere, *a.* अकृत्रिम, निर्व्याज, निष्कपट, निर्व्यलीक, दक्षिण, ऋजु, सरल, विशुद्ध, अमाय; यथार्थ, सत्य, तात्त्विक-वास्तविक (की *f.*); (of persons only) शुद्धमति-भाव, शुद्धात्मन्, विमलात्मन्, शुचि, सत्यशील-व्रत-वादिन्; *See* **Frank, Honest.** **-ly**, *adv.* निर्व्याजं, निर्व्यलीकं, अमायया, शुद्धहृदयेन-भावेन, विमलात्मना. **-ity, -ness**, *s.* सारल्यं, दाक्षिण्यं, आर्जवं, निष्कापट्यं, अमाया, विमलात्मता, शौचं, यथार्थता, &c.

Sine, *s.* ज्या, ज्यापिंडः.

Sinecure, *a.* अकर्माधिकृत, कर्मशून्याधिकारिन्.

Sinew, *s.* स्नायु *f.*, स्नसा; (s. s) बलं, शक्ति *f.*, सामर्थ्यं. **-y**, *a.* स्नायुमय (यी *f.*). 2 प्र-स-बल.

Sing, *v. i.* गै 1 P; (of birds) कूज् 1 P, रु 2 P. **-***v. t.* गै, गानेन वर्ण् or कृत् 10, उत्कृत्, अभिगै; 'they sang his praises' तं स्तुतिभिरुपतस्थिरे. **-er, -Songster**, *s.* गायकः, गातृ *m.* **-ing, -Song**, *s.* गीतं, गीति *f.*, गेयं, गानं. 2 कूजनं, रुतं, रावः, रवः.

Singe, *v. t.* ईषद् दह् 1 P, अग्निना स्पृश् 6 P.

Single, *a.* एक, एकाकिन्, अद्वितीय, केवल, असहाय; अद्वैध (धी *f.*). 2 भिन्न, व्यक्त, अविभक्त. 3 **Simple**, q. v. 4 अनूढ, अविवाहित, अकृतोद्वाह, निःसंग; 's. combat' द्वंद्वयुद्धं, नियुद्धं, बाहुयुद्धं; 's.-handed' एक, एकाकिन्, बाहुसहाय, भुजमात्रसहाय; 's.-hearted' अनन्यवृत्ति, एकचित्त; 's. stick' यष्टि *f.*, दंडः. **-***v. t.* (Out) (बहूनां मध्यात्) वृ 5 U, उद्धृ 1 P, उद्-ग्रह् 9 P; निरूप् 10, निर्दिश् 6 P. **-ness**, *s.* कैवल्यं, अद्वितीयता, &c. 2 शुद्धि *f.*, अनन्यता, अनन्यभावः. **-Singly**, *adv.* Ex. by (*a.*). 2 एकैकं, एकैकशः, प्रत्येकं, एकशः, पृथक्, पृथक् पृथक्; *See* **Separately.**

Singular, *a.* अपूर्व, अप्रतिम, अद्वितीय, अप्रतिरूप, अनुपम. 2 अनन्यसाधारण (णी *f.*), लोकोत्तर, अनन्यसामान्य; अपरूप, विलक्षण, अद्भुत, लोकबाह्य, अलौकिक (की *f.*); 's. number' एकवचनं. **-ity**, *s.* अपूर्वता, अप्रतिमता, असामान्यता, वैलक्षण्यं, वैचित्र्यं, असंगति *f.*, लोकोत्तरता. **-ly**, *adv.* अपूर्वं, विशेषतः, अद्भुतं, लोकोत्तरप्रकारेण.

Sinister, *a.* अमंगल, अशुभ, अकल्याण (णी *f.*), अभद्र. 2 दुष्ट, वक्र, वाम, कुटिल, अनृजु. 3 वाम, सव्य; 'of s. motives' दुराशय, पापमति; उमां स पश्यन्नृजुनेव चक्षुषा (K. v. 32) 'looking at Umā with no s. eye'. **-Sinistrally**, *adv.* वामतः, वामदिशि. **-Sinistrous**, *a.* वामस्थ, वामपार्श्ववर्तिन्.

Sink, *v. i.* नि-मस्ज् 6 P; 'sank in deep mire' महापंके निमग्नः; सद् 1 P. अव-नि-°, अधः गम् 1 P or पत् 1 P or या 2 P, अवपत्. 2 ह्रासं-क्षयं या-इ 2 P, क्षि pass., ध्वंस् 1 A; *See* **Decay, Decline.** 3 (Down) अव-वि-सद्, परि-, म्लै-ग्लै 1 P, स्रंस् 1 A; *See* **Droop**; 'my heart s. s down' सीदति मे हृदयं; 'limbs, s. ing down through excessive thirst' प्रबल-पिपासावसन्नानि अंगकानि (Ka. 36); 'his heart sank within him' तस्य धैर्यमही-

पत; स लुप्त-स्खलित-धैर्यः. -*v. t.* नि-मस्ज् c. (मज्जयति); अधः गम् c. or पत् c. 2 (A well! &c.) खन् 1 P. 3 अवसद् c., परि-, म्लै c. (spirits &c.) 4 न्यूनीकृ 8 U. अल्पीकृ, लघयति ((D.), ह्रस् c., अपचि 5 U: क्षि 5 P. -*s.* जलनिर्गमः, गुप्तनाली.

Sinuous, *a.* कुटिल, वक्र, अराल, जिह्म. **-Sinuosity,** *s.* वक्रिमन् *m.*, कौटिल्यं.

Sinus, *s.* नाडि-डी-लि-ली *f.*

Sip, *v. t.* आचम् 1 P; उपस्पृश् 6 P, ईषत्-अल्पशः-पा 1 P. -*s.* आचमनं, उपस्पर्शः, ईषत्पानं.

Siphon, *s.* उत्क्षेपणी, वक्रनाली.

Sir, (Voc.) आर्य; भदन्त, भोः; 'holy s.' भगवन्; 'gentle or good s.' भद्र, भद्रमुख.

Sirdar, *s.* मांडलिकः, सामंतः. 2 सेनानी *m.*

Sire, *s.* (In addressing) देव, श्रीमद्देव, महाराज, राजन्. 2 भगवन् (of holy men). 3 तातः, जनकः, पितृ *m.*

Siren, *s.* वि-,मोहिनी, (गानेन) लोभयित्री, मायिनी.

Sirrah, *interj.* रे, अरे, अरेरे.

Sirrup, *s.* स्वादु or मधुर-रसः or पेयं.

Sister, *s.* स्वसृ *f.*, भगिनी, सोदर्या, जा(या)मिः-मी. 2 धर्मभगिनी; 'elder s.' अग्रजा; 'younger s.' अवरजा; 's.'s son' भागिनेयः, स्वस्रेयः; 's.'s daughter' स्वस्रीया, भागिनेयी; 's.'s husband' आवुत्तः; 's.-in-law' यातृ, ननांदृ, श्याली. भ्रातृजाया, प्रजावती (expressing different relations). **-hood,** *s.* भगिनीत्वं, भगिनीसंबंधः. 2 भगिनीसमाजः, स्त्रीगणः. **-ly,** *a.* भगिन्यनुरूप, स्वस्रीय, स्वसृयोग्य.

Sit, *v. i.* आस् 2 A, नि-,सद् 1 P, उपविश् 6 P: 'please s. here' अत्रास्यतां, इदमासनमलंकरोतु भवान्. 2 कार्यं निर्वह् c. 3 (Fit) Ex. by शुभ् 1 A: 'this crown s.s well on you' नितरां तवेदं मुकुटं शोभते, शोभसे एतेन मुकुटेन; 's. by' उपास्, अन्वास्; 's. up' स्था 1 P, सम्यक् (अनतकायं) स्था; 'half s. ing up in the bed' पूर्वार्धविसृष्टतल्पः (R. xvi. 6); जागृ 2 P.

Site, *s.* सन्निवेशः, सं-,स्थिति *f.*, स्थानं, पदं, स्थलं. आस्पदं. भूमि *f.*: (of a house) वास्तु *m. n.*, वेश्मभूः, गृहपोटः; 'purificatory ceremony of a s.' वास्तुशमनं.

Situate,-ed, *a.* अव-,स्थित, निविष्ट; दिश्य, स्थ, वर्तिन् in comp.; 's. to the east' पूर्वदिश्य, पूर्वस्थ; (of persons) स्थ, स्थित, अवस्थ in comp., अवस्थापन्न; 'so s.' एतदवस्थ; 'badly s.' दुःस्थ, दुःस्थित, कृच्छ्रगत, कष्टदशापन्न. **-ion,** *s.* सन्निवेशः, अवस्थानं, अव-,स्थितिः. 2 पदं, नियोगः, अधिकारः, पदवि-वी *f.* 3 अवस्था, दशा, स्थितिः, भावः, वृत्ति *f.*, आस्पदं.

Sitz-Bath, *s.* कटिस्नानं.

Six, *a.* षष्; 's.-fold' षड्गुण; 's.-faced' षण्मुखः, षडाननः; 'having s. mothers' षाण्मातुरः; 'collection of s.' षट्कं; 'in s. ways' षड्धा, षोढा; 'of s. months standing' षाण्मासिक (की *f.*), षण्मास्य. **-th,** *a.* षष्ठ (ष्ठी *f.*). **-Sixteen,** *a.* षोडशन्. **-th,** *a.* षोडश (शी *f.*). **-Sixty,** *a.* षष्टि *f.* **-ieth,** *a.* षष्टितम (मी *f.*).

Size, *s.* प्र-परि-माणं, मानं; 'of great s.' महाप्रमाण, पृथु; 'of a big s.' बृहत्प्रमाण. 2 आकारः, आकृति *f.* रूपं, आकारमानं; 'of the s. of' ex. by (*s.*) or मात्र in comp.: 'of the s. of a mustard seed' सर्षपमात्रं (छिद्रं); बिल्वमात्रं, अंडपरिमाणं, &c. 3 लेपः.

Skain, Skein, *s.* पं (विं)जि-जी *f.*-जिका.

Skate, *s.* हिमविसर्पणपादुका.

Skeleton, *s.* कंकालः; 'mules reduced to s. s' कंकालशेषाः खराः (U.3): अस्थिपंजरः. 2 आकारः, संस्थानं. 3 वस्तुमात्रं.

Sketch, *v. t.* वर्ण् 10, आलिख् 6 P, स्थूलवर्णनं-पांडुलेख्यं-कृ 8 U. -*s.* वर्णनं; आलेख्यं; 'rough s.' स्थूललेख्यं, पांडुलेखः; 's. of a painting' पांडुचित्रं, चित्रारंभः, रेखामात्रं. 2 वस्तुमात्रं.

Skew, *a.* तिर्यक्, अनृजु, विषम. -*v. i.* तिर्यक् निरीक्ष् 1 A.

Skewer, *s.* शलाका, कीलः-लकः, शंकुः.

Skiff, *s.* तरीः, नौ *f.*, लघुनौका.

Skill, *s.* कौशलं, नैपुण्यं, पटुता, पाटवं, प्रावीण्यं, चातुर्यं, वैदग्ध्यं, युक्ति *f.*, विज्ञता, &c. **-ful, -ed,** *a.* कुशल, निपुण, प्रवीण, पटु, विचक्षण, दक्ष, विदग्ध, चतुर, विशारद, पेशल, युक्तिमत्, कृतिन्, विज्ञ, अभिज्ञ-ज्ञ-विद् in comp. **-ly,** *adv.* सपाटवं, सनैपुण्यं, दक्षतया, चतुरं, कुशलतया, विज्ञवत्, सवैदग्ध्यं, &c. **-ness,** *See* (*s.*) above.

Skim, *s.* मंडः-डं, फेनः-णः. -*v. t.* फेनं गल् c. or अपनी 1 P or निर्हृ 1 P. -*v. i.* जवेन-वेगात् परिसृप् 1 P or परि-द्रु 1 P, लघुगत्या विसृप्. **-med,** *a.* हृत-मंड-फेन; 's. milk' घोलं, मथिततक्रं. **-mer,** *s.* झर्झरी-रं, खजः-कः.

Skimp, *v. i.* कार्पण्यं समाचर् 1 P. 2 निरवधानं कृ 8 U.

Skin, *s.* चर्मन् *n.* (of animals), त्वच् *f.*; (hide) अजिनं, दृतिः, कृत्ति *f.*; (of snakes) निर्मोकः, कंचुकः; 'reduced to mere s. and bones' त्वगस्थिमात्रशेष. 2 **Rind,** *q. v.*: 's.-deep' चर्मगत; *See* **Superficial**; 's-flint' अतिकृपणः, कदर्यः; *See* **Miser**. -*v. t.* चर्म-त्वचं-अपनी 1 P or निर्हृ 1 P or उल्लिख् 6 P, निस्त्वचीकृ 8 U.

-ny, *a.* चर्मभूत, त्वङ्मात्र, चर्ममात्रावशेष, क्षीण, कृश; *See* **Lean.**

Skip, *v. i.* प्लु 1 A, वल्ग् 1 P. नृत् 4 P. **-s.**, **-ping**, *s.* प्लुतं-ति *f.*, प्लवनं, प्लुतगति *f.* **-ping**, *a.* प्लुतगति-गामिन्.

Skipper, *s.* नौकाधिपः.

Skirmish, *s.* डिंबाहवः, डिंबः, डिंबयुद्धं. **-v.** *i.* कृ 8 U with (*s.*).

Skirt, *s.* प्रांतः, पर्यंतः, अंतः, प्रांत-पर्यंत-भागः, परिसरः, सीमा, धारा; 's. s of a mountain' पर्यंतभूः. **2** अंचलः, दशा-वस्ति *m. f.* (pl.); वस्त्रांचलः, वसनांतः. **-v.** Ex. by (*s.*), प्रांतयति (D.); *See* **Border.**

Skittish, *a.* चंचल, चपल, तरल. **2** क्रीडा or खेला-शील or पर.

Skulk, *v. i.* निभृतं-अलक्षितं-स्था 1 P or वृत् 1 A, प्रच्छन्नं आस् 2 A.

Skull, *s.* कपालः-लं, कर्परः, शिरोस्थि *n.*; 's. for alms' भिक्षाकपालं; *See* **Scull.**

Sky, *s.* नभस् *n.*, वियत् *n.*, व्योमन् *n.*, गगनं-णं, आकाशः-शं, अंबरं, अंतरि(री)क्षं, खं, नाकः, दिव् *f.*, द्यो *f.*, विहायस् *m. n.*, विहायसः, अभ्रं पुष्करं, अनंतं, सुरवर्त्मन् *n.*, विष्णुपदं, तारापथः; 'roaming through the s.' नभश्चरः, खेचरः, &c. 's.-coloured' व्योम-नील-वर्ण; 's.-lark' भ(भा)रद्वाजः; व्याघाटः; 's.-light' आकाशप्रकाशः; 's.-touching' अभ्रंलिह्-लिख्, नभोलिह्, व्योमस्पृश्, गगनचुंबिन्.

Slab, *s.* शिला, शिलातलं-पट्टः-फलकः.

Slabber, *v. i.* लालायते (D.), लालां स्रु c.

Slack, *a.* शिथिल, प्र-,श्लथ, स्रस्त, गलित. **2** मंद, अतीव्र, अतीक्ष्ण, प्रमत्त, अनवहित; *See* **Remiss. -en**, *v. t.* शिथिलयति (D.), श्लथ् 10, शिथिली-श्लथी-कृ 8 U, मंदीकृ; रथस्य मंदीकृतो वेगः (S. 1.) 'I have s.-ed the speed' &c.; प्र-शम् c. (शमयति) 'will not s. (the bonds of) her love' न अनुरागं शिथिलयति (V. 2.); 's. your pace a little' गतिवेगं किंचित शिथिलय; 'who have s.ed their efforts' शिथिलितप्रयत्नाः, श्लथोद्यमाः. **-v.** *i.* शिथिली-श्लथी-भू, शिथिलायते (D.), मंदीभू; *See* **Relax. -ened**, *a.* शिथिलित, शांतवेग-रय. **-ly**, *adv.* शिथिलं, प्रमादतः, अनवधानेन. **-ness**, *s.* शैथिल्यं, &c.

Slake, *v. t.* प्र-,शम् c. (शमयति), छिद् 7 P, (thirst). **2** जलेन संमिश्र् 10 or संसृज् 6 P. **-v.** *i.* प्र-,शम् 4 P.

Slam, *v. t.* (Door) तीव्राघातेन पि-धा 3 U or बंध् 9 P.

Slander, *s.* अप-परि-वादः, पैशुन्यं, पिशुनवचनं, अभि-,असूया, निर्वादः; *See* **Scandal. -v.** *t.* परि-अप-वद् 1 A, असूयति (with dat); अपभाष् 1 A, कलंकयति (D.), अभिशंस् 1 P; *See* **Defame, Libel. 2** सूच् 10, उपजप् 1 P, कर्णे जप्. **-er**, *s.* परि-अप-वादकः, अभि-,असूयकः, पिशुनः, सूचकः, कर्णेजपः, उपजापकः. **-ous**, *a.* पिशुन, साभ्यसूय, सपरिवाद, सापवाद, परिवाद-अपवाद-गर्भ, परिवादात्मक. **-ously**, *adv.* सापवादं, पिशुनं, सपरिवादं.

Slang, *s.* प्रलापः, अपभाषा, अश्लील-भाषणं, खलोक्ति *f.*

Slant,-ing, *a.* तिर्यच्, वक्र, कुटिल, तिरश्चीन; अवसर्पिन्, प्रवण; 'striking s.-ly with the tusks' तिर्यग्दंतप्रहारिन्; 's. blow' तिर्यक्प्रहारः. **-v.** *t.* आवृज् 10, वक्रीकृ 8 U, प्रवणीकृ. **-v.** *i.* वक्रीभू, अवसृप् 1 P, प्रवणीभू, आनम् 1 P. **-ingly**, *adv.* तिर्यक्, तिरः, साचि, तिरश्चीनं.

Slap, *s.* चपेटिका, चपेटः, तल or चपेट-प्रहारः or आघातः, आस्फोटनं. **-v.** *t.* चपेटेन प्रहृ 1 P or तड् 10 or आहन् 2 U, आस्फुट् c.

Slash, *v. t.* दीर्घं छिद् 7 P or कृत् 6 P, व्यवच्छिद्, वि-नि-कृत्, क्षतविक्षतीकृ 8 U. **-s.** दीर्घ-महा-छेदः, महाक्षतं-ति *f.* **-ing**, *a.* दीर्घच्छेदकारिन्; (fig.) अरुंतुद, मर्मच्छिद्-भिद्, तीक्ष्ण; *See* **Sharp.**

Slattern, *s.* वेशप्रमत्ता, अपरिष्कृतवेशा.

Slaughter, *v. t.* विशस् 1 P, हन् 2 P or c. (घातयति), व्या-पद् c., प्र-मी 9 U, आलभ् 1 A (beast); *See* **Kill. -s.** विशसनं, वैशसं, घातनं, प्रमाथः, कदनं, संहारः, प्रमापणं; *See* **Killing;** 's.-house' सू(शू)ना, वध्यस्थानं, वधभूमि *f.*, घातस्थानं. **-er**, *s.* घातकः, विशसितृ *m.*, सौ(शौ)निकः.

Slave, *s.* दासः, प्रेष्यः, चेटः, किंकरः, भृत्यः, दासेयः-रः, भुजिष्यः; *See* **Servant;** 'born a s.' गर्भदासः; 'domestic s.' गृहदासः; 'a female s.' दासी, चेटी, भुजिष्या; 's.-trade' दासविक्रयः; 's. dealer' दासविक्रयिन् *m.*; (fig.) दासः, or ex. by वश, अधीन in comp.; 's. to carnal passions' इंद्रियसुखवशगः, विषयसुखाधीनः; 's. to love' कामपरवशः. **-ry**, *s.* दास्यं, दासत्वं, दासभावः, दास्यवृत्ति *f.* **-ish**, *a.* दासवत् *adv.*, दास in comp., दासोचित; *See* **Servile.**

Slaver, *s.* *See* **Saliva.**

Slay, *v. t.* विशस् 1 P, हन् 2 P, व्या-पद् c., नृ c. **-er**, *s.* घातकः, हंतृ *m.*, हन् in comp.; *See* **Kill,-er.**

Sledge, *s.* अचक्रयानं.

Sledge-hammer, *s.* मुद्गरः, महाघनः.

Sleek, *a.* मृदु, श्लक्ष्ण, स्निग्ध, सुखस्पर्श.

Sleep, *v. i.* स्वप् 2 P, शी 2 A, संविश् 6 P, नि-द्रा 2 P, निद्रायते (D.); ‘I also do not s. over this matter’ मयाप्यस्मिन् वस्तुनि न शयानेन स्थीयते (Mu. 1.). **–***s.* निद्रा, स्वप्नः, स्वापः, सुप्ति *f.*, शयनं, संवेशः; ‘go to s.’ निद्रां या 2 P; *See* (*v.*); ‘fall into s.’ निद्रया आभिभू pass. or आक्रम् pass.: ‘he fell into a deep s.’ गाढनिद्राभिभूतः-विधेयः-बभूव; ‘death-s.’ घोर-काल-निद्रा; ‘roused from s.’ विनिद्र, भग्ननिद्र, प्रबोधित. **–er,** *s.* निद्रालुः, शयालुः, better by (*v.*). **–ing,** *s.* शयनं, निद्रा, &c.: ‘s.-house’ शयनमंदिरं-गृहं. **–***a.* निद्राण, शयित, शयान, सुप्त; ‘s. draught’ निद्राकरमौषधं. **-less,** *a.* नष्टनिद्र, उन्निद्र, अ-वि-निद्र, निर्णिद्र; ‘passes s. nights’ उन्निद्राः-उत्सन्ननिद्राः-क्षपा गमयति. **-lessness,** *s.* निद्रानाशः, निर्णिद्रता, निद्राभावः. **–y,** *a.* निद्रालु, शयालु, तंद्रालु, निद्राशील. **2** निद्राक्रांत, निद्रापर-वश-विधेय-अभिभूत-आकुल-ग्रस्त. **3** निद्रामद-जनन (नी *f.*), स्वापकर (री *f.*). **4** सुषुप्सु, शिशयिषु, शयनेच्छु; ‘to feel s.’ स्वप्-शी-desid.: ‘I feel s.’ निद्रयाऽपन्हिये-पराभूये, सुषुप्सामि.

Sleet, *s.* शीकरः, तुषार or शीकर-वर्षः or आसारः.

Sleeve, *s.* पिप्पलः; ‘to laugh in one’s s.’ अंतर् हस् 1 P.

Sleigh, *s. See* **Sledge.**

Sleight, *s.* (Of hand) हस्तलाघवं-कौशलं, माया, इंद्रजालं.

Slender, *a.* प्र-,तनु, कृश, क्षीण, क्षाम; ‘having a s. waist’, ‘s.-waisted’ क्षीण or तनु-मध्य or मध्यम, कृशोदर, मृग or सिंह-कटि or मध्य; ‘s.-waisted woman’ सुमध्यमा, कृशोदरी, तनुमध्या, वेदिविलग्नमध्या. **2** अल्प, क्षुद्र, लघु, तनु; ‘possessed of s. means’ क्षीणविभव. **–ness,** *s.* तनुता, कृशता, कार्श्यं, तानवं, अल्पता.

Sleuth, *s.* पदवी, पद्धति *f.*

Slice, *s.* खंडः-डं, शकलः-लं, छेदः, भागः, लवः. **–***v. t.* खंड् 10, छिद् 7 P, खंडशः छिद्.

Slide, *v. i.* अव-वि-सृप् 1 P; ‘s. up and down’ आरोहावरोहं कृ 8 U. **2** च्यु 1 A, स्खल् 1 P, भ्रंश् 1 A, 4 P. **–ing,** *s.* विसर्पः, अवसर्पणं, स्खलनं.

Slight, *a.* सु-,अल्प, स्तोक, क्षुद्र, तनु, लघु, ईषत् in comp.; ‘a s. blow’ लघुप्रहारः, ईषदाघातः; ‘in a s. degree’ ईषत्, किंचित्, मनाक्, स्तोकं, कियत्; ‘not in the s. est degree’ न मनागपि-किंचिदपि-स्तोकमपि. **–***v. t.* उपेक्ष् 1 A, अवधीर् 10, अव-ज्ञा 9 U, तृणीकृ 8 U, तृणाय मन् 4 A, अवमन् 4 A, अवगण् 10; *See* **Contemn.** **–***s.* उपेक्षा, अवधीरणं-णा, अवज्ञा, अवमानः, अनादरः, अवगणनं-ना. **–er,** *s.* उपेक्षकः, मंदादरः. **–ing,** *a.* सावज्ञ, अनादरपूर्वक, सावमान. **–ingly,** *adv.* सोपेक्षं, अनादरेण. **–ly,** *adv.* ईषत्, मनाक्, किंचित्, स्तोकं, अल्पमात्रं, by आ pr.: ‘s. blue’ आनील, ईषन्नील.

Slim, *a. See* **Slender.**

Slime, *s.* पंकः, श्यानकर्दमः, सांद्र-श्यान-पंकः. **–y,** *a.* श्यान, पंकिल, चिक्कण, सांद्र.

Sling, *s.* सृगः, भिंदि(द)पालः, गोफणा. **2** दोला, काचः, शिक्यं, भारयष्टि *f.* **–***v. t.* सृगेण क्षिप् 6 P or प्रास् 4 P. **2** उद्-बंध् 9 P, काचयति-आंदोलयति (D.).

Slink, *v. i.* अलक्षितं-निभृतं-अपया 2 P or अपगम् 1 P or अपसृप् 1 P or अपक्रम् 1 U, 4 P, छलेन अप-या, &c.

Slip, *v. i.* प्र-,स्खल् 1 P, (fig. also): वचनानि स्खलयन् पदे पदे (K. iv. 12) ‘making their words slip.’ &c.; चल् 1 P. **2** सहसा-अलक्षितं-अज्ञातः-निर्गम् 1 P or अपसृप् 1 P. **3** (Off) च्यु 1 A, प्र-,भ्रंश् 1 A, 4 P, स्रंस् 1 A, निर्-,गल् 1 P, पत् 1 P; ‘s. away’ व्यप-या 2 P, अपसृप्-गम्; *See* **Slink;** ‘s. in’ अलक्षितं आ-प्र-विश् 6 P; ‘let s. an opportunity’ अवसरं-समयं न ग्रह् 9 U or अवाक्षिप् 6 P. **–***v. t.* अलक्षितं नि-धा 3 U or प्र-नि-विश् c. **2** वि-,मुच् 6 P, क्षिप्, भ्रंश् c.; अवगण् 10, उपेक्ष् 1 A, च्यु c., त्यज् 1 P, *See* **Neglect.** **3** शिथिलीकृ 8 U, स्रंस् c., शिथिलयति (D.); *See* **Loose.** **–***s.* स्खलनं, स्खलितं, (fig. also); ‘s. as to names’ गोत्रस्खलितं; प्र-,भ्रंशः, च्युति *f.*, पतनं. **2** दोषः, प्रमादः, अपराधः, भ्रमः, स्खलितं. **3** विटपः, शाखा, पल्लवः, कांडः. **4** खंडः-डं. **–pery,** *a.* पिच्छिल, मेदुर, चिक्कण, स्निग्ध, श्लक्ष्ण; ‘s. ground’ निपत्या, पिच्छिलभूमिः. **2** अस्थिर, चल, लोल, तरल, अनवस्थित, चपल, चंचल; *See* **Fickle.**

Slipper, *s.* (लघु) पादुका, पादत्रं, उपानह् *f.*

Slit, *s.* दीर्घच्छेदः-भेदः-छिद्रं.

Slobber, *v. i.* लालां स्रु c.

Slop, *s.* (S. s) अधोंशुकं, अधोवसनं. **2** अमेध्यं-अपवित्रं-जलं, मलिनं-समलं-जलं. **3** कर्दमः, पंकः. **–***v. t.* इतस्ततः प्रमादात् पत् c. or क्षिप् 6 P. **–py,** *a.* पंकिल, अनूप, सकर्दम.

Slope, *v. i.* अवसृप् 1 P, प्रवणीभू 1 P, क्रमशः निम्नीभू. **–***v. t.* आवृज् 10, प्रवणीकृ 8 U. **–***s.* प्रावण्यं; प्रवणभूमिः, अवसर्पिणी भूमिः; क्रमशः निम्नता. **2** (Of a mountain) नितंबः, उत्संगः, कटकः-कं; ‘mountain s.’ गिरिनितंबः; अवसर्पिणी भूः. **–ing,** *a.* प्रवण, अवसर्पिन्, क्रमशः निम्न, पातुक.

Slot, *s.* छिद्रं. **2** कीलकः.

Sloth, *s.* तंद्रा, आलस्यं, तांद्रि-द्री *f.*, तांद्रिका, कार्यविमुखता. **-ful**, *a.* अलस, तांद्रिल, तंद्रालु; *See* **Lazy.**

Slouch, *v. i.* अलसं चल् or गम् 1 P. **-ing**, *a.* प्रलंब, निम्न.

Slough, *s.* निर्मोकः, कंचुकः, अहि-भुजंग-त्वच् *f.* 2 महापंकः, पांकिलस्थानं, पंकाढ्यस्थलं,

Sloven, *s.* अविनीत-अपरिष्कृत-वेशः. **-ly**, *a.* मलिन, अव्यवस्थित; अविनीत, अपरिष्कृत, अविनीत-अपरिष्कृत-वेश. **-liness**, *s.* अव्यवस्था, अपरिष्कारः, मालिन्यं.

Slow, *a.* मंद, (in all senses): मंदाग्निः, मंदगतिः, मंदमतिः, मंदविषं, &c.; मंदगतिगामिन्, अद्रुत; आक्षिप्र, अशीघ्र; मंथर; 'a mind s. to discriminate' मंथरविवेकं चेतः; 's. in recognizing' प्रत्यभिज्ञानमंथर (S. 4.). 2 विलंबित; कालातीत अतीतसमय; *See* **Late.** 3 मंदमति-धी-बुद्धि, जड or स्थूल-बुद्धि or मति, &c. *See* **Dull.** 4 दीर्घसूत्र-त्रिन्, चिरक्रिय; 's. time' विलंबितवृत्ति *f.*; 's. fever' जीर्णज्वरः. **-ly**, *adv.* मंदं, मंदं मंदं, मंथरं; शनैः, शनैः शनैः, अशीघ्रं, अद्रुतं, विलंबेन. **-ness**, *s.* मांद्यं, मंदता; विलंबः, दीर्घसूत्रता, &c.

Sludge, *s.* पंकः.

Slug, *s.* प्रक्षेपणी गुलिका. 2 मंदः, अलसः, जडः, तुंदपरिमृजः, शीतकः, आलस्यशीलः, तंद्रालुः, स्थूल-जड-मतिः. **-gard**, *s.* *See* s. 2 above. **-gish**, *a.* मंद, अलस, तंद्रालु, मंदगति, आलस्यशील; *See* **Dull.** **-ly**, *adv.* मंदं, अलसवत्. **-ness**, *s.* मांद्यं, आलस्यं, तंद्रा, जाड्यं.

Sluice, *s.* (जल-) प्रवाहः, प्रपातः. 2 द्वारं, परि(री)वाहः, जलनिर्गमः.

Slumber, *v. i.* प्र-,स्वप् 2 P; अनिर्भरं स्वप्; (fig.) अनुपयुक्त-अव्यापृत-*a.* स्था or भू 1 P. **-s.** लघु-अल्प-अगाढ-निद्रा.

Slur, *s.* कलंकः, दूषणं, अकीर्तिचिह्नं. **-v. t.** 'cast a s. on' कलंकयति-मलिनयति- (D.). मलिनीकृ 8 U, दुष् c. (दूषयति). 2 प्र-,छद् 10, गुह् 1 U

Slush, *s.* कर्दमः, सजलपंकः.

Slut, *s.* बंधकी, अविनीता, पुंश्चली; *See* **Prostitute**, **-tish**, *a.* अविनीत, अपरिष्कृतवेश.

Sly, *a.* धूर्त, कितव, कापटिक-छाद्मिक-(की *f*), समाय, सव्याज, वंचन-कपट-पटु. 2 चतुर, विदग्ध; 's. laugh' अंतर्हासः **-ly**, *adv.* चतुरं, धूर्ततया, वैदग्ध्येन, सव्याजं, समायं. 2 निभृतं, अलक्षितं. **-ness**, *s.* व्याजः, छलं, छद्मन् *n.*, कापट्यं, माया, धूर्तता, वैदग्ध्यं, चातुर्यं.

Smack, *v. t.* Ex. by गंध, स्वाद in comp.; आ-अव-भाष् 1 A; *See* **Savour.** **-v. t.** आ-,स्फुट् c.; आस्फल् c. 2 सशब्दं चुंब् 1 P. **-s.** आ-,स्वादः, रसः, गंधः. 2 आस्फोटनं, आस्फालनं; परुषस्वनः. 3 सशब्दचुंबनं.

Small, *a.* अल्प, स्तोक, (of quantity). 2 लघु, तनु, अणु, क्षुद्र; अल्प-क्षुद्र-तनु, अल्पशरीर, अगुरु, अबृहत्, अमहत्; oft. ex. by क affixed; *See* **Little**; 's. tree' वृक्षकः; 's. boy' बालकः &c. 3 (Voice) नीच, अगुरु; 's.-pox' मसूरी-रिका, विस्फोटकः; शीतला, वसंतरोगः (modern names).

Smart, *a.* तीक्ष्णमति, कुशाग्रबुद्धि, प्रदीप्तप्रज्ञ, चतुर; विदग्ध. 2 तीव्र, तीक्ष्ण, शीघ्र, द्रुत, लघु; आशु-शीघ्र-कारिन्. 3 (Speech &c.) सरस, मार्मिक (की *f.*), रसिक, रसगर्भ. 4 शोभन, सुवेश, प्रफुल्ल, सु pr. 5 (Pain &c.) तीव्र, तीक्ष्ण, उग्र, दुर्विषह; वेगवत्. **-s.** तीव्रवेदना, तीक्ष्णव्यथा-वेदना; शूलः-लं. **-v. i.** व्यथ् 1 A, तप् pass., तीक्ष्णव्यथां अनुभू 1 P; 'I am s. ing under the defeat' पराभवो मम हृदि प्रत्युप्तं शल्यमिव; न्यक्कारो हृदि वज्रकील इव मे तीव्रं परिस्पंदते (Vi. 5.). **-ly**, *adv.* तीक्ष्णं, तीव्रं, शीघ्रं, द्रुतं; लाघवेन, शोभनं, सु pr. **-ness**, *s.* तीव्रता, तीक्ष्णता; शीघ्रमतित्वं, मार्मिकता, सरसता; शोभा, &c.

Smash, *v. t.* चूर्ण् 10, वि-,मृद् 9 P, निष्पिष् 7 P, भंज् 7 P, प्रमंथ् 9 P, निर्दल् c. (दलयति); *See* **Break.** **-s.** प्रमाथः, निर्दलनं, विमर्दः, चूर्णनं, निष्पेषः-षणं.

Smatter, *v. i.* अल्पं ज्ञा 9 U, पल्लवग्राहि पांडित्यं कृ 8 U, किंचित् अवगम् 1 P. **-er**, *s.* चुंबकः, पल्लवग्राहिपंडितः; अल्पज्ञः. **-ing**, *s.* अल्पज्ञानं, पल्लवग्राहि पांडित्यं; oft. ex. by किंचित्, अल्पमात्रं; 's. of knowledge' अत्यल्पं ज्ञानं.

Smear, *v. t.* लिप् 6 P, वि-प्र-आ-अव-°, अभि-, अंज् 7 P or c., दिह् 2 U. **-ing**, *s.* लेपः-पनं, अंजनं.

Smell, *s.* घ्राणं; 'sense of s.' घ्राणेंद्रियं, घ्राणशक्ति *f.*, गंधग्रहणशक्तिः. 2 आ-,घ्राणं, गंधग्रहणं. 3 गंधः, वासः, आमोदः; *See* **Odour, Fragrance.** **-v. t.** घ्रा 1 P, आ-उपा-° **-v. i.** Ex. by गंध in comp. or सगंध-तुल्यगंध-*a.*; 's. ing of honey' मधुगंधि; 's. ing like fat' वसागंधि; 'the flower s. s sweet' मधुरोस्य कुसुमस्य गंधः; 'it s. s of smoke' धूमसगंधमेतत्. **-ing**, *a.* गंधग्राहिन्. 2 गंधयुत, सगंध, वासयुक्त.

Smelt, *v. t.* वि-ली c., वि-द्रु c. **-er**, *s.* लोहद्रावकः; लोहकारः.

Smile, *v. i.* स्मि 1 A, मंदं विहस् 1 P, ईषद् हस्, मंदस्मितं-मंदहास्यं-कृ 8 U; 's. on' अनुग्रह् 9 P; प्र-सद् 1 P, प्रसन्न-कृपार्द्रदृष्टि-*a.* भू (with loc.); 'fortune s. s on you' भाग्यशाली भवान्.

-*s*. स्मितं, मंदहासः-हास्यं-स्मितं, विहसितं, विहसनं; 'speaking with a s.' स्मितपूर्वाभिभाषिन्; 'with a s.' सस्मितं. **-ing,** *a*. स्मेर, सस्मित, स्मयमान, प्रसन्न, प्रफुल्ल; 's. sweetly' शुचिस्मित, चारुहासिन्; 'a s. countenance' स्मेर-हास्य-मुखं, प्रसन्न-प्रफुल्ल-वदनं. **-ingly,** *adv*. सस्मितं, विहस्य.

Smirch, *v. t.* मलिनीकृ 8 U.

Smirk, *s*. विकृतहासः, विलक्षस्मितं. **-*v. i*.** कृ 8 U with (*s*.)

Smite, *v. t.* हन् 2 P, प्र-हृ 1 P, तड् 10, नि-अप-कृ 8 U, तुद् 6 P; व्यध् 4 P; 's. en with anxiety' संस्पृष्टमुत्कंठया (S. 4); 's. en by love' मदनबाणहत, कामोपहत, कामार्त, मदनसंतप्त, अनंगपीडित. 2 हन्, मृ c., सूद् 10: *See* **Kill.** **-er,** *s*. हंतृ *m*. सूदनः, घातकः.

Smith, *s*. शिल्पिन् *m*., कारः in comp.; 'iron s.' लोहकारः, अयस्कारः; स्वर्णकारः, &c. **-ery, -y.** *s*. शिल्प-कर्म-शाला; लोहकारशाला.

Smock, *s*. (स्थूल) शाटकः, अधोवसनं.

Smoke, *s*. धूमः-मिका, धूपः-पिका; 'a quantity of s.' धूम्या; 'cloud of s.' धूमपटलं-ओघः. **-*v. t*.** (धूमनालीं) पा 1 P, सेव् 1 A. 2 धूमेन शुध् c. or शुष् c., धूप् 1 P, 10, धूम्रयति-धूमयति (D.). **-*v. i*.** धूमायते (D.), धूमं उत्क्षिप् 6 P or उद्-गॄ 6 P or निः-सृ c. or उत्सृज् 6 P; 's. ing food' धूमं विसृजत् (प्रोष्णं) अन्नं. 2 धूमनालीं पा. **-er,** *s*. धूमपाः, धूमपायिन्-सेविन् *m*. **-ing,** *s*. धूमपानं. 2 धूमोत्क्षेपः-पणं. **-less,** *a*. निर्धूम, धूमहीन-रहित. **-y,** *a*. सधूम, धूमावरुद्ध, धूमबहुल. 2 धूम्र, धूमाभ, धूमल, धूमाकार. 3 धूमगंध-स्वाद.

Smooth, *a*. सम; श्लक्ष्ण, मृदु (fig. also); स्निग्ध, मसृण, अरूक्ष; अपरुष, अकटु, अकर्कश (sound); 'by s. words' श्लक्ष्णया गिरा, सांत्ववादेन, मृदुभिर्वचोभिः; 'by s. remedies' सामोपायैः. 2 धारावाहिन्, विसारिन्, सततप्रवाहिन्; निरुपप्लव, निर्विघ्न, निरंतराय, निर्बाध, (business &c.); शांत, अक्षुब्ध, प्रसन्न, अनुत्तरंग, निर्वात (water). **-*v. t*.** समीकृ 8 U, श्लक्ष्णीकृ. 2 अविघ्न-*a*. &c. कृ, निर्विघ्नीकृ. **-ly,** *adv*. सुखेन, निर्विघ्नं, निरंतरायं, अनायासेन. **-ness,** *s*. श्लक्ष्णता, स्निग्धता, मृदुता, अक्षोभः, प्रसादः, &c.

Smother, *v. t.* श्वासं अव-नि-रुध् 7 U, श्वासावरोधं कृ 8 U. 2 प्रति-, स्तंभ् 9 P, निग्रह् 9 P, नियंत्र् 10, नियम् 1 P. **-ed,** *a*. रुद्धश्वास-प्राण.

Smoulder, *v. i.* अंतर् ज्वल् 1 P or स्फुर् 6 P or दह् pass., better by 's. ing'; 'just as a s.-ing tree bursts into flame' अंतःप्रसुप्तदहनो ज्वलन्निव वनस्पतिः (U. 4). **-ing,** *a*. अंतर्दाहिन्-ज्वालिन्, गूढदाहवत्, प्रसुप्तदहन.

Smudge, *v. t.* मलिनयति (D.): कृष्णी-अस्पष्टी-कृ 8 U, दिह् 2 U: **-*s*.** मलं, कलुषं, कलंकः.

Smug, *a*. शोभन, सुवेश.

Smuggle, *v. i.* प्रतिषिद्धानि भांडानि आहृ 1 P or आनी 1 P.

Smut, *s*. मसी, मलं. 2 अश्लीलवाच् *f*., दुरुक्तं, दुर्वचनं. **-*v. t*., Smutch,** *v. t.* मलिनीकृ 8 U, मलीमसीकृ, मलिनयति (D.). **-ty.** *a*. मलिन, मलीमस. 2 अश्लील, दुरुक्त, अवाच्य.

Snack, *s*. *See* **Share, Repast.**

Snaffle, *s*. लघुवल्गा.

Snail, *s*. शंबूकः, कोष-कवच-स्थः. 2 मंथरः.

Snake, *s*. सर्पः, भुजगः, भुजंगः-गमः, पन्नगः, अहिः, नागः, उरगः, उरंगमः, विषधरः, भोगिन् *m*., व्यालः, आशीविषः, फणिन् *m*., दर्वीकरः, जिह्मगः, पवनाशनः, कुंभीनसः, दंदशूकः, चक्रिन् *m*., द्विजिह्वः, द्विरसनः, सरीसृपः, कुंडलिन् *m*., गूढपाद् *m*., चक्षुःश्रवस् *m*., काकोदरः, दीर्घपृष्ठः, बिलेशयः; 'hooded s.' फणभृत् *m*. भोगधरः, भोगिन् *m*.; 's. without poison' राजि(जी)लः, डुंडुभः; 's. with a spotted skin' मालुधानः, मातुलाहिः; चित्रसर्पः; 'that has cast off his slough' निर्मुक्तः, मुक्तकंचुकः; 'his venom' क्ष्वेडः, गरलं, विषं; 'his hood' स्फटा, फटा, फणा, स्फोटा दर्वी; 'charmer of s. s' अ(आ)हितुंडिकः, व्यालग्राहिन् *m*. **-y,** *a*. (*s*.) in comp.; आहेय (यी *f*.).

Snap, *v. t.* (अकस्मात्) त्रुट् c., भंज् 7 P, खंड् 10, छिद् 7 P. 2 आ-, स्फल् c., सहसा ग्रह् 9 U or उद्-हृ 1 P. 3 अकस्मात् दंश् 1 P: 's. the fingers' अंगुलीः स्फुट् c., छोटिकां दा 3 U or कृ 8 U. **-*v. i*.** (सहसा) त्रुट् 4, 6 P, दल् 1 P स्फुट् 6 P. भंज्-भिद्-pass. 2 क्वण् 1 P. 3 भष् 1 P. 4 दंश् 1 P, दंतैः ग्रह् 9 U. **-*s*., -ping,** *s*. त्रोटनं, आस्फालनं, आस्फोटनं, आकस्मिकभंगः. 2 छोटिका, मुकु(चु)टी, अंगुलिभंगः. 3 आकस्मिकदंशः. **-pish,** *a*. दंशनशील, दिदंक्षु. 2 कर्कश, परुष, दुःशील, कुक्कुरस्वभाव.

Snare, *s*. पाशः, वागुरा, जालं; 'take in a s'. जाले बंध् 9 P; (fig.) उन्मार्गेण-अपथेन-प्रवृत् c. or गम् c. (गमयति) **-*v. t*.** पाशे पत् c., पातयित्वा बंध् 9 P, पाशीकृ 8 U; जाले बंध्.

Snarl, *v. i.* भष् 1 P, रै 1 P; गर्ज् 1 P. 2 परुष-कर्कशं-वद् 1 P. **-er,** *s*. भषकः, कर्कशः, भषशीलः-स्वभावः.

Snatch, *v. t.* (away) आच्छिद् 7 P, (कृपाणपातविषयात् आछिंदतः प्रेयसीं Mal.

5); आक्षिप्य ग्रह् 9 U, झटिति ग्रह् or कृष् 1 P or हृ 1 P or धृ 1 P, 10 or आ-कल् 10 (कलयति). **-at,** ग्रहीतुं प्रवृत् 1 A, सवेगं ग्रह् desid. (जिघृक्षति). **-off,** अपहृ, मुष् 9 P, चुर् 10. **-out,** उत्-कृष्, निर्हृ, उद्धृ, उन्मूल् 10, वि-उत्-पट् 10. **-up,** उत्क्षिप् 6 P, (उत्क्षिप्यैनां ज्योतिरेकं जगाम S. 5.). **-s., -ing,** *s.* आकस्मिकग्रहणं-धरणं; आच्छेदः, सहसा आकलनं. 2 अल्पांतर, अल्पावकाशः. 3 क्षण-आकस्मिक-प्रवृत्ति *f.*; ' by s. es ' खंडशः; ' s. es of moonlight ' कदाचित्कः चंद्रप्रकाशः. **-ing,** *a.* लोलुप, गृध्नु; *See* **Greedy.**

Sneak, *v. i. See* **Slink. -ing,** *a.* कुत्सितवृत्ति, अधम, कापुरुषवृत्ति; *See* **Mean.**

Sneer, *v. i.* (at) अव-उप-हस् 1 P (with acc.); सहासं अवज्ञां सूच् 10; अव-ज्ञा 9 U, अवमन् 4 A; *See* **Deride. -s.** अव-उपहासः; अवज्ञाहासः. **-ingly,** *adv.* सोपहासं, सावज्ञं.

Sneeze, *v. i.* क्षु 2 P. कृ 8 U with (*s.*) **-s., -ing,** *s.* क्षुतं, क्षवः, क्षवथुः, क्षुत् *f.*, हंजिः, छिक्का.

Snicker, Snigger, *v. i.* अंतर् हस् 1 P.

Sniff, *v. t.* नासाद्वारेण नि-श्वस् 2 P.

Snip, *v. t.* अग्रभागं-अग्रं-लू 9 U; *See* **Nip.**

Snipe, *s.* दीर्घचंचुः. 2 **Fool,** q. v.

Snivel, *s.* नासामलं, सिंहा(घा)णं-नं. **-v. i.** मलं स्रु c.; ' he s. s ' तस्य नसः मलं स्रवति.

Snob, *s.* सभ्यंमन्यः, भद्रमानिन् *m.*

Snooze, *See* **Nap.**

Snore, *v. t.* घर्घरायते (D.), घर्घररवं कृ 8 U. **-ings.** *s.* घर्घरः, घर्घररवः, क्रथनं.

Snort, *s.* फू(फु)त्कारः. **-v. i.** फूत्कृ 8 U, फुत्कारं मुच् 6 P.

Snot, *See* **Snivel.**

Snout, *s.* प्रोथः, नासा, पोत्रं.

Snow, *s.* हिमं, तुषारः, तुहिनं, प्रालेयं, अवश्यायः, नीहारः, मिहिका; ' flow of s. ' तुषारस्रुति *f.*, हिमनिष्यंदः; ' s.-drift, ' ' mass of s. ' हिमानी, हिमसंहति *f.*, हिमराशिः; ' s.-capped ' हिमावृतशिखर; ' s.-storm ' हिमवर्षः-संपातः. **-v. i.** हिमं वृष् 1 P, हिमकणान् मुच् 6 P. **-y,** *a.* हिमवत्, हैम(मी *f.*); तुषार-हिम-मय (यी *f.*), हिमावृत, (*s.*) in comp.; ' s. mountain ' हिमाद्रिः, तुहिनाचलः, &c. 2 हिमाभ, हिमवर्ण.

Snub, *v. t.* पराभू 1 P, अधिक्षिप् 6 P; प्रत्यादिश् 6 P, अधरीकृ 8 U, अपकृष् 1 P, वाचं रुध् 7 U; ' s. nose ' चिपिटनासा, नतनासिका; ' s.-nosed ' अवटीट, अवनाट, अवभ्रट, नतनासिक, चिपिट.

Snuff, *s.* नस्यं, नासाचूर्णं, क्षुत्करी; ' s.-box ' नस्यधानी, नस्याधारः. 2 दग्धवर्ति *f.*-तूला, छत्रं. **-v. t.** निश्वस् 2 P, अंतर् ग्रह् 9 U. 2 दग्धवर्ति अवच्छिद् 7 P, छत्रं अपनी 1 P; ' s. out ' निर्वा *See* **Extinguish. -ers,** *s.* वर्तिकर्तनी-छेदनी. **-y,** *a.* नस्यदूषित-मलिन.

Snuffle, *See* **Snort.**

Snug, *a.* सु-,संहत, सु-,प्रच्छन्न, सुगुप्त, आवृत, सुगूढ, सुसंश्लिष्ट, सुरक्षित. 2 सुखावह, हितकर (री *f.*), सुस्थ, सुस्थित, सुख, स्वस्थ. 3 निकटशायिन्. **-ly,** *adv.* सुखेन, यथासुखं; सुसंहतं, सुसंश्लिष्टं, सुगुप्तं. **-Snuggle,** *v. i.* निकटे-पार्श्वतः-शी 2 A

So, *adv.* तथा, एवं, तद्वत्, एवंविधं; इति, इत्थं. 2 ईदृक्, एतावत्, इयत् तथा, एतादृशं. 3 तत्, तेन, तस्मात्, ततः ' as-s. ' यथा-तथा; ' s.-that ' तथा-यथा; ' s. and so ' अमुक (की *f.*); मया ह्यमुकसूनुना लिखितं ह्यमुकेन (Y. II. 88) ' written by me s. and s., the son of s. and s. '; ' s.-called ' नाम, नामन् in comp.; ' s. far ' एतावत्, एतदवधि; एतावत्पर्यंतं; ' s. far as ' तावत्, oft. ex. by इति; *See* **As;** ' s. forth ' इत्यादि, एवमादि; ' s. long ' एतावत्काल यावत्, इयतो दिवसान्, इयंतं कालं; ' s. long as ' यावत्-तावत्; ' s. many ' इयत्, एतावत्; ' as many ' ' s. many ' यावत्-तावत्; ' s. much ' (*adv.*) तादृक्, ईदृक्, तथा; (*a.*) एतावत् इयत्; ' s. that ' येन, यथा; ' s. then ' एवं तर्हि, एतावता, एवं च; ' s. much as ' अपि, अपि तावत्; ' could not s. much as wet the tip of his bill ' चंच्वग्रमपि तावत् जलाक्लिन्नं कर्तुं नाशकत्.

Soak, *v. t.* (चिरं) मस्ज् c. (मज्जयति), जलेन सिच् 6 P, क्लिद् c., आ-प्लु c., अभ्युक्ष् 1 P. **-ed,** *a.* जल-सिक्त-क्लिन्न, अभ्युक्षित.

Soap, *s.* मार्जनलेपः; perhaps अरिष्टः, फेनिलः (s. berry plant). **-y,** *a.* चिक्कण, स्निग्ध.

Soar, *v. i.* उत्पत्-उद्गम् 1 P, उड्डी 1 A, ऊर्ध्वं विसृप् 1 P or डी; ' the aspirations of the great s. high ' उत्सर्पिणी महतां प्रार्थना (S. 7); ' high-s. ing hope ' दूराधिरोहिणी आशा (S. 5) **-er,** *s.* उड्डयनकृत् *m.* **-ing,** *s.* ऊर्ध्वगमनं, उड्डयनं, ऊर्ध्वारोहणं, दूराधिरोहणं.

Sob, *v. i.* सगद्गदं रुद् 2 P or क्रंद् 1 P, फु(फू)त्कृ 8 U. **-bing,** *s.* फु(फू)त्कारः, गद्गदः, सगद्गदाक्रंदनं. **-bingly,** *adv.* सगद्गदं, गद्गदगिरा.

Sober, *a.* शांत, धीर, गंभीर, स्थिर, स्थिरमति-बुद्धि, विचारशील. 2 अमत्त, अक्षीव, निर्मद. 3 (In drinking) पानाप्रसक्त, पानसंय-

मिन्, अनतिपायिन्. 4 मित, परिमित, नियत, समर्याद. -*v. t.* निर्मदीकृ 8 U, स्थिरीकृ, मदं अपनी 1 P, स्थैर्यं आ-पद् c. -**ed**, *a.* विगतमद, निर्मद, नष्टमद. -**ly**, *adv.* धीरवत्, गंभीरं, शांतचेतसा, विचारपूर्वं; सविवेकं. -**ness, Sobriety**, *s.* धीरता, गांभीर्यं, स्थैर्यं, विचारशीलता, सुविचारः; शांति *f.*, अनुद्वेगः, अरभसः. 2 अमत्तता, मदाभावः. 3 संयमः, निग्रहः, पानाप्रसक्ति *f.*, मितपानं.

Sobriquet, *s.* उपाधिः, उपनामन् *n.*

Sociable, *a.* संगमप्रिय, संसर्गप्रिय-शील, जनसंगशील, संवासप्रिय-शील. 2 सुजन, मधुरालाप, सुशील, संलापप्रिय, स्नेहबुद्धि. -**ness, Sociability**, *s.* संसर्गशीलता, जनसंगमप्रीति *f.*; सौजन्यं. सुशीलं, संलापप्रियता-शीलता.

Society, *s.* संगमः, संगः, संसर्गः, समागमः, सहवासः, संगति *f.*, संवासः, साहचर्यं. 2 श्रेणी, संघः. 3 समाजः, लोक or जन-समूहः or संघः, पंक्ति *f.*, सभा-संसद्-परिषद्-*f.*; admissible into s. ' पांक्त्य, पांक्तेय, सभ्य. -***Social***, *a.* सामाजिक, सांसर्गिक (की *f.*); oft. ex. by (*s.*) in comp.; 's. interest' समाजहितं; 's. intercourse' अन्योन्यसंघट्टनं, परस्परसंसर्गः-व्यवहारः. 2 **Sociable.** q. v. 3 संसर्ग or संगम-रूप or आत्मक.

Sociology, *s.* समाजशास्त्रं.

Sock, *s.* पादत्रं, (और्ण) पादत्राणं.

Socket, *s.* आधारः, पात्रं, भाजनं.

Sod, *s.* शाद्वलं, तृणावृतभूभागः.

Sodality, *s.* मंडलं, संघः. 2 धर्मपथः.

Sodden, *a.* अति-सिक्त-क्लिन्न; शून.

Sodomy, *s.* पुंमैथुनं, पुरुषमेहः, पायु-गुद-मैथुनं. -***Sodomite***, *s.* पुरुषमेहिन् *m.*, गुदमैथुनकृत्.

Sofa, *s.* पर्यंकः, मंचः, शय्या; शयनं, आसनं.

Soft, *a.* मृदु (in all senses); प्रकृत्या मृदुः, मृदुगीः, मृदु पुष्पं, मृदुरुपायः. &c.; 'even red-hot iron becomes s.' अभितप्तमयोपि मार्दवं भजते (R. viii. 43); 'neither very severe nor very s.' न खरो न च भूयसा मृदुः (R. viii. 9); कोमल, मृदुल, पेलव, सुकुमार, अप्रखर, अपरुष, अकठोर, अनुग्र, अकठिन, अकर्कश, सौम्य (disposition). 2 स्निग्ध, श्लक्ष्ण, मसृण, मृदु-सुख-स्पर्श; आशिथिल, अदृढ, अघन; (voice) मधुर, मृदु, मंजुल; (in mind) सुप्रतार्य, अल्पबुद्धि, बालिश. -*interj.* तूष्णीं भव, तूष्णीं, शांतं, नीचैः. -**en**, *v. t.* मृदूकृ 8 U, कृ with (*a.*) (with pity) दयार्द्रीकृ, वि-,द्रु c., करुणया द्रु c. 2 शम् c. (शमयति), प्र-,उप-°, सान्त्व् 10, लघूकृ, लघयति (D.); *See* **Alleviate.** -*v. i.* मार्दवं भज् 1 A, भू 1 P with (*a.*); मृदूभू, दयार्द्रीभू; प्र-,शम् 4 P *See* **Melt.** -**ening**, *a.* शांतिद, शांतिकर (री *f.*), शमक-न. -**ly**, *adv.* मृदु, कोमलं, समार्दवं, &c. 2 लघुगत्या, चपलं. 3 निःशब्दं, निभृतं, मंदं, शनैः, शनैः शनैः. -**ness**, *s.* म्रदिमन् *m*, मार्दवं, सौकुमार्यं, कोमलता, शैथिल्यं, मसृणता, माधुर्यं, &c.

So-ho, *interj.* हहो, भो भोः.

Soil, *s.* भूः, भूमि *f.*, प्र-,देशः, स्थलं-ली; (earth) मृद् *f.*, मृत्तिका, 'native s.' जन्मभूमिः; 'fertile s.' उर्वरा, सर्वसस्याढ्या; 'dry s.' मरुः, धन्वन् *m.*; 'barren and salt s.' ई(इ)रिणं; 'waste s' खिलं, अप्रहतभूमिः; 'stony s.' शर्करिलभूमिः. 2 मलः-लं, कल्कं, कलुषं-किट्टं, कलंकः. -*v. t.* मलिनीकृ 8 U, कलुषयति-मलिनयति-कलंकयति- (D.), दुष् c. (दूषयति). -**ed**, *a.* मलिनित; कलुषित, &c.; कल्किन्, मलिन, समल, लिप्त.

Sojourn, *v. i.* अव-स्था 1 A, स्वल्पकालं निवस् 1 P, प्रवस्, देशांतरं अधि-आ-वस्, प्रवासं-यात्रां-कृ 8 U. -*s.*, -**ing**, *s.* अवस्थानं, अवस्थिति *f.*, यात्रा, प्रवासः, अल्पकालनिवासः; 'the s. of life' संसारवृत्तिः, संसारयात्रा. -**er**, *s.* आगंतुकः, अवस्थायिन् *m.*, प्रवासी, यात्रिकः, परदेशसेवी.

Solace, *v. t.* सां(शां)त्व् 10, आ-समा-श्वस् c.; परितुष् c.; (oneself) विनुद् c., वि-हृ 1 P. -*s.* सान्त्वनं-ना, आश्वासनं, विनोदः-दनं, क्लेश or शोक-शांति *f.* or अपहरणं; *See* **Comfort, Console.**

Solar, *a.* सौर (री *f.*), सावन (नी *f.*); सूर्य, अर्क (**Sun**, q. v.) in comp.; 's. heat' सूर्यातपः; सूर्यवंशः, सूर्यग्रहणं, अर्कबिंबं, &c.

Solder, *v. t.* सं-धा 3 U. -*s.* संधिः, धातुलेपः.

Soldier, *s.* सैनिकः, योधः, भटः, आयुधिकः, योद्धृ *m.* शस्त्र or अस्त्र-धरः-भृत् *m.*-जीविन् *m.* -आजीवः, शस्त्र-युद्ध-उपजीवी. -**like**, -**ly**, *a.* सैनिकवत्, सैनिक इव, सैनिकयोग्य. 2 शूर, विक्रांत; *See* **Brave.** -**y**, *s.* सेना, बलं, सैन्यं, योध-सैनिक-समूहः, भटगणः.

Sole, *a.* एक with एव; एकाकिन्, केवल. -*s.* तलं, पादतलं; (of shoe) पादुकातलं. -**ly**, *adv.* एक-*a.* with एव or simply एव; केवलं.

Solecism, *s.* संस्कारच्युति *f.*, अपप्रयोगः, अशुद्धप्रयोगः, म्लेच्छितं.

Solemn, *a.* पुण्य, पवित्र; विधिपूर्व, संस्कारसहित, धर्मसंस्कारयुक्त. 2 गुरु, गंभीर, धीर, उदात्त, (occasion) अलघु, गुर्वर्थ; oft. ex. by उत्सव in comp.; 's. occasions' उत्सवदिवसाः; 's. procession' यात्रोत्सवः. 3 दृढ, दृढप्रतिज्ञापूर्व, सनिश्चय, स्थिरनिश्चयात्मक; 'a s. promise' दृढप्रतिज्ञा. -**ity**, -**ness**, *s.* क्रिया, संस्कारः, धर्म-पुण्य-क्रिया, विधिः, उत्सवः. 2 गांभीर्यं, गुरुत्वं, गौरवं. 3

आडंबरः. -ize, *v. t.* यथाविधि अनु-ष्ठा 1 P or सं-पद् c., यथाशास्त्रं निर्वह् c. 2 गौरवं उत्पद् c. or आवह् 1 P. -ly, *adv.* यथाविधि, विधिवत्, यथाशास्त्रं, विधिपूर्वं. 2 साडंबरं; धीरं, गौरवेण, सगौरवं, गंभीरं, &c.

Solicit, *v. t.* याच् 1 A, प्र-अभि-अर्थ् 10 A, सविनयं याच् or प्रच्छ् 6 P. **-ation**, *s.* याच्ञा, प्रार्थनं-ना, याचना, सविनयप्रार्थना. **-or**, *s.* याचकः, अर्थिन् *m.*, प्रार्थयितृ *m.*, प्रार्थकः. **-ous**, *a.* उत्सुक, सचिंत, सोत्कंठ, व्यग्र, उत्क in comp.; उद्विग्न, चिंताक्रांत. **-ously**, *adv.* उत्सुकं, सोत्कंठं. **-ude**, *s.* व्यग्रता, चिंता, उत्कंठा, औत्सुक्यं, उद्वेगः.

Solid, *a.* ससार, सारवत्, वास्तविक (की *f*). 2 अशून्य, सगर्भ, पूर्णगर्भ. 3 ,घन, सु-,दृढ, दृढसंधि; सु-,संहत, स्थूल, कठिन, संघातवत्; अद्रव; अग्निसंयोगाद् द्रवभावापत्त्या काठिन्यविनाशो भवति (S. B. 545) 'lose their s. state' &c. 4 (Knowledge) अगाध, परिपक्व, सुदृढ, सुपरिणत. **-s.** घनः; 's. contents' घनफलं. 2 संघातः, घन-अद्रव-द्रव्यं. **-ify**, *v. t.* घनीकृ 8 U, कठिनीकृ. **-ity, -ness**, *s.* घनता, काठिन्यं-दृढता, &c.

Soliloquy, *s.* स्वगत or आत्मगत-भाषणं or वचः. **-Soliloquize**, *v. i.* स्वगतं &c. वच् 2 P, (*Say* q. v.)

Solitary, *a.* विविक्त, निर्जन, विजन, निभृत, एकांत; (of persons) विविक्त or एकांत वासिन् or सेविन्, विविक्तप्रिय, एकचर, निःसंग; एक, एकाकिन्, असहाय. 2 **Single**, q. v. **-s.** विविक्तवासिन् *m.*, परिव्राज् *m.* **-ily**, *adv.* विविक्तं, निभृतं, रहः, उपांशु. **-iness, -Solitude**, *s.* विविक्तं, निर्जनं-विजनं-स्थानं, रहःस्थानं, विजनं, अरण्यं. 2 विजनता, निर्जनता, विविक्तता. 3 विविक्ताधिवासः, विविक्तवृत्ति *f.*-सेवा, संसर्गाभावः.

Solstice, *s.* अयनांतः, अयनं, अयनकालः-संधिः, क्रांति *f.*,-कालः; 'summer s.' कर्कसंक्रांतिः, उत्तरायणं; 'winter s.' मकरसंक्रांतिः, दक्षिणायनं. **-Solstitial**, *a.* (*s.*) in comp.; 's. point' अयनांतः.

Solve, *v. t.* व्याकृ 8 U, विवृ 5 U; शुध् c., वि-परि-,° व्या-ख्या 2 P, विशदीकृ, साध्-सिध् c. (साधयति), उप-प्रति-पद् c.; 's. the difficulties' विषमपदानि शोधयति-विमर्शयति. 2 (Question) उत्तरं दा 3 U or वद् 1 P; 's. doubt' संशयं छिद् 7 P or निराकृ or निरस् 4 U or अपनी 1 P. 3 वि-,द्रु c., वि-,ली c. **-ency**, *s.* समृद्धता, ऋणशोधनक्षमता. **-ent**, *a.* समृद्ध, सधन, ऋणशोधनक्षम. 2 द्रावण (णी *f.*), द्रावक. **-s.** द्रावणं. **-Soluble**, *a.* वि-,द्राव्य, विलाप्य, द्रवार्ह. **-Solution**, *s.* साधनं, विवरणं; &c.; व्याख्या, व्याख्यानं, सिद्धि *f.*, उपपत्ति *f.* 2 द्रावणं, विलयनं. 3 सं-,योगः.

Sombre, *a.* श्याम, मलिन, धूसर, मंद-मलिन-प्रभ.

Some, *a.* किम् (कः-का-किं) with चित्, चन, अपि, or अमुक in comp.; 'the son of s. one' अमुकसूनुः. 2 (Quantity) किंचित्, कियत्, ईषत्, अल्प, स्वल्प, स्तोक; 'to s. extent' किंचित्, ईषत्, कियतांशेन, स्तोकांशेन; 's.-others' एके or केचित्-अन्ये-अपरे. 3 (Number) कतिचित्, कतिपय (यी-या *f.*); 'going s. steps' कतिचित् पदानि गत्वा; 's. how' कथमपि, केनापि प्रकारेण, कथं कथमपि, कथंचित्, यथाकथंचित्; 's. how or other' येन केन प्रकारेण; 's. one,' 's.-body' कश्चित्, कोपि, यःकश्चन; अमुकः, &c.; 's.-thing' यत्किंचित्, किमपि, किंचन, किंचित्; 's.-thing is better than nothing' बधिरान्मंदकर्णः श्रेयान्; 's.-time' पूर्वं, एकदा, पुरा, प्राक्, गतकाले, पूर्वकाले; 's.-times' क्वचित, कदाचित्, कदापि, कर्हिचित्; कदा कदा, काले काले; 's.-what' किंचित्; किंचन, अल्पं, स्तोकं; (*adv.*) किंचित्, ईषत्, स्तोकं, आ pr., देश्य-देशीय-कल्प in comp.; or by doubling *adj.*; 's.--what red' आताम्र, ताम्रकल्प, ईषद्रक्त; 's.-what afraid' भीतभीत इव; 's.-where' क्वापि, कुत्रचित्, कुत्रापि, यत्र कुत्रचित्, यत्र कुत्रापि.

Somer-sault, -set, *s.* ऊर्ध्वपादलंघनं.

Somnambulate, *v. t.* निद्रायां or स्वप्ने चर् 1 P. **-Somnambulism**, *s.* निद्राचारः-भ्रमणं, स्वप्नचारः. **-Somnambulist**, *s.* निद्राचारः, स्वप्नचारिन् *m.*

Somniferous, *a.* स्वाप-निद्रा-जनन (नी *f.*), निद्राकृत्, स्वापकर (री *f.*).

Somniloquist, *s.* निद्रालापिन् *m.*, निद्राभाषी.

Somnolent, *a.* निद्रालु, निद्रालस; *See* **Sleepy**.

Son, *s.* पुत्रः, सुतः, तनयः, सूनुः, आत्मजः, आत्मसंभवः, नंदनः, अंगजः, तनु(नू)जः, दारकः, कुमारः; oft. ex. by deriv.; 's. of Dasaratha' दाशरथिः; गांगेयः, पांडवः, &c.; 's.-in-law' जामातृ *m.* **-less**, *a.* अपुत्र, निपुत्रिक, निःसंतान.

Song, -ster, *s.* *See* under **Sing**.

Sonnet, *s.* गीतिका, गाथा, लघुगीतं-काव्यं.

Sonorous, *a.* मधुर, मंजुल. 2 व्यक्त, स्पष्ट, परिस्फुट, व्यक्तवर्ण. 3 विराविन्, उच्च, सुस्वर, शब्दवत्, घोषण, शब्द-ध्वनि-कर (री *f.*). **-ly**, *adv.* मधुरं, स्पष्टं; उच्चैः, महाशब्देन. **-ness**, *s.* माधुर्यं, स्पष्टता, उच्चता, सुस्वरता.

Soon, *adv*. अचिरेण, अचिरात्, अविलंबं, आशु, सद्यः, झटिति, सपदि; द्राक्, द्रुतं; *See* **Quickly**; 'as s. as' (so s.), 'no s.-er than' ex. by यावत्-तावत्, च-च, मात्र in comp.; *See* **Scarcely**. **-er**, *adv*. वरं; शीघ्रं; 's. or later' अद्य श्वो वा; 'this is s. said than done' वक्तुं सुकरमिदं न तु कर्तुं.

Soot, *s*. कज्जलं, किट्टं, मसी-षी. **-y**, *a*. कज्जलमय (यी *f*.), धूम्रश्याम.

Sooth, *s*. सत्यं, तथ्यं; 'in s.' सत्यं, नाम, यत्सत्यं, नूनं खलु, सत्यमेव; 's.-sayer' दैवज्ञः, गणकः, मौहूर्तिकः. 's.-saying' शुभाशुभकथनं, दैवपरीक्षा-चिंतनं.

Soothe, *v. t*. शम् c. (शमयति), प्र-उप-°, लघूकृ 8 U, लघयति (D.), निर्वा c. (वापयति); (persons) लल् 10, अनुनी 1 P, सांत्व् 10, प्र-सद् c., परि-तुष् c., आराध् c., परामृश् 6 P (by stroking), आश्वस् c. **-ing**, *a*. शमन (नी *f*.), शांतिकर (री *f*.), शांतिप्रद, निर्वापयितृ, तापहर-हारिन्. 2 सांत्वक, आश्वासनशील; 'by s. words' सांत्वनीगरा, सामवचोभिः. -*s*. प्र-उप-शमनं, निर्वापणं, सांत्वनं, अनुनयः, लालनं.

Sop, *s*. पिंडः, अक्तं, पिष्टकखंडः.

Sophism, **Sophistry**, *s*. हेत्वाभासः, युक्त्याभासः, पक्षाभासः, आभासः, सत्याभासः, वाक्छलं. **-Sophist, -er**, *s*. हेत्वाभासवादिन् *m*., तार्किकः. **-ic, -ical**, *a*. आभासरूप, हेत्वाभासरूप, सत्याभास. **-Sophisticate**, *v. t*. **Adulterate**, q. v.

Soporific, **Soporiferous**, *a*. निद्राजनन-स्वापन-(नी *f*.), निद्रा-स्वाप-कर (री *f*.), निद्रावह.

Sorcery, *s*. ऐंद्रजालं, माया, कुसृति *f*., योगः, अभिचारः (black art). **-er**, *s*. ऐंद्रजालिकः, मायाकरः, अभिचारविद्. **-ess**. *s*. योगिनी, मायिनी, अभिचारिणी.

Sordid, *a*. नीच, कृपण, कुत्सित, अधम, दीन, जघन्य, निंद्य; *See* **Mean**. 2 मलिन, मलीमस.

Sore, *s*. क्षतं, व्रणः-णं, अरुस् *n*., ईर्मं. -*a*. सरुज, जातव्यथ, दुःखित, क्षत, सव्रण; सवेदन, सव्यथ, स्पर्शासह. 2 पीडाकर (री *f*.), कष्ट-क्लेश-प्रद, दुःखद. 3 उग्र, तीव्र, दारुण, गुरु; 's. throat' कंठपाकः, कंठरुज् *f*. **-ly**, *adv*. भृशं, अतीव, नितांतं, उग्रं, दारुणं, सुतरां, बलवत्.

Sorrel, *s*. चुक्रः, सहस्रवेधिन् *m*., अम्लवेतसः, शतवेधी. -*a*. पिंगल, पिशंग.

Stimulate, *v. t.* उत्तिज् c., प्रोत्सह् c., प्रचुद् 10, प्रवृत् c., प्ररुच् c., उद्दीप् c., (शक्तिं-तेजः-) वृध् c. **-ing,-Stimulant,** *a.* दीपक-न, उत्तेजक, प्ररोचक, तेजोवर्धिन्, प्रवर्तक, प्रोत्साहक. **-***s.* दीपनं-कं, प्र-,रोचनं, जीवनीयं, उत्तेजकं, प्रवर्तकं &c. **-ion,** *s.* प्र-उद्-दीपनं, प्रोत्साहः-हनं. **-Stimulus,** *s.* दीपनं, प्रोत्साहः-हनं, प्रचोदनं, उत्तेजनं, &c.; 'give s. to' वृध् c. &c.

Sting, *v. t.* दंश् 1 P. 2 अत्यंतं पीड् 10 or व्यथ् c. (व्यथयति), मर्माणि भिद्-छिद् 7 P or स्पृश् 6 P. **-***s.* दंशः, दंशचंचु *f.*, कंटकः, शंकुः, (of a scorpion) अलं. 2 मर्मन् *n.*, रसः. **-ing,** *a.* कटु, दंशक, मर्मस्पृश्, अरुंतुद.

Stingy, *a.* कृपण, बद्धमुष्टि, दानविरक्त, अमुक्तहस्त, क्षुद्र, कदर्य. **-ily,** *adv.* कृपणं, बद्धमुष्ट्या. **-iness,** *s.* कार्पण्यं.

Stink, *s.* पूति *f.*,-गंधः, दुर्गंधः. **-***v. i.* Ex. by 's. ing' with भू. **-ing,** *a.* पूतिगंधि, दुर्गंध, कुत्सितगंध, पूति.

Stint, *v. t.* नियम् 1 P, निबंध् 9 P निग्रह् 9 P, संहृ 1 P, परि-मा 3 A, 2 P, परिच्छिद् 7 P. **-***s.* परिमाणं, परिमिति *f.*, नियमः-मनं, इयत्ता, मर्यादा; *See* **Limit.**

Stipend, *s.* वेतनं, वृत्ति *f.*, वर्तनं, भृति *f.* **-Stipendiary,** *s.* वृत्ति-वेतन-भुज् *m.*, वृत्तिग्राहिन् *m.*, वैतनिकः.

Stipulate, *v. i.* समयं-संविदं-कृ 8 U, नियम् 1 P; प्रतिपद् 4 A, परि-,पण् 1 A, प्रतिज्ञा 9 A, अभ्युपगम् 1 P, -इ 2 P. **-ed,** *a.* नियत, नैयमिक- सामयिक-(की *f.*), प्रतिज्ञात, संकेतित, निरूपित, निर्दिष्ट. **-ion,** *s.* समयः; संविद् *f.*, अभिसंधिः, नियमः, पणः; संकेतः, प्रतिज्ञा.

Stir, *v. t.* चल् c., सं-वि-°; *See* **Move;** 'when the fuel is s. ed, the fire blazes up' ज्वलति चलितेंधनोऽग्निः (S. 6). 2 आ-वि-लुड् c, क्षुभ् c, (of water); मंथ् 9 P or c., आ-धू 5, 9 U; (up) सं-, क्षुभ् c., उत्तिज् c., प्रकुप् c.; उद्दीप् c., प्रवृत् c., प्रणुद् c.; *See* **Excite, Prompt.** **-***v. i.* क्षुभ् 4 P, 1 A, चल् 1 P, उद्विग्न-संक्षुब्ध-*a.* भू 1 P. **-***s.* संक्षोभः, संभ्रमः, चलनं, धूननं, विप्लवः, तुमुलं. **-ring,** *a.* प्रक्षोभिन्, प्रकोपक, उद्दीपक.

Stirrup, *s.* पादग्रहणी-धारणी.

Stitch, *v.t.* सिव् 4 P; *See* **Sew;** संश्लिष् c. **-***s.* गुणः, सूचिमार्गः-अंकः. 2 शूलः-लं; 'a s. in time saves nine' स्वल्पोऽपि कालकृतो यत्नः महांतं उत्तरकरणीयं यत्नं व्यावर्तयति. **-ing,** *s.* सी(से)वनं, स्यूति *f.*

Stock, *s.* मूलं, मूलधनं, परिपणः; नीवि-वी *f.*; 'common s.' गणद्रव्यं. 2 त्सरुः, दंडः, वारंगः, मुष्टि *m. f.* 3 संचयः, राशिः, संभारः, सामग्री; 's. in cattle' गोधनं, पशुसंपत्ति *f.* 4 मूलं, प्रसूति *f.*, वंशः, कुलं, अन्वयः. 5

प्र-,काण्डः-ण्डं, स्कंधः. 6 स्तंभः, स्थाणुः. 7 (S.s) निगडः, हडिः; ‘s.-dove’ कपोतः; *See* **Dove**; ‘s.-still’ स्थिर, स्थाणुरिव अचल. -*v. t.* सं-भृ 1, 3 U, संचि 5 U, समाहृ 1 P, राशीकृ 8 U, उपक्लृप् c., परि-,पूर् 10. -*a.* मूल in comp., प्रधान, विशिष्ट; ‘s. instance’ मूर्धाभिषिक्तमुदाहरणं. **-Stockade,** *s.* स्तंभपंक्ति *f.*, शंकुवरणः.

Stocking, *s.* चरणच्छदः, पादावरणं, पादत्रं-त्राणं.

Stodgy, *a.* मंद, जड. 2 नीरस. 3 दुष्पच.

Stoic,-al, *a.* निःस्पृह, जितेंद्रिय, निःसंग, समबुद्धि-चित्त, सुखदुःखानधीन, समसुखदुःख, इंद्रियानायत्त. **-ally,** *adv* औदासीन्येन, निःसंगं, वीतस्पृहं. **-ism,** *s.* निःस्पृहता, औदासीन्यं, आत्मसंयमः, इंद्रियजयः, सुखदुःखसमता.

Stoke, *v. t.* चल् c.

Stolid, *a. See* **Stupid.**

Stomach, *s.* जठरः-रं, पक्वाशयः, कोष्ठः, अन्नाशयः, आमाशयः; उदरं, पिचं(चिं)डः. 2 रुचि *f.*, ex. by **Like,** q. v. 3 औद्धत्यं, दर्पः; *See* **Haughtiness.** -*v. t.* वि-,सह् 1 A, मृष् 4 P, 10. **-ic,** *a.* अग्निदीपन-वर्धन (नी *f.*), उत्तेजक, अग्निद, दीपक, रुचक, पाचक. 2 जाठर (री *f.*). -*s.* दीपनं, रुचकं, अग्निवर्धनं.

Stone, *s.* शिला, पाषाणः, अश्मन् *m.*, प्रस्तरः, उपलः, ग्रावन् *m.*, दृषद् *f.*, शर्करा. 2 (Of fruits) अस्थि *n.*, अष्ठि *f.*, अष्ठीला. 3 (In the bladder) अश्मरी, मूत्रकृच्छ्रं. 4 **Testicle,** q. v. ‘s.-blind’ घनांध; ‘s.-cutter’ औपलिकः, आश्मिकः, पाषाणदारकः; ‘s.-hearted’ पाषाणहृदय, अश्महृदय, निर्दय, कठोर; ‘s.-horse’ बीजाश्वः; ‘s.-pit’ ‘s.-quarry’ प्रस्तरखनि *f.*-आकरः. -*a.* **Stony,** q. v. -*v. t.* लोष्टघातं-उपलैः-हन् 2 P or व्या-पद् c. **-y,** *a.* उपलसंकुल-बहुल-आकीर्ण. 2 औपल (ली *f.*), शिला-प्रस्तर-मय (यी *f.*), शार्कर (री *f.*), आश्मिक (की *f.*), शर्करिल, श(शा)र्करिक (की *f.*). (*s.*) in comp.; ‘s. seat’ शिलासनं. 3 प्रस्तरनिभ-तुल्य-समान.

Stool, *s.* पीठः-ठं, आसनं, पाद-चरण-पीठं. 2 उच्चारः, रेकः, मलोच्चारः, पुरीषोत्सर्गः; ‘to pass s. s’ उच्चर् 1 P, पुरीषं उत्सृज् 6 P.

Stoop, *v. i.* गात्रं नम् c. or आवृज् 10, नम् 1 P, अव-आ-प्र°-, प्रह्वीभू 1 P, नम्रीभू, प्रवणीभू. 2 **Condescend,** q. v. -*v. t.* आवृज्, नम् c., नम्रीकृ 8 U, प्रह्वीकृ. -*s.*, **-ing,** *s.* नति *f.*, नमनं, आ-अव-प्र°. **-ing,** *a.* नत, प्रवण, प्रणतिप्रवण; अव-,नम्र, प्रह्व, नतांग, अवनतकाय, प्रणताशिरस्; ‘a s. posture’ नतिः, वैतसी वृत्तिः.

Stop, *v. t.* वि-,स्तंभ् 9 P or c., अव-स्था c. (स्थापयति), रुध् 7 U, नि-प्रति-अव-सं°, प्रति-बंध् 9 P; पि-धा 3 U (ears &c.); ‘s.s the chariot’ रथं स्थापयति. 2 निवृ c., बाध् 1 A, प्रति-वि-हन् 2 P, प्रति-नि-षिध् 1 P, विच्छिद् 7 P. 3 निवृत् c., विरम् c., विश्रम् c., प्र-उप-शम् c. -*v. i.* प्र-उप-शम् 4 P, विरम् 1 P, निवृत् 1 A; स्था 1 P, अवस्था (A), निश्चल-स्थिर-स्तब्ध-रुद्ध-गति- *a.* भू 1 P; *See* **Cease, End.** 2 विश्रम् 4 P (rest); ‘the evil does not s. here’ नैतावता पीडा निष्क्रामति (S. 2). -*s.*, **-ping,** *s.* स्तंभः, स्तंभनं, प्रतिष्टंभः, प्रतिबंधः, अव-नि-प्रति-रोधः, पिधानं; विष्टंभः, याननिवृत्ति *f.*, विरामः; ‘put a s. to’ *See* (*v.*), often by विरम् with abl. 2 अव-,स्थिति *f.*, विरामः, प्रशांति *f.*, विश्रांति *f.*, वि-,निवृत्तिः, विच्छेदः, भंगः, विरति *f.*, 3 (In music) यति *f.*, अवसानं, विरामः. 4 विरामः,-चिह्नं,-बिंदुः, अवसानचिह्नं. **-page,** *s.* प्रतिबंधः, प्रतिष्टंभः; *See* (*s*); ‘s. of any organic function’ अव-,रोधः, आ-,नाहः, बंधः. **-per, -Stopple,** *s.* रोधः, अवष्टंभः.

Storax, *s.* शिलाजं, शिलाकुसुमं-पुष्पं.

Store, *v. t.* संभृ 1, 3 U, समाहृ 1 P, संचि 5 U, संग्रह् 9 P, संपूर् 10, पृ c. -*s.*, **-age;** *s.* संभारः, संचयः, राशिः, संग्रहः, समाहारः, सामग्री, निधिः, निधानं, कोशः-षः, संघातः. 2 **Store-house,** q. v.; ‘s.-house’ कोषः, भांडारं; कोष्ठः; ‘s.-keeper’ कोषाध्यक्षः-पालः; ‘s.-house of corn’ कुशूलः, धान्यकोष्ठः.

Stork, *s.* सारसः, बकः, बलाकः, क्रौंचः.

Storm, *s.* वात्या, चंडवातः, प्रभंजनः, महा-अति-वातः, वात्यावेगः, प्रकंपनः, दुर्दिनं, झंझावातः (with showers). 2 संरंभः, संक्षोभः. 3 लंघनं, अवस्कंदः-दनं -*v. t.* आ-अव-स्कंद् 1 P, लंघ् 1 A, 10, सहसा आपत् 1 P or ग्रह् 9 U or रुध् 7 U. -*v. i.* **Rage,** q. v. **-y,** *a.* प्रचंडवात वात्याकुल, वाताहत, पवनक्षुब्ध, अतिवातविशिष्ट; ex. by (*s.*); ‘it is s. weather to-day’ अद्य प्रभंजनः सर्वतो वाति, दुर्दिनमद्य; ‘s. sea’ क्षुब्धार्णवः. 2 संरब्ध, संक्षुब्ध, संक्षोभित.

Story, *s* कथा, वृत्तांतः, आख्यानं, उपाख्यानं, उप-परि-कथा, आख्यायिका; ‘historical s.’ इतिहासः चरित्रं-तं; ‘remaining only in s.’ कथीकृत, कथावशेषीकृत, कथाशेष. 2 वस्तु *n.*, कथानकं (of dramas &c.). 3 भूमि *f.*; सप्तभूमिकः प्रासादः ‘a palace having 7 s. es’; ‘ground s.’ तलं; ‘s.-teller’ कथकः. **-ied,** *a.* सभूमि-मिक. 2 इतिहासप्रसिद्ध.

Stout, *a.* महा-स्थूल-काय, बृहच्छरीर, मांसल, स्थूलशरीर, प्रबल, महाबल, बलवत्. 2 धीर, विक्रांत, शूर, प्रगल्भ (heart). **-ness,** *s.* शरीरस्थूलता, मांसलता.

Stove, *s.* चुल्लि-ल्ली *f.*, अधिश्रयणी, अग्निकुंडं, अश्मंत, उद्धानं, अंतिका.

Stow, *v. t.* (कोशे) निविश् c., नि-धा 3 U, स्था c. (स्थापयति); *See* **Store,** also.

Straddle, *v. i.* प्रगतजंघ *a.* स्था 1 P.

Straggle, *v. i.* व्यभिचर् 1 P, विभ्रम् 1, 4 P. मार्गात् प्र-वि-चल् 1 P or च्यु 1 A or भ्रंश् 1 A, 4 P. **-er,** *s.* भ्रष्ट-भ्रांत-पथः, व्यभिचारिन् *m.*, नष्टपथः.

Straight, *a.* सरल, ऋजु, अजिह्म, अकुटिल, अभुग्न, अवक्र, समरेख, अनराल, प्रगुण, अंजस; ' the s.-stemmed lotus ' अनरालनालनलिनी. **-***adv.*, ' s.-way ' सपदि, अनंतरमेव; सद्यः, तत्कालं, अविलंबितं. 2 सरलं, अवक्रं, ऋजु. **-en,** *v. t.* ऋजूकृ 8 U, सरलीकृ. **-ly,** *adv.* सरलं, अवक्रं, ऋजुतया, &c. **-ness,** *s.* सारल्यं, आर्जवं, अकौटिल्यं. **-Straightforward,** *a.* ऋजु, सरल, शुचि, ऋजु-सरल-प्रकृति; *See* **Honest.** **-ly,** *adv.* सरलं, अवक्रं, ऋजुतया; स्पष्टं, व्यक्तं. **-ness,** *s.* आर्जवं, सारल्यं, दाक्षिण्यं.

Strain, *v. t.* आयस् c., अत्यंतं आकृष् 1 P; ' s. every nerve ' सर्वात्मना प्रयत् 1 A. 2 अत्यंतं तन् 8 U, अतितानेन अभिहन् 2 P; *See* **Sprain.** 3 (Juice) निष्पीड् 10, निर्गल् c., निष्कृष्. 4 (Filter) शुध् c., पू 9 U, विमलीकृ 8 U, स्रु c.; ' should s. through a cloth ' स्रावयेत् पटात्. 5 (To the bosom) *See* **Clasp**; ' this is not the time to s. courtesies ' अत्युपचारपूर्वकं-यथाचारं-व्यवहर्तुं नायंसमयः. **-***v. i.* अत्यंतं प्रयत् or उद्यम् 1, A or आयस् 1,4 P or व्यव-सो 4 P. 2 निर्गल् 1 P, स्रु 1 P. **-***s.* आयासः, अतियत्नः-श्रमः. 2 प्रवहणं, अत्यंताकर्षः; *See* **Sprain.** 3 तानः, संततस्वरः. 4 आ-,कर्षणं, वितति *f.* 5 रीति *f.*, प्रकारः. 6 विषयः. **-ed,** *a.* वितत, आ-,कृष्ट &c. 2 (Meaning) क्लिष्ट, नेयार्थ. **-er,** *s.* गालनी, चालनी, शोधनी.

Strait, *a.* संकट, संबाध, अनायत, संकुचित; *See* **Narrow.** **-***s.* कृच्छ्रं, कष्टं, संकटं, दुर्दशा, कष्टावस्था, संकटावस्था; ' in s. s ' कृच्छ्रगत, कष्टापन्न. 2 सामुद्रधुनी, संकटमार्गः. **-en,** *v. t.* पीड् 10, सं-, बाध् 1 A, संकुच् 1 P; ' s. ed circumstances ' (अर्थ-) कृच्छ्रं, कष्टं, दुर्गति *f.*

Strand, *s.* तीरं, तटं, कूलं. **-***v. t.* उत्कूलयति (D.). **-***v. i.* तीरं प्राप् 5 P.

Strange, *a.* अपूर्व, वि-,चित्र, अद्भुत, आश्चर्यभूत; ' what is s. in this ' किमत्र चित्रं. 2 वैदेशीय, परकीय; *See* **Foreign.** 3 अप-,विरूप, विलक्षण, असंगत, असंबद्ध, अलौकिक (की *f.*), असंभव. 4 अपरिचित, असंस्तुत, अज्ञातपूर्व. **-***interj.* चित्रं, अहो बत चित्रं, आश्चर्यं. **-er,** *s.* आगंतुकः, अभ्यागतः. 2 वैदेशिकः, विदेशीयः, वैदेशः. 3 परः, परपुरुषः, पारक्यः, अपरिचितः, अन्यजनः. 4(*a.*) अपरिचित, अनभ्यस्त, अनभिज्ञ, अज्ञात; ' we are s. s to the use of chariots ' वयं अनभ्यस्तरथचर्याः (U. 5). **-ly,** *adv.* अद्भुत चित्रं. **-ness,** *s.* अपूर्वता, वैचित्र्यं, वैलक्षण्यं, &c.

Strangle, Strangulate, *v. t.* कंठं निपीड्य श्वासं निरुध्य-मृ c. or व्यापद् c., गलहस्तयति (D.); श्वासं अव-नि-रुध् 7 U. **-ing, -ion,** *s.* गलपीडनं, गल-हस्तः, श्वासावरोधः.

Strangury, *s.* अश्मरी, मूत्रकृच्छ्रं.

Strap, *s.* चर्मपट्टः-बंधः, वरत्रा, वध्री, नध्री. **-***v. t.* चर्मपट्टेन प्रहृ 1 P or तड् 10.

Stratagem, *s.* उपायः, कल्पना, युक्ति *f.*, अप-व्यप-देशः, छलं, कपटोपायः, छद्मन् *n.*

Strategy, *s.* युद्धकौशलं, समरपाटवं, व्यूहरचनाविद्या-नैपुण्यं.

Stratum, *s.* स्तरः, फलकः-कं, आ-सं-स्तरः.

Straw, *s.* पलः, पलालः-लं, नालः-लं, तृणं (fig. also), शुष्कधान्यं; ' to make s. of ', ' not to care a s. for ' तृणाय-तृणं-मन् 4 A; ' a man of s. ' तृणमूर्ति *f.*; कल्पितपुरुषः.

Stray, *v. i.* (यूथात् &c.) भ्रंश् 1 A, 4 P, व्यभिचर् 1 P; (मार्गात्) प्र-,विचल् 1 P, प्र-,भ्रंश्. 2 प्रमद् 4 P, स्खल् 1 P; *See* **Err, Mistake.** **-ed,** *a.* प्र-,भ्रष्ट, च्युत, विचलित, भ्रांत, मार्गभ्रष्ट, नष्टपथ, यूथभ्रष्ट. 2 (Thoughts) निरन्वय.

Streak, *s.* रे(ले)खा, राजि *f.*; ' s. of lightning ' विद्युल्लेखा. **-***v. t.* रेखाभिः अंक् 10, चित्रीकृ 8 U; ' s. ed with gold ' कनकरेखाभिः सनाथीकृत, हेमरेखांकित. **-ed,-y,** *a.* रेखांकित-चिह्नित, चित्र, चित्रित, शबल.

Stream, *s.* स्रोतस् *n.*, सरित् *f.*, नदी. 2 स्रोतः प्रवाहः, रयः, ओघः, प्रवृत्ति *f.*, वेला, वेगः, प्रस्रावः, धारा-रः; ' s. of rain ' पर्जन्यधारा. **-***v. i.* वृष् 1 P, सततं प्रवह् 1 P or प्रस्रु 1 P. 2 **Radiate, Extend,** q. v. **-er,** *s.* पताका, केतुवसनं. **-ing,** *a.* संतत or निरंतरप्रवाहिन् or स्राविन्. **-let,** *s.* क्षुद्र-कु-सरित्; अल्पस्रोतः.

Street, *s.* पथिन् *m.*, मार्गः, वीथि-थी *f.*, रथ्या, प्रतोली, विशिखा; ' royal s. ' राजमार्गः-पथः, महापथः, संसरणं.

Strength, *s.* *See* under **Strong.**

Strenuous, *a.* सोत्साह, सोद्यम, सोद्योग, महोद्यम; अविरत, अविश्रांत, अभिनिविष्ट, संतत. **-ly**, *adv.* सोत्साहं, प्रयत्नैः, अविरतं. **-ness**, *s.* उत्साहः, उद्योगः, उद्यमः, उद्यमसातत्यं; *See* **Energy, Industry.**

Stress, *s.* भारः, भरः; गुरुत्वं, माहात्म्यं, गौरवं, प्रभावः, बलं; 'I lay s. on this point' इममर्थं गुरुप्रयोजनं-गुरुं-मन्ये.

Stretch, *v. t.* विस्तृ-स्तृ c., प्र-वि-तन् 8 U, आयम् 1 P, दीर्घीकृ 8 U; (hand) प्रसृ c., लंब् c. **-***v. i.* प्र-वि-तन् pass., विस्तृ pass., प्र-सृ 1 P, प्र-,लंब् 1 A; *See* **Extend** also. **2 Exaggerate**, q. v. **-***s.* वितति *f.*, विस्तारः, विस्तृतिः, आयामः, प्रसारः-रणं. **2** प्रयत्नः, प्रयासः, उद्यमः. **3** विषय, प्रसरः. **4** वागुपचयः, अत्युक्ति *f.* **-er**, *s.* शिबिका.

Strew, *v. t.* अव-प्र-विकॄ 6 P, स्तॄ 9 U, सं-आ-परि-°, आच्छद् 10.

Striate, *a.* रेखांकित.

Strict, *a.* अशिथिल, दृढ, नियत. **2** अनतिक्रमणीय, अनुल्लंघ्य; *See* **Peremptory. 3** परुष, निष्ठुर, कठिन, कठोर, तीक्ष्ण, तीव्र. **4** सूक्ष्म, निपुण; 'on the s.-est search' आतिनिपुणमन्विष्यापि. **-ly**, *adv.* अशिथिलं, परुषं, सनिश्चयं, परिच्छेदनिष्ठुरं, दृढं; 's. true' सर्वथा सत्य. **-ness**, *s.* अशैथिल्यं, सूक्ष्मता, काठिन्यं, &c.

Stricture, *s.* निंदा, भर्त्सना, आक्षेपः; *See* **Censure. 2** प्रस्रावरोधः, मूत्रग्रंथिः.

Stride, *s.* विक्रमः, पादन्यासः, दीर्घविक्रमः. **-***v.* वि-परि-क्रम् 1 U, 4 P, लंघ् 1 A, 10, आ-अध्या-रुह् 1 P, आ-अध्या-क्रम्.

Strife, *s.* कलिः, विवादः, कलहः, विप्रतिपत्ति *f.*, विरोधः, द्वंद्वं.

Strike, *v. t.* हन् 2 P, प्र-अभि-उप-°, आहन् 2 U, तुद् 6 P, प्रहृ 1 P (with loc.), तड् 10; आस्फल् c. (water); 's. on the face' मुखे चपेटां दा 3 U, हस्ततलेन प्रहृ. **2** विप्लु c, पीड् 10, अर्द् 1 P or c.; 'famine-s. on' दुर्भिक्ष-पीडित-विप्लुत. **3** (With wonder &c.) उपहन्, चकित-*a.* कृ; oft. by चकित-सविस्मय; 'was struck with the beauty of his horns' शृंगशोभां दृष्ट्वा विस्मयमावेदे. **4** वद् c., नद् c., ध्वन् c. (lute &c.). **5** जन् c., उत्पद् c.; 's. s fear in the mind' चित्ते भयं जनयति; 's. ing deep root' स्थिरबद्ध-प्ररूढ-मूल; 's. sail' वातवस्त्रं अवपत् c. or अवतॄ c., निश्चली-स्तब्धी-भू; 's. blind' अंधीकृ; 's. accounts' गणनां समीकृ; 'it struck me as wonderful' तदद्भुतमिवेमां प्रतिबभौ; 'he was struck with wonder' तस्य हृदयं पस्पर्श विस्मयः (Ka. 80), आश्चर्यचकितो बभूव; 'being used in its most general sense, it easily s. s the mind' तद्धि प्रसिद्धतरेण प्रयोगेण शीघ्रं बुद्धिमारोहति, प्रसिद्धिबलेन प्रथमतरं प्रतीयते (S. B. 135, 137). **-***v. i.* (Against) संघट्ट् 1 A or c., आस्फल् 1 P; *See* **Dash. 2** संभूय कर्म परित्यज् 1 P; कार्यनिवृत्तिसंकेतं कृ. **-down**, नि-अव-पत् c., शद् c. (शातयति), आहत्य भूमौ पत् c. **-for**, प्र-स्था 1 A, प्र-या 2 P, निर्गम् 1 P; *See* **Start. -off**, वि-,नश् c., वि-, लुप् c.; अप-व्या-मृज् 2 P or c., उच्छिद् 7 P. **-out**, (Fire) घर्षणेन-संघट्टनेन जन् c. **2** लुप् 6 P or c., नश् c., उच्छिद्, व्यामृज्; *See* **Efface. 3** कल्प् c., चिंत् 10, युज् 7 U, 10, निरूप् 10. **4** मुद्रयति (D.). **-through**, निर्भिद् 7 P, प्रविश् 6 P, प्रविश्य निर्गम्. **-up**, आरभ् 1 A, प्रस्तु 2 U; *See* **Begin. -***s.* युगपत् or संभूय कार्यनिवृत्तिसंकेतः. **-ing**, *a.* वि-, चित्र, आश्चर्यजनन (नी *f.*,), अद्भुत, विस्मयावह, आश्चर्यभूत, हृदयग्राहिन्, चित्तहारिन्. **-ingly**, *adv.* मनोहरं, विचित्रतया, अद्भुतं, अतीव, हृदयग्राहितया. **-Stroke**, *s.* आ-अभि-घातः, आहति *f.*, प्रहारः, ताडनं, पातः; 's. of a thunder-bolt' वज्रपातः, अशनिपातः. **2** रेखा, लेखा. **3** आक्रमः, अवसारः, आवेशः, लंघनं; 'sun-s.' आतपलंघनं, सूर्याभिघातः. **4** प्रयत्नः, आकस्मिकयत्नः; 's. of policy' नीत्युत्कर्षः, नयनिपुणता. **-***v. t.* (पाणिना-हस्तेन) परामृश् 6 P, स्पृश् 6 P; (परामृशन् हर्षजडेन पाणिना R. III. 68); शनैः मृज् 2 P or समालभ् 1 A, हस्तेन लल् 10.

String, *s.* रज्जु *f.*, गुणः, तंत्रं-त्री (of lutes &c.), तंतुः, सूत्रं, दामन् *f. n.*, शुल्बं; *See* **Rope**; (of a bow) ज्या, गुणः, मौर्वी, शिंजिनी. **2** परंपरा, माला, पंक्ति *f.*, श्रेणि-णी *f.*, आवलि-ली *f.*; 's. of pearls' मुक्तावली, मुक्ताहारः-सरः. **3** (Human) शिरा. **-***v. t.* सं-ग्रंथ् 9 P, गुं(गु)फ् 6 P, वि-,रच् 10, सं-,दृभ् 6 P, 10, सूत्र् 10. **2** तंत्रीभिः-गुणैः-बंध् 9 P; (a bow) आधिज्यं कृ; धनुषि ज्यां आरुह् c. or आतन् 8 U; 'a bow strung' आधिज्यं-आततज्यं-आरोपितज्यं-धनुः; 'a string strung tight on a bow' धनुषि आतता मौर्वी (R. I. 19). **-ed**, *a.* तंत्रिन्, तंत्री-गुण-विशिष्ट, तंतुयुक्त. **-y**, *a.* सूत्रिन्, सूत्र-तंतु-मय (यी *f.*).

Stringent, *a.* तीक्ष्ण, कठोर, दृढ, अशिथिल.

Strip, *v. t.* अप-,हृ 1 P, अप-नी 1 P, निर्-हृ; gen. by अप, निर्, वि in comp.; 's. of clothes' विवस्त्रयति (D.), निर्वस्त्रीकृ 8 U, उच्छद् 10; 's. of bark' विवल्कयति (D.); निष्पत्रयति, निर्दलीकृ, &c. **-***s.* खंडः

णं, पहः. **-ped,** *a.* अप-,हृत, अपनीत. 2 विवस्त्र, विवस्त्रीकृत, नग्नीकृत, हृतवस्त्र-वेश; 's. of one's all' हृतसर्वस्व.

Stripe, *s.* रे(ले)खा. 2 दीर्घखंडः. 3 कशाघातः-प्रहारः. **-v. t.** रेखाभिः चित्रयति (D.) or अंक् 10. 2 कशया तड् 10 or प्रहृ 1 P.

Stripling *s.* शिशुः, अर्भकः, डिंभः, बालः, किशोरः.

Strive, *v. i.* प्र-,यत् 1 A, घट् 1 A, उद्यम् 1 A, चेष्ट् 1 A, व्यव-सो 4 P, प्रवृत् 1 A. 2 स्पर्ध् 1 A. 3 (Against) विवद् 1 A, विरुध् 7 U, कलहं कृ 8 U; *See* **Contend.**

Stroke, *s.* *See* under **Strike.**

Stroll, *v. i.* (आलस्येन) विचर् 1 P, परिक्रम् 1 U, 4 P, विहृ 1 P, परिभ्रम् 1, 4 P. **-s.** परिक्रमः-मणं, विहारः, परि-,भ्रमणं, यथेष्टचारः. **-er,** *s.* पथिकः, यथेष्टविहारिन् *m.*

Strong, *a.* बलिन्, बलवत्, सबल, वीर्यवत्, शक्तिमत्, समर्थ, ऊर्जस्वल, ओजस्विन्, प्रबल, ऊर्जित; 's.-minded' मनस्विन्, धीरप्रकृति. 2 क्षम, दक्ष, कुशल. 3 दृढ, स्थिर (resolution): उग्र(smell). 4 तीव्र, तीक्ष्ण, चंड, प्रखर, अति pr. 5 गाढ, उत्कट, प्रबल; *See* **Intense.** 6 वीर्यवत्, प्रतापवत्, गुणावह, गुणकारिन् (medicine): 'to grow s.' प्रबलीभू, मुच्छ् 1 P; '10000 s.' अयुतसंख्याक; 's.-bodied,' 's.-built' उपचितगात्र, मांसल, दृढांग, दृढावयव; 's.-hold' दुर्ग, कोटः. **-ly.** *adv.* बलवत्, दृढं, गाढं, परमं, उग्रं, उत्कटं, &c. **-Strength,** *s.* बलं, वीर्यं, शक्ति *f.*, सामर्थ्यं, तेजस् *n.*, प्रभावः, ओजस् *n.*, ऊर्जः, सत्त्वं; वि-पराक्रमः; क्षमता, बलवत्ता, प्राबल्यं, विभवः; 'the s. of mind' धीशक्तिः, बुद्धि-प्रभावः, मतिविभवः; 'what is the s. of the enemy' कियत्संख्यकाः शत्रवः; 'on the s. of' अवलंब्य. **-en,** *v. t.* प्रबलीकृ 8 U, बलं दा 3 U or वृध् c. 2 दृढीकृ, द्रढयति (D.): *See* **Confirm, Establish;** निवेशः शैलानां तदिदमिति बुद्धिं द्रढयति(U. 2) 's. s the belief that it is the same'; 'Sringāra s. ed by Karuna' करुणानुप्राणितः शृंगाररसः **-v. i.** प्रबलीभू 1 P, प्र-उप-चि-pass.: वि-प्र-वृध् 1 A; प्ररुह् 1 P. **-ing,** *a.* बलवर्धन (नी *f.*), बलप्रद.

Structure, *s.* निर्माणं, संस्थानं, विधानं, रचनं-ना. 2 आकारः, रूपं. 3 मंदिरं, भवनं.

Struggle, *v. i.* प्रयत् 1 A. प्रयासं-यत्नं-कृ 8 U, चेष्ट् 1 A; शार्दूलः पशुमिव हन्मि चेष्टमानं (S. 6) 'an animal s.-ing, while being killed' &c. 2 युध् 4 A, संयत्; *See* **Fight. -ing,** *s.* प्रयासः, प्रयत्नः, वि-चेष्टा-चेष्टितं, अतियत्नः; मुक्तप्रयत्नं मां सलिलबिंदुनापाययत् (Ka. 38) 'me who had ceased s.' &c. 2 युद्धं, कलहः, विवादः, द्वंद्वं.

Struma, *s.* विस्फोटः-टकः.

Strumpet, *s.* *See* **Prostitute.**

Strut, *v. i.* साटोपं-उद्धतं-धीरोद्धतं-परिक्रम् 1 U, 4 P, सगर्वं चल् 1 P. **-s.** साटोप-उद्धत-सगर्व-गति *f.* **-ting,** *a.* सगर्वगति, साटोपगामिन्.

Stubble, *s.* नालः-ली, लूनशस्यनालः.

Stubborn, *a.* दुर्दांत, दुर्दम, प्रतिनिविष्ट, अवश्य, अविनेय, प्रतीप; *See* **Obstinate.**

Stucco, *s.* सुधा, चूर्णलेपः. **-v. t.** सुधया लिप् 6 P. **-ed,** *a.* सुधालिप्त.

Stud, *s.* गंडः; (of horses) अश्वाः, आश्वं, अश्वीयं, वाडवं; (place) अश्वशाला, मंदुरा. **-v. t.** उत्-,खच् 10 (खचयति), प्रतिबंध् 9 P, प्रतिवप् 1 P, अनुव्यध् 4 P: 'sky s. ed with stars' तारकितं नभः; 's. ed with gems' रत्नखचित, रत्नानुविद्ध-प्रत्युप्त &c.

Study, *v. t.* अधि-इ 2 A, अधिगम् 1 P. (acquire by s.); शिक्ष् 1 A; पठ् 1 P: आवृत् c., अभ्यस् 4 U. 2 ध्यै 1 P, चिंत् 10, कल्प् 10: प्रयत् 1 A, विमृश् 6 P. **-s.** अध्ययनं, अभ्यासः अभ्यसनं, शिक्षणं, पठनं, पाठः, अधिगमः-मनं; 's. of the Vedas' वेदाध्ययनं, उपाकरणं; 'close s.' अविरताभ्यासः, अनु-परि-शीलनं; 'desultory s.' चंक्रमणं. 2 अध्ययनशाला-आगारं, ग्रंथकुटी. 3 पाठः, अध्ययनविषयः. 4 चिंतनं, कल्पना, विचारः. **-ent,** *s.* अध्येतृ *m.*, छात्रः, शिष्यः, अधीयानः, विद्यार्थिन् *m*; 'a religious s.' ब्रह्मचारी, व्रती, लिंगी. **-ied,** *a.*: पूर्वपठित, सुनिश्चित, पूर्वनिर्णीत, चिंतित-निर्णीत-पूर्व, कामतः कृत. **-ious,** *a.* अध्ययनपरायण-तत्पर-शील-आसक्त, विद्याप्रसित-अभिनिविष्ट. 2 उत्सुक, व्यवसायपर, अध्यवसायिन्; 'of s. habits' व्यवसायशील. **-iously,** *adv.* विद्याभ्यासंगेन; संकल्प-निर्णय-पूर्वं, कामतः. **-iousness,** *s.* अध्ययन-विद्या-आसक्ति *f.*-अभिनिवेशः, विद्याभ्यासंगः.

Stuff, *s.* वस्तु *n.*, द्रव्यं, प्रकृति *f.*, पदार्थः. 2 पटः, वस्त्रं, वसनं; *See* **Cloth.** 3 गृहोपस्करः, गृहसामग्री-द्रव्याणि-भांडानि. 4 तुच्छ-कुत्सित-द्रव्यं. 5 अनर्थकप्रलापः. **-v. t.** अत्यंतं पूर् 10, अतिशयेन तृप् c. 2 **Crowd, Cram.** q. v.; 's. ed with cotton' कार्पासपूरित. **-v. i.** आतृप्ति पृ pass. **-ing,** *s.* पूरणं &c.

Stuffy, *a.* निर्वात.

Stultify, *v. t.* मूढीकृ 8 U, मूर्खवत् आचर् c.; (oneself) मूर्खवत् आचर् 1 P.

Stumble, *v. i.* प्र-,स्खल् 1 P, विषमीभू, (मार्गे पदानि खलु ते विषमीभवंति S. 4)

प्र-वि-चल् 1 P, च्यु 1 A. –*v. t.* प्र-स्खल् c. (स्खलयति). –*s.* **–ing,** *s.* स्खलनं स्खलितं; 's. ing-block' गतिकुंठनस्थानं. 'this is a s. ing-block to all' अत्र सर्वे स्खलंति; अत्र सर्वेषां गतिः कुंठिता भवति.

Stump, *s.* कंदः-दं, स्थाणुः. **–y,** *a.* ह्रस्वस्थूल.

Stun, *v. t.* बधिरीकृ 8 U, (आक्रंदेन दिशो बधिरीकृताः); (persons) आघातेन-प्रहारेण-जडीकृ 8 U, मूर्च्छां प्राप् c. or जन् c.; 's. the ears' कर्णविवरं-कर्णपुटं जर्जरीकृ or जर्जरयति (D.) or स्फुट् c. or उपहन् 2 P, जर्जरितकर्णविवरः (Ka. 27), जर्जरीकृतकर्णपुटः 'the ears being s. ed' &c.; 'he was s.-ed by the noise' निनादश्रवणेनामूर्च्छत् **–ned,** *a.* आघात-प्रहार-मूढ-जड-मोहित. जर्जरितकर्ण, बधिरीकृत. **–ning,** *a.* कर्णोपघातिन्, श्रवणशक्तिहारिन्.

Stunt, *v. t.* (वृद्धिं) स्तंभ् 9 P or c., रुध् 7 U, वामनी-खर्वी-कृ 8 U –*s.* वृद्धिरोधः-स्तंभः. **–ed,** *a.* पृश्नि, अल्पतनु, वामनाकृति, रुद्धवृद्धि.

Stupefy, *v. t.* जडीकृ 8 U, जडयति (D.), मुह् c., सं-व्या-°, निष्पंदीकृ, सं-स्तंभ् c. **–action, Stupor,** *s.* जाड्यं, जडिमन् *m.*, जडता-त्वं, मोहः, सं-व्या-°, इंद्रियस्वापः-मोहः-स्तंभः. **–ing,** *a.* व्या-, मोहिन्, मोहकारिन्, स्तंभक. **–Stupid,** *a.* जड, मूढ, मूर्ख, मंद, मूढ-स्थूल-जड-मंद-धी-मति-बुद्धि, निर्बुद्धि, दुर्बुद्धि, अविज्ञ, अज्ञ; 'a s. mistake' अतिगर्हणीयः प्रमादः. **–ity, –ness,** *s.* जाड्यं, मौर्ख्यं, मूढता, जडिमन् *m.*, अज्ञानं, &c. **–ly,** *adv.* जाड्येन, मूर्खतया, मूढवत्.

Stupendous, *a.* अतिविशाल, अद्भुत, आश्चर्य-विस्मय-कर (री *f.*), विस्मयोत्पादक.

Sturdy *a.* कठिन, कठोर; दृढांग, प्रबल; *See* **Stout.**

Stutter, *v. i. See* **Stammer.**

Sty, *s.* शूकरशाला.

Style, *s.* रीति *f.*, प्रकारः, पद्धति *f.*, वृत्ति *f.*, सरणि *f.* **2** भाषासरणिः, लेखनपद्धतिः; (of speaking) वाग्वृत्तिः-व्यापारः-सरणिः. **3** संज्ञा, आख्या, ख्याति *f.* **4** लेखनी, कलमः. **5** शलाका, कीलः; शंकुः (of a dial). –*v. t.* अभि-धा 3 U, वच् 2 P, संज्ञां दा 3 U, कृत् 10; *See* **Name, Call;** 's. ed Kakutstha' ककुत्स्थ इत्याहितलक्षण (R. vi. 71), ककुत्स्थसंज्ञ &c. **–ish,** *a.* शिष्टजनमत, सभ्याचारानुरूप.

Styptic, *a.* रक्तस्तंभन, रक्तस्रावरोधिन्. –*s.* रक्तस्तंभनं-अवरोधः.

Styx, *s* वैतरणी, प्रेतनदी.

Suasion, *s. See* **Persuassion** under **Persuade.**

Suave, *a.* सुशील, सभ्य, मधुर, मनोज्ञ. **–ity,** *s.* माधुर्यं, मनोज्ञता, स्वादुता.

Subacid, *a.* ईषदम्ल.

Subdivide, *v. t.* प्र-विभज् 1 U, अंशांशान् कृ 8 U **–Subdivision,** *s.* प्रभागः, प्रविभागः; उपशाखा, प्रति-प्र-शाखा, उपांगं, अवयवः.

Subdue, *v. t.* वशं नी 1 P, वशीकृ 8 U, वि-परा जि 1 A, अभि-परा-भू 1 P, दम् c. (दमयति), स्वायत्तीकृ, स्व-वशे स्था c. (स्थापयति) **2** (Passions) जि, सं-नि-यम् 1 P, निग्रह् 9 P, दम् c., वशं नी; *See* **Control. –er,** *s.* जेतृ *m.*, दमनकारिन्. **2** वशिन् *m.* **–ing,** *s.* विजयः, दमः-मनं, अभिभवः, नि-सं-यमः, निग्रहः, &c.

Subjacent, *a.* अधोवर्तिन्.

Subject, *s* प्रजा, प्रकृति *f.* (usually in pl.) **2** विषयः (विषयिन् *m.*, as opp. to object). प्रकरणं, प्रस्तावः, प्रसंगः, अर्थः, पदं, स्थानं, आस्पदं, भूमि *f.*, अधिष्ठानं, आधारः, आश्रयः, आशयः, भाजनं. **3** नायकः, कथापुरुषः-नायकः. **4** कर्ता (in grammar). **5** साध्यं; 's. in hand' प्रकृतं, प्रस्तुत, प्रस्तुतार्थः; 'this chapter is on the s. of Sānkhya doctrines' सांख्यवादविषयकोऽयमध्यायः. –*a.* वशवर्तिन्, वशग, उपजीविन्, आश्रित; निघ्न, वश, अधीन, आयत्त, तंत्र in comp. **2** (Liable) अधीन, आयत्त, &c., अर्ह, पात्रं, आस्पदं in comp.; *See* **Liable;** 'one that is born is s. to death' जातेन खलु मर्तव्यं, जातस्य हि ध्रुवो मृत्युः; 'not s. to anger' अनायत्तो रोषस्य (Ka. 45); so अवशो विषयाणां, अदत्तावकाशो मत्सरस्य (*ibid.*); 's. to disease' रोगाधीन, नित्य-सदा-रोगिन्, रोगपात्रं, &c. –*v. t.* वशीकृ 8 U, अभिभू 1 P; *See* **Subdue. 2** पदं नी 1 P, अधीनी-आयत्ती-आस्पदी-कृ; 'you have s.-ed yourself to trouble' क्लेशस्यात्मा पदमुपनीतः (S. 1); 'you have s. ed yourself (soul) to great penance' आयोजितस्तपसि महत्यात्मा (Ka. 173); अयत्नेनैवोपहासास्पदतामीश्वरो नयति जनं (Ka. 151) 'easily m. s to ridicule' &c.; उपहासास्पदं कृ, &c. **–ion,** *s.* वशः-शं, वशता, निघ्नता, वश्यता, आयत्तत्वं, अधीनता, &c. in comp.; 's. to another' परवशता, पराधीनता, परवत्ता, &c. **–ive,** *a.* विषयिन्, आधिकरणनिष्ठ.

Subjoin, *v. t.* अनुबंध् 9 P, आयुज् 7 U, 10; अधः लिख् 6 P or निर्दिश् 6 P.

Subjugate, *v. t.* वशीकृ 8 U, अभिभू 1 P, परा-वि-जि 1 A, भंज् 7 P, करदीकृ; *See* **Subdue –ion,** *s.* दमः-मनं, जयः, परा-अभि-भवः, भंगः, नियमः, निग्रहः; *See* **Control** also.

Sublimate, *s.* रसकर्पूरः-पुष्पं. —*v. t.* बाष्पीकृ 8 U.

Sublime, *a.* उन्नत, अत्युच्छ्रित, उत्कृष्ट, विशिष्ट, गुरु; *See* **Lofty;** उदात्त, प्रौढ (sentiment &c.). —*v. t.* **Exalt,** q. v. **-ity,-ness,** *s.* तुंगता, उन्नति *f.*, अनुभावः, प्रौढि *f.*, अत्युत्कर्षः, गौरवं; 's. of meaning' अर्थगौरवं, उदात्तार्थः.

Subliminal, *a.* बोधातीत, अव्यक्त.

Sublunary, *a.* ऐहिक-सांसारिक-(की *f.*); *See* **Worldly.**

Submarine, *a.* समुद्रस्थ-गत; 's. fire' और्वः, वडवानलः, वाडवः.

Submerge, *v. t.* नि-,मस्ज् c. (मज्जयति), आप्लु c. —*v. i.* नि-,मस्ज् 6 P, अवगाह् 1 A; *See* **Plunge.** **-Submersion,** *s.* निमज्जनं, आप्लावः, प्लावनं.

Submit, *v. i.* प्रणम् 1 P, वशं गम् 1 P, शरणं गम् or या 2 P or प्रपद् 4 A; (to order &c.) अनुरुध् 4 A, अनुवृत् 1 A, अनुपा c. (पालयति); *See* **Obey;** सह् 1 A, क्षम् 1 A, मृष् 4 P, 10; oft. ex. by प्रमाणं; आर्यमिश्राः प्रमाणं (M. 1) 'I s. to your honor's opinion (decision)'. 2 सविनयं वद् 1 P or प्रार्थ् 10 A. —*v. t.* सविनयं ऋ c. (अर्पयति) or निक्षिप् 6 P or निर्दिश् 6 P; *See* **Refer.** **-Submission,** *s.* प्रणति *f.*, वशता-त्वं. 2 अनुवृत्ति *f.*, अनुवर्तनं, अनुरोधः. 3 क्षमा, क्षांति *f.*, सहिष्णुता. **-Submissive,** *a.* वश्य, प्रणतिप्रणव, वशग, वशवर्तिन्, विधेय, अनुविधायिन्, आज्ञाकर (री *f.*). 2 सविनय, नम्र, दीन. **-ly,** *adv.* सविनयं, नम्रतया, प्रार्थनापूर्वं, प्रणतिपूर्वं.

Subordinate, *a.* अधीन, आयत्त. 2 अप्रधान, गौण (णी *f.*), अमुख्य; 'any thing s. to another' अप्रधानं, उपसर्जनं. —*v. t.* (to) अन्यापेक्षया गौण-अप्रधान-*a.* मन् 4 A. **-ion,** *s.* अधीनता, वशता, वश्यता, परवशता, पारतंत्र्यं, पराधीनता. 2 अप्राधान्यं, गौणता. **-ly,** *adv.* गौणतः, अप्राधान्येन, अमुख्यतः.

Suborn, *v. t.* (धनदानादिना) कूटसाक्ष्यं दा c. (दापयति).

Subpœna, *s.* आह्वानपत्रं. —*v. t.* आह्वे 1 P.

Subscribe, *v.* (अधः) नाम लिख् 6 P or निविश् c., हस्ताक्षरेण अंक् 10 or चिह्नयति (D.); *See* **Sign.** 2 **Agree,** q. v. 3 (द्रव्यं) दातुं प्रतिज्ञा 9 A, अंशं दा desid. (दित्सति-ते). **-er,** *s.* अंशदायिन् *m.* **-Subscription,** *s.* नामलिखनं-निवेशनं. 2 अंश-उद्धार-दानं, स्वांशः, उद्धारः. 3 (Of a paper) मूल्यं.

Subsequent, *a.* उत्तरगामिन्, उत्तर, पश्चात् in comp.; पर, पश्चात्कालीन; अनु pr.; 's. rites' अनुकर्माणि; अनुगमनं, &c.; 's. mention' वक्ष्यमाणता. **-ly,** *adv.* तत ऊर्ध्वं; अनंतरं, तत उत्तरं, पश्चात्; (to) परं, ऊर्ध्वं, अनंतरं, परतः (with abl.); अनु pr.; 's. to the marriage' अनुविवाहं, विवाहात्परं, &c. **-Subsequence,** *s.* अनुगमनं-यानं.

Subserve, *v. i.* पुरस्कृ 8 U, वृध् c., उपकृ; *See* **Promote.** **-Subservient,** *a.* आयत्त, अधीन, वश, निघ्न, तंत्र in comp. 2 उपयुक्त, उपकारिन्, सहयोगिन्. **-Subservience,-cy,** तंत्रता, अधीनत्वं. 2 उपयोगः, उपकारः.

Subside, *v. i.* शम् 4 P, प्र-उप-°, निवृत् 1 A, विरम् 1 P, वि-गम् 1 P; प्रसद् 1 P. 2 अधस्तले आसद्, अधः गम् or पत् 1 P.

Subsidy, *s.* (धनरूपं) साहाय्यं, करः. **-Subsidiary,** *a.* सहकारिन्, साहाय्यकारिन्, अनुकूल, मिश्रभावापन्न. 2 **Subordinate,** q. v.; 'something s.' अप्रधानं, उपसर्जनं, गौणार्थः.

Subsist, *v. i.* भू 1 P, वृत् 1 A, विद् 4 A, अस् 2 P, स्था 1 P. 2 जीव् 1 P, आ-उप-°, प्राणयात्रां कृ, जीवितं-प्राणान् धृ 1 P, 10; *See* **Live.** **-ence,** *s.* सत्ता, अस्तित्वं, भावः, वृत्ति *f.* 2 आजीवः, वृत्तिः, आ-उपजीविका, प्राण-शरीर-यात्रा; *See* **Living.** **-ent,** *a.* जीविन्, सत्त्ववत्.

Subsoil, *s.* अधःस्तरः.

Substance, *s.* सारः, सत्त्वं, तत्त्वं; भावः, भावार्थः, सारांशः, तात्पर्यं, तात्पर्यार्थः; 'sum and s.' पिंडितः-निर्गलितः-अर्थः, निष्कर्षः; भावः; 'they are the same in s.' वस्तुतः समाः, अर्थतः तुल्याः. 2 (In Philosophy) द्रव्यं, पदार्थः. 3 वस्तु *n.*, द्रव्यं, अर्थः, मूर्तद्रव्यं. 4 संपत्ति *f.*, द्रव्यं, धनं, अर्थः, वित्तं, विभवः, वैभवं; *See* **Wealth.** **-Substantial,** *a.* सारवत्, ससार, सगर्भ, घन. 2 तात्त्विक-सात्त्विक-वास्तविक-(की *f.*), यथार्थ, सत्य, वास्तव (वी *f.*). 3 धनिन्, सधन, समृद्ध, धनवत्; *See* **Wealthy.** **-ly,** *adv.* वस्तुतः, अर्थतः, तत्त्वतः, सारतः. **-Substantiate,** *v. t.* साध् c., उप-प्रतिपद् c., प्रमाणयति (D.), प्रमाणीकृ 8 U, सत्यापयति (D.), सत्याकृ, वि-भू c.; *See* **Prove.** **-ion,** *s.* उपपादनं, साधनं, सिद्धि *f.* **-Substantive,** *s.* विशेष्यं, सत्त्वं; 'dependent on the gender of the s.' विशेष्यनिघ्न, वाच्यलिंग. —*a.* सत्त्ववाचिन्.

Substitute, *s.* प्रतिनिधिः, प्रतिहस्तः-स्तकः, प्रतिपुरुषः; oft. by स्थानीय-*a.* or स्थाने वृत् 1 A. 2 (In grammar) आदेशः. —*v. t.* स्थाने-पदे सं-,निविश् c. or प्र-नि-उप-युज् 7 A, 10 or उपकल्प् c.; तत्पदे धातोः स्थाने इवादेशं सुग्रीवं संन्यवेशयत् (R. XII. 58) 's.ed Sugriva in his place' &c.

'Adesa is one word s.-ed for another' आदेशो नाम शब्दांतरस्य स्थाने विधीयमानं शब्दांतरमभिधीयते (M. N. on *ibid.*). 2 परिवृत् c., उपसृज् 6 P. -ion, *s.* स्थाने निवेशनं-उपकल्पनं-विधानं.

Substratum, *s.* स्तरः, फलकः-कं. 2 आधारः, आश्रयः, स्थानं.

Subtend, *v. t.* अभिमुखं-संमुखं-वृत् 1 A or स्था 1 P(with gen.).

Subterfuge, *s.* छलं, छद्मन् *n.*; अप-व्यपदेशः.

Subterranean, *a.* आंतर्भौम (मी *f.*), भूमि in comp.; भूम्यंतर्गत, गूढ; 's. place' भूमिगृहं, अंतर्भूमिः; 's. passage' सुरुंगा, गूढमार्गः.

Subtile, Subtle, *a.* अतिसूक्ष्म; अणु, अतिलघु, विरलयव. 2 चतुर, विदग्ध, सूक्ष्मदर्शिन्, सूक्ष्म or कुशाग्र-मति or बुद्धि, मार्मिक (की *f.*), मर्मविद्. 3 Roguish, Sly, q.v. -ly, *adv.* सूक्ष्मं, सूक्ष्ममत्या. -ness, -ty, *s.* सूक्ष्मता, अणिमन् *m.*, अतिलाघवं. 2 वैदग्ध्यं, चातुर्यं.

Subtract, *v. t.* विश्लिष् 10, वियु 2 P, व्यवकल् 10 (कलयति); वियुज् 10, (with instr.); शुध् c.; एतान्युतवियुतान् (Li. 13) 'these s. ed from 10,000;' अयुताच्छोधिते जातं &c. (*ibid.*). 2 उद्-हृ 1 P. -ion, *s.* वियोजनं, वियोगः, व्यवकलितं, व्यवकलनं, शोधनं, वि-,वर्जनं. 2 उद्धारः. -Subtrahend, *s.* ऋणं. शोधकः.

Suburb, *s.* (नगर-) परिसरः, उपकंठं, पर्यंतभूमि *f.*, उपशल्यं, उपांतं, शाखानगरं, उपनगरं. -an, *a.* नगरोपांतस्थ-वर्तिन्, उपकंठ.

Subvert, *v. t.* उद्-,ध्वंस् c., उन्मूल् 10, विनश् c., उच्छिद् 7 P or c., अवसद् c., खंड् 10, नि-अव-पत् c. -Subversion, *s.* ध्वंसः, उपप्लवः, वि-,नाशः, &c. -Subversive, *a.* विनाशिन्, ध्वंस-नाश-कर (री *f.*), उच्छेदिन्; better ex. by (*v.*); 'it is s. of happiness' सुखं उच्छिनत्ति, सुखांतकरं.

Subway, *s.* आंतर्भौममार्गः.

Succeed, *v. i.* (Of things) निष्पद् 1 A, सं-पद्, सफलीभू 1 P; फल् 1 P; सिध् c. (साधयति), जयं आप् 5 P, विजयिन्-*a.* भू (of persons); सिध् 4 P (of both); 'he s. ed in all his attempts' सर्वे तस्य प्रयत्ना निष्पन्नाः-सफला बभूवुः &c. —*v. t.* Ex. by Go q. v. with (अनंतरं with abl.) पश्चात् (with gen.); अनु pr.; 's. ing his father as sovereign of the North Kosala' पितुरनंतरमुत्तरकोशलान्समधिगम्य (R. ix. 1); 's. to the throne' राजपदं-सिंहासनं-आरुह् 1 P, राजपदं आप् 5 P, राजपदभाज् भू; 's.-ed his brother' भ्रातुः पश्चात् राज्यमवाप; 's. ed the General' सेनापतेः पश्चात् तत्पदमवाप, (lit.) सेनापतिमन्वगच्छत्; *See* Follow; 'joy s.-ed by fear' भयोत्तरः हर्षः. -ing, *a.* पर, उत्तर, आगामिन्, अनुपातिन्-गामिन्, 's. generations' पुत्रपौत्रादयः, उत्तरकालीना जनाः. -Success, *s.* सिद्धि *f.*, साफल्यं, अर्थ-साध्य-सिद्धिः, कृतार्थता, जयः, संपद् *f.*, श्रीः, उदयः. -ful, *a.* कृतिन्, कृतार्थ, सिद्धार्थ, विजयिन्, चरितार्थ, कृतकृत्य, प्राप्त-पूर्ण-लब्ध-काम, संपन्नमनोरथ. 2 (Of things) सिद्ध, सफल, निष्पन्न, फलवत्. -fully, *adv.* सफलं, अवृथा, अमोघं, सिद्ध्या. -ion, *s.* अनु-,क्रमः, परंपरा, आनुपूर्व्यं, पर्यायः, अन्वयः, श्रेणी; *See* Order; 'in s.' अनुक्रमं-क्रमेण, यथाक्रमं, अनुपूर्वशः, निरंतरास्वंतरवातवृष्टिषु (K. v. 25) 'coming in s.'. 2 श्रेणी, आवलि-ली *f.*, माला; *See* Series. 3 उत्तराधिकारः-रिता, दायाधिकारः. -ive, *a.* क्रमबद्ध, आनुक्रमिक (की *f.*), यथाक्रम, अनुपूर्व, परंपरा or क्रम-आगत or आयात, क्रमानुसारिन्. 2 निरंतर, सतत, अविरत. -ively, *adv.* क्रमशः, क्रमेण, अनुक्रमशः, अनुपूर्वशः, आनुपूर्व्येण, यथाक्रमं. -or, *s.* प्रत्यनंतरः, उत्तराधिकारिन् *m.*, अनंतरगामी.

Succinct, *a.* संक्षिप्त, लघु, अविस्तीर्ण. -ly, *adv.* संक्षिप्तं, समासतः.

Succour, *s.* साहाय्यं, शरणं. —*v. t.* दा 3 U with (*s.*), उपकृ 8 U.

Succulent, *a.* सरस, आर्द्र, रसमय (यी *f.*), सद्रव, सजल.

Succumb, *v. i.* वशं गम् 1 P or इ-या 2 P, वशीभू 1 P, अव-,सद् 1 P; *See* 'Give way' under Give.

Such, *a.* ईदृश्-श (शी *f.*), तादृश्-श, एतादृश्-श, तथाविध, एवंविध; 's. as myself, -yourself' मादृश्-श, मद्विध, भवादृश्-श, त्वादृश &c.; 's. and s.' अमुक; 'as s.' एवं सति; परमार्थतः प्रेम 'affection as s.'

Suck, *v. t.* आ-,चूष् 1 P, पा 1 P. 2 (As children) धे 1 P, स्तनं-स्तन्यं-पा; 'a child that s.-s the breast' स्तनंधयः शिशुः. 3 (up) उत्-, शुष् c., आ-नि-पा, आचम् 1 P, (रसं) आदा 3 A. -ing, *s.* स्तनपानं, चूषणं. 2 स्तन्यं, दुग्धं, चूष्यं; 'who gives s.' स्तन्यदायिनी. -Suckle, *v. t.* स्तनं-स्तन्यं पा c. or दा 3 U, स्तनं धे c. (धापयति), स्तन्यदानेन पुष् c. -ing, *s.* स्तन्यदानं. 2 स्तनंधयः (यी *f.*), स्तन्यपायिन्. -Suction, *s.* आ-,चूषणं.

Sudden, *a.* आकस्मिक (की *f.*), अकांड, अलक्षित, अतर्कित-अचिंतित-पूर्व, अकल्पित, अकस्माद्भूत. 2 चल, चंचल, लोल; *See* Fickle. -ly, 'on a s.' *adv.* अकस्मात्, सहसा, एकपदे, अकांडे, काकतालीय-

न्यायेन, अतर्कितं, असमर्थितं; 'befalling s.' अतर्कितोपनत.

Sudorific, *a.* स्वेदजनन (नी *f.*), स्वेदकर (री *f.*).

Sue, *v.* प्र-अभि-अर्थ् 10 A, सविनयं याच् 1 A. 2 अभियुज् 7 A, 10, निविद् *c.* (राजकुले); 'if he s. me in a court of law' यद्यसौ राजकुले मां कथयति (Mr. 4).

Suet, *s.* वसा, मेदस् *n.*

Suffer, *v. t.* अनुभू 1 P, उपगम् 1 P, उप-, भुज् 7 A, आप् 5 P, ज्ञा 9 U (**Experience,** q. v.). 2 अनु-ज्ञा, अनुमन् 4 A, अनुमुद् 1 A. न प्रतिबंध् 9 P or प्रतिषिध् 1 P. 3 वि-, सह् 1 A, क्षम् 1 A, मृष् 4 P, 10. —*v. i.* (from) क्लिश्-तप्-पीड्-pass., व्यथ् 1 A; 'is s.ing from an injury' (कृत-) निकृत्या पीड्यते; ex. by भाज् in comp., (दुःखभाक्); दुःखं-पीडां-अनुभू; परार्थे यः पीडामनुभवति 'who s.s for others'; 'if any important duty should not s. thereby' यदि नावसीदति गुरु प्रयोजनं (Ka. 181) 'a wicked person commits a fault and a good man s.s for it' खलः करोति दुर्वृत्तं नूनं फलति साधुषु. **-ance,** *s.* अनुज्ञा, अनुमति *f.*, क्षमा. **-er,** *s.* दुःखितः, दुःखभाक्, दुःखी. **-ing,** *s.* पीडा, क्लेशः, दुःखं, व्यथा, परि-,सं-,तापः, वेदना, कृच्छ्रं. 2 दुःखानुभवः-वेदनं &c. —*a.* क्लिष्ट, दुःखभाक्-भागिन्.

Suffice, *v. i.* क्लृप् 1 A (with dat.), पर्याप्त-*a.* भू 1 P: *See* below; 's. it to say' इति कथनं पर्याप्तं भवेत्. **—Sufficient,** *a.* पर्याप्त, उपयुक्त, उचित, समर्थ, gen. by अलं (with dat.); 'this (cow) will be s. to satisfy my hunger' तस्यालमेषा क्षुधितस्य तृप्त्यै (R. ii. 39), क्षुधाशांतये कल्पेत, पर्याप्ता भवेत्. 2 यथेष्ट, प्रचुर, विपुल: 'you cannot do him s. honour' तद्विषये अपर्याप्तिर्बहुमानस्य. **-ly,** *adv.* पर्याप्तं, यथेष्टं, प्रचुरं. **—Sufficiency,** *s.* पर्याप्ति *f.*, औचित्यं, यथेष्टता. 2 स्वशक्त्यभिमानः.

Suffix, *See* **Affix.**

Suffocate, *v. t.* श्वासं-कंठं-रुध् 7 U or स्तंभ् 9 P; *See* **Choke. -ed,** *a.* रुद्धश्वास-प्राण-कंठ. **-ion,** *s.* श्वास-प्राण-रोधः, कंठस्तंभनं.

Suffrage, *s.* *See* **Vote.**

Suffuse, *v. t.* आ-परि-प्लु *c.*, व्याप् 5 P, व्यश् 5 A. आ-सं-कॄ 6 P; 'eyes s.ed with tears' बाष्पपरिप्लुत-अश्रुप्लावित-बाष्पसमाकुल-नयने; 's.ed with blushes' ह्रीपरिगत; सव्रीड, व्रीडाविलक्ष. **-ion,** *s.* आप्लावः-वनं, व्यापनं.

Sugar, *s.* शर्करा, सिता, खंडविकारः; 'coarse s.' गुडः; 'raw s.' मत्स्यंडी, फाणितं. —*v. t.* मिष्टी-मधुरी-कृ 8 U, शर्करान्वित-*a.* कृ. **-ed, -y,** *a.* मधुमय (यी *f.*), मधुस्यंदिन्, शर्करावगुंठित; सशर्कर, मिष्ट, शर्करायुक्त; 's.-candy' सिताखंडः; खंडमोदकः; 's.-cane' इक्षुः, रसालः.

Suggest, *v. t.* सूच् 10, उपन्यस् 4 U, उपक्षिप् 6 P, उद्दिश् 6 P, प्रस्तु *c.*, समुप-स्था *c.* (स्थापयति); व्यंज् *c.* 2 उपदिश्, प्रबुध् *c.*, मंत्र् 10 A; 's.ed sense' ध्वनितः-व्यंग्यः-अर्थः; 'such is the s.ed sense' इति ध्वनिः; 'this plan s.ed itself to my mind' अयमुपायो मे मनसि प्रादुर्बभूव, एनमुपायमहमचिंतयम्. **-ion,** *s.* सूचना, उपन्यासः, उपक्षेपः, प्रस्तावः. 2 मंत्रणं, उपदेशः, बुद्धि *f.* **-ive,** *a.* व्यंजक, सूचक, प्र-,बोधक.

Suicide, *s.* आत्महत्या-घातः-वधः, प्राण-जीवित-त्यागः, हिंसा. 2 आत्मघातकः-घाती-हन् *m.*: 'commit s.' प्राणान् उत्सृज् 6 P, आत्महत्यां कृ. **-al,** *a.* आत्मघातिन्, आत्मनाशिन्, स्वनाशावह.

Suit, *v.* युज् pass. (with loc. of person), शुभ् 1 A (with gen. of person), उपपद् 4 A, (with gen. or loc.); ननु रामभद्र इत्येव मां प्रत्युपचारः शोभते तातपरिजनस्य (U. 1); शुभपादत्वं ब्रह्मणो नोपपद्यते, ते गुणाः परस्मिन् ब्रह्मणि उपपद्यंते (S. B. 147, 170), oft. ex. by words for 'proper' q. v. —*s.* प्रार्थना, प्रणयः, विज्ञप्ति *f.*, विज्ञापना. 2 कार्यं, अभियोगः, व्यवहारः, अक्षः; 'file a s.' अभियुज् 7 A: *See* **Sue.** 3 (Of clothes &c.) युगलं, युग्मं, युतकं, युगं, संयोगः, समूहः; *See* **Set.** 4 परिजनः, परिवारः, *See* **Retinue. -able,** *a.* अनुरूप, युक्त, उचित, योग्य, उपपन्न, अनुगुण, सदृश (शा *f.*); *See* **Becoming, Proper. -ably,** *adv.* यथोचित, अनुरूपं, यथायोग्यं, यथार्हं, युक्तं. 2 अनुगुणं, अनुसारेण, अनुरोधेन. **-or,** *s.* प्रार्थयितृ *m.*, प्रार्थकः; आवेदकः. 2 अर्थिन् *m.* 3 विवाहार्थिन् *m.*, पाणिग्रहणार्थिन् *m.*

Suite, *s.* परिच्छदः, परिवारः, परिजनगणः. 2 (Of rooms) समष्टि *f.*, संयोगः.

Sulk, *v. i.* उद्-आस् 2 A, उद्-विज् 7 P. **-y,** *a.* रूक्ष, प्रतीप, विषण्ण, उदासीन, उद्विग्न, अंतःकुपित. **-ily,** *adv.* उदासीनवत्, सोद्वेगं. **-iness,** *s.* औदासीन्यं, अंतःकोपः, उद्वेगः.

Sullen, -ly, -ness, *See* **Sulky, -ly, -ness.**

Sully, *v. t.* दुष् *c.* (दूषयति), आविलयति-कलंकयति (D.), मलिनीकृ 8 U; *See* **Stain.**

Sulphate, *s.* (Of copper) तुत्थं; 'red s. of iron' काशी(सी)शं; 'green s. of iron' धातुशेखरः

Sulphur, *s.* गंधिकः, गंधकः, गंधाश्मन् *m.*, सौगंधिकः. **-ated,-eous,** *a.* गंधकसंपृक्त-युक्त, गंधकगुणविशिष्ट, गंधकगर्भ.

Sulphuret, *s.* (Of iron) ताप्यं; (of mercury) कज्जली.

Sultry, *a.* प्रखर, तिग्म, प्रवृद्धताप, अत्युष्ण, निर्वात; ' s. season ' निदाघः, ग्रीष्मः.

Sum, *s.* योगः, संकलनं,संयोजनं (in Math.). **2** साकल्यं, समाहारः, समवायः. **3** सारः, तात्पर्यं, सारांशः. **4** राशिः. **5** संग्रहः, संक्षेपः. **6** (Of money) राशिः, धनभागः-अंशः, oft. not ex.; ' spending a large s. of money ' भूरिद्रव्यव्ययः; ' small s. of money' अल्पधनं; बहुधनं &c. **7** परा कोटिः, सारः; 's. and substance'; *See* **Substance.** **-***v. t.* संयुज् 10, सं-कल् 10 (कलयति). **2** (up) संक्षेपेण कथ् 10, समासतो वद् 1 P, (उक्तं) उपसं-हृ 1 P. **-Summary,** *a.* संक्षिप्त, सामासिक (की *f.*). **2** क्षिप्र, अविलंबित. **-***s.* संक्षेपः, सारः, संग्रहः. **-ly,** *adv.* संक्षेपतः, संक्षेपेण, समासतः.

Summer, *s.* ग्रीष्मः, निदाघः, घर्मः, तपः, उष्णः, उ(ऊ)ष्मागमः, उ(ऊ)ष्मकः, ग्रीष्मसमयः-कालः &c.; 's.-house' केलि or विलास-गृहं or मंदिरं; ' s.-house with fountains &c. ' जलमंदिरं, धारायंत्रगृहं.

Summit, *s.* शिखरः-रं, शृंगं, सानु *m.*, *n.*, चूडा, शिखा, अग्रं, कूटः-टं; ' reclining on the s. of the western mountain 'अस्ताचलचूडावलंबिन्. **2** (fig.) परा काष्ठा-कोटिः.

Summon, *v. t.* आह्वे 1 P, आकृ c., आनी c., आहृ c.; ' to s. up courage '; *See* **Courage.** **-Summons,** *s.* आह्वानं; ' written s. ' आह्वानपत्रं; ' he who disobeys a s. ' आहूतोऽनागच्छन् (V. M. 4).

Summum-bonum, *s.* निःश्रेयसं, परमार्थः, अपवर्गः.

Sumpter,-horse, *s.* स्थू(स्थौ)रिन् *m.*, पृष्ठ्यः.

Sumptuary, *a.* व्ययविषयक, व्ययनियमसंबंधिन्.

Sumptuous, *a.* महार्ह-र्घ, बहुव्ययसाध्य, महा-बहु-मूल्य. **2** विशिष्ट; ' s. feast ' भोजनविशेषः. **-ly,** *adv.* अतिव्ययपूर्वं, महाव्ययेन. **-ness,** *s.* महा-अति-व्ययः.

Sun, *s.* रविः, सूर्यः, आदित्यः, भानुः, सवितृ, अर्कः, भास्करः, दिनकरः, दिवाकरः, मार्तंडः, मरीचिन्, विवस्वत्, मित्रः, खगः, पूषन्, भास्वत्, and comp. of ' Hot ' with ' Ray ', ' Ray ' with सहस्र, पतिः with ' Day '; उष्णरश्मिः, सहस्रकिरणः, सहस्रधामा, दिनपतिः &c. **2** आतपः; ' morning-s. ' बालातपः, बालार्कः; ' exposed to the sun ' आतपे वृत्तं, आतपायोज्झितं (धान्यं); ' s.-beam ' सूर्यकिरणः, अंशुः; *See* **Ray;** ' s.-day ' रविवारः-वासरः, भानुवासरः; ' s.-dial ' सूर्यघटी; ' s.-rise ' सूर्योदयः, उदयः; ' s-set ' अस्तमनं, अस्तः, दिनांतः; 'at s.-set ' अस्तं गते रवौ; 'at s.-rise ': समुदिते रवौ ' from, s.-stroke ' आतपलंघनात् (*S.* 3); ' s.-shine ' सूर्यातपः, प्रकाशः, सूर्यालोकः. **-ny,** *a.* सौर (री *f.*) (*s.*) in comp. **2** सूर्यतप्त, आतपव्याप्त, आतपाक्रांत, आतपवत्, सातप.

Sunder, *See* **Separate.**

Sundry, *a.* बहुविध, नानाविध, विविध, अनेक-नाना in comp.

Sup, *v. i.* रात्रौ भुज् 7 A. **-Supper,** *s.* रात्रिभोजनं.

Super, A prefix rendered by अति, अधिक, अतिशय in comp.; ' s.-abound ' अतिबहुलीभू; ' s.-abundant ' अतिबहुल, उपचित.

Super-annuated, *a.* वयोऽधिक, वार्धक्येन कार्याक्षम.

Superb, *a.* अतिशोभन; *See* **Magnificent.**

Supercilious, *a.* अवलिप्त, अत्युद्धत, अतिदृप्त.

Supererogatory, *a.* विध्यतिरिक्त, नियमातिरिक्त. **-Supererogation,** *a.* नियमातिरेकः, अत्याचारः.

Superficies, *s.* तलं, पृष्ठं. **-Superficial,** *a.* बाह्य, बहिःस्थ, बहिः-पृष्ठ in comp.; ' s. contents ' पृष्ठफलं; ' s. view ' बाह्यालोकः. **2** गाध, पल्लवग्राहिन्, अल्प, असूक्ष्म, अनिपुण, अगाढ; ' s. scholar ' अल्पज्ञः, चुंबकः. **-ly,** *adv.* बाह्यतः, बहिः.

Superfine, अतिसूक्ष्म, सर्वोत्कृष्ट.

Superfluous, *a.* अधिक, अतिरिक्त, व्यर्थ, अपेक्षातिरिक्त; oft. ex. by. पुनरुक्त; ' render s. ' पुनरुक्ततां नी 1 P, (इदमुत्पाद्य सरःसलिलं अमृतरसमुत्पादयता पुनरुक्ततामिव नीता स्वसृष्टिः Ka. 124); ' when there is clear moonlight, torches are s. ' अभिव्यक्तायां चंद्रिकायां किं दीपिकापौनरुक्त्येन (V. 3); आशास्यमन्यत्पुनरुक्तभूतं (R. v. 34). **-ness,-Superfluity,** *s.* आधिक्यं, पुनरुक्तता, अतिरेकः, वैयर्थ्यं.

Superhuman, *a.* अ-अति-मानुष (षी *f.*), अतिमर्त्य, अपौरुष (षी *f.*), मानुषातिग.

Superincumbent, *a.* उपरिस्थित, अधिशयान, उपरिवर्तिन्.

Superinduce, *v. t.* अध्यारुह् c., अधिनिविश् c.

Superintend, *v. t.* पर्यवेक्ष् 1 A, अधि-ष्ठा 1 P, अध्यास् 2 A. **-ence,** *s.* अधिष्ठानं, अवेक्षा, अधिकारः, अध्यक्षता, अवेक्षणं, कार्यदर्शनं. **-ent,** *s.* पर्यवेक्षकः, अधीशः, अध्यक्षः, अधिकारिन् *m.*

Superior, *a.* (To) ज्यायस्, गरीयस्, श्रेयस्, वरीयस्; अधिक, श्रेष्ठ, वरिष्ठ, गरिष्ठ, विशिष्ट, प्रमुख; oft. by अतिरिच्-विशिष् pass.; *See* **Excel**; ' truth is s. to thousands of horse-sacrifices ' अश्वमेधसहस्रेभ्यः सत्यमेवातिरिच्यते-विशिष्यते (H. 4); ' of s. merits ' गुणाधिक, विशिष्टगुण. **-s.** गुरुः, ज्येष्ठः, श्रेष्ठः, वरिष्ठः, अध्यक्षः **-ity,** *s.* आधिक्यं, ज्येष्ठता, श्रेष्ठता, विशिष्टता, उत्कर्षः, प्राबल्यं, प्राग्भावः.

Superlative, *a.* सर्वोत्कृष्ट; परम, अत्युत्तम, अतिशय in comp. **-ly,** *adv.* अत्यंतं, परमं.

Supernatural, *a.* अलौकिक (की *f.*), अ-अति-मानुष- (षी *f.*), प्रकृतिबाह्य, मानुषातिग. **-ly,** *adv.* अलौकिकतया.

Supernumerary, *a.* अतिरिक्त: अधिक, संख्यातिरिक्त.

Superpose, *v. t.* उपरि नि-धा 3 U.

Superscribe, *v. t.* बाह्यनाम लिख् 6 P or दा 3 U. **-Superscription,** *s.* बाह्यनाम; (fig.) बहिर्देशः, बाह्यभागः.

Supersede, *v. t.* उल्लंघ् 1 A, 10, अतिक्रम् 1 U, 4 P, निरस् 4 U, निराकृ 8 U; ' s. ed him in the office ' तमतिक्रम्य तत्पदमवाप. 2 वि-,लुप् c., खंड् 10, निवृत् c. **-ed,** *a.* निरस्त, विलोपित; ' a s. wife ' अधिविन्ना, अध्यूढा.

Superstition, *s.* मूढविश्वासः, अतिविश्वासः-भक्ति *f.*, मिथ्याधर्मः; अविधिनिष्ठा-श्रद्धा. **-Superstitious,** *a.* मूढ, विश्वासनिष्ठ; असत्य-मिथ्या-धर्मिन्, अत्याचारनिष्ठ. 2 मूढविश्वासमूलक.

Superstructure, *s.* भवनं, मंदिरं; *See* **Building.**

Supervene, *v. i.* अकस्मात् उप-स्था 1 P, or उपनम् 1 P.

Supervise, *v. t.* पर्यवेक्ष् 1 A. **-er,** *s.* पर्यवेक्षकः; *See* **Superintend.**

Supine, *a.* उत्तानशय, अवपृष्ठशायिन्, उत्तान, ऊर्ध्वमुख (खी *f.*). 2 अलस, निरीह, उदासीन. **-ness,** *s.* आलस्यं, तंद्रा.

Supplant *v. t.* निष्कस् c., स्थानं व्याप् 5 P or अधि-ष्ठा 1 P, अप-निः-सृ c., निराकृ 9 U, निरस् 4 U.

Supple, *a.* कोमल, सुनम्य, अदृढ, मृदु, चपल, लघु, नमनशील.

Supplement, *s.* परिशिष्टं, परिपूरणं, उत्तरखंडः, शेषपूरणं. **-***v. t.* पूर् 10, न्यूनतां निराकृ 8 U. **-al, -ary,** *a.* परिशिष्ट in comp.

Suppliant, Supplicant, *s.* अर्थिन् *m.*, प्रणयिन्, प्रार्थकः, शरणागतः; ' service to s. s ' प्रणयिक्रिया. **-***a.* प्रणत, नम्र, कृतांजलि, बद्धांजलि, शरणार्थिन्. **-ly,** *adv.* सानुनयं, प्रणतिपूर्वं, कृतांजलि.

Supplicate, *v. t.* अनु-नी 1 P, अर्थ् 10 A, सांजलि याच् 1 A. **-ion,** *s.* प्रार्थना-नं, अनुनयः, सविनयप्रार्थना. **-ory,** *a.* सानुनय, सविनय, प्रणतिपूर्व.

Supply, *v. t.* उपाहृ 1 P, परि-उप-क्लृप् c., संयुज् 10; ' he was s. ed with food ' अन्नमुपकल्पितं तस्य; सं-भृ 3 U, उप-स्था c. (स्थापयति), परि-,पूर् 10. 2 (An ellipsis.) अध्याहृ, अभ्यूह् 1 U, पूर्. **-s.** संभारः, संचयः, सामग्री, उपकल्पनं. 2 (S. s) वीवधः; *See* **Provision.**

Support, *v. t.* उप-सं-अव-उत्-स्तंभ् 9 P or c., आ-अव-लंब् 1 A, सं-,धृ 1 P, 10, आलंबं-अवलंबं-दा 3 U; ' how shall I s. my life ' कथं जीवितं धारयिष्यामि (S. 4); ' s. by the hand' हस्तं दा, (सेवाविचक्षणहरीश्वरदत्तहस्तः R. XIII. 69); *See* **Lean.** 2 भृ 1, 3 U, ग्रासाच्छादनं दा 3 U, पुष् 1, 9 P or c., (अन्नादिना) पा c. (पालयति), संवृध् c.; 's. oneself' उदरपूरणं कृ. 3 वि-,सह् 1 A; *See* **Bear.** 4 उपकृ 8 U, अनुग्रह् 9 P, साहाय्यं कृ. 5 समर्थ् 10, द्रढयति (D.); *See* **Prove;** न ह्ययं मंत्रः स्वातंत्र्येण कंचिदपि वादं समर्थयितुमुत्सहते (S. B. 356) ' cannot, by itself, s. any theory '. 6 अभिनंद् 1 P, अनुमुद् 1 A, अनुकूलयति (D.). **-s.** आ-अव-लंबः-लंबनं, धारणं; ' s. of life' असुधारणं, प्राणयात्रा. 2 अवष्टंभः, आश्रयः, आधारः, आ-अव-लंबः, उपस्तंभः, उपघ्नः; ' a tree of s. ' संश्रय-आश्रय-द्रुमः, उपघ्नतरुः. 3 भरणं, पोषणं, पालनं, संवर्धनं. 4 (Means) आजीवः; उपजीविका; *See* **Living.** 5 साहाय्यं, अनुग्रहः, आनुकूल्यं; अभिनंदनं. **-ed,** *a.* साधार, सावष्टंभ, उत्तंभित, दत्तहस्त (with the hand). 2 सप्रमाण. **-er,** *s.* आधारः, अवष्टंभः, आलंबिन् *m.*, उद्वहः. 2 पोषकः, वर्धयितृ *m.*, पालकः.

Suppose, *v. t.* वि-सं-भू c., क्लृप् c., उपन्यस् 4 U. 2 मन् 4 A, ऊह् 1 A, अनु-मा 3 A, अवगम् 1 P, वि-,तर्क् 10; *See* **Infer;** ' s. ing that ' ex. by अथ, यदि, (अथ मरणमवश्यमेव जंतोः Ve. 3). **-ition,** *s.* सं-,भावना, कल्पना, उपन्यासः; तर्कः, ऊहः, अनुमानं; ' on this s. only ' एवं कल्पिते एव, अनेन एव उपन्यासेन. **-Supposititious,** *a.* कूट in comp., कृत्रिम, कल्पित; ' s. child ' पुत्रप्रतिनिधिः, कूटपुत्रः.

Suppress, *v. t.* सं-नि-यम् 1 P, निग्रह् 9 P, अव-सं-नि-रुध् 7 U, नि-वृ c., नियंत्र् 10; धृ 10. स्तंभ् 9 P or c., प्र-,शम् c. (शमयति), निवृत् c.; ' s. ing the emotions of sorrow ' नियम्य शोकावेगं; अंतर् in comp.; ' who s. es his tears' अंतर्बाष्पः; अंतःकोपः &c.; ' s. ing disturbance ' संक्षोभशमनं-निवा-

रणं; (the passions) जि 1 P, दम् c. (दमयति), नि-सं-यम्, निग्रह्; *See* **Control.** 2 गुह् 1 U, छद् 10, गुप् 1 P, संवृ 5 U, अपलप् 1 P; *See* **Conceal. -ion,** सं-नि-यमः-मनं, निग्रहः, अव-निरोधः, नियंत्रणं, स्तंभनं, निवारणं, प्र-,शमनं, अवष्टंभः; (of the passions) दमः-मनं, जयः, निग्रहः, &c. 2 गहनं, गोपनं, छादनं.

Suppurate, *v. i.* पाकं व्रज् 1 P, पच् pass., सपूय-*a.* भू. **-ion,** *s.* परि-,पाकः, सपूयत्वं.

Supreme, *s.* परम, अतिश्रेष्ठ, निरतिशय; ' s. soul' परमात्मा, परब्रह्म, जगदात्मा. 2 मुख्य, प्रभविष्णु, प्रधान, विशिष्ट; *See* **Principal;** ' s. power ' साम्राज्यं, पारमेष्ठ्यं, प्रधानाधिकारः, ऐकपत्यं; ' s. monarch ' अधीश्वरः, सम्राट्, परमराजः; ' be s. to ' अतिरिच्-विशिष्-pass., (with abl.); *See* **Excel. -ly,** *adv.* परमं, अत्यंतं, परं, अति-सु pr. **-Supremacy,** *s.* आधिपत्यं, प्रभुत्वं, प्रभविष्णुता, स्वाम्यं; प्राधान्यं, मुख्यता, श्रेष्ठता, विशिष्टता.

Surcharge, *v. t.* अत्यंतं पूर् 10. **-ed,** *a.* अतिभाराक्रांत, पूर्णगर्भ.

Surd, *s.* करणी.

Sure, *a.* निश्चित, असंदिग्ध, ध्रुव, निःसंशय, स्थिर, नियत; *See* **Certain;** (of persons) दृढनिश्चय, जातप्रत्यय, संशयहीन; ' I am s.' दृढं मन्ये, मम दृढप्रत्ययाशा विद्यते, नूनं खलु, or एव with verbs; 'he is s. of success' सिद्धिं ध्रुवां मन्यते; 'she is s. of heaven ' तस्याः स्वर्गवासोऽवस्थित एव; तं हतं विद्धि be s. that he will be killed '. 3 निर्भय; अकुतोभय; *See* **Secure, Safe. -ly,** *adv.* नियतं, नूनं, खलु, ध्रुवं, अवश्यं, निश्चितं, निःसंदेहं, निःसंशयं; *See* **Certainly. -ty,** *s.* प्रतिभूः, बंधकः, लग्नकः; 's. for recognizance ' दर्शनप्रतिभूः. 2 प्रत्ययः, निर्णयः, निश्चयः. **-tyship,** *s.* प्रातिभाव्यं.

Surf. *s.* लहरी, तरंगः, कल्लोलः.

Surface, *s.* तलं, पृष्ठं, मुखं, दृश्यांगं, तल-पृष्ठ-भागः, पीठं; ' s. of the earth ' क्षितितलं, धरापीठं, &c.

Surfeit, *v. t.* अतिपूर् 10, अतिभोजनं कृ c., अत्यंतं तृप् c., सौहित्यं-निर्वेदं-जन् c.; *See* **Glut. -s.** अतिभोजनं, अतिपूरणं, अतितृप्ति *f.*-सौहित्यं.

Surge, *v. i.* उल्लल् 1 P, उद्गम् 1 P, उत्क्षिप् pass.; ' s. ing waters ' कल्लोलाकुलं-तरंग-क्षुभितं-जलं. **-s.** कल्लोलः, महोर्मि *f.*

Surgeon, *s.* शल्यतंत्रविद्, शस्त्रवैद्यः. **-Surgery,** *s.* शल्यं, शल्यतंत्रं-शास्त्रं, शस्त्रविद्या. **-Surgical,** *a.* (*s.*) in comp.

Surly, *a.* कर्कश, रूक्ष, परुष, प्रतीप, वक्र, दुःशील.

Surmise, *v.* आ-,शंक् 1 A, तर्क् 10, सं-भू c. **-s.** वि-,तर्कः, आ-,शंका.

Surmount, *v. t.* तॄ 1 P, सं-उद्-,ᶜ अतिक्रम् 1 U, 4 P, लंघ् 1 A, 10, पारं गम् 1 P.

Surname, *s.* उपनामन् *n.*, कुलनाम. **-v. t.** Ex. by (*s.*); ' s. ed Vyasa ' व्यासकुलोत्पन्नः, व्यासोपनामा.

Surpass, *v. t.* अति-शी 2 A, अतिक्रम् 1 U, 4 P, अतिरिच्-विशिष्-pass., जि 1 P; *See* **Excel. -ing,** *a.* अति in comp.; ' s. the strength of man ' अतिमानुष; *See* **Beyond.**

Surplice, *s.* धौतावारः, उपरिच्छदः.

Surplus, *s.* उद्-वृत्तं, उद्वर्तः, अतिरिक्तभागः.

Surprise, *v. t.* वि-स्मि c. (स्माययति, स्मापयते), साश्चर्य-*a.* कृ, विस्मयेन उपहन् 2 P, विस्मयाकुल-आश्चर्यचकित-*a.* कृ. 2 अतर्कितं-सहसा-आपत् 1 P or आसद् c. or अवस्कंद् 1 P; सन्निपत्याभियुक्तः (U. 3) 'was s. ed and attacked.' **-s., -al,** *s.* विस्मयः, आश्चर्यं, चमत्कारः, चमत्कृति *f.*, अद्भुतं. 2 अतर्कितः आपातः-अवस्कंदः, सहसाक्रमः-अवस्कंदनं. **-ed,** *a.* विस्मित, विस्मापित, विस्मयाकुल, साश्चर्य, आश्चर्यचकित, विस्मयोपहत-अन्वित-आपन्न; ' to be s. ' विस्मि 1 A. 2 सहसाक्रांत. **-ing,** *a.* आश्चर्य-विस्मय-कर (री *f.*), अद्भुत, विचित्र, आश्चर्य-विस्मयावह.

Surrender, *v. t.* उपा-हृ 1 P, उपा-नी 1 P, सं-,ऋ c. (अर्पयति), निक्षिप् 6 P, प्र-दा 3 U, प्रति-पद् c. 2 परि-,त्यज् 1 P, उत्सृज् 6 P, हा 3 P, संन्यस् 4 U. 3 (Oneself) शरणं गम् 1 P or या 2 P or प्र-पद् 4 A, वशं गम्-या. **-s.** समर्पणं, प्रदानं, परि-,त्यागः, उत्सर्गः. 2 प्रणति *f.*, वशीभवनं.

Surreptitious, *a.* मोषेण-चौर्येण-छलेन-कृत-प्रकाशित-निवेशित, &c. **-ly,** *adv.* छलेन, सकपटं.

Surround, *v. t.* परि-वृ 5 U or c., परिक्षिप् 6 P, परि-इ 2 P, परिगम् 1 P, परि-,वेष्ट् 1 A or c., परि-सृ 1 P; oft. by मेखला, रसना, वलय in comp.; ' the earth s. ed by ocean ' समुद्ररसना-उदधिवलया-रत्नाकरमेखला-उर्वी. **-ing,** *a.* समंततः वर्तिन्, आभोग-पर्यंत-वर्तिन्; परिसरस्थ; *See* **Near. -s.** परिवेष्टनं, संवलनं.

Surtout, *s.* उत्तरीयं, प्रावारः.

Surveillance, *s.* अवेक्षा-क्षणं, निरूपणं.

Survey, *v. t.* प्र-,परि-,मा 3 A or c. (मापयति). 2 (With the eye) संदृश् 1 P, परि-अव-ईक्ष् 1 A, विलोक् 1 A, 10, निरीक्ष्, निरूप् 10. **-s.** अव-आ-लोकः-कनं, निरीक्षा, निरीक्षणं. 2 मापनं. **-or,** *s.* क्षेत्र-भू-मापकः.

Survive, *v. t.* अति-जीव् 1 P; जीव् with पश्चात् (with gen.) or उत्तरं (with

abl.): 's. danger' आपदं उत्तॄ 1 P. **-**_v. i._ धृ pass., अव-स्था 1 A. **-al,** _s._ अतिजीवनं, अवस्थानं. **-ing,** _a._, **-or,** _s._ शेष, अवशिष्ट, अतिजीविन्, ध्रियमाण, अवस्थित.

Susceptible, _a._ योग्य, उचित, ग्राहिन्, ग्रहण-वेदन-क्षम-शक्त, गमनीय, ग्राहक; _See_ **Admit** (of); ' I am made s. of an emotion ' विकारस्य गमनीयास्मि संवृत्ता (S. 1): ' youth is s. ' विकारि यौवनं (Mal. 1); ' s. of anger ' सुलभकोप, क्रोधशील, शीघ्रकोपिन्. **-Susceptibility,** _s._ ग्राहकत्वं, ग्रहण-वेदन-शीलता-क्षमता.

Suspect, _v. t._ शंक् 1 A, वि-आ-परि-°, सं-शी 2 A, न प्रति-इ 2 P or विश्वस् 2 P: 'exces-ive affection s. s evil' अतिस्नेहः पापशंकी (S. 4). 2 मन् 4 A, वि-, तर्क् 10. **-Suspicion,** _s._ आ-, शंका, संदेहः, संशयः, विकल्पः, वि-,तर्कः. **-Suspicious,** _a._ आ-.शंकिन्, जातशंक, शंका or संशय-शील or बुद्धि, साशंक, संदिग्धचित्त-मति, अविश्वासिन्. 2 आशंक्य, शंकावह, शंकास्थानं-आस्पदं-पात्रं.

Suspend, _v. t._ उद्-,बंध् 9 P, प्र-अव-लंब् c., वि-अव-संज् c.: विटपविषक्तवल्कलेषु (S. 1) ' the bark-garments s. ed from the branches'; आंदोलयति (D.). 2 व्याक्षिप् 6 P, विलंब् c. 3 (From office) नियतकालं यावत् आधिकारात् निष्कस् c. or प्रच्यु c. or भ्रंश् c. **-ed,** _a._ उद्बद्ध, प्र-अव-लंबित, विषक्त, आंदोलित, &c.: ' s. ed in a loop ' काचित, शिक्यित; ' s. ed from the neck ' कंठलंबिन्-लग्न. **-Suspense,** _s._ अनिश्चयः, संदेहः,संशयः, विकल्पः, दोलावृत्ति _f._, द्वैधीभावः; धृतद्वैधीभावकातरं मे मनः (S. 1) ' my mind is held in s. and hence anxious '; ' being in s. ' दोलायमान, संशयदोलारूढ, संदेहदोलास्थ. **-Suspension,** _s._ उद्बंधनं, अवलंबनं. 2 विलंबनं, व्याक्षेपः. 3 विच्छेदः, निवृत्ति _f._, निरोधः.

Sustain, _v. t._ भृ 3 U, सं-वृध् c., पा c. (पालयति) &c. 2 सं-,धृ 10, (शोकक्षोभं हृदयं प्रलापैरेव धार्यते U. 3); सं-स्तंभ् 9 P or c.; _See_ **Support;** ' s. life ' प्राणधारणं-प्राणयात्रां-कृ 8 U, जीवितं धृ, प्राणसारं धृ; _See_ **Live, Maintain.** 3 प्रवृत् c. 4 प्रति-उप-पद् c., _See_ **Prove.** 5 सह् 1 A, अनु-भू 1 P. **-Sustenance,** _s._ जीवनं, उपजीविका, वृत्ति _f._, अन्नं, आहारः; _See_ **Maintenance, Living.**

Sutler, _s._ सैन्यानुगामिन्-_a._ वणिज् _m._

Suture, _s._ संधिः, सीवनं.

Suzerain, _s._ अधीशः, अधीश्वरः.

Swaddle, _v. t._ क्षौमेण परिवृ c. or परि-वेष्ट् c., ' s.-ing clothes ' बालपरिवेष्टनं.

Swagger, _v. i._ प्र-,गल्भ् 1 A, विकत्थ् 1 A; _See_ **Boast.**

Swain, _s._ ग्रामिकः, असभ्यः, ग्रामीणः. 2 **Agriculturist,** q. v.

Swallow, _v. t._ ग्रस् 1 A, नि-, गॄ 6 P. **-**_s._ ग्रासः, गिलनं. 2 निगरणस्रोतस् _n._, अन्नमार्गः; ' s.-wort ' अर्कः, वसु(:सु)कः, आस्फोटः, गणरूपः, विक्षी(क्षि)रणः, मंदारः, अर्कपर्णः.

Swamp, _s._ कच्छभूः, अनूपो देशः, अनूपभूः. **-**_v. t._ आ-प्लु c.: _See_ **Plunge.** **-y,** _a._ कच्छ, अनूप.

Swan, _s._ मरालः, राजहंसः, श्वेतगरुत् _m._

Sward, _s._ शाद्वलं, सतृणभूमि _f._

Swarm, _s._ संघः, समूहः, गणः, वृंदं, कुलं; _See_ **Multitude.** **-**_v. i._ गणशः संनिपत् 1 P or संमिल् 6 P, संघशः गम् 1 P or या 2 P. **-ing,** _a._ (with) व्याप्त, संकुल, आ-सं-कीर्ण, जुष्ट, उपसेवित.

Swarthy, _a._ श्याम, कृष्ण, कृष्णवर्ण.

Swathe, _s._ पट्टः, दीर्घखंडः. **-**_v. t._ (पट्टेन) वेष्ट् 1 A or c., परिवृ c., परिच्छद् 10.

Sway, _s._ शासनं, आधिपत्यं, ईशत्वं, प्रभुत्वं, वशः-शं, अधीनता. **-**_v. t._ शास् 2 P. 2 प्रवृत् c., प्र-, नी 1 P, प्रेर् c., प्रयुज् 10, प्रचुद् 10: _See_ **Influence, Subject;** ' not s. ed by avarice ' अवशो लोभस्य, अनाकृष्टः लोभेन, लोभाप्रेरित, &c. **-**_v. i._ प्रेंख् 1 P, इतस्ततः चल् 1 P or कंप् 1 A; नम् 1 P, आ-प्र-लंब् 1 A.

Swear, _v. i._ शप् 1, 4 U, शपथं शप्. **-**_v. t._ शप् c., शपथं ग्रह् c. **-er,** _s._ शपथकृत् _m._ **-ing,** _s._ शपथं, शापः.

Sweat, _v. i._ प्र-,स्विद् 4 P: _See_ **Perspire.** 2 परिश्रम् 4 P: तम् 4 P (tire). **-**_v. t._ स्विद् c. **-**_s._ स्वेदः, घर्मः, स्वेदजलं. 2 परिश्रमः, आयासः; 'by the s. of thy brow' आत्मनः परिश्रमेण. **-ing, -y,** _a._ सस्वेद, घर्माक्त, स्वेदवत्.

Sweep, _v. t._ मृज् 2 P or c., सं-परि-प्र-°; ' s. away ' अव-अप-मृज्, अपवह् c., (रयेण) अपनी; ' s. across ', ' s. over ' जवेन अतिक्रम् 1 U, 4 P or अति-इ 2 P. **-**_s._ प्रसरः, गोचरः, विषयः; _See_ **Range.** **-er,** _s._ संमार्जकः, खलपूः, बहुकरः. **-ing,** _s._ सं-,मार्जनं-ना, मलापहरणं. **-ings,** _s._ अवकरः, अव(प)स्करः, मलं, संकरः, उच्छिष्टं.

Sweet, _a._ मधुर; मिष्ट, सुरस, स्वादु, मधुमय (यी _f._), (of taste only). 2 चारु, मंजुल, ललित, कोमल, मनोज्ञ; _See_ **Pleasant,** ' s. smile ' चारु-मधुर-स्मितं; ' s. song ' चारुगीतं, &c. **-**_s._ मधु _n._, मिष्टं, आस्वादः. 2 सुखं, सौख्यं; ' s. s of royalty ' राज्यसुखानि; ' s.-heart ' वल्लभ, प्रणयिन्,दयित, कांत, रमण (णी _f._), प्रियतम; ' s.-meat

मिष्टान्नं, मोदकः, वायनं; ‘s.-smelling’ सुगंधि, सुरभि; ‘s.-speaking, -toned, -voiced’ मंजुलस्वन, चारुभाषिन्, प्रियंवद, मधुरवाक्. **-en,** *v. t.* मधुरीकृ 8 U, मिष्टीकृ स्वादूकृ. -*v. i.* मधुरीभू. **-ly,** *adv.* मधुरं, चारु, मधुर in comp.; ‘smiling s.’ चारुहासिन्. **-ness,** *s.* माधुर्यं, स्वादुता, &c.

Swell, *v. i.* श्वि 1 P or pass., प्र-उत्-°, स्फाय् 1 A, वृध् 1 A, उत्सृप् 1 P; प्र-उप-चि pass., बहुली-भू 1 P; ‘a heart s. ing with joy’ हर्षोत्फुल्लं हृदयं; *See* **Increase.** -*v. t.* श्वि c., स्फाय् c. (स्फावयति), वृध् c. (with air), उद्-प्र-आ-ध्मा 1 P; *See* **Puff.** **-s., -ing,** *s.* स्फीति *f.*, वृद्धि *f.*, उपचयः. 2 श्वयथुः; शोथः; शोफः, गंडः. 3 (Of the sea) ऊर्मिप्रलोठनं, संक्षोभः. **-ing,** *a.* शूयमान, उत्सर्पिन्; ‘a s. sea’ प्रचलदूर्मिमालाकुल. **-Swollen,** *a.* शून, स्फीत, प्रवृद्ध, &c.

Swelter, *v. i.* घर्मेण अभिभू or बाध् pass.

Swerve, *v. i.* प्र-वि-चल् 1 P, भ्रंश् 4 P, 1 A, पराङ्मुखीभू 1 P, च्यु 1 A, व्यति-इ 2 P, व्यतिक्रम् 1 U, 4 P, (with abl.); अतिचर् 1 P, अति-वृत् 1 A (with acc.); *See* **Deviate;** ‘s. ing from the right path’ सन्मार्गभ्रष्ट, &c.

Swift, *a.* जवन, वेगवत्, त्वरित, सत्वर, शीघ्र-द्रुत-लघु-गामिन्, प्र-,जविन्, शीघ्रग, प्रजवन, तरस्विन्, महावेग; ‘s. of foot’ धावने महाजव; ‘as s. as the wind’ वायुगति, वायुवेग. **-ly,** *adv.* शीघ्रं, जवेन, सवेगं, सत्वरं. **-ness,** *s.* शीघ्रता, वेगः, तरस् *n.*

Swig, Swill, *v.* अतिपानं कृ 8 U.

Swim, *v. t.* तॄ 1 P; प्लु 1 A: ‘swam across the sea with their arms’ पयः अतारिषुर्भुजैः (Si. xii. 77); ‘s. ing against the waves’ बाहुभ्यां लहरीश्छिंदन्; ‘the Earth s. s in blood’ रुधिरप्लाविता मही. -*v. t.* तॄ (with acc.), पारं गम् 1 P. **-mer,** *s.* तरण-प्लवन-कृत् *m.* **-ming,** *s.* तरणं, प्लवनं; ‘s. against the current’ प्रतीपतरणं.

Swindle,-er, *See* **Cheat.**

Swine, *s.* शू(सू)करः, वराहः. **-ish,** *a.* सौकर (री *f.*), सूकरशील-वृत्ति.

Swing, *s.* दोला-ली, प्रेंखा, प्रेंखोलनं, हिंदोलः; काचं, शिक्यं (with a loop). 2 दोलनं, प्रेंखणं. 3 रयः, वेगः, गति *f.* -*v. t.* प्रेंख् 1 P, दोलायते (D.), इतस्ततः सं-वि-चल् 1 P. -*v. t.* प्रेंख् c., आंदोलयति-प्रेंखोलयति (D.), इतस्ततः सं-वि-चल् c. **-ing,** *a.* प्रेंखत्, दोलायमान; काचित, शिक्यित.

Swinge, *v. t.* बलवत् तड् 10, प्रतुद् 6 P, पक्षं प्रहृ 1 P.

Swirl, *v. i.* घूर्ण् 6 P, 1 A, भ्रम् 1, 4 P.

Swish *v. t.* वेत्रेण तड् 10 or हन् 2 P or प्र-हृ 1 P.

Switch, *s.* पिंजा; पल्लवः.

Swoon, *v. i.* मुह् 4 P, प्र-वि-व्या-°, मूर्च्छ् 1 P. -*s.* मूर्च्छा, मोहः; ‘he fell in a s.’ मोहपरायणो बभूव, मूर्च्छापन्नः. **-ing,** *a.* मूढ, मुग्ध, मूर्च्छापन्न, मोहवश.

Swoop, *s.* अवपातः, सहसाक्रमणं-आपतनं. -*v. i.* सहसा अवपत्य ग्रह् 9 U or आक्रम् 1 U, 4 P.

Sword, *s.* असिः, खड्गः, निस्त्रिंशः. कृपाणः, करवा(पा)लः, चंद्रहासः, रिष्टिः, मंडलाग्रः, कौक्षेयकः; ‘s.-belt’ त्सरुबंधनं; ‘s.-stick’ कूटासिः; ‘s.-man’ खड्गिन्, खड्गधरः, आसिकः.

Syce, *s.* अश्वबंधः-पालः.

Sycophant, *s.* चाटुकारः-पटुः, अतिलालनपरः, अत्यनुरोधिन् *m.* **-Sycophancy,** *s.* चाटूक्ति *f.*, चाटुकारित्वं; *See* **Flatter,-y.**

Syllable, *s.* अक्षरं; ‘of one s.’ एकाच्, एकाक्षर; ‘of many s. s’ अनेकाच्, बह्वक्षर.

Syllabus, *s.* सारः, संक्षेपः, सारांशः.

Syllogism, *s.* न्यायः. **-Syllogistic,** *a.* न्यायसंगत, न्याय्य, न्याय in comp.

Sylph, *s.* तन्वंगी, तनुगात्री. 2 विद्याधरी, दिव्यांगना.

Sylvan, वन्य, आरण्यक.

Symbol, *s.* चिह्नं, लक्षणं, लिंगं, संज्ञा, प्रतिरूपं. **-ic,** *a.* लाक्षणिक-सांकेतिक (की *f.*), संकेतरूप.

Symmetry, *s.* सौष्ठवं, चतुरस्रता, यथाप्रमाणता, अंगसंयोगः, अवयवसंगति *f.* **-ical** *a.* सम, चतुरस्र, सम-यथा-स-प्रमाण, संगतावयव.

Sympathy, *s.* सहानुभवः, संवेदनं, अनुकंपा, समदुःखता, समदुःखिता; समसुखिता. oft. by समदुःख-सुख; ‘the birds even screamed as if out of s.’ विहगाः समदुःखा इव चुक्रुशुः (R. viii. 39). 2 स्वभाव-प्रकृति-साम्यं, आनुगुण्यं, साधर्म्यं आनुरूप्यं. **-etic,** *a.* समदुःख-दुःखिन्, सदय, स्निग्ध, सहदुःखिन्,-सुखिन्. **-ize,** *v. i.* सह-सम-दुःखिन्-*a.* भू &c.: *See* (*s.*); ‘I s. with you in your distress’ त्वद्दुःखदुःखितोहं; त्वत्समदुःखभागहं; ‘many s. with us in our success’ बहवः अस्मदभ्युदयेन सुखभाजो भवंति-मोदंते-प्रीयंते &c.

Symphony, *s.* एकतानता, स्वरैक्यं, साम्यं; *See* **Harmony.** **-ious,** *a.* सम or संगतस्वर or तान.

Symposium, *s.* सह-पान-भोजनं.

Symptom, *s.* लिंगं, लक्षणं; *See* **Indication. -atic,** *a.* सूचक, बोधक.

Synagogue, *s.* समाजः, सभागृहं.

Synchronous, *a.* एक-सम-कालीन. **-Synchronism,** *s.* यौगपद्य, समकालीनता. **-Synchronize,** *v. i.* युगपत्-एककाले-वृत् 1 A or भू 1 P or जन् 4 A.

Syncope, *s.* मूर्छा.

Syndicate, *s.* सभा, संसद् *f.*, सदस् *f. n.*

Synod, *s.* समाजः, सभा, परिषद् *f.* **-ic,** *a.* चंद्र in comp.; (चंद्रमासः).

Synonym, *s.* पर्यायः, तुल्यार्थशब्दः, पर्यायशब्दः. **-ous,** *a.* समानार्थ, तुल्य-एक-अर्थ, सहार्थ.

Synopsis, *s.* सारसंग्रहः-पत्रकं. **-Synoptical,** *s.* सारभूत.

Syntax, *s.* कारकप्रक्रिया, वाक्यरचनाविचारः.

Synthesis, *s.* संयोगः, संकलनं. **-Synthetical,** *a.* सांयोगिक (की *f.*); संयोग in comp.; संयोगात्मक.

Syphilis, *s.* उपदंशः.

Syringe, *s.* शृंगं-गकं, बस्ति *m. f.*

Syrup, *s.* मधुरं, मधु *n.*, लेह्यं.

System, *s.* पद्धति *f.*, रीति *f.*, सरणि-णी *f.*, क्रमः, पर्यायः; *See* **Manner. 2** कल्पना, प्रयोगः. **3** शास्त्रं. 4 (Of the body) कायव्यूहः. 5 (Of philosophy) दर्शनं; 'the solar s.' सौरं जगत्. **-atic,** *a.* अनुज्झितक्रम, यथापद्धति, यथाक्रम, क्रमानुगत. **-atically,** *adv.* यथाक्रमं, यथापद्धति. **-atize,** *v. t.* व्यव-स्था c. (स्थापयति), यथाक्रमं रच् 10 or विन्यस् 4 U; *See* **Method,-ize,** &c.

Systole, *s.* हृत्संकोचः.

T.

Tabard, *s.* तनुत्रावारः.

Tabasheer, *s.* *See Manna.*

Tabby, *a.* चित्र, शबल, कर्बुरित.

Tabernacle, *s.* पटवेश्मन् *n.*, पटमंडपः, दूष्यं; (fig.) अचिरस्थायी आवासः.

Tabes, *s.* क्षयः, क्षयथुः.

Tablature, *s.* *See* **Picture.**

Table, *s.* फलकः-कं, आधारः, मंचः; 't. for writing' लेखनाधारः, लिपिसज्जाधारः. **2** पत्रं. **3** (Of metal &c.), पत्रं, फलकं; 'sitting at the same t.' सहभोजिन्, पांक्तेयः; 't. of contents' सूची-निर्देश-पत्रं, सूचि-ची *f.*, अनुक्रमणिका; 't. of numbers' अंकपत्र-जालं; 'be at ' भुज् 7 A; 'to keep good t.' भोजनविशेषान् उपकल्प् c.; 't.-land' अधित्यका, ऊर्ध्वभूमि *f.*, मालं क्षेत्रं, सानु *m. n.*, प्रस्थः; 't.-talk' विश्रंभालापः-कथा. **-Tablet,** *s.* पट्टिका, पट्टः, फलकः, पत्रं; 'on the t. of your heart' हृत्पट्टिकायां. **-Tabular,** *a.* पत्राकार

Taboo, *See* **Interdict.**

Tabor, *s.* मुरजः, मृदंगः.

Tacit, *a.* तूष्णीं दत्त, मानस (सी *f.*); 't. consent' मानसाज्ञा; 't. obedience' निर्विकल्प-निर्विवाद-आज्ञापालनं. **-ly,** *adv.* तूष्णीं, जोषं, मूकभावेन, मनसा; निर्विकल्पं.

Taciturn, *a.* संवृतिमत्, मौनिन्, अनालापशील, तूष्णीक, तूष्णींशील, भाषणविरक्त, मितवाक्-कथ. **-ity,** *s.* संवृति *f.*, मौनं, मूकभावः, अनालापः, मितवाक्, कथाविरक्ति *f.*, वाग्यमः.

Tack, *v. t.* आ-बंध् 9 P, पि-आ-नह् 4 P. **2** (a vessel) नौमार्गं परि-व्या-वृत् c. **-***s.* कीलकः, गुणः. **-ing,** *s.* नौमार्गपरिवृत्ति *f.*

Tackle, *s.* (नौ-)सज्जा, रज्ज्वादिसामग्री. **-***v. t.* सज्जीकृ 8 U, संनह् c. **-ing,** *s.* *See* (*s.*) above.

Tact, *s.* कौशलं, नैपुण्यं, वैदग्ध्यं, युक्ति *f.*, चातुर्यं; *See* **Skill. -Tactics,** *s.* युक्तिकौशलं; (of war) बलविन्यासकौशलं, व्यूहरचनाविद्या. **-Tactician,** *s.* युक्तिकुशलः, व्यूहपंडितः.

Tactile, *s.* *See* **Tangible.**

Tadpole, *s.* भेकशिशुः-शावकः.

Tag, *s.* अग्रं.

Tail, *s.* लांगू(गु)लं, पुच्छः-च्छं, लूमं; वालहस्तः, वालधिः (bushy end). **-ed,** *a.* पुच्छिन्, लांगूलयुक्त.

Tailor, *s.* सौचिकः, तुन्नवायः, सूचिकः; 't.'s work' सूच्या सेवनं, सूचिकर्मन् *n.*

Taint, *v. t.* दुष् c. (दूषयति), लिप् 6 P, कलंकयति (D.). **-***s.* दूषणं, कलंकः, दोषः; *See* **Stain.**

Take, *v. t.* ग्रह् 9 U, प्रति-परि-° (in all senses) अगृहीते राक्षसे (Mu. 1); उपदेशं गृहाण &c ; आ-दा 3 A प्रति-इष् 6 P; स्वी-अंगी-कृ 8 U. **2** धृ 1 P, 10, आ-अव-लंब् 1 A. **3** (A word in a sense) परि-ग्रह्; तत्राथशब्द आनंतर्यार्थः परिगृह्यते (S. B. 23) 'is taken in the sense of' &c. **4** नी 1 P, वह् 1 P, हृ 1 P. **5** उपलभ् 1 A, अवगम् 1 P **6** अनुभू 1 P; *See* **Suffer, Affect. 7** लभ्, प्राप् 5 P, अधिगम्, आ-सद् c.; *See* **Get. 8 Captivate,** q.v.; 't. food' आहारं सेव् 1 A; 't. the field' रणभूमिं अवतॄ 1 P, रणांगणे युध् 4 A; 't. rest' विश्रम् 4 P; 't. root' मूलं बंध् 9 P; 't. heart' समाश्वस् 2 P, धैर्यं अवलंब्-अवष्टंभ् 9 P; *See* **Courage;** 't. fire' दह् pass., अग्निं उप-इ

2 P; 't. in hand' प्रतिपद् 4 A, उ(ऊ)रीकृ 't. place'; *See* **Happen**; 't. part in' हस्तं दा 3 U, संगिन्-सहकारिन्-सहाय-*a.* भू; 'took part in the massacre' विशसने सहायो बभूव; 't. aim' सं-धा 3 U; 't. one's way' सिध्-साध् c. (साधयति), साधयामो वयं (.1); 't. effect' फल् 1 P, सफलीभू 1 P; 't. possession of' आक्रम् 1 U, 4 P, आविश् 6 P; 't. to task' निर्भर्त्स् 10 A, परुषं निगद् 1 P. **–***v. i.* सिध् 4 P, संपद् 4 A, गुणं आवह्. 2 आश्रि 1 U, व्रज् 1 P. **–away**, अप-वि-नी 1 P, अप-, हृ 1 P, अप-ऊह् 1 U, विनुद् c.; *See* **Remove**. **–back**, सं-प्रतिसं-हृ, प्रत्या-दा, प्रत्यानी. **–down**, अवरुह् c., नि-अव-पत् c., अधो नी. 2 लिख् 6 P. **–for**, मन् 4 A; *See* **Consider**; 'mischievousness is t. en for assiduity' चापल्यमुद्योगितां भजते. **–in**, ग्रह्, सेव्; (in the stomach) ग्रस् 1 A: नि-,गॄ 6 P. 2 विप्र-लभ् 1 A; *See* **Cheat**. **–off**, अपनी, अवतॄ c.,उन्मुच् 6 P, अवकृष्. **–out**, बहिर्नी, अपनी. **–to**, सेव्, आश्रि, अवलंब्. **–up**, प्रतिपद्, अंगी-स्वी-कृ. 2 आरभ् 1 A, प्रवृत् c. 3 **Occupy**, **Engross**, q. v. **–upon**, (oneself) अंगीकृ, प्रति-पद्, उ(ऊ) रीकृ; (निर्वाहः प्रतिपन्नवस्तुषु Mu. 2). **–er**, *s.* ग्रहीतृ *m.*, ग्राहिन्-हारिन्-हृत् in comp. **–ing**, *a.* मोहिन्, मनोहारिन्, चित्ताकर्षिन्, मनोज्ञ; *See* **Charming**. 2 ग्राहिन्, &c. **–***s.* आदानं, ग्रहणं, स्वीकारः.

Tale, *s.* कथा, उप-,आख्यानं, आख्यायिका. 2 परि-,गणना, संख्यानं; 't.-bearer' सूचकः, कर्णेजपः; 't.-bearing' पैशुन्यं, उपजापः.

Talent, *s.* मति *f.*, बुद्धि *f*, धीशक्ति *f.* प्रज्ञा, बुद्धि or मति-प्रभावः or विभवः, बुद्धिकौशलं. 2 गुणः. **–ed**, *a.* धीमत्, प्रज्ञ, सुधी, गुणिन्, गुणवत्.

Talisman, *s.* कवचः-चं, माया, रक्षाकरंडकः.

Talk, *v. i.* आ-सं-लप् 1 P, सं-,भाष् 1 A, संवद् 1 P, संमंत्र् 10 A; *See* **Converse**. **–***s.* आलापः, संवादः, सं-,कथा, सं-,भाषणं, कथाप्रसंगः. 2 किंवदंती, प्रवादः; *See* **Report**; 'idle t.' प्र-,जल्पितं, प्रलापः; 'popular t.' जनप्रवादः; 'fine t.' शाब्दपांडित्यं; 'mere t.' वाङ्मात्रं. **–ative**, *a.* बहुभाषिन्, जल्पनशील, जल्प(ल्पा)क, वावदूक. **–ativeness**, *s.* वावदूकता, जल्पकता, बहुभाषित्वं. **–er**, *s.* कथकः, वक्तृ *m.*, आलापिन् *m.*

Tall, *a.* उच्च, तुंग, उन्नत, उच्छ्रित, प्रांशु; 't. in stature' उच्च or दीर्घ-देह or मूर्ति; 't.person' प्रांशुः. **–ness**, *s.* उच्चता, उत्तुंगता, उन्नति *f*, उच्छ्रायः; 't. of stature' देहदीर्घता-उच्चता.

Tallow, *s.* (मेषादीनां) वसा, वपा; 't.-chandler' वसाविक्रयिन् *m.*

Tally, *v. i.* सं-वद् 1 P, तुल्य-अनुरूप-अनुगुण-*a.* भू 1 P; 't.-ing of hands' अक्षरसंवादः. **–***s.* *Match*, q. v.

Talon, *s.* नखः-खं,नखरः-रं.

Tamarind, *s.* चिंचा, तिंतिडी-डिका, अम्लिका, आम्लि(म्ली)का.

Tamarix, *s.* पिचुलः, भाबुकः.

Tambour, –ine, *s.* *See* **Drum** (1).

Tame, *v. t.* वि-नी 1 P, दम् c. (दमयति), निग्रह् 9 P, वशीकृ 8 U; (fury) शम् c. (शमयति). **–***a.* विनीत, दांत, वशग, अधीन. 2 ग्राम्य, गृहपुष्ट, गृह्य-गृह-ग्राम-in comp; 't. dove' गृहकपोतः; 't. hog' ग्राम्यशूकरः, विड्वरः. 3 निस्तेजस्, नष्टवीर्य; नीरस, निःसत्त्व; *See* **Spiritless**. **–ed**, *a.* दांत, शांतक्रौर्य, विनीत. **–er**, *s.* विनेतृ *m.*, दमयिता. **–ing**, *s.* दमनं. **–ly**, *adv.* नष्टवीर्यवत्, कापुरुषवत्, क्लीबवत्. **–ness**, *s.* वशता, गृह्यता, &c.

Tamper, (with) *v. i.* *Meddle*, q. v. 2 (Witness &c.) कपटेन-छलेन-वशीकृ 8 U; दुष् c. (दूषयति), अन्यथा कृ, विकृ.

Tan, *v. t.* श्यामीकृ 8 U, सं-धा 3 U, शुष् c.; परिष्कृ c. **–ner**, *s.* चर्मकारः, चर्मशोधनकृत् *m.*

Tangent, *s.* स्पर्शः, स्पर्शरेखा.

Tangible, *a.* स्पर्शनीय, स्पृश्य. 2 स्पर्शवेद्य, प्रकट, सुस्पष्ट, विभाव्यमान.

Tangle, *v.* **Entangle**, q. v. **–ed**, *a.* जटिल, संमिश्र, संकुल, संकीर्ण.

Tank, *s.* तडागः-गं, जलाशयः, कासारः, वापी, दीर्घिका (large t.); *See* **Pond**.

Tankard, *s.* चषकः.

Tantalize, *v. t.* आशां-तृष्णां-वृध् c., आशां वर्धयित्वा विप्रलभ् 1 A,जाताशाः खंड् 10 or भंज् 7 P. 2 (general) **Cheat**, q. v.

Tantamount, *a.* सम, तुल्य, समार्थक, तुल्यार्थक.

Tantrum, *s.* निष्कारण वैरभावः or दुःशीलं.

Tap, *v. t.* लघु आ-अभि-हन् 2 U or प्र-हृ 1 P. 2 छिद्रयति (D.), छिद्रं कृ 8 U. **–***s.* मृदु-लघु-चपेटः, लघ्वाघातः-प्रहारः.

Tape, *s.* दीर्घपट्टः-बंधनी.

Taper, *s.* दीपिका, क्षुद्रदीपः.

Tapering, *a.* वृत्तानुपूर्व (K. 1. 35); गोपुच्छाकार,शुंडाकृति.

Tapestry, *s.* चित्रयवनिका.

Tapeworm, *s.* कृमिः, अंत्रकीटः.

Tapis, *s.* *See* **Tapestry**.

Tar, *s.* अ-,रालः, सर्जरसः; *See* **Pitch**.

Tardy, *a.* चिरक्रिय, दीर्घसूत्रिन्, मंद; *See* **Slow.**

Target, *s.* क्षुद्रचर्मन् *n.* 2 शरव्यं, लक्ष्यं-क्षं. **-eer,** *s.* चर्मधरः.

Tariff, *s.* (पण्य-) शुल्कपत्रिका.

Tarnish, *v. t.* दुष् c. (दूषयति). कलंकयति (D.); *See* **Stain.** *-v. i.* मलिनीभू 1 P, दुष् 4 P.

Tarpaulin, *s.* सर्जरसालिप्तं शाणं.

Tarry, *v. i.* विलंब् 1 A, चिरं(रा)यति (D.); अव-स्था 1 A.

Tart, *a.* अम्ल, शुक्त. *-s.* अम्लीष.

Tartar, *s.* दंतशर्करा, मलं, पिप्पिका.

Task, *s.* कार्यं, नियुक्तं कर्म, कर्तव्यं, कार्यभा(भ)रः, व्रतं; 'one who does a t. imposed' व्रातीनः; 'to take to t.' अधिक्षिप् 6 P, निर्भर्त्स् 10 A; *See* **Reproach.** *-v. t.* कार्यभारं न्यस् 4 U, गुरुकार्ये नियुज् 7 A, 10.

Tassel, *s.* कौशेयसूत्रगुच्छः.

Taste, *v. t.* आ-,स्वाद् 1 A or c., रस् 10, प्राश् 9 P, लिह् 2 U. *-v. i.* Oft. by (*s.*). *-s.* आ-,स्वादः, रसः. 2 आ-,स्वादनं, रसनं. 3 (Sense of t.) रसनं, रसनेंद्रियं, रुचि *f.* 4 अभि-,रुचिः, प्रवृत्ति *f.*, शीलं, व्यसनं; 't. s differ', 'different men have different t. s' भिन्नरुचिर्हि लोकः; 'he was not to her t.' स न तस्या रुचये बभूव (R. vi. 44); 'of like t. s' समानशील. 5 रसज्ञता, रसिकता; 'devoid of t.' अरसिक, अरसज्ञ. **-er,** *s.* आस्वादकः. **-y, -ful,** *a.* रुचिकर (री *f.*), स्वादु, मिष्ट, सरस, सुरस, रुच्य. 2 हृद्य, मनोहर, हृदयग्राहिन्. **-fully,** *adv.* सकौशलं; रसज्ञतया, यथारुचि. **-less,** *a.* नीरस, विरस, रसहीन.

Tatter, *s.* चीरं, चीरचीवरं, नक्तकः, कर्पटः; *See* **Rag.** **-ed,** *a.* जीर्ण, जर्जरित.

Tattle,-er, *See* **Babble,-er.**

Tattoo, *v. t.* रञ्ज् c. *-s.* पटहप्रणादः.

Taunt, *v. t.* आ-अधि-क्षिप् 6 P, निंद् 1 P, उपालभ् 1 A; *See* **Censure.** 2 सोल्लुंठनं-सोपहासेन-वद् 1 P; 'enough of t. ing' अलमलमुपालभ्य. *-s.* आ-अधि-क्षेपः, उपालंभः, सोल्लुंठनोक्ति *f.* **-ing,** *a.* साक्षेप, सोपालंभ, आक्षेपगर्भ; *See* **Sarcastic.**

Taurus, *s.* वृषभः,-राशिः.

Taut, *a.* दृढं आतत.

Tautology, *s.* पुनरुक्ति *f.* पुनरुक्तत्वं, पौनरुक्त्यं. **-ous,** *a.* पुनरुक्त, पुनरुक्तभूत.

Tavern, *s.* गंजा, शुंडापानं, शुंडा; पथिकाश्रमः; 't. keeper' शौंडिकः.

Tawdry, *a.* बहिरुज्ज्वल, बाह्यशोभन, मिथ्याशोभायुक्त.

Tawny, *a.* पिंग, पिंगल, पिशंग (गी *f.*), कपिल, कडार, कद्रु.

Tax, *s.* करः, बलिः; शुल्कः-ल्कं, राजस्वं. 2 भारः. *-v. t.* करं न्यस् 4 P (with loc.) or दा c. (दापयति) or ग्रह् 9 U (with abl.). 2 आयस् c., अत्यंतं पीड् 10. 3 निंद् 1 P, दोषं ग्रह् 9 U; *See* **Censure.** **-able,** *a.* करार्ह, शुल्क-कर-अधीन. **-ation,** *s.* करग्रहणं-आधानं, शुल्कसंस्थापनं.

Teach, *v. t.* अधि-इ c. (अध्यापयति), शिक्ष् c., पठ् c., उपदिश् 6 P, शास् 2 P. **-er,** *s.* अध्यापकः, शिक्षकः, गुरुः, उपदेष्टृ *m.*, शास्तृ *m.*; 'religious t.' उपाध्यायः, आचार्यः. **-ing,** *s.* अध्यापनं, शिक्षा-क्षणं, उपदेशः.

Teak, *s.* अर्णः; 't.-wood' अर्णं, अर्णकाष्ठं.

Team, *s.* युग्मं or by pl.

Tear, *s.* अश्रु-स्रु *n.*, बाष्पः, अस्रं, नेत्रांबु *n.* -जलं-उदकं, नयनवारि, and sim. comp.; 'with t. s in eyes' सबाष्पं, सास्रं, बाष्पाकुलनयन-*a.*; 'starting of t. s' बाष्पोद्गमः, उद्बाष्पत्वं; 'flood of t. s' धाराश्रु, अश्रुधारा; 'having the eyes filled with t. s' बाष्पाकुल, अश्रुनयन, सास्र, अश्रमुख, अश्रुपरिप्लुतेक्षण, पर्यश्रु. **-ful,** *a.* सबाष्प, साश्रु अश्रु-संकुल-पूर्ण-परिप्लुत. **-fully,** *adv.* सास्रं, सबाष्पं, साश्रु.

Tear, *s.* छिद्रं, विदरः, भिदा; *See* **Rent.** *-v. t.* वि-,दृ 9 P or c., वि-,शॄ 9 P, विदल् c., भिद्-निर्भिद्- 7 P; 'she tore her hair for grief' विललाप विकीर्णमूर्धजा (K. iv. 4); 't. to pieces' शकलीकृ, चूर्ण् 10. **-down,** अवकृष् 1 P, निकृष्. **-off,** आच्छिद् 7 P, अपनी 1 P, व्यपोह् 1 P, निर्हृ 1 P; 't. off the hair' केशान् उल्लुंच् 1 P; *See* **Pull** also; 'I am unable to t. myself off from the cane-bower' निर्गंतुं सहसा न वेतसगृहाच्छक्तोस्मि (S. 3). **-up,** उन्मूल् 10, उत्-वि-पट् 10, उद्-धृ 1 P, उच्छिद्, उत्खन्, व्यपरुह् c. *-v. i.* विदृ-विभिद्-pass. 2 सवेगं चल् 1 P. **-ing,** *s.* वि-,दारणं, विभेदनं, पाटनं, &c.

Tease, *v. t.* दु 5 P, क्षुभ् c., अर्द् 1 P or c., बाध् 1 A, पीड् 10; *See* **Injure.**

Teat, *s.* वृंतं. 2 चूचुकं, स्तनाग्रं.

Technical, *a.* पारिभाषिक-सांकेतिक-(की *f.*). **-ity,** *s.* पारिभाषिकशब्दः, परिभाषा. 2 पारिभाषिकत्वं. **-ly,** *adv.* परिभाषानुसारेण.

Technology, *s.* परिभाषा. 2 शिल्प-कला-विज्ञानं; 'school for t.' शिल्पशाला.

Tedious, *a.* अतिदीर्घ, दीर्घसूत्र, दीर्घतर; 'passes the night grown t. by sorrow' गमयति रजनीं विषाददीर्घतरां (S. 4). 2

श्रमावह, क्लांति-खेद-कर (री *f.*). 3 मंद, मंथर, दीर्घसूत्रिन् चिरक्रिय. **-ly,** *adv.* अति-सु-दीर्घं. **-ness,** *s.* अतिदैर्घ्यं, श्रमावहता; दीर्घता ex. by (*a.*).

Teem, *v. i.* **Abound,** q. v. **2** बाहुल्येन उत्पद् c. or प्र-सू 2, 4 A. **-ing,** *a.* परिपूर्ण, पूर्णगर्भ, आढ्य, समाकुल, आकीर्ण, प्रचुर; *See* **Abundant.**

Teetotal, *a.* मद्यनिवृत्तिविषयक. **-(l) er,** *s.* मद्यात् निवृत्तः, निवृत्तमद्यः.

Tegument, *s.* आवेष्टनं, आवरणं, कवचः-चं, पुटः-टं.

Telegram, *s.* विद्युत्प्रेरितवार्ता, विद्युत्संदेशः-वार्ता. **-Telegraph,** *s.* विद्युद्यंत्रं विद्युद्वार्तावहः.

Teleology, *s.* मीमांसा, हेतुविद्या.

Telephone, *s.* दूरभाषणयंत्रं.

Telescope, *s.* दूरदर्शनयंत्रं.

Tell, *v.t.* कथ् 10. आचक्ष् 2 A, शंस् 1 P, आ-नि-विद् c., आ-,ख्या 2 P or c. (ख्यापयति) (with dat.); वर्ण् 10, कत्त 10, श्रु c., नि-,गद् 1 P, व्या-उदा-हृ 1 P, अभि-धा 3 U, निरूप् 10: *See* **Say** also. **2** गण् 10, सं-परिसंख्या; ' t. beads ' जप् 1 P. **-*v. i.*** सिध् 4 P, सफलीभू 1 P, गुणं-कार्यं-कृ, यशः-सिद्धिं-दा 3 U. **2** (upon) गुणं-कार्यं-जन् c. or उत्पद् c.; अवसद् c; अप-चि 5 U, क्षि 5 P or c. **2** दुर्बलीकृ; *See* **Impair;** ' t.-tale ' सूचकः, पिशुनः, कर्णेजपः. **-er,** *s.* कथकः, आख्यायकः. **-ing,** *s.* कथनं, शंसनं &c.

Temerity, *s.* साहसं, क्षिप्रकारिता, असमीक्ष्य-अविमृश्य-कारिता; *See* **Rashness.**

Temper, *v. t.* संमिश्र् 10, संयुज् 10, संसृज् 6 P. **2** मृदूकृ 8 U, स्निग्धीकृ, प्र-,शम् c. (शमयति), लघूकृ, लघयति (D.), नियम् 1 P; *See* **Moderate.** **-*s.*** शीलं, प्रकृति *f.*, स्व-,भावः; ' good t. ' सुशीलं, सद्भावः, सौजन्यं; *See* under ' **Good. 2** समता, अक्षोभः, असंभ्रमः, संयमः, रोषाभावः, चित्तस्वास्थ्यं,-समता; ' to lose t. ' क्षुभ् 4 P, क्रुध्-कुप् 4 P. **3 Anger,** q. v. **-Temperament,** *s.* प्रकृतिः, स्वभावः, देह or शरीरप्रकृतिः or स्वभावः; ' of a choleric t.' पित्तप्रकृति. **-Temperate,** *a.* परि-,मित, समर्याद, नियत. **2** प्र-,शांत, अक्षुब्ध, धीर, अकोपन, अचंड. **3** संयत, संयमिन्, संयतवृत्ति, संयमशील; ' t. in eating' मिताहार, अल्पाहार, मिताशिन्, संयताहार; ' t. in drinking ' &c.; *See* **Moderate. 4** समशीतोष्ण, मंदोष्ण. **-ly,** *adv.* धीरं, शांत्या, अक्षोभेण, निरुद्वेगं, शांतचेतसा. **-Temperance,** *s.* संयमः, निग्रहः, परिमितता, नियमः, नियतत्वं, मिताहारः, मिताशनं, मितपानं, पानाप्रसक्ति *f.*, &c.

Temperature, *s.* उष्ण-घर्म-परिमाणं.

Tempest,-ous, *See* **Storm,-y.**

Temple, *s.* देवालयः, देवतायतनं-निकेतनं, सिद्धायतनं, देवगृहं-भवनं-मंदिरं; and sim. comp.; मठः, विहारः (Jaina t.); ' endowment of a t.' देवस्वं. **2** कुंभः, कपोलः, शंखः.

Temporal, *a.* ऐहिक-सांसारिक-ऐहलौकिक-प्रापंचिक-लौकिक- (की *f.*).

Temporary, *a.* अचिरस्थायिन्, अचिर-अल्पकालिक (की *f.*), अशाश्वत (ती *f.*), असनातन (नी *f.*), अचिर, अनित्य, क्षणिक. **-ily,** *adv.* स्वल्पकालं, अचिरं, अशाश्वतं.

Temporize, *v. i.* यथाकालं-यथासमयं-व्यवहृ 1 P; छंदोनुवृत् 1 A **-ing,** *a.* समयानुवर्तिन्, कालानुरोधिन्.

Tempt, *v. t.* प्र-वि-लुभ् c., वि-आ-कृष् 1 P, वि-,मुह् c.; *See* **Allure. 2** परीक्ष् 1 A. **-ation,** *s.* प्र-वि-लोभनं, आकर्षणं, विकारहेतुः, विकारहेतौ सति विक्रियंते येषां न चेतांसि त एव धीराः (K. 1. 59) 'there being t. s &c. '; ' liable to t. s ' प्रलोभनास्पदं. **-er,** *s.* प्र-वि-लोभकः मोहकः. **-ing,** *s.* आकर्षिन्, वि-,मोहिन्, प्रलोभिन्.

Ten, *a.* दशन्; ' in t. ways ' दशधा; ' t. times ' दशकृत्वः. **-th,** *a.* दशम (मी *f.*).

Tenable, *a.* रक्षणीय, प्रतिपादनीय.

Tenacious, *a.* ग्राहिन्, संलग्नशील. **2** धारणावत्; *See* **Retentive. 3** साग्रह, प्रतिनिविष्ट, आग्रहिन्; दृढसंकल्प, स्वमताग्रहिन्; *See* **Obstinate. 4** श्यान, सांद्र, चिक्कण. **-ness,-Tenacity,** *s.* ग्राहकत्वं, धारणाशक्ति *f.* **2** ग्राहः, (एको ग्राहस्तु मीनानां), आ-,ग्रहः, अभिनिवेशः, दृढता, श्यानता.

Tenant, *s.* भूम्यधिवासिन् *m.*; (in general) गृहनिवासिन्. **-*v. t.*** परभूमिं अधिवस् 1 P or अधि-ष्ठा 1 P.

Tend, *v. i.* प्रवणी-भू 1 P, प्रवृत् 1 A, प्रवह् 1 P, उद्दिश् 6 P, अभिसं-धा 3 U; oft. by आलु, शील in comp.; ' t. ing to fall ' पतयालु, पतनशील, पिपतिषु; ' t. ing to the same object ' तदुद्दिष्ट; ' t.s to the centre ' केंद्राभिमुखीभवति. **2** (to) आवह् 1 P; क्लृप् 1 A, संपद् 4 A (with dat.), (निष्फलमायमपि प्रभुप्रयोजनं न मे धृतिमावहति Rat. 1); कल्पते रक्षणाय &c.; oft. by dat. with or without कृ; *See* **Lead.** **-*v. t.*** चर् c., पा c. (पालयति), रक्ष् 1 P (of cattle only). **-ency,** *s.* प्रवृत्ति *f.*, प्रवणता, प्रावण्यं, स्वभावः, शीलता-आलुता in comp.

Tender, *a.* सुकुमार, कोमल, मृदु, पेलव; *See* **Delicate, Soft. 2** सुलभवेदन-दुःख, दुःसह, मृदु. **3** बाल, कौमार (री *f.*). **4** सदय, करुणार्द्र, करुण, स्निग्ध, दयालु, ' t.-

hearted करुणात्मक, कोमल-मृदु-चित्त, क्लिन्नहृदय, दयार्द्रचित्त -*v. t.* उपानी 1 P, उपहृ 1 P. 2 उपक्षिप् 6 P, उपन्यस् 4 U. -*s.* उपन्यासः, प्रस्तावः. **-ly**, *adv.* सकरुणं, सदयं, सानुकंपं, सादरं, करुणार्द्रदृष्ट्या. **-ness**, मार्दवं, कोमलता, स्निग्धता, कारुण्यं, दयालुता, वात्सल्यं, &c.

Tendon, *s.* शि(सि)रा; स्नायु *f.*, स्नसा. **-Tendinous**, *a.* शिराल; स्नायुमय (यी *f.*)

Tendril, *s.* तंतुः; (of creepers) प्रतानं, किसलयः-यं; *See* **Shoot.**

Tenement, *s.* भवनं, आयतनं; 'earthly t.' देहः. 2 स्थावरं.

Tenet, *s.* मतं, अभिप्रायः.

Tenour, *s.* भावः, भावार्थः, अभिप्रायः, तात्पर्यं. 2 क्रमः, अन्वयः.

Tense, *s.* कालः. -*a.* आतत. **-ion**, *s.* आततिः *f.*

Tent, *s.* वस्त्र-पट-वेश्मन् *n.*, दूष्यं-ष्यं, पटमंडपः-गृहं; 'royal t.' उपकार्या, उपकारिका; 'pitch a t.' दूष्यं रच् 10 or उप-क्लृप् c.

Tentative, *a.* परीक्षार्थं कृत, तत्कालोपयुक्त.

Tenuous, *a. See* **Thin. -Tenuity**, *s. See* **Thinness.**

Tepid, *a.* कोष्ण, कवोष्ण, ईषदुष्ण, मंदोष्ण.

Tercentenary, *a.* त्रिशतवर्षावर्तिन् -*s.* त्रिशतसांवत्सरिको विधिः.

Tergiversation, *s.* वाक्छलं, अपलापः; *See* **Prevarication.**

Term, *s.* पर्यंतः, अंतः. 2 मर्यादा, अवधिः, सीमा; 'the utmost t.' परमावधिः; 't. of life' आयुर्मर्यादा, आयुःसीमा; 'the t. of life is small' स्वल्पं आयुः. 3 कार्यनिर्वाहसमयः-कालः. 4 पदं, शब्दः, संज्ञा. 5 व्यवहारः, वृत्ति *f.*, भावः; 'on friendly t.s' मित्रभावेन, सद्भावेन, प्रीत्या, सुखेन; 'ill t.s' अप्रीति *f.*, विरोधः, असंतोषः. 6 (Math.) पदं. 7 अवयवः (of a syllogism). 8 (T.s) समयः, संकेतः, संविद् *f.*, प्रतिज्ञा. -*v. t.* आ-ख्या 2 P, अभि-धा 3 U. आह्वे 1 P; *See* **Call, Name. -less**, *a.* निरवधि, अनंत. **-inable**, *a.* अंत्य, सीमा in comp. **-inal**, *a.* अंत्य, अंतिम. **-inus**, *s.* अंतः, सीमन् *f.* **-Terminate**, *v. t.* अव-सो 4 P, समाप् c. -*v. i.* समाप् pass. **-ion**, *s.* अंतः, अवसानं, परिणामः, निष्ठा, समाप्ति *f.*, निवृत्ति *f.* 2 अत्ययः.

Termagant, *s.* अतिकलहप्रिया, कर्कशा, चंडी; *See* **Shrew, Scold.**

Terminology, *s.* परिभाषा.

Terpsichorean, *a.* नृत्यसंबंधिन्.

Terrace, *s.* अलिंदः,-भूमि *f.*, प्रघा(घ)णः. 2 **Roof**, q. v. 3 वितर्दि *f.*, वेदिका.

Terraqueous, *a.* जलस्थलात्मक.

Terrene, Terrestrial, *a.* पार्थिव (वी *f.*), भौमिक (की *f.*), भौम (मी *f.*), भू in comp. 2 लौकिक, ऐहिक: (की *f.*); *See* **Worldly.** 3 भूचर, स्थलज, भूलोकस्थ; 't. globe' भूगोलः.

Territory, *s.* प्र-,देशः, राष्ट्रं, राज्यं, भूमि *f.* **-ial**, *a.* राष्ट्रीय; by (*s.*) in comp.

Terror, *s.* सं-,त्रासः, भयं, साध्वसं, शंका. 2 भयहेतुः-स्थानं, शंकास्थानं; 'a t. to the wicked' शठानां व्यथयिता (Mr. 9). **-Terrible,-Terrific**, *a.* घोर, दारुण, भीषण, भीम, उग्र, कराल, विकट. **-Terribly**, *adv.* दारुणं, बलवत्, घोरं, उग्रं. **-Terrify**, *v. t.* सं-,त्रस् c., भी c., *See* **Fright, -ful,** &c.

Terse, *a.* लाघवान्वित, संक्षिप्त, लघुपद. **-ness**, *s.* लाघवं, संक्षेपः.

Tertian, *s.* तृतीयकः-ज्वरः, द्वैहिकाविषमः (t. ague).

Tertiary, *a.* तृतीयक, तृतीयिन.

Test, *v. t.* परीक्ष् 1 A, (मायां मयोद्भाव्य परीक्षितोऽसि R. II. 62), विमृश् 6 P, (शास्त्रे प्रयोगे च मां विमृशतु M. 1). -*s.* परीक्षा, विमर्शः, प्रतीति *f.* 2 प्रमाणं; (something whereby to t.) निकषः, निकषग्रावन् *m.*; 'this should be put to t.' एतत्प्रतीतिकल्पाद्या; *See* **Touch.**

Testaceous, *a.* कंबुविशिष्ट, शंखवासिन्.

Testament, *s.* मृत्युलेखः-पत्रं, इच्छापत्रं. 2 संहिता. **-ary**, *a.* मृत्युपत्रदत्त.

Testator, *s.* मृत्युलेखकर्तृ *m.*

Testicles, *s.* अंडः,-कोषः-शः, मुष्कः, वृषणः फलं (in dual).

Testify, *v. t.* साक्ष्यं दा 3 U, प्रमाणयति (D.), प्रमाणीकृ 8 U. 2 प्रकाश् c., विद् 5 U, व्यंज् 7 P or c., प्रकटीकृ; आविष्कृ, (by words) ब्रू 2 U, वच् 2 P &c

Testimony, *s.* साक्ष्यं, प्रमाणं, प्रामाण्यं **-Testimonial**, *s.* प्रमाणपत्रं-लेखः.

Testy, *a. See* **Fretful.**

Tetanus, *s.* धनुर्वातः.

Tete-a-tete, *s.* रहः-संलापः-प्रत्यासत्ति *f.*

Tether, *s.* बंधनरज्जु *f.*-सूत्रं. -*v. t.* (रज्ज्वा) बंध् 9 P.

Tetrad, *s.* चतुष्टयं, चतुष्कं.

Tetragon, *s.* चतुर्भुजः, चतुरस्रं. **-al**, *a.* चतुरस्र, चतुष्कोण.

Text, *s.* मूलं, मूलपंक्ति *f.*, मूलग्रंथः. 2 उक्ति *f.*, सूत्रं, वचनं, वाक्यं **-ual**, *a.* मौलिक (की *f.*), मौल (ली *f.*).

Textile, *a.* तांतव (वी *f.*), तंतुनिर्मित

Texture, *s.* विन्यासः, वि-,रचना-नं, व्यूति *f.*, वापः-यः. 2 तंतु-सूत्र-गुणः. 3 तांतवं.

Tew *v. t. See* **Ply.**

Than, *conj.* Ex. by abl. of word following it; मतिरेव बलाद्गरीयसी &c.; with

' better ' ex. by न च, न तु, न पुनः; *See* **Prefer, Better;** oft. ex. by अपेक्ष्य (with acc.), अपेक्षया in comp.

Thank, *v. t.* उपकृत-अनुगृहीत-*a.* अस्मि इति वद् 1 P, ('Say,' q. v.); कृतज्ञतां दृश् c. or आविष्कृ 8 U कृतोपकारं स्तु 2 U or प्रशंस् 1 P; ' t-ed his deliverer' भवतानुगृहीतः-उपकृतः-अस्मि इति रक्षितारमुवाद; '(I) t. you ', ' thanks ' अनुगृहीतोस्मि, महानयं प्रसादः. ' t. God ' दिष्ट्या. **-***s.* (Thanks) कृतज्ञतादर्शनं-प्रकाशनं, उपकारस्तुति *f.*, धन्यवादः; better ex. by (*v.*); 'accept my t. s' by (*v.*). **-ful,** *a.* कृतज्ञ, कृतवेदिन्, उपकारज्ञ, कृतज्ञतादर्शिन्. **-fully,** *adv.* कृतज्ञतापूर्वं, कृतज्ञतया. **-less,** *a.* अकृतज्ञ, कृतघ्न. **-Thanksgiving,** *s. See* (*s.*).

That, *a.* तद् (सः-सा-तत्). 2 यत् ((यः-या-यत्), oft. by comp.; 'he t. has strength' सबल, बलिन् &c. -*conj.* इति (after assertions) यथा, यत् (at beginning) with or without इति; sometimes not ex. 2 (Purpose) इति with pot, mood or अर्थ-र्थे in comp.; ' Oh t. ' *See* **Would.**

Thatch, *s.* छदिस् *f.*, पटलं, तृणपटलं-छदिः. -*v. t.* तृणादिना आ-,छद् 10. -*er*, *s.* तृणपटलकारः.

Thaw, *v. i.* द्रु 1 P, वि-ली 4 A. -*v. t.* द्रु c., द्रवीकृ, वि-ली c.; *See* **Melt.** -*s.* हिम or तुषार-स्रुति *f.* or स्रावः.

The, (Article) Ex. by तत् (सः-सा-तत्) or अदस् (असौ-अदः); gen. not ex. 2 (With comp. adj.) by यथा यथा-तथा तथा; यथा यथा यौवनमतिचक्राम तथा तथा अनपत्यताजन्मा अवर्धतास्य संतापः (Ka. 59), ' t. older he grew, t. greater his torment ' &c.; ' t. sooner, t. better ' यथा यथा लघु कार्यं संपाद्यते तथा तथा अधिकं श्रेयोभवेत्; ' t. more so ' विशेषतः, विशेषेण.

Theatre, *s.* रंगः,-भूमि *f.*,-शाला, नृत्य-नाट्य-शाला, नाटकगृहं. **-Theatrical,** *a.* नाटक, नाट्य in comp.; ' t. performance ' नाटकप्रयोगः.

Theft, *s. See* under **Thieve.**

Theism, *s.* ईश्वरवादः, आस्तिक्यवादः, आस्तिक्यं. **-Theist,** *s.* ईश्वरवादिन् *m.*, आस्तिकः.

Theme, *s.* विषयः, प्रकरणं, वस्तु *n.*, प्रबंधः.

Then, *adv.* तदा, तदानीं, तस्मिन्काले. 2 ततः, अनंतरं, अथ. 3 तर्हि; तत्; ' now and t. ' कदापि, कदाचित्; ' so t. ' एवं, तर्हि; 'what t.' ततः किं. **-Thence,** *adv.* ततः, तस्मात्, तस्मात् स्थानात्; ' t.-forth ', ' t.-forward ' ततः प्रभृति-आरभ्य, तदाप्रभृति.

Theocracy, *s.* ईश्वरप्रभुत्वं, ईश्वरकर्तृकत्वं.

Theogony, *s.* देवोत्पत्ति *f.*-वंशः.

Theology, *s.* ईश्वर-ब्रह्म-ज्ञानं, परमार्थविद्या, अध्यात्म-ज्ञानं-विद्या. **-ian,** *s.* परमार्थविद् *m.*, ईश्वरज्ञानविशारदः, ब्रह्म-विद्-ज्ञानिन्, वेदांती, अध्यात्मवादी. **-ical,** *a.* ex. by (*s.*) in comp., आध्यात्मिक-पारमार्थिक- (की *f.*).

Theorem, *s.* प्रमेयोपपाद्यं.

Theory, *s.* मतं, सिद्धांतः; वादः; ' t. of evolution ' परिणामवादः; नास्तिकमतं &c. 2 कल्पना, तर्कः, मनःसृष्टि *f.* 3 आगमः, शास्त्रं, उपपत्ति *f.* (as opp. to ' practice ' प्रयोगः), द्वावेवाप्यागमिनौ प्रयोगनिपुणौ च (M. 3) ' well-versed in t. and practice'; oft. मंत्रतंत्रं 't. and practice.' **-Theoretical,** *a.* व्यवहारायोग्य, काल्पनिक-अव्यावहारिक- (की *f.*). **-ally,** *adv.* कल्पनापूर्वं. **-Theorize,** *v. t.* मतं उपक्लृप् c.

Theosophy, *s.* ईश्वरवादः-ज्ञानं. **-ist,** *s.* अध्यात्मविद्.

Therapeutic, *a.* शांतिकर (री *f.*), रोगघ्न (घ्नी *f.*); ' t. s' भेषजशास्त्रं.

There, *adv.* तत्र, तस्मिन्स्थाने, तत्स्थले. 2 (Expletive) by अस्ति. -*interj.* पश्य, पश्य; ' here and t. ' इतस्ततः; 't.-about' (t. s) तत्रैव कुत्रापि; तत्स्थानसमीपे; (with number) उप-आसन्न in comp.; *See* **Nearly, About;** ' 20 or t.-abouts ' उप-आसन्न-विंशाः (नराः) &c., 't.-after' ततः, तदनु, ततः परं, तदनंतरं; ' t.-at ' तेन, तत्र; तदुपरि; ततः; 't.-by ' तेन; तेनोपायेन, तद्द्वारेण; ' t.-fore ' अतः, तस्मात्, तस्मात् कारणात्-हेतोः, ततः; तत्, इति हेतोः, अनेन कारणेन-हेतुना; ' t.-in ' तस्मिन्विषये; ' t.-of ' तत्रत्य, ततस्त्य, तत्रस्थ (*a.*); तस्य, अस्य, तदीय; ' t.-upon ' ततः, &c.

Thermal, *a.* उष्णतासंबंधिन्.

Thermometer, *s.* उष्णमापनयंत्रं.

Thesis, *s.* प्रतिज्ञा, पूर्वपक्षः. 2 प्रबंधः.

Thews, *s. See* **Muscle,** (1). 2 शरीरबलं

Thick, *a.* घन, निबिड, अविरल, सांद्र, गाढ; नीरंध्र, स्त्यान. 2 स्थूल, महत्, विपुल; *See* **Large.** 3 मंद, जड, स्थूल; *See* **Dull;** ' t.-headed ' मंदधी; ' t.-skinned ' कठिन, सहिष्णु; मंद, स्थूल. 4 पंकिल, कलुषित, आविल. 5 (Of a solid body) घन. -*s.* तुमुलं, शिरस् *n.*, मूर्धन् *m.*, संकुलं; ' in the t. of the fight ' रणशिरसि, रणसंमर्दे-मूर्ध्नि. -*adv.* अविरतं, निरंतरं, अविरलं, निबिडं, by (*a.*) in comp.; ' t. sown ' घनोप्त, सांद्राच्छादित &c; ' t.-set ' घ-, संहत, उपचित.

-en, *v. t.* घनीकृ 8 U, निबिडीकृ &c. **-v.** *i.* घनीभू 1 P, निबिडीभू; 'the horizon t. -ed' दिङ्मंडलं (अभ्रपटलैः) घनीकृतं, अभ्रपटलाकीर्णं. **-et,** *s.* गहनं, गुल्मः-ल्मं, निबिडारण्यं, वृक्ष-तरु-गहनं. **-ly,** *adv.* निरंतरं, अविरलं, निबिडं, गाढं. **-ness,** *s.* घनता, सांद्रता, संहति *f.*, &c. 2 वेधः, घनता, पिंडत्वं. 3 (Of voice) स्वरभंगः.

Thieve, *v. t.* चुर् 10, मुष् 9 P, स्तेन् 10. **-ish,** *a.* अपहरण or चौर्य-शील or वृत्ति. चौर्यासक्त. **-ishness,** *s.* चौर्यासक्ति *f.* **-Thief,** *s.* स्तेनः, चोरः, चौरः, तस्करः, दस्युः, मोषकः, कुंभीलकः, पा(प)टच्चरः, प्रतिरोधिः, परास्कंदिः, मलिम्लुचः, ऐकागारिकः. **-Theft,** *s.* स्तेयं, मोषः, चौर्यं, चो(चौ)रिका, स्तैन्यं.

Thigh, *s.* ऊरुः (*m.*), सक्थि *n.*; 'having beautiful t. s' वामोरुः-रू.

Thimble, *s.* अंगुलित्राणं, अंगुलिमुखत्रं.

Thin, *a.* प्र-,तनु, सूक्ष्म, विरल, अस्थूल, श्लक्ष्ण. 2 कृश, क्षीण, शांत; 'grown t.' तन्वंग-कर्शितांग-(गी *f.*); 'having a t. waist' तनुमध्यम, क्षीणमध्यम; *See* **Slender.** **-v.** *t.* विरलयति (D.), ऊनी-विरली-कृ 8 U, संख्यां अप-चि 5 U or क्षि 5 P or c. 2 तनूकृ, तक्ष् 1, 5 P, उल्लिख् 6 P. **-ly,** *adv.* विरलं, असंहतं. **-ness,** *s.* तनुता, सूक्ष्मता, वैरल्यं, कार्श्यं; क्षीणता.

Thing, *s.* वस्तु *n.*, द्रव्यं, पदार्थः, अर्थः. 2 विषयः, अर्थः.

Think, *v.* चिंत् 10, ध्यै 1 P, विमृश् 6 P, आ-पर्या-लोच् 10, वि-,तर्क् 10, वि-चर् c., मनसा क्लृप् c., सं-,भू c. 2 मन् 4 A, गण् 10; *See* **Consider;** 't. much of' बहु मन्; 'I t. so' इति मे मतिः; 'dose not t. of going to his capital' नगरगमनाय मतिं S. 2); 't. of' स्मृ 1 P, मनसि कृ 'I never thought of winter' हेमंतः समुपस्थास्यति इति चिंता नैव मनसि कृता, इति नवालोचितं. **-er,** *s.* सूरिः, मुनिः; (lit.) चिंतकः; *See* **Philosopher.** **-Thought,** *s.* (act) चिंता, ध्यानं; आलोचनं; (result also) विचारः, विमर्शः, विचारण-णा, भावना, मनोव्यापारः, चित्तचेष्टा. 2 मतं, अभिप्रायः, मनोरथः. 3 मति *f.*, बुद्धि *f.*, कल्पना, विचारः, संकल्पः, मनोगतं, चित्तं, मनस् *n.*, तर्कः, चित्त-मनो-वृत्ति *f.*, भावना; 'one's inmost t. s' अंतर्गतं मनः; 'evil t.' कुमतिः; 'benevolent t.' परहितबुद्धिः; 'swift as t.' मनोजव; 'beyond t.' अचिंत्य; 'in t., word or (actual) deed' मनोवाक्कायकर्मभिः. **-ful,** *a.* चिंताशील, विचार-विवेक-शील, विमृश्य-समीक्ष्य-कारिन्, असाहसिक (की *f.*), सावधान, अप्रमत्त. 2 चिंता-कुल-पर-निमग्न, ध्यानपर. **-fully,** *adv.* विचिंत्य, विमृश्य, विचार्य, समीक्ष्य, सविवेकं, पर्यालोच्य. **-fulness,** *s.* सविचारता, विवेकिता, समीक्ष्यकारिता. **-less,** *a.* प्रमत्त, अनवहित, असावधान; *See* **Negligent.** 2 निश्चिंत, वीतचिंत. 3 असमीक्ष्य-अविमृश्य-कारिन्, क्षिप्रकारिन्, विवेक-विचार-हीन, सरभस, मूढ. **-lessly,** *adv.* मोहात्, रभसा, अविमृश्य, अविवेकेन, अविचारेण. **-lessness,** *s.* अविवेकः, अविचारः, रभसः, मोहः.

Thirst, *v. t.* तृष् 4 P, (fig. also); पा desid. (पिपासति), उदन्यति (D.). **-s.** तृष्णा, (fig. also); द्रव्यतृष्णा, जीविततृष्णा &c.; पिपासा, तृषा, तृष् *f.*, उदन्या, पानेच्छा. **-y,** *a.* तृषित, पिपासित, तृषार्त-आकुल-आतुर, सतृष्ण, पिपासु, उदकार्थिन् तृष्णाविष्ट-आक्रांत.

Thirteen, *a.* त्रयोदशन्. **-th** *a.* त्रयोदश (शी *f.*).

Thirty, *a.* त्रिंशत् *f.* **-ieth,** *a.* त्रिंश (शी *f.*), त्रिंशत्तम (मी *f.*).

This, *pron. a.* एतद् (एषः-एषा-एतत्), इदं (अयं-इयं-इदं); 't. way', 't. way' इतः इतः.

Thistle, *s.* गोक्षुरः-रकः, गोकंटकः, वनशृंगाटः, स्वादुकंटकः; पलंकषा, इक्षुगंधा, श्वदंष्ट्रा, (plant).

Thither, *adv.* तत्र. **-ward,** *adv.* तं देशं प्रति.

Thong, *s.* वरत्रा, न(व)ध्री, चर्मरज्जु *f.*

Thorax, *s.* उरः-वक्षः *n.*,-स्थलं.

Thorn, *s.* कंटकः-कं, शल्यं; शिताग्रः, तरु-द्रुम-नखः; (fig.) कंटकः, शल्यं; 'he is a t. in your side' अंतःप्रत्युप्तं शल्यं-कंटकं-इव स त्वां पीडयति; 'there is no rose without a t.' सुखं नाम दुःखमिश्रितमस्त्येव, दुःखासंभिन्नं सुखं नैव प्राप्यते. 2 कंटलकता-वृक्षः; 't.-apple' धत्तूरः, धुस्तूरः, उन्मत्तः, कितवः, धूर्तः, कनकाह्वयः, मातुलः, मदनः; (fruit) मातुलपुत्रकः. **-less,** *a.* निष्कंटक. **-y,** *a.* कंटकावृत, कंटकाकीर्ण, कंटकित, सकंटक.

Thorough, *a.* संपूर्ण, सम्यञ्च्, साद्यंत, पर्याप्त; *See* **Complete;** 't.-bred' अभिजात, अतिकुलीन; (horse) आजानेयः, कुलीनः; 't.-fare' राजमार्गः, घंटापथः, संसरणं; सर्वसामान्यपथः, सर्वगम्यमार्गः. **-ly,** *adv.* सम्यक्, संपूर्णं, साद्यंतं; by पार in comp.; 'who has t. learnt the lores' विद्यानां पारदृश्वनः (R. I. 23); 't. mastered all lores' ततार सर्वा विद्याः (R. III. 30). **-ness,** *s.* पूर्णता, परिपूर्ति *f.*, निःशेषता.

Thou, *pron.* त्वं; 'to t. and thee' त्वंकृ 8 U; 'do not t. your elders' गुरुषु त्वंकारं न प्रयोजयेत्. **-Thine,** *a.* त्वदीय, तावक (की *f.*), तावकीन, त्वत्क, भवदीय, त्वत् in comp.

Though, *adv.* अपि, यद्यपि; ' as t. ' इव.

Thousand, *a., s.* सहस्रं, दशशतं; ' t.s of times ' सहस्रशः-वारं; ' in a t. ways or parts ' सहस्रधा; ' ten t. ' अयुतं; ' hundred t. लक्षं; ' by t. s. ' सहस्रशः. **-th,** *a.* सहस्रतम (-मी *f.*).

Thrall, *s.* दासः. **-dom,** *s.* दास्यं, दासवृत्ति *f.*, दासत्वं; *See* **Slave,-ery.** 2 वशता, पारतंत्र्यं, अधीनता.

Thrash, *v. t.* परुषं-बलवत्-तड् 10 or प्र-हृ 1 P. 2 निस्तुषीकृ 8 U, पू 9 U; *See* **Thresh.**

Thread, *s.* सूत्रं, तंतुः, (fig. also), (आशातंतुः), गुणः,तंत्रं; 't. of a story' कथाप्रबंधः-अनुबंधः-संदर्भः-अन्वयः,अनु-,संधानं,प्रबंधार्थः; ' t.-bare ' सूत्रदरिद्र; अयं पटः सूत्रदरिद्रतां गतः (Mr. 2), सूत्रशेष; जर्जर. **-***v. t.* सूत्र् 10; गु(गुं)फ् 6 P, ग्रंथ् 9 P; ' t. one's way ' मंदं मंदं प्रसृ 1 P. **-y,** *a.* सूत्र-तंतु-मय (यी *f.*).

Threat, *s.* तर्जनं, तर्जितं, भर्त्सनं, अपकारगिर् *f.* **-en,** *v. t.* सं-,तर्ज् 1 P, 10 A, निर्-, भर्त्स् 10 A, भी c. **-***v. i.* प्रत्या-सद् 1 P, लग्न-*a.* संपद् 4 A, उपस्था 1 P; ' war t. s ' प्रत्यासीदति रणप्रसंगः; *See* **Impend. -ening,** *a.* भर्त्सनकृत; अनिष्टावेदिन्; प्रत्यासन्नभय, विभीषक. **-eningly,** *adv.* तर्जयत्-*a*.

Three *a.* त्रि (तिसृ *f.*); ' aggregate of t. त्रयं, त्रितयं, त्रिकं, त्रयी; 't. months' त्रिमासं, मासत्रयं; ' two or t. ' द्वित्र, त्रिचतुर, &c.; ' t.-cornered ' त्रिकोण; ' t.-eyed ' त्रिलोचनः, त्रिनयनः; &c.; ' t.-fold ' त्रिगुण; ' t.-fourths ' त्रिपादः, पादत्रयं; ' 2 and t.-fourths ' पादोनत्रयं. **-Third,** *a.* तृतीय. **-***s.* तृतीयभागः-अंशः. **-ly,** *adv.* तृतीयस्थाने. **-Thrice,** *adv.* त्रिः, त्रिवारं.

Thresh, *v. t.* मृद् 9 P, परि-,पू 9 U, निस्तुषीकृ 8 U, कंड् 10. 2 तड् 10, प्र-हृ 1 P. **-ed,** *a.* निस्तुषित, निस्तुष, पूत, बहुलीकृत. **-ing,** *s.* पावनं, बहुलीकरणं, कंडनं, निस्तुषीकरणं; ' t. floor ' खलधान्यं; ' t. instrument ' मुसलः-लं, अयोग्रं, कंडनी.

Threshold, *s.* देहली, द्वारपिंडी, गृहावग्रहणी; (fig.) प्रारंभः.

Thrift, *s.* मितव्ययः-व्ययिता. 2 सं-वि-वृद्धि *f.* **-y,** *a.* मितव्ययिन्, अल्पव्यय; *See* **Frugal.**

Thrill, *s.* प्र-,कंपः, स्फुरणं, हर्षः; (of joy, horror, &c.) रोमांचः, पुलकः; उद्धर्षः; ' t. of joy ' हर्षरोमांचः, पुलकोद्गमः, रोमहर्षः, ' a t. came over her body ' तस्या गात्रं रोमांचितं-पुलकितं-कंटकितं-बभूव; 'with a t. of horror ' सास्त्रसरोमांचितगात्रः. **-***v.* स्फुर् 6 P, हृष् 4 P, प्र-,कंप् 1 A: gen. ex. by पुलकित, रोमांचित, कंटकित, (*a.*); ' he t.-ed with joy ' आनंदपुलकिततनुर्बभूव. **-ing,** *a.* लो(रो)महर्षण (णी *f.*), पुलकित, रोमांचित, &c.

Thrive, *v. i.* प्र-,वृध् 1 A, प्र-उप-चि pass., संऋध् 4, 5 P, उन्नतिं-उत्कर्षं-प्राप् 5 P: *See* **Prosper, Flourish. -ing,** *a.* वर्धिष्णु, प्र-उप-चीयमान, समृद्ध.

Throat, *s.* कंठः, गलः, कृकः, निगरणः; 'relating to t. ' कंठ्य; ' up to the t. ' आकंठं, आकंठात्.

Throb, *v. i.* प्र-,स्पंद् 1 A, स्फुर् 6 P, वेप् 1A, कंप् 1 A. **-bing,** *s.* स्पंदः, स्पंदनं; स्फुरणं, स्फुरितं, कंपः.

Throe, *s.* यातना, वेदना, व्यथा; (of delivery) प्रसववेदना, प्रसवकालव्यथा.

Throne, *s.* सिंहासनं, नृपासनं, &c.; भद्रासनं; ' ascended the ancestral t. ' भेजे पैतृकमासनं (R. xvii. 28); ' getting the t. ' राजपदावाप्ति *f.*; ' having lost his t. ' छत्रभ्रष्टः. **-***v. t.* अभिषिच् 6 P, राज्ये अभिषिच्, सिंहासनं आरुह् c.; ' t. ed king ' अभिषिक्तो राजा.

Throng, *s.* जनसंमर्दः-संकुलं, लोकनिवहः. **-***v. t.* आ-समा-कॄ 6 P, संबाध् 1 A. **-***v. i.* जनाकीर्ण-जनसंबाध-*a.* भू; *See* **Crowd. -ed,** *a.* आ-समा-कीर्ण, जनसंकुल-संबाधित.

Throttle, *v. t.* गलं निष्पीड् 10, गलनिष्पीडनेन व्या-पद् c., गलहस्तयति (D.).

Through, *prep.* Ex by instr. or abl. 2 मध्येन, अंतरेण; ' t. the branches ' विटपांतरेण. 3 पारं, तीरांतरं यावत्. 4 मुखेन; द्वारेण, द्वारा, in comp.; सखीमुखेनोचे ' spoke t. her friend '. **-***adv.* समग्रं, साद्यंतं, शेषं यावत्, आसमाप्तेः; oft. by पारं गम् or दृश् 1 P; ' he has learnt the Vedas t. ' श्रुतिपारं गतः, श्रुतिपारदृश्वा, ' to get t. ' तारयति-पारयति (D.), समाप् c. **-Throughout,** *prep.* Ex. by सर्व, समस्त; *See* **All;** आ or यावत् in comp.; ' t. one's life ' यावज्जीवं-वेन, आजीवितांतात् ' t. the town ' अखिले नगरे, नगरे सर्वत्र. **-***adv* सर्वत्र, अशेषतः; सर्वत्र वैतालीयं छंदः ' the metre is Vaitālī'ya t. '

Throw, *v. t.* प्र-,क्षिप् 6 P, प्र-,अस् 4 P, पत् c., प्र-,मुच् 6 P, विसृज् 6 P, ईर् c., प्रेर् c., (with loc. of place); ' t. a glance ' दृष्टिं-चक्षुः-क्षिप् or दा 3 U or पत् c.; ' t. into disorder ' पिंजली-आकुली-कृ 8 U, व्यूह भंज् 7 P; ' t. dice ' अक्षान् आवप् 1 P or पत् c. **-about,** उत्-वि क्षिप्, इतस्ततः चल् c.; बाहूत्क्षेपं ' t. ing about the arms. ' **-away,** निः-वि-क्षिप्, अपास्,

अप-हा 3 P, अपव्यध् 4 P, त्यज् 1 P; (time) क्षिप्, हृ 1 P, यां c. (यापयति). 2 निरस्, प्रत्याख्या 2 P: *See* **Reject**; 'it was t.-ing words away' निरर्थकं-मोघं-एव तत् भाषणं, वागायासमात्रकं भाषणं; 'kindness was not thrown away upon him' सोनुग्रहं कृतज्ञतयास्मरत्; 'to be thrown away upon' विफलीभू 1 P, विफलतां गम् 1 P, लयं-क्षयं-नाशं-गम्-या &c.; गता नाशं तारा उपकृतमसाधाविव जने (Mr. 5); असत्पुरुषसेवेव दृष्टिर्विफलतां गता (Mr. 1). **-down,** पत् c., अधः क्षिप् or पत्; प्र-भ्रंश् c., प्र-च्यु c. **-off** निः-प्र-क्षिप्, अव-निर्-धू 5, 9 U, निराकृ, अपव्यध्, अप-सृ c.: 't. one off his guard' असावधान-*a.* कृ; 't. off the veil or mask' स्वरूपं प्रकटीकृ or वि-वृ 5 U or प्रकाश् c. **-out, Reject,** q. v. **2** निः-,सृ c., अपास्. **3** (Hints) सूच् 10, उप-क्षिप्, उपन्यस्, व्यंज् c. **-up,** उदस्, उत्क्षिप् &c.; (from the stomach) उद्वम् 1 P, उद्-गृ 6 P; 'I have thrown a wall around' उपक्षिप्तो मया भित्तिबंधः (M. 5). **-***s.* प्र-,क्षेपः-पणं, प्रासनं, प्रेरणं; &c. **-er,** *s.* क्षेप्तृ *m.*, प्रासकः.

Thrum, *s.* दशाः-वस्तयः (pl.).

Thrush, *s.* सारिका, शरारि *f.*

Thrust, *v. t.* अपव्यध् 4 P, प्र-सृ c., प्र-क्षिप् 6 P; 't. away', 't. out' निरस् 4 U, निः-सृ c., बहिष्कृ 8 U; (the hand &c.) प्र-सृ c.; 't. into' प्र-नि-विश् c.: 't. on' प्रणुद् c., c. प्रचल् c. **-***s.* आघातः, प्रहारः ताडनं; (with fist) मुष्टिप्रहारः-आघातः.

Thumb, *s.* अंगुष्ठः; 'under one's t.' आयत्त, वश्य. **-***v. t.* अंगुष्ठेन परामृश् 6 P or स्पृश् 6 P or अंक् 10.

Thump, *v. t.* आहन् 2 U, तड् 10, प्र-हृ 1 P. **-***s.* आ-अभि-घातः, प्रहारः.

Thunder, *s.* मेघगर्जनं, घनध्वनिः, जीमूतस्तनितं, मेघगर्जितं; and sim. comp.; वि-, स्फूर्जथुः- थूः, स्फूर्जितं, स्तनितं, रसितं;गर्जितं, गर्जनं-ना; 't.bolt' वज्रः-ज्रं, कुलिशं, भिदुरं, पविः, अशनि *m f.*, शतकोटिः, स्वरुः, शंबः, ह्रादिनी, दंभोलिः; 't. clap' वज्रनिर्घोषः-निर्घातस्वनः-निष्पेषः; *See* (*s.*): 't.-storm' अशनिवर्षः-पातः; 't.-struck' अशनिताडित,वज्राहत,*See* **Astounded.** **-***v.* गर्ज् 1 P, स्तन् 1 P, वि-स्फुर्ज् 1 P; 'shouldst t. reproof' यत्त्वं (साक्षेपमिव) नदसि सिंहनादैः (Mr. 5). **-er,** *s.* वज्रिन् *m.*, कुलिशभृत्, वज्रपाणिः.

Thursday, *s.* गुरुवासरः.

Thus, *adv.* एवं, इत्थं, इति, अनेन प्रकारेण, अनया रीत्या.

Thwack, *See* **Smack.**

Thwart, *v. t.* खंड् 10, वि-प्रति-हन् 2 P, मोघीकृ 8 U.नि-प्रति-वि-रुध्7 U:प्रतिकूलयति-प्रतीपयति (D.); क ईप्सितार्थस्थिरनिश्चयं मनः प्रतीपयेत् (K. v. 5); *See* **Frustrate, Baffle.**

Tiara, *s.* मुकुटं, किरीटः, मौलिः.

Tick, *s.* यूका. **2 Credit,** q. v.

Ticket, निर्देशनी, अभिज्ञानपत्रं.

Tickle, *v.* कुतकुतयति (D.), कंडूयति (D.); (fig.) **Please, Gratify,** q. v. **-er,** *s.* कंडूयनकः.

Tide, *s.* वेला (of the sea). **2** स्रोतस् *n.*, ओघः, वेगः, रयः; *See* **Stream.** **-***v. i.* (over) तॄ 1 P, सं-उत्-°.

Tidy, *a.* **Neat,** q. v.

Tidings, *s.* वार्ता, प्रवृत्ति *f.*; *See* **News.**

